Digitized by Madhuban Trust, Delhi

॥ओ३म्॥

श्रौतपदार्थ-निर्वचनम्

नागेश्वर शास्त्री सोमणः

अन्नाद्भवति भूतानि पर्जन्यादन्न संभवः
यज्ञाद्भवति पर्जन्यो यज्ञः कर्म समुद्भवः
(३.१४)



Digitized by Madhuban Trust, Delhi

श्रौतपदार्थ-निर्वचनम्

नागेश्वर शास्त्री सोमणः

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ओ३म्

श्रौतपदार्थ-निर्वचनम्

लेखक-
नागेश्वर शास्त्री सोमणः

प्रकाशक-
रामलाल कपूर ट्रस्ट
रेवली, सोनीपत- ३९ (हरियाणा)
०१३०- ३२९०२७६, २१००२८५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकाशक–
रामलाल कपूर ट्रस्ट
रेवली, सोनीपत– ३९ (हरियाणा)
(०१३०) ३२९०२७६, २१००२८५
web- www.rlktrust.org

प्राप्ति-स्थान–
१. रामलाल कपूर ट्रस्ट एण्ड संस
२५९६, नई सड़क, दिल्ली
२. विजय कुमार गोविन्दराम हासानन्द,
४४०८ नई सड़क दिल्ली– ६
३. सुबोध पाकेट बुक्स, २/३ बी॰
अंसारी रोड, नई दिल्ली– २

द्वितीय वार– ५००
वि॰ सं॰ २०६६ (सन् २००९)

मूल्य– १००.००

मुद्रक–
अजय प्रिंटर्स
दिल्ली

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सादर समर्पण

श्री नारायण दास भाटिया

जन्म : १७ सितम्बर, सन् १९२३ ई० मृत्यु : ११ जून, सन् २००८ ई०

पति की स्मृति में–

शन्नो देवी भाटिया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दानवीर श्री नारायण दास भाटिया

श्रौतपदार्थ-निर्वचनम् के इस संस्करण का प्रकाशन श्री नारायण दास भाटिया की स्मृति को अक्षुण्ण रखने के लिए उनके परिवार के आर्थिक सहयोग से किया जा रहा है। स्वर्गीय श्री नारायणदास भाटिया का जन्म एक उच्च धार्मिक परिवार में **१७ सितम्बर सन् १९२३** में डेरा ईस्माइल खां (जो अब पाकिस्तान में है) में हुआ था तथा स्वर्गवास अपने निवास स्थान ९३ गौल्फ लिंक, नई दिल्ली में **११ जून सन् २००८** में हो गया। ये अपने पीछे भरा-पूरा परिवार छोड़ कर गये हैं। इनके पूर्वजों ने हरिद्वार में धर्मशाला (भाटिया भवन) बनवाई हुई है। दिल्ली में 'जैसाराम हास्पिटल' बनवाया, एक स्कूल 'भाटिया बरादरी' के नाम से खोला। ये सब संस्थायें पारिवारिक व्यवसाय के दशांश दान से बनवायीं एवं चलायीं। भाटिया परिवार बहुत ही धनाढ्य परिवारों में माना जाता रहा है। स्वर्गीय श्री भाटिया जी एक परोपकारी, दानी व्यक्तित्व वाले व्यक्ति थे। वे अन्धविद्यालय (लाल बहादुर शास्त्री मार्ग, दिल्ली) के आजीवन सदस्य थे। इनका लगाव वृद्ध-आश्रम के साथ भी रहा है। समय-समय पर वृद्धों की सहायता करते रहते थे। वास्तव में आपका जीवन तथा परिवार निम्न श्लोक का मूर्त्त रूप है– **सानन्दं सदनं सुताश्च सुधियः कान्ता न दुर्भाषिणी। सन्मित्रं सधनं स्वयोषिति रतिश्चाज्ञापराः सेवकाः। आतिथ्यं शिवपूजनं प्रतिदिनं मृष्टान्नपानं गृहे साधोः सङ्गमुपासते हि सततं धन्यो गृहस्थाश्रमः॥** भाटिया जी छोटी आयु से ही खेलों में बहुत रुचि रखते थे। व्यवसाय तथा खेल साथ-साथ सफलता पूर्वक करते रहे। इतना करते हुये भी बड़े सरल तथा दयालु स्वभाव के थे।

स्वर्गीय भाटिया जी अपने पीछे धर्मपत्नी श्रीमती शन्नो भाटिया के साथ सुपुत्र श्री पवन कुमार तथा तीन सुपुत्रियों श्रीमती अलका भाटिया, मंजु कत्याल तथा पूर्णिमा चावला को छोड़ कर गये। इनके सभी बच्चे पैतृक संस्कार तथा स्वभाव से पूर्ण हैं। सब अपने-अपने परिवारों में धार्मिक संस्थायें चला रहे हैं। प्रभु इन पर अपनी कृपा बनाये रखें।

मन्त्री
रामलाल कपूर ट्रस्ट

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकाशकीयम्

श्रौतपदार्थानां 'कश्चिदपूर्वपरिचयात्मकोऽज्ञातकर्तृकः **श्रौतपदार्थ-निर्वचन**' नामा ग्रन्थो बहुवर्षेभ्यः प्राक् त्रिः प्रचकाशे। तस्य प्रथमं मुद्रणं वाराणस्याः 'क्वींसकालेज' (संस्कृतमहाविद्यालय) नाम्न्याः संस्थातस्तदानीं प्रकाश्यमाणे पण्डितपत्रे ऽनेकैर्ग्रन्थैः सह धाराप्रवाहरूपेण प्रकाशितो बभूव। ततः संकलय्यास्य प्रथमं मुद्रणं कदा केन प्रकाशितमिति नास्माभिर्ज्ञायते (नास्माभिरिदं संस्करणमुपलब्धम्)। द्वितीयं संस्करणं वाराणस्याः 'ई० जे० लाजरस एण्ड कम्पनी' इत्याख्यया संस्थया १९१९ तमे ख्रैस्ताब्दे प्रकाशितमभूत्। इदमपि संस्करणं त्रिंशद्वर्षेभ्य प्रागेव दुर्लभतां गतम्।

अस्य ग्रन्थस्यादावन्ते मुखपृष्ठे च ग्रन्थकर्तुर्नाम नोपलभ्यते। द्वितीयसंस्करणस्य मुखपृष्ठतो ज्ञायते यदस्य प्रथमं संशोधनं श्रीविश्वनाथशास्त्रिणा ऽकारि, द्वितीयसंस्करणस्य संशोधनं श्रीप्रभुदत्तशास्त्रिणा व्यधायि।

'ई० जे० लाजरस एण्ड कम्पनी' संस्थया प्रकाशितं द्वितीयं संस्करणम् अशुद्धिबहुलं वर्तते। बहुत्र पाठभ्रंशोऽपि दृश्यते। अस्माभिः पण्डितपत्रे प्रकाशितेन अस्मत्सकाशे वर्तमानेन मध्ये मध्ये ऽन्ते च खण्डितेन ग्रन्थेन यथाशक्यं सम्मेल्य संस्करणमिदं प्रकाशितम्। चिरन्तनकालादस्वस्थेन मया विशिष्टमत्र किमपि सम्पादनकार्यं नाकारि। यतो ह्ययं ग्रन्थो बहुभ्यो वर्षेभ्यो विदुषां कृते श्रौतपदार्थजिज्ञासूनां च कृते दुर्लभमभूद् अत एतस्य दुर्लभतां परिहारायैव प्रयत्नोऽयं मयाऽकारि।

ग्रन्थकर्त्रा ग्रन्थोऽयं यद्यपि बौधायनश्रौतसूत्रं प्रधान्येनावलम्ब्य विरचितम्, तथापि समग्रस्य बौधायनसूत्रस्यानुपलब्ध्या (द्र० पृष्ठ १४८, पं० १८) ग्रन्थकारेण बहुत्रापस्तम्बसूत्रानुसारेण प्रयोगो निर्दिष्टः (यथा—पृष्ठ १६८, पं० २५; पृष्ठ १६९, पं० १७)। आश्वलायनसूत्रम् अमरकोशश्च बहुत्र ग्रन्थकृतोद्धृतौ। बौधायनसूत्रसम्बद्धा गोपालकारिकाऽप्यत्रोद्धृता दृश्यते।

एतस्मिन् ग्रन्थे अनेकाष्टिप्पण्यः पूर्वसंस्करणस्था विद्यन्ते ऽनेकाश्च मया ऽस्मिन् संस्करणे नियोजिताः। बहुत्र पूर्वसंस्करणे टिप्पण्यामुद्धृतानां वचनानामाकरग्रन्थस्योल्लेखो नासीत्। अस्माभिस्तस्य नाम्नो यथास्थानं योजना ऽकारि (द्र० पृष्ठ ७३, टि० २, अग्रे च बहुत्र)।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्मिन् ग्रन्थे बहुत्र चतुर्होतृप्रभृतिमन्त्राणां विनियोगस्तु विहितः, परन्तु तत्र तत्र ते मन्त्रा न निर्दिष्टाः। अस्माभिर्ग्रन्थाध्येतृणां सौकर्याय तेषां पाठो ऽग्रे प्रदर्श्यते।

अत्र केवलं कार्यद्वयमेव मयाऽकारि। १-ग्रन्थकर्त्रा निरुच्यमानस्य पदार्थस्य नाम विवरणान्ते लिखितम्,मया पाठकानां सौविध्याय तन्नाम तत्तत्स्थाने आदावपि स्थूलाक्षरेषु प्रत्तम्। २—बहुत्र लम्बायमानानां सन्दर्भाणां यथाशक्यं विच्छेदं कृत्वा ऽत्र मुद्रणं विहितम्। ग्रन्थ उद्धृतानां मन्त्राणां स्थूलाक्षरेषु मुद्रणमपि प्रारब्धम्, किन्त्वग्रे मन्त्रपाठानामाधिक्यात् स्थूलमुद्रणाक्षराणामल्पताकारणात् परित्यक्तम्, केवलं मन्त्राणामादावन्ते च ' ' निर्देशो ऽकारि। अतिशयास्वस्थताकारणान्मया मुद्रणपत्राणां शोधनमपि न कृतम्।

अस्मिन् पूर्वमुद्रिते ग्रन्थे प्राचीनहस्तलेखलेखनविध्यनुरूपं मन्त्राणां सकलपाठमदत्त्वा ऽल्पीयांसं भागं विलिख्य पाठपूर्त्यै प्रायः ० विन्दोर्निर्देश उपलभ्यते। एतादृशस्थलेषु बहुत्र यथाशक्यं मन्त्रपाठस्य पूर्त्तिः कृता, तथापि कार्यस्य परिश्रमसाध्यत्वात् तादृशपरिश्रमेऽशक्तत्वान्मयोत्तर[illegible] यथापूर्वमेव मुद्रणं व्यधायि।

वस्तुत एतद्ग्रन्थस्य बहोः कालाद् यद् दौर्लभ्यमासीत् तस्यापाकरणार्थमेव मयैष बहुद्रव्यसाध्यप्रयत्नो विहितः। एतेन यदि केषामपि श्रौतपदार्थजिज्ञासूनां साहाय्यं सम्पत्स्यते तर्ह्यहं स्वप्रयत्नं सफलं मंस्ये।

प्रकाश्यमाणे ऽस्मिन् ग्रन्थे प्रायेण आध्वर्यवपदार्था एवात्र विवृताः। हौत्रौद्गात्रपदार्थविवरणपरोऽपि श्रीविश्वनाथश्रौतिमहाभागैर्विरचिष्यमाणो ग्रन्थो द्वितीयभागरूपेणाऽचिरादेव प्रकाशयिष्यते। तदर्थं प्रयत्नः प्रचलति।

भाद्रशुक्ला १५
सं० २०४१

विदुषां वशंवदः—
युधिष्ठिरो मीमाँसकः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्होतृ-प्रभृतीनां मन्त्राः

चतुर्होतृमन्त्राः—"पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता ।" तै० आर० ३।२॥ **उपवक्ता= ब्रह्मेति सायणः ।** मै० संहितायां (१।६।१) तु—'त्वष्टाऽग्नीत् । मित्र उपवक्ता' इति भेदः ।

पञ्चहोतृमन्त्रः—"अग्निर्होता । अश्विनावध्वर्यू । त्वष्टा ऽग्नीत् । मित्र उपवक्ता ॥" तै० आ० ३।३॥ **अध्वर्यू=अध्वर्युः प्रतिप्रस्थाता चेति सायणः ।** अध्वर्योर्द्वित्वमभिप्रेत्य पञ्च संख्या ऽत्र ज्ञेया । मै० संहितायां (१।६।१) तु 'रुद्रो ऽग्नीत् । बृहस्पतिरुपवक्ता' इति भेदः ।

षड्होतृमन्त्रः (पशुबन्धादौ)—"सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अन्तरिक्षमात्मा । अङ्गैर्यज्ञम् । पृथिवीं शरीरैः ॥" तै० आ० ३।४ ॥

षड्होतृमन्त्रः (चयने)—वाग्घोता । दीक्षा पत्नी । वातोऽध्वर्युः । आपोऽभिगरः । मनो हविः । तपसि जुहोमि ॥" तै० आ० ३।६ ॥ **अभिगरः= प्रोक्षणार्था आपस्ता अभिगरो ब्रह्मस्थानीयाः । तपसि=अग्निस्थानीये इति सायणः ।**

सप्तहोतृमन्त्रः—"महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता । अनाधृष्याश्चाप्रतिधृष्याश्च यज्ञस्याभिगरौ । अयास्य उद्गाता ॥" तै० आ० ३।५॥ अत्र सायणभाष्यम्—**'महाहविसत्यहविरित्याद्या अयास्यान्ता सप्तसंख्याका महर्षयः । तन्महर्षिरूपा अत्रत्या होत्रादयः । यज्ञस्य सोमयागस्य अभिगरौ अभित उद्गातुः पुरस्तात् पश्चाच्च गृहीतप्रस्तारप्रतिहारभागौ गायेते इति प्रस्तोतृप्रतिहर्तारावभिगरौ । होताऽध्वर्यू राग्नीध्रो ब्रह्मा प्रस्तोता प्रतिहर्तोद्गातेति सप्तसंख्याका होमनिष्पादकाः ।'** मै० संहितायां (१।६।१) तु 'अचित्तपाजा अग्नीत् । अचित्तमना उपवक्ता' इति भेदः ।

दशहोतृमन्त्रः—चित्तिः स्रुक् । चित्तमाज्यम् । वाग्वेदिः । अधीतं बर्हिः । केतो ऽग्निः । विज्ञातमग्निः । वाक्पतिर्होता । मन उपवक्ता । प्राणो हविः । सामाऽध्वर्युः ॥ तै० आ० ३।१ ॥ **'अत्राग्निद्वयेन चाहवनीयगार्हपत्यौ विवक्षितौ' । उपवक्ता= अनुवचनकर्तुहोतुः पुरा प्रैषवक्ता मैत्रावरुणः । यद्वा प्रोक्षणादिवचनानुज्ञायां पृष्टायां ब्रह्मा तदनुज्ञां वक्ति तस्मादयं ब्रह्मोपवक्ता' इति सायणः ।** मै० संहितायां (१।६।१) तु 'केतो ऽग्निः विज्ञातमग्नीत्' इति भेदः । तथा 'सामाध्वर्युः' इत्यतो ऽग्रे 'इन्द्रं गच्छ स्वाहा' इत्यधिकः पाठः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एतेषां चतुर्होतृप्रभृतीनां मन्त्राणां काम्यप्रयोगः तै० ब्रा० २।३।१०; चयने प्रयोगः तै० ब्रा० ३।१२।५ इत्यत्र द्रष्टव्यः । दशहोतृप्रभृतिसंज्ञानां निर्वचनार्थं तै० ब्रा० २।३।११ द्रष्टव्यम् । मै० संहितायाः प्रथमकाण्डस्य नवमानुवाके चतुर्होतृप्रभृतिमन्त्राणां विस्तरशो वर्णनमुपलभ्यते ।

संशोधन-पत्रम्

येषु मुद्राक्षरेषु प्रायेणोत्तरभारते ग्रन्था मुद्रयन्ते, तेषु प्रायेण ई-उ-ऊ-ए-ऐ-ओ-औ-ऋ-ॠ-स्वराणां मात्रा उपरितनस्य रेफस्य संकेतो ऽनुस्वारचिह्नं च मुद्रणकाले त्रुटित्वा विलुप्यन्ते । अत एतादृशोनामशुद्धीनां पाठकैः स्वयं संशोधनमूहनीयम् । अत्राधस्तात् कासांचिद् अशुद्धीनां संशोधनं विधीयते ।

पृष्ठ	पं०	अशुद्धः पाठः	शुद्धः पाठः
१५	२८	वाक्यतिहोता	वाक्पतिर्होता
१७	१	पत्रासादनम्	पात्रासादनम्
१७	२१	अधः सादन०	अनधः सादन०
२३	१५	सामधेनीः	सामधेन्यः (ऋचः)
३१	२७	वीतवत्पादान्ताः	वीतवत्पदान्ताः
६९	१६	अग्निवारुणेष्टिः	आग्निवारुणेष्टिः
७२	२६	आयायण०	आग्रयण०
७२	२९-३०	२.६.२—६	आप० श्रौ० ६.२९.२-६।।
९७	२३	अग्निहो·····कृत्य	नित्यवत्सा गौः
१०५	२२	दक्षिणानुरूपघ्ना०	दक्षिणानुरूनुपघ्ना०
१११	१२	प्रतिष्ठाकामः-इष्टचा	प्रतिष्ठाकामेष्टिः-प्रतिष्ठा-काम इष्टचा
१२३	१२	यूपाच्छ्रय०	यूपोच्छ्रय०
१३४	२१	पश्वङ्गाहवि०	पश्वङ्गहवि०
१७४	२५	अश्विनग्रहा०	आश्विनग्रहा०
२०७	२७	प्रवर्ग०	प्रवर्ग्य०
२४१	१७	आग्नीध्रिया०	आग्नीध्रीया०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अकारादिक्रमेण-पदार्थनामानि

पदार्थः	पृष्ठम्
अंशुग्रहपात्रम्	२३४
अंशुपरिप्लावनम्	२५२
अंशुपात्रहोमः	२५०
अग्निचयनसंकल्पः	१५०
अग्निपरिधानम्	२१
अग्निप्रणयनम्	८७
अग्निमन्थनम्	५९
अग्निमन्थनीयाः (ऋचः)	५८
(अग्नि) विहरणम्	६२
अग्निविहरणादिप्रैषः	२५६
अग्निष्टोमारम्भकालः	१८३
अग्निष्टोमारम्भात् पूर्वकृत्यम्	१८३
अग्निष्टोमसंकल्पः	१८३
अग्निष्टोमसंज्ञा	२८१
अग्निष्टोमीयदीक्षानिर्णयः	१८३
अग्निष्ठाऽस्थिः	१२३
अग्निसमारोपः	५७
अग्निसमारोपणम्	९५
अग्निहोत्रमपकृष्य पौर्णदर्वहोमः	९७
अग्निहोत्रशाला	३
अग्निहोत्रशेषप्राशनम्	६५
अग्निहोत्रहवणी	७
अग्निहोत्रहवणीजलनिनयनम्	४१
अग्निहोत्रहोमः	६६
अग्निहोत्रहोमान्तमग्न्याधानम्	६१
अग्निहोत्रारम्भः	६३
अग्नीनां समारोपो मन्थनं च	११६
अग्नीषोमप्रणयनैप्रैषः	२३६

पदार्थः	पृष्ठम्
अग्नीषोमीयपशु-अथाग्नीषोमीयः पशुः	२२७
अग्न्याधानम्, आधानं च	४३
अग्न्याधेयदक्षिणा	६२
अग्न्युद्धरणपात्री	८६
अङ्कधारणा	२३
अङ्गयागः	१३४, १८१
अङ्गसंस्पर्शनम्	१६२
अङ्गुलम्	३
अङ्गुलिपर्वाञ्जनम्	३४
अङ्गावदानप्रैषः	१३३
अङ्गाहरणप्रैषः	१३३
अचः स्वराश्च	२९
अच्छावाकखरः, अच्छावाकधिष्ण्यं वा	२३३
अच्छावाकचमसः	२३५
अच्छावाकचमस प्रभृतिभक्षणम्	२६८
अच्छावाकचमसोन्नयनप्रैषः	२६३
अच्छावाकवादनप्रैषः	२६३
अजस्रधारणपक्षः	६३
अजस्रधारणम्	६२
अज्यानिसंज्ञा ऋचः	७६
अज्यानिहोमः	७६
अञ्जलिकरणम्	२६
अतिग्रहपात्राणि	२३५
अतिग्राह्यपात्राणि	२४५
अतिग्राह्यभक्षणम्	२७६
अत्याक्रमणम्	२६
अदाभ्यग्रहणम्	२४८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्टम्
अदाभ्यग्रहपात्रम्	२३५
अदाभ्यग्रहहोमः	२४६
अधस्तादभ्यञ्जनम्	२१
अधिकश्रीकामेष्टिः	११२
अधिवपनम्	१६
अधिश्रयणम्	१७
अध्यर्धकारम्	२३
अध्रिगुप्रैषः	१४२
अध्रिगुप्रैषप्रैषः	१४२
अध्रिग्वपापनामकौ देवशमितारौ	१६८
अध्वर्युः	१
अध्वर्युकर्तृकघर्मस्रावणम्	२१५
अध्वर्युकर्तृकनित्यप्रायश्चित्तहोमः	४०
अध्वर्युकर्तृकप्रवरणम्	२७
अध्वर्युप्रतिप्रस्थातृकर्तृकघर्मस्रावणम्	२१४
अध्वर्युस्थानम्	२६
अध्वर्यवग्नीध्रान्वारम्भः	२७
अध्वर्व्वादीनां अग्नीषोमीयपशुसम्बन्धीनि-कर्माणि	२३५
अनधः सादनम्	१७
अनसोरूस्तम्भने स्थापनम्	२२८
अनीकवतीष्टिः	६६
अनुवाक्या	२८
अनुनिर्वापपौष्णेष्टिः	१०७
अनुप्रहरणम्	७१
अनुमन्त्रणम्	१७
अनुयाजप्रचारः, अनुयाजहोमश्च	३७
अनुयाजसमिदाधानम्	३६
अनुयाजहोमः	३७
अनुयाजाः	१८१
अनुयाजाः (मन्त्राः)	३७
अनुयाजानां यजमानस्यानुमन्त्राणि	१३६
अनुयाजेषु यजमानस्य त्यागाः	१३६
अनुवचनम्	२४
अन्तःपरिधिनिनयनम्	३३
अन्तरागमननिषेधप्रैषः	२०५
अन्तर्धानकटम्	१४
अन्तर्यामरसग्रहणम्	२५३
अन्तापत्तिः	२४
अन्तिमप्रवर्ग्यसम्बन्धि शालामुखीयोपस्थानम्	२२६
अन्तिमयूपोपस्थानम्	१३८
अन्नकामेष्टिः (१)	१०६
अन्नकामेष्टिः (२)	१११
अन्नपतित्वकामेष्टिः	१०६
अन्नाद्यकामेष्टिः	१७७
अन्यपात्राणि	२३५
अन्वाचमनम्	३५
अन्वाधानम्	११
अन्वारम्भणीयः	६७
अन्वाहार्यः	१४
अन्वाहार्यरचनी	१४
अन्वाहार्यदानम्	३६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्टम्
अन्वाहार्यप्रतिग्रहः	३६	अम्भ्रणः	२४०
अन्वाहार्यस्थाली	१४	अरणीग्रहणम्	५७
अन्वाहार्यावघ्राणम्	३६	अर्घ्यम्	५१
अन्वाहार्यावेक्षणम्	३६	अलंकरणम्	११
अपकर्षः	१५२	अवकर्षणम्	२३
अपलसैः पर्यावर्तनम्	८६	अवदानम्	३२
अपाननम्	३६	अवदानाभिमर्शनमन्त्रः	१३४
अपाव्यहोमः	१२६	अवभृथेष्टिः	९३
अपाव्यानि	१२६	अवभृथानुमन्त्रणमन्त्रः	१६५
अपोनप्त्रीयानुवचनप्रैषः	२४५	अवभृथीयवायव्यासादनम्	१६५
अपोनप्त्रीयारम्भकहोमः	२४५	अवशिष्टसोमार्धमानम्	२६९
अपोहनम्	२१	अवस्थानम्	२२
अप्रोक्षितशकलनिरसनम्	२६१	अवहननम्	१८
अवानयननिवेदनम्	२४७	अवान्तरदीक्षाप्रैषः	२०७
अभिक्रमणम्	२७	अवान्तरेडा	३४
अभिमन्त्रणम्	१७	अविच्छिन्नोदकधाराहरणम्	६३
अभिमर्शनम्	१५	अवोक्षणम्	५२
अभिवासनम्	१८	अश्वियाज्याप्रैषप्रैषः	१५५
अभिशापनिवृत्तीष्टिः	११०	अश्व्यनुवाक्याप्रैषः	१५५
अभिषवणम्	२५०	अष्टाकपालादयः	७
अभिषवप्रैषः	२७५	असिदः	१२
अभिषवार्थफलकाभिमर्शनम्	२५०	आक्रमणम्	२३
अभिषवार्थसेचनम्	२४९	आगूः (दैवकर्मणि)	२९
अभिषवार्थोपवेशनम्	२५२	आगूः (पितृकर्मणि)	२९
अभिषुतसोमनिवेदनम्	२५३	आग्निवारुणेष्टिः	६९
अभिहिंकारः	२३	आग्नीध्रः	२
अभ्यञ्जनम्	७१	आग्नीध्रीयखरकरणम्, आग्नीध्रधिष्ण्यकरणम् वा	२३२
अभ्यातानहोमः	५५	आग्नीध्रीयचमसः	२३५
अभ्यात्माञ्जिननयनम्	३५		
अभ्यासः	२३		

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
आग्नीध्रीयादिपञ्चकसम्मर्शनम्	२४१
आग्नेयपात्रे सोमग्रहणम्	२५४
आग्नेयातिग्राह्यग्रहप्रचारः	२७५
आग्रयणम्	७२
आग्रयणस्थाल्यां रसग्रहणम्	२५९
आग्रयणे तृतीयसवनीयसोमग्रहणम्	२७७
आघारः	२५
आचमनम्	२२
आचमनीयम्	५१
आज्यग्रहणम्	२०
आज्यभागौ	३२
आज्यशास्त्रोत्तरभक्षः	२६६
आज्यस्थाली	९
आज्यावेक्षणम्	२०
आज्याहुती	१६३
आज्येडा	३९
आज्येडाप्राशनम्	३९
आज्येडामार्जनम्	३९
आज्येडोपह्वानम्	३९
आञ्जनम्	७१
आतिथ्येष्टिः	२०४
अतिथ्येष्टिहविषो निर्वापः	२०४
आत्ममार्जनम्	४२
आत्मसंप्रैषः	४३
आदित्यग्रहप्रचारप्रैषः	२७७
आदित्यग्रहेशृतातङ्ग्रहणम्	२७७
आदित्येष्टिः	१८२
आदित्योपस्थानम्	४२,१३८,२२६
आधवनीयः	२३९
आधवनीयन्युब्जकरणप्रैषः	२५६
आधवनीयस्यहविर्धाननीडे सादनम्	२५६
आधानमन्त्राः	२४८
आधानम्	४३
आधानसंकल्पः	४९
आप्रीसूक्तानि	१४१
आप्लावनम्	१८
आमन्त्रणम्	२२
आमिक्षाकुम्भ्युपधानम्	१४४
आमिक्षा वाजिनश्च	७८
आयतने सम्भारनिधानम्	५८
आयतनोपलेपनम्	५८
आयुष्कामेष्टिः	१०९
आवहननिगदः	२६
आश्रावणम्, आश्रुतं च	२८
आश्रुतम्	२८
आश्विनकुष्टिकशापहोममन्त्राः	१६०
आश्विनग्रहपात्रम्	२३४
आश्विनप्रचारः	२६०
आश्विनग्रहप्रैषः	१७४
आश्विनग्रहानुवाक्याः	१७४
आश्विनहविःप्रचारः	१७५
आसन्दीप्रतिष्ठापनम् (पाशुक)	१६१
आसन्दीप्रतिष्ठानम् (सौमिक)	२०४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
आसन्दीप्रत्यवरोहणम्	१६३
आसन्द्यासीनयजमानानुमन्त्रणम्	१६२
आसन्द्यास्तरणम्	१६१
आसन्द्युपवेशनम्	१६१
आसन्यहोमः	२४२
आसादितधर्मोपकरणोपस्थानम्	२२५
आहवनीयः	५
आहवनीय-कुण्डम्	५
आहवनीयाग्निपुनराधानम्	६८
आहवनीयाधानम्	५६
आहवनीयायतनम्	४
आहवनीयोपस्थानम्	४२
आहितप्रत्येकोपस्थानम्	६१
आहितसर्वाग्निजपः	६१
आहितसर्वोपस्थानम्	६०
आहिताग्निप्रवासविधिः	७०
आहृतदध्यवेक्षणम्	२७१
इडा	६, ३४
इडाजपः	१४
इडापात्रम्	६
इडाप्राशनम्	३४
इडाप्रैषः	१४०
इडामार्जनम्	३४
इडावदानम्	३४
इडोपह्वानम्	३४
इध्मप्रदीपनहोमः	२२३
इध्मप्रव्रश्चनानि	१४
इध्मसन्नहनम्	१३

पदार्थः	पृष्ठम्
इध्मानि	१४
इन्द्रियवीर्यप्रतिष्ठाकामेष्टिः	१०७
इष्टिः	१
इष्टचन्तमग्न्याधानम्	६१
उक्थ्यतृतीयग्रहणम्	२६७
उक्थ्यद्वितीयग्रहणम्	२६७
उक्थ्यप्रथमांशग्रहणम्	२६७
उक्थ्यस्थाल्यां सोमग्रहणम्	२५५
उज्जितिवाचनम्	३७
उत्करः	६, ८३
उत्तमप्रयाजप्रैषप्रैषः	१३०
उत्तमस्वरः	३८
उत्तरकूष्माण्डहोमः	६१
उत्तरगार्हपत्यसमिदाधानम्	४०
उत्तरपरिग्राहः	२०
उत्तररौहिणहोमः	२१६
उत्तरवेदिनाभिः	८३
उत्तरवेदिपरिधानम्	८७
उत्तरवेदिप्रोक्षणम्	८६
उत्तरवेदिव्याघारणम्	८७
उत्तरवेदिसंस्कारः	८५
उत्तरवेद्यवरोहणम्	२६१
उत्तरवेद्यारोहणम्	२६१
उत्तरवेद्युपस्थानम्	१३८
उत्तरशान्तिः मन्त्राः	१८६
उत्तरश्रोणिः	६
उत्तरसर्वौषधिहोमः	६०
उत्तरहविर्धानोत्तरवर्तनीहोमः	२२८
उत्तरांसः	६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
उत्तराक्षधूरञ्जनम्	२२८	उपयमनम्	२१८
उत्तराहवनीयपरिषेकः	४३	उपयमनसादनम्	२१६
उत्तराहवनीयसंमार्गः	३६	उपयमनसादनाङ्गजपः	२१६
उत्तराहुतिः	६४	उपयमनी	८६
उत्पवनम्	१६	उपयाजप्रैषः	१३५
उत्सादनार्थं धर्मपात्रसादनक्रमः	२२५	उपरः	१२३
उदकशान्ति	४५	उपरवखननप्रैषः	२३०
उदकहोमानन्तरं समिदाधानम्	६५	उपरवाणां कालः	२२२
उदकाहुतिहोमः	६५	उपरवाणां खननम्	२३१
उदकोदुक्षणम्	४१	उपरवाणां संस्कारः	२३१
उदकोपस्पर्शनम्	१३	उपरवेषु फलकप्रतिष्ठापनम्	२३२
उदञ्चनः	२४०	उपरिष्टादाहुतिः	३२
उदवसानम्	११६, १४६	उपला	८
उद्गातृचमसः	२३५	उपवेशनः (मन्त्रः)	२८
उद्गातृनिवेदनम्	२४२	उपवेषः	१२
उद्ग्रहणम्	२७	उपशयौ	२१६
उद्धननम्	१६	उपसदिष्टिः	२१६
उद्धरणपक्षः	६३	उपसद्धोमः	२२१
उद्धरणम्	६५	उपस्तम्भनम्	२०४
उद्धरणविहरणकालः	६६	उपस्थानव्रीहयः	२०४
उद्वासनीयखरः	२१६	उपहननम्	२५, ११७
उद्वासनीये महावीरासादनम्	२१५	उपहोमः	७३
उद्वासनेष्टिः	६८	उपहोमः सोमशोधनादिप्रैषाङ्गहोमः	१६८
उन्महनम्	१६	उपांशुपात्रहोमः	२५१
उपधानम्	१६	[उपांशुपात्रे] तृतीयरसग्रहणम्	२५१
उपप्रैषः	१२७	[उपांशुपात्रे] द्वितीयरसग्रहणम्	२५१
उपवर्हणम्	७१	उपांशुपात्रेप्रथमरसग्रहणम्	२५०
उपभृत्	८		
उपयमनपर्यग्निकरणम्	२१६		

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
उपांशुसवनं प्रत्यभिमर्शनम्	२५२	ऐन्द्रयाज्याप्रैषप्रैषः	१५५
उपाकरणवर्हिः	१२७	ऐन्द्रवायवग्रहपात्रम्	२३४
उपाकरणवर्हिरग्रप्रक्षेपः	१२९	ऐन्द्रवायवग्रहप्रचारः	२५९
उपोत्थानम्	२७	ऐन्द्रवायवपात्रेरसग्रहणम्	२५३
उभयवन्त, प्रयाजाः	३९	ऐन्द्रवायवे सोमग्रहणम्	२५९
उभयवन्तः प्रैषाः	३९	ऐन्द्रहविःप्रचार	१७५
उलूखलम्	८	ऐन्द्राग्नग्रहणम्	२६५
उषासानक्ताप्रैषः	१४१	ऐन्द्रतिग्राह्यग्रहप्रचारः	२७५
उष्णीषवेष्टनम्	१९४	ऐन्द्रानुवाक्याप्रैषः	१५५
ऋग्यजुःसामतोयज्ञश्रेशप्राय-		ओष्ठनिमार्गः	३४
श्चित्तम्	२१८	औत्तरवेदिकम्	१२१
ऋतुग्रहपात्रम्	२३५	औत्तरवेदिकाद्युपस्थानम्	२३३
ऋतुपात्रभक्षणम्	२६५	औदुम्वर्यवटखननप्रैषः	२२९
ऋतुपात्रहोमः	२६४	औदुम्वर्यवटपरिलेखनम्	२२९
ऋतुयाजप्रचारः	२६४	औपयाजिकधूमान्वेक्षणम्	१३६
ऋत्विगाह्वानम्	१८४	कपालानि	७
ऋत्विग्वरणम्	५०	कपालोपधानम्	१६
ऋत्विजां व्यपक्रमणम्	१०२	करम्भः	२४४
एककपालः	७	कशिपुः	७१
एककपालयागः	९१	कामेष्टिः	१०८
एककपालहोमः	७६	काम्येष्टिः	११५
एकधनग्रहणम्	२४६	काम्येष्टिप्राङ्नियमाः	१०७
एकधनग्रहणार्थहोमः	२४६	कुण्डम्	४
एकधना आपः	२६४	कुम्बकुरीरामध्यूहनम्	१९५
एकश्रुतिः	२५	कूर्चे लोपमार्जनम्	२१७
एकादशत्रिपश्वनुयाजप्रैषाः	१७६	कूष्माण्डहोमः	४३
एकादशानुयाजप्रैषाः १४५,	१७०	कृष्णविषाणा	१९५
ऐन्द्रकुष्टिकशफहोममन्त्राः	१६१	कृष्णाजिनम्	८
ऐन्द्रपशुसंकल्पः	१५०	क्रतुकरणहोमः	२४७
ऐन्द्रपात्रेसोमग्रहणम्	२५५	क्रमणाङ्गसोमोपस्थानम्	२०१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
क्रीडीयेष्टिः	९८	घर्मपात्राच्छादनम्	२२५
क्षामवदिष्टिः	१०८	घर्मपात्रोत्सादनार्थंसादनम्	२२५
क्षैत्रपत्येष्टिः	१०८	घर्मभक्षणम्	२१७
खरः	१५१	घर्मयागः	२१४
खरे ग्रहादिसादनम्	२४४	घर्महोमार्थदक्षिणात्याक्रमणम्	२१४
खरेमहावीरसादनम्	२०९	घर्मोद्वासनप्रैषः	२१८
खरे सवनीयासादनम्	२५९	घर्मोद्वासनसामप्रैषः	२२५
गणहोमः	४४	घर्मोपस्थानम्	२१०
गार्हपत्यः	४	घर्मोष्मान्वीक्षणम्	२१३
गार्हपत्यपुनराधानम्	६८	घृताज्यासम्पुटि सौम्यचरुयागः	२७९
गार्हपत्यादिपरिषेचनम्	२१६	चक्षुःकामेष्टिः (१)	११०
गार्हपत्याधानम्	५९	चक्षुष्कामेष्टिः (२)	११४
गार्हपत्यायतनम्	४	चतुरवत्तम्	३२
गुदहोमा उपयाजाः	१३५	चतुरवत्ती	३२
गृहमेधीयेष्टिः	९६	चतुर्धाकरणम्	३४
गोदानम्	५२	चतुर्धाकृतभागदानम्	३५
गोपितृयज्ञः	५३	चतुर्धाकृतभागपरिहरणम्	३५
गोप्तादेशः	२२६	चतुर्गृहीतम्	११७
गोमतीजपम्	४३	चमसभक्षणम्	२६३
ग्रहप्रचारार्थप्रतिप्रस्थातृप्रैषः	२६७	चमसभक्षणम्	२६६
ग्रहरसावमार्जनम्	२५१	चमसाः	२३५
ग्रहाभिमर्शनम्	२४५	चमसाध्वर्यवः	१८४
ग्रहावेक्षणम्	२५१	चमसानयनप्रैषः	२६१
ग्रहेषु रसायनप्रैषः	२५३	चमसाप्यायनम्	२६३
ग्रहोन्मार्जनम्	२५१	चरुः	१९
ग्रामकामेष्टिः (१)	११०	चरुपुरोडाशाद्यवदानम्	३२
ग्रामकामेष्टिः (२)	११२	चषाल	१२२
ग्रावस्तुतप्रैषः	२६८	चषालावेक्षणम्	१२३
ग्रावस्तुते उष्णीषदानम्	२६९	चात्वालः	८३
घर्मदुघादोहनप्रकारः	२१२		

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
चात्वालमध्यः	२२३
चात्वालसंस्कारः	८५
चिररोगमुक्तिकामेष्टिः	१०९
छेदनप्रयुक्तहोमः	११८
छेदनम्	१३
जयहोमः	५५
जुहूः	८
जौहवः प्राक्संस्थो वा आधारः	२६
तनूनपात्प्रैषः	१४०
तनूनपात्वन्तः प्रयाजाः	३१
तन्त्रेण व्रीहिश्यामाकाग्रयणम्	७६
तानूनप्त्रसंज्ञकम् आज्यम्	२०६
तानूनप्त्राज्यग्रहणम्	२०६
तानूनप्त्रावघ्राणम्	२०६
तानूनप्त्रावमर्शनम्	२०६
तिर्यगाधारः	२५
तिस्सृणां देवीनां प्रैषः	१४१
तीर्थः	११
तूष्णीम्	१८
तृणप्रहरणम्	३८
तृतीयरसग्रहणम् [उपांशुपात्रे]	२५१
तृतीयसवनस्य शिष्टं कर्म	२८०
तृतीयसवनसम्बन्ध्यभिषवः	२७६
तृतीयसवनहोमः	२७८
तृतीयसवनारम्भकप्रैषः	२७६
तृतीयसवनीयप्रचारः	२७८
तृतीयसवनीयप्रस्थितयाज्याप्रचारः	२७९
तृतीयसवनीयहोतृचमसप्रचारः	२७८
तृतीयिन ऋत्विजः	१८४
तेजस्कामेष्टिः	१०९
त्यागः	३१
त्रिःपशुसङ्कल्पः	१५०
त्रिपशोरनुयाजानां प्रैषा याज्याश्च	१७१
त्रिस्तनव्रतदोहनप्रैषः	२२१
त्रिस्तनव्रतप्रैषः	२२१
त्रैयम्बिकेष्टिः	१०५
त्वक्छेदनम्	१२८
त्वग्ग्रहणम्	१८
त्वष्टृप्रैषः	१४१
दक्षिणधूरञ्जनम्	२२८
दक्षिणरौहिणहौमः	२१२
दक्षिणश्रोणिः	६
दक्षिणहविर्धानवर्तनीहोमः	२२७
दक्षिणांसः	६
दक्षिणाग्निः	५
दक्षिणाग्निकुण्डम्	५
दक्षिणाग्निपुनराधानम्	६८
दक्षिणाग्निप्रायश्चित्तहोमः	३९
दक्षिणाग्नेरायतनम्	५
दक्षिणाग्न्याधानम्	५९
दक्षिणानयनम्	२७२
दक्षिणारम्भकहोमः	२७२
दक्षिणाविभजनम्	२७२
दक्षिणावृत्	२२
दक्षिणासमनुदेशः	२७४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
दक्षिणोत्तरवैश्वदेवकर्मणहोमः	२७३
दक्षिणोत्तराङ्गहोमः	३७३
दक्षिणोत्तराङ्गहोमोपस्थानम्	२७४
दत्तद्रव्यप्राप्तिकामेष्टिः	११२
दधिग्रहपात्रम्	२३४
दधिग्रहप्रचारः	२४७
दधिघर्मप्रचारः	२७१
दधिघर्मभक्षः	२७१
दधिघर्मार्थं दध्याहरणप्रैषः	२७०
दर्शः	३०
दशहोतृपदानि	१५
दारुपात्री	१०
दिग्घोमः	१३४
दीक्षणीयेष्टि.	१९३
दीक्षाङ्गदण्डग्रहणम्	१९५
दीक्षाङ्गपत्नीसन्नहनम्	१९४
दीक्षाङ्ग-पवनम्	१९२
दीक्षाङ्गमेखलाबन्धनम्	१९४
दीक्षाङ्गवपनम्	१९२
दीक्षाङ्गशालाप्रवेशः	१९२
दीक्षाङ्गस्नानपरिधाने	१९२
दीक्षाङ्गाञ्जनम्	१९२
दीक्षाङ्गभ्यञ्जनम्	१९२
दीक्षाव्रतभ्रेषप्रायाश्चित्तानि	१९६
दीक्षाहुतयः	१९३
दीक्षितत्वज्ञापनम्	१९५
दीक्षितयजमानस्य शयनमन्त्रः	१९७
दीक्षोपवेशनम्	१९४
दुश्चर्मत्वाभावेष्टिः	११३
दृषद्	८
देवतादेशः	३३
देवताह्वानम्	२६
देवपत्नीमन्त्राः	२२०
देवयजनयाच्ञा	५२
देवयजनाध्यवसाय	१९०
देवहोमः	५५
दैव्याहोतृप्रैषः	१४१
द्रोणकलशः	१४९
द्रोणकलश-आधवनीय–पूतभृदभिमर्शनम्	२५५
द्वादशगर्तखननम्	२२९
द्वादशिको विहारः	१८५
द्वारां प्रैषः	१४१
द्वितीयं पुनराधानम्	६९
द्वितीयमेखला	७
द्वितीयरसग्रहणम् [उपांशुपात्रे]	२५१
द्वितीयस्तोत्रोपाकरणम्	२६६
द्वितीया मेखला	४
द्वितीयिन ऋत्विजः	१८४
द्वितीयोक्थ्यग्रहणम्	२६७
द्विदेवत्यग्रहभक्षणम्	२६२
द्विदेवत्यप्रचारः	२६७
द्विस्तनदोहनप्रैषः	२२१
धवित्रादानम्, तत्प्रदानं च	२११
धानाकपालोपधानम्	२४३
धिष्ण्याधारणम्	२५७
धिष्ण्येष्वङ्गारविहरणम्	२५७
धृष्टिः	१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
ध्रुवस्थाल्यां सोमग्रहणम्	२५५	पत्नीवेदवाचनम्	३९
ध्रुवा	८	पत्नीशालाप्रवेशः	१९३
ध्रुवाप्यायनम्	४०	पत्नीसंयाजप्रचारः	३८
ध्रुवासमञ्जनम्	२७	पदम्	३
नान्दीश्राद्धं वृद्धिश्राद्धं वा	४४	पद्धरणीग्रहणम्	२००
नापितप्रैषः	१९१	पन्नेजनीग्रहणम्	२४६
नाभ्यालम्भनम्	३५	पन्नेजनीग्रहणार्थपत्न्यानयनम्	२४६
नाराशंसप्रैषः	१४०	पन्नेजनीजलस्रावणम्	२८०
नाराशंसवन्तः प्रयाजाः	३१	पन्नेजनीसहितपत्न्यानयनम्	२६३
नाराशंससादनम्	२६३	पन्नेजन्य आपः	२४६
निगदः	२६	पयसिचरुः	१९
नित्यवत्सा=जीववत्सा (द्र० संशोधन पत्र)	९७	पयोग्रहाः	१४९
निधानम्	१७	पयोग्रहासादनम्	१५२
निरसनः (मन्त्रः)	२८	पयोग्रहोपस्थानम्	१५३
निरसनम्	२७	पवनम्	४६
निरूढपशुः	१४८	पवमानेष्टिः	६२
निर्वपः	१५, १७	पवित्रकरणम्	१५
निवीतम्	२२	पवित्रे	९
निह्नवः	२०७	परापवनम्	१८
नीडम्	२४०	परावपनम्	१६
नेष्टृखरः, नेष्टृधृष्ण्यं वा	२३३	परिकर्म	१७
पञ्चसमिद्धोमः	६०	परिकर्मी	१७
पञ्चहोतृवाक्यानि	७७	परिग्रहणम्	१३
पञ्चावत्तम्	३२	परिघर्म्यम्	२१८
पञ्चावत्ती	३२	परिधयः	१३
पत्नी (यजमान-पत्नी)	२	परिध्यञ्जनम्	३७
पत्नीनिष्क्रमणम्	४०	परिप्लुसहितचमसनिधानम्	२६८
पत्नीयजमानव्रतपयःसाधनम्	१९६	परिवापकपालोपधानम्	२४४
पत्नीयोक्त्रविमोचनम्	४०	परिवापश्रपणम्	२४४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
परिसमूहनम्	११	पश्वङ्गहविर्याज्याप्रैषप्रैषः	१३४
परिसरणम्	१२६	पश्वङ्गानुवाक्याप्रैषः	१३४
परिस्तरणम्	१५	प्रयाजाः	३०
पर्यग्निकरणप्रैषः	१२६	पश्विडाभक्षणम्	१३५
पर्यग्निकरणम्	१८	पाणिसंमर्शनम्	१४
पर्यग्निकरणानुवचनम्	१४२	पात्नीवतग्रहणम्	२८०
पर्युक्षणम्	११	पात्रासादनम्	१५, १७
पशुकामेष्टिः (१) (२)	१११	पादिन ऋत्विजः	१८४
पशुकुम्भी	११६	पाद्यम्	५१
पशुदेवतासंकल्पः	११६	पाघक्षयेष्टिः	११२
पशुनियोजनम्	१२५	पार्वणहोमः	३३
पशुपुरोडाशनिर्वापप्रैषः	१३१	पार्ष्णी	२३
पशुपुरोडाशप्रचारः	१४४	पाशुकपर्यग्निकरणम्	१२६
पशुपुरोडाशयाज्याप्रैषः १३२,	१४४	पाशुकपात्राणि	१२०
पशुपुरोडाशस्विष्टकृतेऽनुवाक्या-प्रैषः	१३२	पाशुकपात्रासादनम्	१२०
पशुपुरोडाशस्विष्टकृत्प्रैषप्रैषः	१३२	पाशुकसक्तुहोमः	१३८
पशुपुरोडाषानुवाक्याप्रैषः	१३२	पाशुकसमिदाधानम्	१४७
पशुपूर्वेष्टिः	११६	पाशुकस्रुगासादनम्	१२१
पशुप्रायश्चित्ताहुतयः	१२४	पाशुकहविरासादनप्रैषः	१३२
पशुप्रोक्षणम्	१२५	पाशुकहविरासादनम्	१३३
पशुबन्धः	१४८	पाशुकाग्नावैष्णवेष्टिः	१३६
पशुबन्धकालः	११६	पाशुकाग्नेयेष्टिः	१३६
पशुबन्धसंकल्पः	११६	पाशुबन्धिकीवेदिः	८२
पशुरसना	११६	पिञ्जूलम्	४६
पशुसमञ्जनम्	१२५	पिण्डदानम्	७१
पशुस्विष्टकृद्याज्याप्रैषः	१४५	पिण्डनिपरणम्	७१
पशूपाकरणम्	१२४	पिण्डपितृयज्ञः	७२
पशूल्मुकप्रक्षेपणम्	१२६	पितृयज्ञः	६८
पशवङ्गग्रहणप्रैषः	१३१	पित्रादिभिः सोमयागकरणाभावे प्रायश्चित्तम्	१८३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
पिष्टोद्वपनी	६	पृषदाज्यग्रहणी	७६
पुंस्त्वकामेष्टिः	११४	पृषदाज्यम्	७८
पुण्याहवाचनम्	४७	पृष्ठ्या	४
पुत्रकामेष्टिः	११०	पृष्ठ्यासूत्रम्	४
पुनराधानसंभाराः	६७	पृष्ठ्यास्तरणम्	१५
पुनराधानहोमः	६८	पैतृकवेदिः	६६
पुनराधानारम्भकर्म	६७	पौतृखरः, पोतृधिष्ण्यं वा	२३३
पुनराधेयेष्टिः	६६	पौर्णदर्वहोमः	६७
पुनराहारः	२०	प्रउगः	२४०
पुरस्तादाहुतिः	३२	प्रकृतिः	३०
पुरोनुवाक्या	२८	प्रचरणी	२१६
पुरोडाशः	१८	प्रचरणीयमहावीरः	२१६
पुरोडाशप्रकाशनम्	२१	प्रचरणीयमहावीरपरिपूर्णम्	२२४
पुरोडाशयागः	१८०	प्रजाकामेष्टिः	१०७
पुरोडाशश्रपणम्	१८	प्रजातीयः	१२५
पुरोडाशस्य आर्द्रीकरणम्	२१	प्रज्ञातम्	११७
पुरोडाशस्विष्टकृत्प्रैषः	१४४	प्रणीताग्न्यभिहोमः	८८
पुरोडाशोद्वासनम्	२१	प्रणीताप्रणयननिनयनम्	४१
पूतभृत्	२४०	प्रणीताप्रणयनम्	६
पूतभृत्पूरणप्रैषः	२५५	प्रतिगरः	२६५
पूर्णमासः	३०	प्रतिपत्तिकर्म	१६
पूर्णायुः कामस्य शतकृष्णलेष्टिः	११३	प्रतिप्रस्थाता	८२
पूर्णाहुतिः	६१	प्रतिप्रस्थातृनापितप्रैषः	१६१
पूर्णाहुत्यन्तमग्न्याधानम्	६१	प्रतिप्रस्थातृवेदिः	८३
पूर्वपरिग्राहः	१६	प्रतिषिद्धपशुः	१२४
पूर्वशान्तिः	१८५	प्रतिष्ठाकामेष्टिः	१११
पूर्वाहुतिः	६४	प्रतिसंधानम्	२३
पूर्वाहुत्यङ्गगार्हपत्यावेक्षणम्	२१७	प्रतिसरबन्धः	४६
पूर्वोऽग्निसंमार्गः	२६	प्रतिसरम्	४६
		प्रत्यञ्जनम्	३२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
प्रत्याक्रमणम्	२७	प्रवृत्ताहुतयः	१४०
प्रत्याश्रावणम्	२८	प्रशास्तृचमसः	२३५
प्रत्याश्रुतम्	२८	प्रशास्त्रादिचमसनयनम्	२६२
प्रत्यूहनम्	१८	प्रस्कन्दनम्	१६
प्रथनम्	१८	प्रस्तरः	१३
प्रथम-द्वितीय-मेखलास्वरूपम्	७	प्रस्तरप्रहरणम्	३७
प्रथमप्रयोगपूर्वाङ्गम्	११६	प्रस्तराञ्जनम्	३७
प्रथमा ऋत्विजः	१८४	प्रस्थितयाज्याप्रचारः	२६२
प्रथमा मेखला	४	प्राग्वंशा शाला	१८५
प्रधानयागः	३२	प्राचीनावीतम्	२२
प्रपदः	२३	प्राणभक्षः	७२
प्रयाजशेषाभिघारणम्	३१	प्रातःसवनार्थं सोममानम्	२४६
प्रयाजसंख्याः	३०	प्रातःसवनीयप्रचारः	२५६
प्रयाजाः	३०	प्रातरनुवाकादिप्रैषः	२४२
प्रवरणम्	२६	प्रादेशः	२५
प्रवराः	२५	प्रादेशकरणम्	२५
प्रवर्ग्यपात्रसम्भारप्रोक्षणम्	२०८	प्रायः (भ्रंशः)	६
प्रवर्ग्यप्रायश्चित्ताहुतिमन्त्राः	२१८	प्रायणीयेष्टिः	१८६,१६६
प्रवर्ग्यसंभरणम्	१६०	प्रायश्चित्तम्	१०
प्रवर्ग्यसामग्रीसम्पादनम्	२०७	प्राशित्रहरणम्	६
प्रवर्ग्याङ्गार्हपत्योपस्थानम्	२१२	प्राशित्रप्राशनम्	३५
प्रवर्ग्यारम्भप्रैषः	२०८	प्राशित्रपरिहरणम्	३५
प्रवर्ग्यारम्भहोमः	२०६	प्राशित्रः	३३
प्रवर्ग्योत्तरप्रथमाहुतिहोमः	२१६	प्रैषः	२८
प्रवर्ग्योत्तरशान्तिपाठः	२२३	प्रोक्षणम्	१५
प्रवर्ग्योत्तरसमिदाधानम्	२१६	प्रोक्षण्यः	१७
प्रवर्ग्योद्वासनप्रैषः	२२३	प्रोक्षितशकलाभ्याधानम्	२६१
प्रवासादागमनविधिः	७०	प्रोच्छनम्	१७
प्रवासोपस्थानम्	६६	प्रोहणम्	१६
प्रवृञ्जनीयखरः	२१६	फलीकरणम्	१४

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
फलीकरणपात्रम्	१४
फलीकरणहोमः	३९
वन्धादिमोक्षकामेष्टिः	११२
बर्हिः	१३
बर्हिःप्रैषः	१४१
बर्हिरास्तरणम्	२०
बर्हिरुपस्पर्शनम्	२८
बर्हिरुषोषणम्	१३७
बर्हिरेकदेशानुप्रहरणम्	४०
बर्हिसन्नहनम्	१३
बहिःपरिधिनिनयनम्	३३
बहिर्वेदिभवनप्रैषः	२३८
बहिष्पवमानारम्भकवाचनम्	२५६
बहिष्पवमानारम्भकहोमः	२५६
बहिष्पवमानस्तोत्रोपाकरणम्	२५६
बुद्धिमदिन्दुमन्तौ	६८
ब्रह्मकर्तृकनित्यप्रायश्चित्तहोमः	४२
ब्रह्मचमसः	२३५
ब्रह्मयजमानाग्नीध्राणामुपवेशनम्	२५९
ब्रह्मवर्च्चसकामेष्टिः (१)	१११
ब्रह्मवर्चसकामेष्टिः (२)	११२
ब्रह्मा	१
ब्रह्मादिवपामार्जनम्	१४४
ब्रह्मौदननिर्वापः	५६
ब्रह्मौदनप्राशनम्	५६
ब्राह्मणाच्छंसिखरः	२३३
ब्राह्मणाच्छंसिचमसः	२३५
ब्राह्मणाच्छंसिचमसप्रभृतिभक्षणम्	२६७
ब्राह्मणाच्छंसिधिष्ण्यम्	२३३
भागनिधानम्	३५
भागप्रतिग्रहः	३५
भिक्ष्यमाणद्रव्यप्राप्तिकामेष्टिः	१११
भूतिकामेष्टिः (१)	१०९
भूतिकामेष्टिः (२)	१११
मङ्गलनामाह्वानम्	१६२
मदन्ती	९, १४
मदन्तीपाचनम्	२०६
मधुपर्कः	५१
मधुपर्कपूजा	५२
मध्यमस्वरः	३८
मध्यमोपसद्धोमः	२२१
मनोतृसूक्तम्	१४४
मन्त्रः	१७
मन्त्रप्रोक्षणम्	४७
मन्त्रमार्जनम्	४७
मन्त्राचमनम्	४७
मन्थनप्रैषः	१२५
मन्थिग्रहपात्रम्	२३४
मन्थिपात्रे रसग्रहणम्	२५४
मन्द्रस्वरः	२९
मरुत्वतीयग्रहद्वयप्रचारः	२७४
मरुत्वतीयतृतीयग्रहप्रचारः	२७४
मरुत्वतीयतृतीयपात्रेसोमग्रहणम्	२७४
महायज्ञकामेष्टिः	११२
महावीरः	१८८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
महावीरनिर्माणम्	१८६
महावीरप्राङ्नयनमन्त्राः	२१४
महावीरप्रादेशकरणम्	२१०
महावीरप्रेक्षणमन्त्राः	२११
महावीरस्य प्रदक्षिणगमनम्	२११
महावीराङ्गारपरिश्रयणम्	२१०
महावीराज्यपूरणम्	२०६
महावीराञ्जनम्	२०६
महावीरादीनां तापनादिकर्म	१८८
महावीराप्यायनम्	२११
महावीरे गोपयः प्रक्षेपः	२१३
महावीरोत्थापनम्	२१३
महावेदिः	२२२
महावेदिगमनम्	२२४
महावेद्यां बर्हिरासादनादिप्रेषः	२३४
महाहविरिष्टिः	६८
मातृकापूजनम्	४६
माध्यन्दिनपवमानस्तोत्रोपाकरणम्	२७५
माध्यन्दिनपवमानार्थसदःप्रसर्पणम्	२७०
माध्यन्दिनसवनाभिषवः	२६६
माध्यन्दिनसवनीयनाराशंसादनम्	२७४
माध्यन्दिनसवनीयनिर्वापः	२६६
माध्यन्दिनसवनीयप्रचारः	२७१
माध्यन्दिनसवनीयप्रेक्षणवाचनादि	२६८
माध्यन्दिनसवनीयसोमग्रहणम्	२६६
माध्यन्दिनीयचमसोन्नयनप्रैषः	२७१
माध्यन्दिनीयप्रस्थितयाज्याप्रचारः	२७२
माध्यन्दिनीयशुक्रामन्थिप्रचारः	२७२
मारुतीप्रचारः	६१
मारुतीयागः	६१
मारुतीवेदिः	८३
मार्जालीयः	२३१
मार्जालीयखरः	२३३
मार्जालीयधिष्ण्यम्	२३३
मासाहुतयः	७६
माहेन्द्रग्रहग्रहणम्	२७५
माहेन्द्रग्रहप्रचारः	२७५
मुखविमार्जनम्	४०
मुखसंमार्गः	२७
मुसलम्	८
मेक्षणम्	६
मेथीनिहननम्	२२६
मेथ्यां हविर्घानवन्धनम्	२२६
मैत्रावरुणखरः	२३३
मैत्रावरुणग्रहपात्रम्	२३४
मैत्रावरुणचमसपूरणम्	२४६
मैत्रावरुणचमसादिभक्षणम्	२६७
मैत्रावरुणदण्डप्रदानम्	१४०
मैत्रावरुणधिष्ण्यम्	२३३
मैत्रावरुणपात्रे रसग्रहणम्	२५४
मैत्रावरुणप्रचारः	२६०
यजनीयदिनम्	११६

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
यजमानः	१
यजमानकर्तृकगार्हपत्योपस्थानम्	४२
यजमानकर्तृकमन्वाहार्यविक्षणम्	३६
यजमानघर्मोपस्थानम्	२२६
यजमानचमसः	२३५
यजमानभागः	३३
यजमानभागप्राशनम्	४०
यजमानशासनम्	१९५,२०७
यजमानस्थानम्	६
यजमानस्य केशश्मश्रुवपनम्	१९१
यजमानस्य लोमादिसंमर्शनम्	१६३
यजमानस्य संस्रावेणाभिषेचनम्	१६२
यजमानस्य सदस्युपवेशनम्	२५८
यजमानहस्तसम्मर्शनम्	१६२
यजमानावर्तनम्	४२
यज्ञकामेष्टिः	११२
यज्ञपात्राणि	१५
यज्ञयोगमन्त्रः	१६
यज्ञविमोकः	४३
यज्ञस्य पुनरालम्भः	४३
यज्ञायुधानि यज्ञपात्राणि वा	१५
यज्ञोपवीतम्	२२
यथायतन-सादनम्	२७
यथोपपादम्	२१४
यमाः	३०
यवाग्रयणेष्टिः	७४
याज्याः	२९
याज्यापठनप्रकारः	२९
यूपच्छेदनम्	११७
यूपपरिव्ययणप्रैषः	१२३
यूपप्रोक्षालनम्	१२२
यूपप्रोक्षणम्	१२२
यूपयोग्यपलाशशाखोपस्थानम्	११७
यूपरशना	११९
यूपशकलप्रक्षेपः	१२२
यूपशाखाञ्जनम्	११७
यूपसंस्कारः	१२४
यूपसंहननम्	१२३
यूपाञ्जनप्रैषः	१२३
यूपाञ्जनीया ऋचः	१३९
यूपाञ्जनीयानुवाचनम्	१३९
यूपावटपरिलेखनम्	१२०
यूपावटम्	१२०
यूपाहरणम्	११८
यूपाहुति	११७
यूपोच्छ्रयणप्रैषः	१२३
यूपोच्छ्रयणम्	१२३
योक्त्रम्	१०
योगः	१७
रराटीबन्धनम्	२२९
रराटीशब्दार्थः	२२९
रसकामेष्टिः	११०
रक्षोघ्नेष्टिः	१०८
राष्ट्रभृद्धोमः	५५
रुक्मकामेष्टिः	१०९
रुक्मोपगूहनम्	२०९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
रौहिणकपाले	१८८
रौहिणपुरोडाशश्रपणम्	२०६
रौहिणपुरोडाशासन्दनम्	२०६
लब्धहिरण्येष्टिः	११४
वत्सापाकरणम्	१२
वनस्पतिप्रैषः	१४१
वनस्पतियागः	१३५
वनस्पतियाज्याप्रैषः	१४५
वपा	१२८
वपानुयाज्याप्रैषः	१३०
वपाप्रक्षालनम्	१२६
वपाप्रचारः	१३०
वपाप्रतितदनम्	१२६
वपामार्जनम्	१३१
वपायागः	१३०,१६६,१८०
वपायाज्याप्रैषः	१३०,१४४
वपालंकरणम्	१२६
वपाश्रपणम्	१२६
वपाश्रपणी	११६
वपाश्रपण्यनुप्रहरणम्	१३०
वपासादनम्	१२६
वपोत्खेदनम्	१२८
वपोद्धरणम्	१२८
वरः	४४
वराहविहतम्	१८६
वरुणप्रघाससम्भाराः	८२
वल्मीकवपाः	१८६
वषट्कारः (दैवः)	२६
वषट्कारः (पित्र्यः)	२६
वषट्कारानुमन्त्रणम्	३१
वसतीवरीग्रहणम्	२३७
वसतीवरीसादनम्	२३८
वसतीवरीस्थापनम्	२३८
वसतीवर्यादिहविर्धानप्रवेशनम्	२४७
वसाहोमः	१३४
वसुकामेष्टिः	११०
वाजनम्	२५
वाजिनः	७८
वाजिनयागः	८०
वायव्यानि पात्राणि	१६५
वायूपस्थानम्	१३८
वारुणीप्रचारः	६१
वारुणीयागः	६१
वाशनादिनिमित्ताहुतयः	१२७
विकृतिः	३०
विच्छिन्नाग्न्याधानम्	६६
विधुरः	७१
विष्टरः	५०
विष्णुक्रमक्रमणम्	४२
विष्णुक्रममन्त्राः	४२
विधृतिः	२१
विहरणपक्षः	६३
विहारः	२
विहाराव्यावृत्तिः	२३
वीतवत्पदान्ताः प्रयाजाः	३१
वृद्धिवाचनम्	२५०
वृद्धिश्राद्धम्	४४
वेदः	१०
वेदपरिवासनानि	१०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
वेदवाचनम्	३९
वेदशिरःकरणकनाभ्यालम्भनम्	४०
वेदस्तरणम्	४१
वेदिकरणः (मन्त्रः)	१९
वेदिकरणम्	२०
वेदिकारप्रैषः	२२२
वेद्या उत्तरं पार्श्वम्	६
वेद्या दक्षिणं पार्श्वम्	६
वेद्यां पन्नेजनीसादनम्	२४७
वैकङ्कतपरिधानम्	२१०
वैश्वदेवग्रहप्रचारः (प्रातःसवनीय)	२६६
वैश्वदेवग्रहप्रचारः (तृ०-स०)	२७९
वैश्वदेवग्रहे सोमग्रहणम्	२६६
वैश्वदेवपर्व	७७,८१
वैश्वानरपार्जन्येष्टिः	७६
व्यञ्जनानि	२९
व्यस्तव्याहृतिहोमः	१६२
व्यूहनम्	२५
व्रतम्	१९१
व्रतसंज्ञकपयोभक्षणम्	१९८
व्रतोपायनम्	११
व्रीहिश्यामाकाग्रयणेष्टी तन्त्रेण	७४
व्रीह्याग्रयणेष्टिः	७४
संस्थाजपः	४१
संकल्पः	११६
संज्ञपनम्	१२७
संज्ञप्तपश्वाप्यायनम्	१२८
संज्ञप्ताहुतिः	१२८
संज्ञानीष्टिः	११३
सदसिप्रसर्पणम्	२५९
सदसिब्रह्मादिचमसनयनम्	२६२
सदोनिर्माणम्	२३०
सदोऽभिमर्शनम्	२३१
सद्यस्कालपशुप्रकारः	११९
सनिः (यज्ञार्थं याचनीयं द्रव्यम्)	१९६
सनियाचनम्	१६
सन्ततम्	२४
सन्ध्यक्षराणि	२९
सन्नयन्	१२
सप्रहरणप्रैषः	१२५
समित्	२०
समित्प्रैषः	१४०
समिधः	१३
समिष्टयजुः (मन्त्रः)	४१
समिष्टयजुर्होमः	४१
समाहननम्	१६,१८
समारोपणपक्षे	१३८
सम्भारमन्त्राः	२०५
सम्भारसम्भरणम्	५३
सम्भाराः	५२
संयवनम्	१८
सरस्वतीयाज्याप्रैषप्रैषः	१५५
सरस्वत्यनुवाक्याप्रैषः	१५५
सर्वकर्तृकधर्मोपस्थानम्	२११
सर्वपात्रस्थसोमानां प्रत्येकमुपस्थानम्	२५७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
सर्वपात्रस्थसोमोपस्थानम्	२५६
सर्वौषधिहोमः	५६
सवनीयधानाश्रपणम्	२४४
सवनीयपञ्चहोतृहोमः	२४२
सवनीयपशुवपाप्रचारः	२५८
सवनीयपुरोडाशनिर्वापः	२४३
सवनीयपुरोडाशादिद्रव्याणां प्रोक्षणादीनि	२४३
सवनीयपृष्ठ्यास्तरणम्	२५८
सवनीरप्रातर्दोहः	२४३
सवनीयाङ्गमैत्रावरुणादिप्रवरणम्	२५८
सवनीयामिक्षावाजिनकरणम्	२४४
सवनीयेडाभक्षणम्	२६२
सवनीयेन सह पुरोडाशनिर्वापः	२५८
संवापः	६
सवात्ये गावौ	६७
सवनेष्टिः	१०७
सव्यावृत्	२२
सान्तपनेष्टिः	६६
सारस्वतहोमः	६६
सान्नाय्यम्	१२
सामिधेन्यः (ऋचः)	२३
सारस्वतकुष्टिक शापहोममन्त्राः	१६०
सारस्वतहविःप्रचारः	१७५
सिद्धघर्ममहावीरग्रहणम्	२१३
सुत्यारम्भप्रैषः	२४०
सुत्यार्थप्रबोधनम्	२४०

पदार्थः	पृष्ठम्
सुत्यासंकल्पः	२३६
सुत्यासामग्रीसम्पादनप्रैषः	२३८
सुरभिमदिष्टिः	१०८
सुराग्रहभक्षविधिः	१५७
सुराग्रहयाज्याप्रैषप्रैषः	१५६
सुराग्रहहोममन्त्रौ	१५६
सुराग्रहहोमानुमन्त्रणम्	१५६
सुराग्रहाः	१४६
सुराग्रहानुवाक्याप्रैषः	१५६
सुराग्रहोपस्थानम्	१५३
सुराधारोपस्थानम्	१५७
सुरापयसोरुत्पवनम्	१५२
सुरास्थानीयपयोग्रहासादनम्	१५३
सूक्तवाकप्रैषः	३७
सूक्तवाकः	३७
सोमक्रयणम्	२०२
सोमक्रयणाभिमर्शनम्	२०१
सोमक्रयण्यनुगमनम्	२००
सोमक्रयण्यनुमन्त्रणम्	२००
सोमक्रयाहुतिः	१६६
सोमद्रप्सस्कन्दनानुमन्त्रणम्	२५४
सोमप्रवाकः	१८४
सोमप्रवाकवरणम्	१८३
सोममधुपर्कः	२०५
सोमराजोपावरोहणम्	२४२
सोमविमानम्	२०१
सोमवेष्टनम्	२०१
सोमाप्यायनम्	२०६
सोमाभिषवतृतीयपर्यायः	२५२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
सोमाभिषवद्वितीयपर्यायः	२५२
सोमभिषवप्रथमपर्यायः	२५२
सोमावेक्षणम्	२०२
सौत्यपुरोडाशीयपात्रासादनम्	२४३
सौत्यपुरोडाशीयसंवापः	२४४
सौत्यसायंदोहकरणम्	२३९
सौत्येध्मार्बर्हिःसम्भरणम्	२३९
सौत्रामणीकालः	१४८
सौत्रामणीकर्मसम्बन्धिनः पदार्थाः	१४९
सौत्रामणीदेवतावाहनम्	१७१
सौत्रामणीपशवः	१५४
सौत्रामणीपशुश्रपणप्रैषः	१५५
सौत्रामणीपाशुकपात्राणि	१५१
सौत्रमणीपूर्वपशुः	१५०
सौत्रामणीपूर्वाङ्गादित्येष्टिः	१७१
सौत्रामणीपूर्वेष्टिः	१५०
सौत्रामणीप्रधानैन्द्रवपायागः	१७४
सौत्रामणीप्रयाजमन्त्राः	१६७
सौत्रामणीसंकल्पः	१४९
सौत्रामणीसम्बन्धिमहापितृयज्ञः	१६६
सौत्रामणीसारस्वतयागः	१७४
सौत्रामणीसूक्तवाकः	१७७
सौत्रामणीसूक्तवाकप्रैषः	१७७
सौत्रामण्यङ्गपितृतर्पणम्	१५८
सौत्रामण्यङ्गपितृयज्ञः	१७८
सौत्रामण्यङ्गपित्रुपस्थानम्	१५८
सौत्रामण्यङ्गपैतृकहोमः	१५९
सौत्रामण्यङ्गवारुणपुरोडाशयागः	१७६
सौत्रामण्यङ्गसावित्रपुरोडाशयागः	१७६
सौत्रामण्यवभृथाहुतयः	१६५
सौत्रामण्याश्विनग्रहप्रचारः	१७५
सौत्रामण्याश्विनयागः	१७३
सौत्रामण्याश्विनानुवाक्या	१७४
सौत्रामण्युत्तराङ्गैन्द्रपशुः	१६६
सौत्रामण्युत्तरादित्येष्टिः	१६६
सौत्रामण्यङ्गैन्द्रपुरोडाशयागः	१७६
सौमिक उत्करः	२२२
सौमिकदक्षिणादानम्	२७३
सौमिकपरिधिस्रुगभिमर्शनम्	२४१
सौमिकपुरोडाशशकलदानम्	२७९
सौमिकर्त्विग्वरणम्	१८४
सौमिकवाजिनप्रचारः	२६२
सौमिकोऽवभृथः	१६४
सौमिक्युत्तरवेदिः	२२२
सौम्याज्यभागप्रैषः	१४३
सौर्यपात्रेसोमग्रहणम्	२५५
सौर्यातिग्राह्यग्रहचारः	२७५
स्तोकानुवचनम्	१४३
स्तोकाहुतिः	१२९
स्तोत्रान्तरवाचनम्	२५६
स्थण्डिलम्	४४
स्थालीपाकः	७०
स्थाल्युपस्थानम्	१७५

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्
स्पयः	७
स्रक्तयः (=महायज्ञवेदिकोणाः)	६६
स्रुक्	१०
स्रुगादानः (निगदः)	२८
स्रुगासादनम्	२१
स्रुग्व्यूहनम्	३७
स्रुवः	८
स्रौवाधारः	२५
स्वरः	२६
स्वरुः	१२४
स्वरुहोमः	१३६
स्वस्तिवाचनम्	४७
स्वाहाकृतीप्रैषः	१४३
स्विष्टकृद्धोमः	३३
स्विष्टकृन्निगदः	३३
शंसनार्थाध्वर्युप्रश्नः	२६५
शंयुवाकः	३८
शंयुवाकप्रैषः	३८
शकटपरिवहनम्	२०३
शकटेसोमस्थापनम्	२०३
शकलक्षारणम्	२१५
शकलानुप्रहरणम्	२१५
शफे	२१८
शमितृप्रैषः	१२७
शमितृप्रश्नोत्तरे	१३२
शम्या	८
शस्त्रप्रायश्चित्तम्	२६५
शस्त्रान्तेवाचनम्	२६५
शाखापवित्रम्	१२

पदार्थः	पृष्ठम्
शाखाहरणम्	१२
शामित्रोऽग्निः	१२६
शालाप्रवेशः	१८५
शालामुखीयः	१३१
शुक्रग्रहपात्रम्	२३४
शुक्रपात्रे रसग्रहणम्	२५४
शुक्रामन्थिग्रहणश्	२६०
शुक्रामन्थिप्रचारः	२६१
शुनासीरीयम्	१०६
शूर्पम्	८
शूलकर्म	१६४
श्यामाकाग्रयणेष्टिः	७३
श्वपरशुः	१२
षडवत्तम्	३४
षड्ढोता	११७
हविःशेषप्राशनम्	२७२
हविःशेषादिभक्षणम्	२६४
हविरिधिश्रयणप्रैषः	२१६
हविरलंकरणम्	१३३
हविरानयनार्थगमनमन्त्राः	१३३
हविरासादनम्	२२
हविरुद्वासनम्	३६
हविर्धानगृहनिर्मितिप्रकारः	२२६
हविर्धानप्रवर्तनम्	२२८
हविर्धानप्रवर्तनप्रैषः	२२८
हविर्धाने वसतीवर्यादिसादनम्	२४७
हविर्धाने वायव्यादिसादनम्	२४०
हविषां स्रुचां च विपरिहरणम्	१०२
हविष्कृत्	१८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पदार्थः	पृष्ठम्	पदार्थः	पृष्ठम्
हिरण्यलाभकामेष्टिः	११४	होतृचमसः	२३५
हृदयशूलम्	११९	होतृचमसादिषु प्रचरणीशेषा-	
हृदयशूलोपगूहनम्	१३७	नयनम्	२४६
हृदयाभिमर्शनम्	४२	होतृचमसीयामिश्रणम्	२५०
होता	२	होतृचमसीयाप्रेक्षणवाचनम्	२४८
होतृकर्तृकनित्यप्रायश्चित्तहोमः	४१	होतृधृष्ण्यम्	२३३
होतृखरः	२३३	होतृवाद्यवादनप्रैषः	२७१
		होतृषदनम	२७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

* ॐ *

श्रौतपदार्थ-निर्वचनम्

ऐष्टिक-पदार्थाः

१. **इष्टिः**—इष्टिशब्द ऋत्विक्चतुष्टयसंपाद्यसपत्नीकयजमानकर्तृककर्मनामधेयम् ॥

२. **यजमानः**—तत्र 'यजते ऽसौ यजमानः' इति विग्रहे यजमानशब्दः स्वार्थकर्मानुष्ठानकर्तृवाचकः ।[1]

३. **अध्वर्युः**—ऋत्विङ्मध्ये यजमानो यं पूर्वं वृणीते, कर्मण आरम्भसमाप्ती च यः करोति अध्वरं यज्ञं युनक्तीति विग्रहेण[2], सोऽध्वर्युरित्युच्यते ।

४. **ब्रह्मा**—कर्मकाले यजमान आहवनीयस्य दक्षिणत उदङ्मुख उपावशति तस्य पूर्वस्यां दिशि तत्रैवोदङ्मुखो दक्षिणोत्तरिणोपस्थेन[3] दक्षिणंऽङ्के उत्तानं सव्यं पाणिं प्रागग्रं निधाय तदुपरि तथैव न्यञ्चं[4] दक्षिणं निधाय

---

१. कर्मजन्यफल–भोक्तेति यावत् ।

२. अयं विग्रहो यास्काचार्येण प्रदर्शितः—'अध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताऽध्वरं कामयत इति वाऽपि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम ध्वरति हिंसाकर्मा तत्प्रतिषेधः (निरु० १।८) इति । इदमयुक्तमित्यपरे यजमानस्याध्वरमिच्छतीत्यर्थे छन्दसि परेच्छायामपि क्यज् वक्तव्यः (महो० ३।१।८ वा०) इति वार्तिकेनाध्वरशब्दात्कव्यचि क्याच्छन्दसि–(अष्टा० ३।२।१७०) इत्यनेनो प्रत्ययेऽतो लोपे कव्यध्वरपृतनस्यर्चिलोपः–(अष्टा० ७।४।३९) इति सूत्रेणाध्वराकारस्य लोपेऽध्वर्युशब्दः सिद्धो भवतीति कव्यध्वरेति सूत्रस्योदाहरणमध्वर्यु वा मधुपाणिमिति प्रदर्शयतः कौमुदीकारस्य संमतम् ।

अथवा कव्यध्वर(अ० ७।४।३९)इति सूत्रे मनोरमायां "मृगय्वादिगणेऽध्वर्युशब्दः पठ्यते तत्र व्युत्पत्यन्तरं बोध्यम्" इत्युक्ते मृगं यातीतिवद् अध्वरं यातीत्यध्वर्युशब्दः कुप्रत्ययान्तः । तत्राध्वराकारलोपोपि निपातनादिति, उभयथापि मूल प्रदर्शितव्युत्पत्याऽध्वर्युशब्दस्यासिद्धेः । चरणव्यूहे तु "मन्त्रब्राह्मणकल्पानामज्ञानां यजुषामृचाम् । षण्णां यः प्रविभागज्ञः सोऽध्वर्युः कृत्स्नमुच्यते" इत्युक्तम् ।

३. दक्षिणं च तदुत्तरं च दक्षिणोत्तरं तद्वता जानुना । उत्तरं सव्यजानोरुपरिस्थापितम् ॥

४. अर्थात् न्युब्जम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

य आस्ते सर्वदा कर्मणि दत्तचित्तः प्रणीताप्रणयनादौ अभ्यनुज्ञाकर्ता ऋग्यजुःसाममन्त्रकर्मभ्रेषे गार्हपत्यदक्षिणाग्न्याहवनीयेषु[1] क्रमेण [2]प्रायश्चित्ताहुतिहोमकर्ता स ब्रह्मपदवाच्यः ॥

५. **होता**—यस्तु वेद्युत्तरश्रोण्युत्तरतः प्राङ्मुखो दक्षिणोत्तरिणोपस्थेन उपविशति अवकाशवदङ्गुलौ संहितौ पाणी हृदयदेशे अङ्के वा धारयति सामिधेनीः[3] प्रयाजान्[4] आज्यभागयाज्यापुरोनुवाक्याः[5] सूक्तवाकं[6] शंयुवाकं[7] च पठति स होतृपदवाच्यः ॥

६. **आग्नीध्रः, अग्नीद् वा**—यश्च ऊर्ध्वाग्रमसिवत् स्फ्यं[8] दक्षिणहस्ते धारयन् उत्करदेशे च दक्षिणामुखस्तिष्ठति अध्वर्युणा आश्रवणे कृते अस्तुशब्दपूर्वकश्रौषट्शब्दोच्चारणरूपप्रत्याश्रवणं करोति स आग्नीध्र इति अग्नीदिति चोच्यते ॥

७. **पत्नी (यजमान-पत्नी)**—यजमानस्य स्त्री यजमानवद्यज्ञफलभोक्त्री गार्हपत्यस्य पश्चिमदक्षिणे देशे पूर्वमुदङ्मुखी ऊर्ध्वजानुरुपविशति, ततः पयस्वत्याचमनादि गार्हपत्ये समिदाधानान्तं कर्म करोति, ततस्तृणनिरसनं कृत्वा तत्रैवोर्ध्वजानुः प्राङ्मुख्युपविशति, पत्नीसंयाजप्रचारानन्तरं अवभृथस्थानीये अग्निहोत्रहवणीजलनिनयने पत्न्यञ्जलौ [9]योक्त्रमाधाय होत्रा कृते स्वयं पूर्ववत्समिदाधानं पुनः परिषेकान्तं कृत्वा पूर्वं यथा वेद्युत्करयोर्मध्ये[10] मार्गेण प्रविष्टा तथा तेनैव मार्गेण विहारान्निर्गच्छति सा पत्नी भवति ॥

८. **विहारः**—यागार्थं यत्र यत्र यावती भूमिः श्रुत्यादिभिः परिमाणविशेषविशिष्टत्वेन विहिता तत्र तत्र तावती भूमिः विहारपदवाच्या ॥

---

१. गार्हपत्यादिषु प्रायश्चित्ताहुतिदातृत्वं ब्रह्मणः केवलं बौधायनीयानामेव, न त्वापस्तम्बहिरण्यकेशिप्रभृतिसूत्रानुसारिणामिति सामान्यब्रह्मलक्षणे चिन्त्यमेतत् ॥ कातीयानां त्वनादिष्टहोममात्रं ब्रह्मकर्तृकम् ।

२. पदार्थः—६१ । ३. पदार्थः—१८५ । ४. पदार्थः—२४७ ।

५. आज्यभागः पदार्थः—२५७; याज्यापदार्थः—३३३; पुरोनुवाक्यापदार्थः— २२८ ।

६. पदार्थः—३०६ । ७. पदार्थः ३११ । ८. पदार्थः—३४ ।

९. पदार्थः—६५ । १०. वेदि-पदार्थः—३३; उत्करपदार्थः— २५ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९. **अङ्गुलम्**—परस्परसंश्लिष्टानां चतुर्दशसंख्याकानां अणूनामकानां धान्यविशेषाणां यत्परिमाणं तद्, अथवा कोशसंस्थानवत् स्थापितानां पृथुप्रदेशेन संश्लिष्टानां चतुस्त्रिंशत्संख्याकानां तिलानां यत्परिमाणं तदङ्गुलपदवाच्यं परिमाणमिति बौधायनशुल्वसूत्रे प्रसिद्धम् ॥

१०. **पदम्**—पञ्चदशाङ्गुलं पदमुच्यते ॥

११. **अग्निहोत्रशाला**—शुद्धे[1] रमणीये देशे समचतुरस्रा दीर्घचतुरस्रा

---

१. कातीयानां दर्शपूर्णमासविहारनिर्माणप्रकारः—गार्हपत्यस्य (प्रत्यक्स्थस्य मध्यादाहवनीयस्य (प्राक्स्थस्य) मध्यपर्यन्तमन्तरमेकादश द्वादश वा प्रक्रमाः 'प्रक्रमो द्वादशाङ्गुलः' इति परिशिष्टे । प्रक्रमः पदमित्यनर्थान्तरम् । गार्हपत्यकुण्डं सार्द्धत्रयोदशाङ्गुलमितकर्कटिकभ्रामणेन वृत्तं कार्यम् । आहवनीयस्य तु समचतुरस्रं तस्य व्यासविस्तृती चतुर्विंशाङ्गुलमिते । गार्हपत्याहवनीययोर्मध्ये यावतीरज्जुस्तावत्या रज्ज्वाः षड्भागान्कृत्वा स्वषष्ठभागं तस्यां संयोजयेत्, एवं सप्तभागाः समाजाताः । ततः सप्तमभागसहितां रज्जुं त्रेधाविभज्य तृतीयांशद्वयेऽपि चिह्नं कृत्वा प्रान्तयोः पाशौ कृत्वा गार्हपत्यमध्यस्थितशङ्कौ आहवनीयमध्यस्थित मध्यशङ्कौ च पाशौ दत्वा गार्हपत्यात् प्रथमचिह्ने दक्षिणस्यां कर्षिते तत्र चिह्नं कार्यम् (अयं दक्षिणाग्निकुण्डमध्यः) तच्चिह्नादुत्तरभागे सार्द्धनवाङ्गुलप्रदेशे शङ्कुर्देयः । तत्र पूर्वापरं रज्जुर्देया । शङ्कुसकाशाद्यवाधिकैकोनविंशाङ्गुलैर्भ्रमणं कार्यमुत्तरार्द्धस्य त्यागस्तेन अर्द्धचन्द्राकारो दक्षिणाग्निखरः सम्पद्यते । आहवनीयमध्यशङ्कोः सकाशात्पश्चिमस्यां त्र्यरत्निपरिमिते देशे शङ्कुर्देयः । तत्सकाशाद् दक्षिणस्यामुत्तरस्यां द्वयरत्निपरिमितेदेशे शङ्कुर्देयः । आहवनीयमध्यशङ्कुसकाशात्सार्द्धारत्निपरिमिते देशे दक्षिणत उत्तरतश्च शङ्कुर्देयः । चतुर्षु कोणस्थशङ्कुषु सूत्रार्पणाद्विषमचतुरस्रा वेदिः सिद्धयति । ततः प्राचीशङ्कुमारभ्य पश्चिमशङ्कुपर्यंतं कोणद्वयवेष्टनेन सूत्रं प्रदेयं तस्यार्द्धं कर्त्तव्यम् । अर्द्धपरिमितेन सूत्रेण प्राचीशङ्कुमारभ्य आग्नेयस्थशङ्कुवेष्टनेन दक्षिणतः, एवमीशानकोणस्थशङ्कुवेष्टनेनोत्तरतश्च शङ्कुः पृथक्पृथक् देयः । (इदमेव सङ्ग्रहमध्यम्) ताभ्यां शङ्कुभ्यां दलीभूतरज्जुचतुर्थांशेन वेदिमध्ये सङ्ग्रहौ (अर्द्धचन्द्राकारौ) कार्यौ । तत्पश्चाद् द्वादशाङ्गुलमवशिष्टाभूमिः श्रोणिरित्यभिधीयते । पुरस्तादाहवनीयं यावदंस इत्यभिधीयते । तत आहवनीयमध्यात् प्रथमचिह्ने उत्तरस्यां कर्षिते तत्र चिह्नं कार्यं (अयमुत्करमध्यः) तच्चिह्नात् त्र्यङ्गुलकर्कटभ्रामणेन वृत्त उत्करः कार्यः । अयं च द्व्यङ्गुलखातो भवति । तत अग्निकोणादारभ्य ईशानकोणपर्यन्तं वेद्यां संयोज्य (मिश्रयित्वा) सार्द्धत्रिहस्ता वेदिः सम्पादनीया । सङ्ग्रहौ वर्जयित्वा वेद्यां सर्वत्र त्र्यङ्गुलः खातो विधेयः । कुण्डेषु मेखला द्वादशाङ्गुलोच्चा चतुरङ्गुलविस्तारा एकैव भवतीति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वा अग्निहोत्रहोमशाला कर्तव्या वास्तुशास्त्रोक्तरीत्या। तस्याः प्राच्यां दक्षिणस्यां च दिशि एकैकं द्वारं कार्यम्, सा अग्निहोत्रशालेति गीयते।[1]

१२. **गार्हपत्यायतनम्**—तस्यां शालायां पश्चिमभागे मध्यदेशे सप्तविंशत्यङ्गुलव्यासं मण्डलाकारं गार्हपत्यायतनं भवति॥

१३. **प्रथमा मेखला**—तस्य[2] बाह्यतः शुद्धमृत्तिकानिर्मिता षडङ्गुलिपरिमितोच्छ्राया षडङ्गुलपरिमितायामा प्रथमा मेखला भवति॥

१४. **द्वितीया मेखला**—तस्या उपरि पूर्वोक्तोच्छ्राया चतुरङ्गुलपरिमितायामा द्वितीया मेखला भवति॥

१५. **कुण्डम्**—तदेतन्मेखलाद्वयसंस्थानं कुण्डमित्युच्यते॥

१६. **गार्हपत्यः**—गार्हपत्यायतने स्थापितो ऽग्निर्गार्हपत्यनामको गृहपतिना यजमानेन संयुक्त इति व्युत्पत्त्या **गृहपतिना संयुक्ते ञ्यः**[3] इति सूत्रेण 'ञ्य' प्रत्ययात्॥

१७. **पृष्ठ्यासूत्रम्** गार्हपत्यस्य मध्यादारभ्य पूर्वस्यां दिशि ऋजुत्वेन नीयमानम् आहवनीयमध्यपर्यन्तं सूत्रं पृष्ठ्यासूत्रमित्युच्यते॥

१८. **पृष्ठ्या**—तादृशसूत्रस्य आधारभूतत्वेनोपलक्षिता भूमिगता रेखा पृष्ठ्या इति व्यवह्रियते॥

१९. **आहवनीयायतनम्**—पृष्ठ्यासूत्रस्य यस्मिन् देशे पूर्वोऽन्तः पतति स आहवनीयमध्यो भवति। आहवनीयमध्यशङ्कोः पूर्वस्यां दिशि एकः शङ्कुस्तथा पश्चिमायां दिशि च एकः शङ्कुः प्रादेशमात्रे देशे निखेयः। अरत्नीद्वयायामा उभयतःपाशा रज्जुः कर्तव्या। तस्या एकस्मात्पाशादारभ्य द्वादशाङ्गुलमिते देशे किंचिद्वर्णचिह्नं कार्यं तथा अष्टादशाङ्गुलमिते भागे चिह्नं कर्तव्यम्। पूर्वनिखातापाश्चात्यपौरस्त्यशङ्क्वोः पाशौ प्रतिमोचनीयौ। तत्र चिह्नसमीपवर्ती पाशः पाश्चात्यशङ्कौ निधेयः। ततो द्वितीयचिह्ने सूत्रं गृहीत्वा दक्षिणत आकर्षणं कार्यं यस्मिन् देशे प्रथमलक्षणसंबन्धो

---

१. कातीयानां तु "**विंशत्यरत्निः शालास्यात्तदर्धेन तु विस्तृता। विमितं चतुरस्रं च स्याद् दशारत्निप्रमाणतः**" इति परिशिष्टोक्तपरिमाणमर्थात्परिमाणं वाऽग्न्यगारद्वयं पूर्वापरं कृत्वा पूर्वेऽग्न्यगारे पूर्वे पश्चिमे चेति द्वारद्वयं, द्वितीयेऽप्यगारे पूर्वे दक्षिणे चेति द्वारद्वयं कुर्यात्।

२. कातीयानां त्वेकैव मेखलेत्युक्तम्।

३. अष्टा० ४।४।९०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवेत् स आहवनीयायतनस्य नैर्ऋतकोणः। एवमुत्तरतो द्वितीयलक्षणे धृत्वा सूत्रमाकृष्य प्रथमं चिह्नं यत्र पतेत् स आहवनीयवायव्यकोणः। ततः तयोरेव शङ्कवोः तस्या एव रज्जोः पाशौ विपरीतौ निधाय अष्टादशाङ्गुलमिते चिह्ने रज्जुं धृत्वा दक्षिणत आकृष्य प्रथमचिह्नपातस्थानमाहवनीयस्याग्नेयकोणः। एवमेवोत्तरतः द्वितीयचिह्ने धृत्वा आकृष्य प्रथमलक्षणपातस्थानमाहवनीयस्यैशानः कोणः। एवं रीत्या संपन्नं चतुष्कोणमाहवनीयायतनमुच्यते॥

२०. **आहवनीय-कुण्डम्**—तस्य बाह्यतः गार्हपत्यकुण्डवद् द्विमेखलं चतुरस्रमाहवनीयकुण्डं भवति॥

२१. **आहवनीयः**—तन्मध्ये स्थापितोऽग्निः आहूयते ऽस्मिन्निति व्युत्पत्त्या मुख्यः[1] होमाधारत्वाद् आहवनीयपदवाच्यः॥

२२. **दक्षिणाग्नेरायतनम्**—पृष्ठ्यासूत्रस्य पञ्चमं षष्ठं वा भागम आगन्तुकम् अधिकं पृष्ठ्यासूत्रे संयोज्य उभयतःपाशां रज्जुं कृत्वा पुनः सर्वस्य सूत्रस्य पञ्चभागान् कृत्वा एकं पाशं गार्हपत्यमध्यशङ्कौ प्रतिमुच्य पञ्चधा विभाजिताया रज्जोरपरस्मादन्ताद् भागद्वये गते सति चिह्नं कृत्वा द्वितीयं पाशम् आहवनीयमध्यशङ्कौ नियोज्य चिह्ने सूत्रं धृत्वा दक्षिणत आकृष्य लक्षणसंपातस्थाने शङ्कुं निहन्यात्। ततः पञ्चदशाङ्गुलपरिमितां रज्जुम एकतः पाशां कृत्वा तस्मिन्निहते शङ्कौ तं पाशं प्रतिमुच्य तया रज्ज्वा मण्डलं परिलिखेत्। तस्य मण्डलस्योत्तररेखायाः पूर्वनिहितशङ्कोश्च मध्ये अन्यं शङ्कुं निहन्यात्। तस्या एव रज्ज्वाः पाशं तस्मिन् शङ्कौ प्रतिमुच्य पञ्चदशाङ्गुलपरिमितया तयैव रज्ज्वा अन्यन्मण्डलं परिलिखेत्। अस्य मण्डलस्य रेखा पूर्वकृतमण्डलरेखाया उपरि दक्षिणभागे उत्तरभागे च पतति तयोः संसर्गस्थानयोरेकं सूत्रं धृत्वा पश्चिमपूर्वायतसूत्रकृतरेखात उत्तरतो विद्यमानमण्डलभागं त्यजेत् मण्डलस्य दक्षिणतो विद्यमानो भागः पूर्वकृतमण्डलस्य च दक्षिणो भागः शूर्पाकारः संपद्यते स दक्षिणाग्नेरायतनं भवति॥

२३. **दक्षिणाग्निकुण्डम्**—तस्य बाह्यतः गार्हपत्यकुण्डवद् द्विमेखलं शूर्पाकारं दक्षिणाग्निकुण्डमित्युच्यते॥

२४. **दक्षिणाग्निः, अन्वाहार्यपचनो वा**—तन्मध्ये स्थापितो ऽग्निर्दक्षिणाग्निरन्वाहार्यपचन इति चोच्यते॥

---

१. प्रधानः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२५. **उत्करः**—पूर्वं पञ्चधा विभाजिताया रज्जोर्दक्षिणाग्न्यायतनसाधने यः पाशो गार्हपत्यमध्यशङ्कौ प्रतिमुक्तस्तं पाशम् आवहनीयमध्यशङ्कौ प्रतिमुच्य आहवनीयमध्यशङ्कुपाशं गार्हपत्यमध्यशङ्कौ प्रतिमुच्य पञ्चधा विभाजितरज्जोः द्वयोर्भागयोर्गतयोर्यत्पूर्वं चिह्नं कृतं तत्र सूत्रं धृत्वा उत्तरतआकर्षणीयं चिह्नसंसृष्टा भूमिः स्तम्बयजुर्हरणसमये दर्भशकलानि मृत्तिकासहितानि यथा क्षिप्तेऽवकाशे लोके प्रक्षिप्यते तथा विधिवचनात् तस्यां भूमौ प्रक्षिप्यन्ते। अत उत्किरन्त्यस्मिन् वेद्यादिसंबन्ध्यवकरादिकमिति व्युत्पत्त्या उत्कर इति गीयते ॥

२६ **यजमानस्थानम्**—तथास्थितं तदेव सूत्रं तस्मिन्नेव चिह्ने धृत्वा दक्षिणत आकर्षणीयम्, चिह्नसंसृष्टा भूमिः यागकाले यजमानस्य तत्रोपवेशनविधानाद् यजमानस्थानमित्युच्यते ॥

२७. **दक्षिणश्रोणिः**—आहवनीयायतनात्पश्चिमदिशि षण्णवत्यङ्गुलपरिमिते देशे शङ्कुर्निखातव्यः। तद्दक्षिणतो द्वात्रिंशदङ्गुलपरिमिते देशे एकः शङ्कुर्निखेयः। तथैवोत्तरतस्तावत्येव देशे द्वितीयः शङ्कुर्निखेयः। दक्षिणशङ्कुस्थानं दक्षिणश्रोणिरित्युच्यते ॥

२८. **उत्तरश्रोणिः**—उत्तरशङ्कुस्थानमुत्तरश्रोणिरिति गीयते ॥

२९. **दक्षिणांसः**—आहवनीयमध्यशङ्कोर्दक्षिणतश्चतुर्विंशत्यङ्गुलपरिमितदेशे एकः शङ्कुर्निखेयः। तथैवोत्तरतस्तावत्येव देशे अपरः शङ्कुर्निखेयः। दक्षिणशङ्कुस्थानं दक्षिणांस इत्युच्यते ॥

३०. **उत्तरांसः**—उत्तरशङ्कुस्थानमुत्तरांस इति गीयते ॥

३१. **वेद्या दक्षिणं पार्श्वम्**—ततः षण्णवत्यङ्गुलपरिमितां रज्जुं तावदागन्तुकभागामुभयतः पाशां कृत्वा मध्ये लक्षणं कृत्वा दक्षिणश्रोण्यंसशङ्क्वोः पाशौ प्रतिमुच्य लक्षणे रज्जुं गृहीत्वा दक्षिणत आकृष्य शङ्कुं तत्र निहन्यात्। तत उभौ पाशौ समस्य लक्षणशङ्कौ पाशद्वयं प्रतिमुच्य रज्जुमध्येन दक्षिणश्रोणिशङ्कोरारभ्य दक्षिणांसशङ्कुपर्यन्तं लिखेत्। एवंकृते या रेखा उत्पद्यते सा वेद्या दक्षिणं पार्श्वमिति व्यवह्रियते ॥

३२. **वेद्या उत्तरं पार्श्वम्**—तथैव तस्या रज्ज्वाः पाशौ उत्तरश्रोण्यंसशङ्क्वोः प्रतिमुच्य रज्जुमध्येन चिह्नितेन रज्जुमुत्तरत आकृष्य चिह्नसंपातस्थाने शङ्कुं निहन्यात्। तत उभौ समस्य अस्मिन्निहते शङ्कौ प्रतिमुच्य मध्यभागस्थचिह्नेन सूत्रं धृत्वा उत्तरश्रोणिशङ्कोरारभ्य उत्तरांसशङ्कुपर्यन्तं लेखां लिखेत्। सा लेखा वेद्युत्तरपार्श्वमित्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३३. **प्रथम-द्वितीय-मेखलास्वरूपम्**—अनया रीत्या दक्षिणोत्तर-पार्श्वयुक्ता दक्षिणोत्तरश्रोणिसहिता दक्षिणोत्तरांसयुक्ता उरोरूपशरीरावयवत्वेन उपनिषद्युक्ता यागकाले दर्भैराच्छादिता आज्यचरुपुरोडाशादिरूपहविरासादनाश्रयभूतावेदिरित्युच्यते। तस्या बाह्यतः **प्रथमा मेखला** चतुरङ्गुलोत्सेधा चतुरङ्गुलायामा मृत्तिकानिर्मिता भवति तस्य मेखलाया उपरि द्व्यङ्गुलोत्सेधा द्व्यङ्गुलायामा तथैव **द्वितीया मेखला** भवति।

३४. **स्फ्यः**—खदिरकाष्ठनिर्मितः अरत्निपरिमितो दीर्घश्चतुरङ्गुलपरिमितविस्तार आकारेण खड्गसदृशः स्फ्य इत्युच्यते॥

३५. **कपालानि**—पुरोडाशभर्जनार्थं मृत्तिकया निर्मितानि वह्नौ परिपक्वानि द्व्यङ्गुलोच्छ्रायाणि यस्मिन् पुरोडाशे यावन्ति विहितानि तानि सर्वाणि मिलित्वा गार्हपत्यपश्चाद्भूमौ गार्हपत्यायतनान्तः पश्चिमभागे वा उपधीयमानानि कपालपदवाच्यानि॥

३६. **एककपालः**—कस्मिंश्चित्पुरोडाशे एकमेव कपालं भवति। तत्र तदेकं कपालम् अश्वशफपरिमाणं अश्वशफाकारं उपधीयते स च पुरोडाशः श्रुतौ एककपाल इति गीयते॥

३७ **अष्टाकपालादयः**—पुरोडाशस्यानेककपालत्वे तु अश्वशफाकारता अश्वशफपरिमाणता च कपालसमूहे बोद्धव्या। तत्राष्टाकपाले प्रकृतिभूते पुरोडाशे प्रथमं कपालं चतुरस्रं मध्ये उपधीयते। तस्य पुरस्ताद् द्वितीयं शफाकारतासंपादनाय अर्धचन्द्राकारं, तृतीयं तु मध्यमस्य पश्चाद् द्वितीयसदृशं, चतुर्थं तु मध्यमस्य दक्षिणतस्तादृशमेव, पञ्चमं तु दक्षिणस्य पुरस्ताद्आग्नेयकोणे शफाकारतासंपत्तियोग्यं, षष्ठं तु दक्षिणस्य पश्चाद् नैर्ऋतकोणे समुदितस्य शफाकारतासंपत्तियोग्यं, सप्तमं तु मध्यमस्योत्तरार्धे पश्चिमभागे शफाकारतासंपत्तियोग्यम्, अष्टमं तु मध्यस्योत्तरार्धे पूर्वभागे एवमष्टौ कपालानि समुदितानि अश्वशफपरिमितानि अश्वशफाकाराणि भवन्ति। एवं नवकपालादिषु अष्टाकपालन्यूनकपालादिषु च कपालरचना कपालविभागश्च अश्वशफाकारतातत्परिमाणसंपत्तिसंभवेन कर्तव्यौ। एते च पुरोडाशास्तावत्सु कपालेषु भर्जनीयत्वादष्टाकपालादिपदवाच्या भवन्ति॥

३८. **अग्निहोत्रहवणी**—दैर्घ्ये प्रादेशमात्री अरत्निमात्री बाहुमात्री वा हस्त्योष्ठीत्वपक्षे अष्टाङ्गुलपरिमितबिला हंसमुखीत्वपक्षे वायसपुच्छकात्वपक्षे च पञ्चाङ्गुलपरिमितबिला चतुरङ्गुलपरिमितबिला वा बिलावशिष्टभागेन दण्डयुक्ता विकङ्कतकाष्ठेन निर्मिता अग्निहोत्रहोमसाधनत्वादग्निहोत्रं हूयतेऽनयेति करणव्युत्पत्त्या ऽग्निहोत्रहवणीत्युच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३९. **शूर्पम्**—वंशनिर्मितं व्रीह्यादीनां पुरोडाशादिसंबन्धिनां निस्तुषकरणोपयोगि शूर्पमित्युच्यते ॥

४०. **कृष्णाजिनम्**—कृष्णमृगस्य चर्म व्रीह्याद्यवघातकाले उलूखलस्याधःस्थापनोपयोगि कृष्णाजिनमिति कथ्यते ॥

४१. **शम्या**—खदिरकाष्ठनिर्मिता षट्त्रिंशदङ्गुलपरिमितायामा अग्रभागे अष्टास्वङ्गुलिषु [1]कुम्बाष्टकयुता तण्डुलादिपेषणकाले दृषदोऽधस्तात् स्थापनायोपयुज्यमाना आग्नीध्रकर्तृकदृषदुपलादिसमाहननादौ करणभूता शम्यापदवाच्या ॥

४२. **उलूखलम्**—पलाशकाष्ठनिर्मितं द्वादशाङ्गुलपरिमितोच्छ्रायं उपरितनार्धभागे बिलयुक्तं चरुपुरोडाशसंबन्धिव्रीह्यादिकण्डनोपयोगि उलूखलमित्युच्यते ॥

४३. **मुसलम्**—उलूखलार्धत्रिगुणायामं खदिरकाष्ठनिर्मितं कण्डनोपयोगि मुसलमित्युच्यते ॥

४४. **दृषद्**—पाषाणमयो पेषणकाले पेषणीयद्रव्याश्रयभूता दृषदित्युच्यते ॥

४५. **उपला**—पाषाणनिर्मिता पेषणसाधनभूता उपला कथिता ॥

४६. **जुहूः**—पलाशकाष्ठनिर्मिता अग्निहोत्रहवणीसदृशी मुख्यहोमकरणत्वात् हूयतेऽनयेति व्युत्पत्त्या जुहूपदवाच्या ॥

४७. **उपभृत्**—अश्वत्थकाष्ठनिर्मिता जुहूतुल्या उप समीपे भ्रियते भ्रियत इति व्युत्पत्त्या होमकाले अध्वर्युणा सव्यहस्तेन होमार्थधृतदक्षिणहस्तसंबन्धिजुह्वाः समीपे धारणात् उपभृदिति भण्यते ॥

४८. **स्रुवः**—खदिरकाष्ठनिर्मितः अरत्निमात्रो दीर्घः अग्रभागे अङ्गुष्ठपर्वमात्रवर्तुलबिलयुक्तः आज्यहोमादौ करणभूतः। स्रवत्याज्यादिद्रव्यमस्मादिति व्युत्पत्त्या स्रुवपदवाच्यः ॥

४९. **ध्रुवा**—विकङ्कतवृक्षसंबन्धिकाष्ठेन निर्मिता जुहूसदृशी होमाद्यर्थं स्रुवेण गृह्यमाणस्याज्यस्याधारभूता यागसमाप्तिपर्यन्तं वेद्यां विद्यमानतया स्थिरत्वदर्शनात् ध्रुवति अप्रचलिता भवतीति व्युत्पत्त्या ध्रुवापदवाच्या ॥

---

१. कुम्बो वर्तुलग्रन्थिसदृशाकारः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५०. **प्राशित्रहरणम्**—खदिरकाष्ठनिर्मितं प्रादेशपरिमितं गोकर्णाकारं चतुरगङ्गुलपरिमितदण्डयुक्तम् प्राशित्रं, नाम ब्रह्मणे दीयमानो हुतशेषहविर्भागः स ह्रियते ऽनेनेति करणव्युत्पत्त्या प्राशित्रहरणपदवाच्यम् ॥

५१. **इडापात्रम्**—अश्वत्थकाष्ठनिर्मितं चतुरङ्गुलपरिणाहं पदपरिमितायामबिलयुक्तं चतुरङ्गुलदण्डं इडाया आधारत्वात् इडापात्रमित्युच्यते ॥

५२. **इडा**—हुतहविःशेषादवदाय इडापात्रे स्थाप्यमानो हविर्भाग इडेत्युच्यते ॥

५३. **मेक्षणम्**—अश्वत्थकाष्ठनिर्मितं अरत्निपरिमितं अग्रभागे चतुरङ्गुलचतुस्रफलकयुत भर्जनपात्र्यां समुप्तस्य पिष्टस्य मदन्तो (पदार्थ ५५)-भिरद्भिः संमेलनकरणादौ करणतया विहितं फलकाविशिष्टभागदण्डयुतं मेक्षणपदवाच्यम् ॥

५४. **संवापः**—गार्हपत्ये भर्जनपात्रीमधिश्रित्य तस्यां तप्तायां सत्याम् अध्वर्युः सव्यहस्तेन उदगग्रं पवित्रं धृत्वा दक्षिणहस्तेन कृष्णाजिनात् पिष्टानि क्षिपति । तत्क्षेपणं संवाप इत्युच्यते ॥

५५. **मदन्ती**—भर्जनपात्र्यधिश्रयणकाले यज्जलपात्रमधिशृतं भवति, तत्रत्यं जलं अप्शब्दविशेषणत्वाद्बहुवचनान्तेन मदन्तीशब्देनोच्यते ॥

५६. **पवित्रे**—अनखच्छिन्नं साग्र प्रादेशमात्रं मन्त्रसंस्कारयुक्तं समपरिणाहं प्रोक्षणादौ प्रायः उपयोगि दर्भद्वयं पवित्रसंज्ञं भवति ॥

५७. **पिष्टोद्वपनी**—गार्हपत्याधिश्रितायां यस्यां पात्र्यां पिष्टानि समुप्यन्ते सा पिष्टोद्वपनीति पठ्यते ॥

५८. **प्रणीताप्रणयनम्**—अश्वत्थकाष्ठनिर्मितं चतुरङ्गुलदण्डम् अष्टाङ्गुलविलं प्रादेशमात्रं, प्रणीतानामकं जलं नीयतेऽनेनेति करणव्युत्पत्त्या प्रणीताप्रणयनमित्युच्यते ॥

५९. **आज्यस्थाली**—पूर्वोक्तं पवित्रमन्तर्धाय मन्त्रेण प्रायश्चित्तादिहोमार्थं जुह्वादिषु तिसृषु स्रुक्षु पूरणार्थं च यस्यां स्थाल्यामाज्यं गृह्यते सा आज्यस्थाली पदवाच्या ॥

६०. **प्रायः (भ्रंशः)**—कर्म द्विविधं समन्त्रकममन्त्रकं च । तत्र समन्त्रके कर्मणि 'यस्मिन् कर्मणि यो मन्त्रः श्रुत्यादिना मन्त्रान्ते कर्म कुर्वीत' इत्यादिवचनात् क्वचित्कर्मण आरम्भादादौ क्वचित्तु उपस्थानादिकर्मसु कर्मसमकाल-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेव करणत्वेन विनियुक्तस्तस्य मन्त्रस्योक्तस्थाने पाठाभावः अविहितस्थाने पठनं च एवं कर्मणोऽकरणे अस्थाने कर्मानुष्ठानं च, अनयैव रीत्या मन्त्रक्रिययोरुभयोरननुष्ठानम् अस्थाने तयोरनुष्ठानं विहिताकरणं निषिद्धाचरणं च प्रायश्चित्तपदैकदेशस्य प्रायः पदस्य नष्टशब्दापरपर्यायस्य वाच्यम् ॥

६१. **प्रायश्चित्तम्**—प्रायो नाम नष्टं तस्य चित्तं नाम पुनः संधानम् अकृतस्य कृतत्वसंपादकम् अन्यथा कृतस्य सुष्टुकृतत्वसंपादकम्, कृतस्य निषिद्धस्याकृतत्वसंपादकं कर्म विधायकश्रुत्यादिनैव तथा प्रतिपादनात् तच्च जपहोमादिरूपं तीर्थयात्रास्नानादि रूपं दोषानुसारेण श्रुत्यादिप्रतिपादितं प्रायश्चित्तमिति गीयते ॥

६२. **स्रुक्**—'ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियाम्'[1] इति श्रौतव्यवहारमूलककोशाद् ध्रुवोपभृज्जुहूस्रुवाणां चतुर्णां वाचकः स्रुक्शब्दः ॥

६३. **वेदः**—दर्भमुष्टिः प्रदक्षिणमावेष्टच द्विगुणः कृतः प्रादेशमात्र उपविष्टवत्सजानुसदृशसंपन्नः समन्त्रकवेदिसंमार्जनादिकर्मोपयोगी प्रच्छिन्नाग्रो वेद इत्युच्यते ॥

६४. **दारुपात्री**—इडापात्रतुल्यं भेदार्थं केनचिच्चिह्नं न युक्तं पक्वान् पुरोडाशान् कपालेभ्य उद्धास्य मन्त्रेणाज्योपस्तरणं कृत्वा यस्मिन्पात्रे कृतेऽपस्तरणस्थाने पुरोडाशान् स्थापयित्वा, हविरासादनकाले वेद्यासाद्य, यागकाले तत्पात्रस्थानामेव पुरोडाशानामवदानं प्रधानहोमार्थम्, ब्रह्मभागार्थं यजमानभागार्थं स्विष्टकृदर्थं प्राशित्रनामकब्रह्मभागार्थं चतुर्धाकरणार्थम् इडापात्रे ग्रहणार्थं च क्रियते, तत्पात्रं दारुपात्रीत्युच्यते ॥

६५. **योक्त्रम्**—कर्मकाले आग्नीध्रोऽध्वर्युप्रेषितः पत्नीं मन्त्रेण येन गुणेन मुञ्जमयेन वेष्टनेन त्रिगुणितेन कटिदेशे संनह्यति, स गुणो योक्त्रमित्युच्यते ॥

६६. **वेदपरिवासनानि**—वेदस्य यान्यग्राणि पूर्वं छिन्नानि तानि 'वेदस्य परिवासनानि' इति षष्ठीसमासे परिवासनशब्दस्य कर्मण्युडन्ततया वेदपरिवासनानीत्युच्यन्ते ॥

६७. **धृष्टिः**—[2]मेक्षणसदृश कपालोपधाने गार्हपत्यादङ्गारोद्धरणादौ उपयोगिनीं धृष्टिरित्युच्यते ॥

---

१. अमरकोश २।७।२४॥ २. मेक्षणपदार्थः—५३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६८. **अन्वाधानम्**—'अध्वर्युर्यजमानो वाऽन्वाधानं करोति' तत्र गार्हपत्यस्य पश्चात् पदमासनेनोपविश्य त्रिभिः स्वाहाकारान्तैर्ऋङ्मन्त्रैः तिस्रः स्थूला समिधो ऽभ्यादधाति, ततो दक्षिणाग्नावूर्ध्वजानुरुपविश्य तथैवाभ्यादधाय गार्हपत्यस्य पश्चान्मार्गेणागत्य आहवनीयाद् वायव्यदेशे प्रङ्मुख उदस्थाय तथैव तिस्रः समिधो ऽभ्यादधाति । ततस्तत्रैव तिष्ठन् दशमेन ऋङ्मन्त्रेणोपस्थानं करोति । तदेतत्सकलं कर्म अनुकूलं करिष्यमाणस्य कर्मणः समित्रामाधानम् इति व्युत्पत्त्या अन्वाधानमित्युच्यते ।।

६९. **परिसमूहनम**—अनुकूलत्वं करिष्यमाणस्य कर्मणः अन्वाधाने कथमिति चेदित्थं यागात्पूर्वम् अग्निषु प्रकृतोपयोग्यर्थकैर्मन्त्रैः समित्प्रक्षेपणेनाग्नयः करिष्यमाणयागे सावधाना आमन्त्रिता इव भवन्ति—श्वः सद्यो वा अथमस्मासु होष्यतीति । अत एव प्रक्षिप्तानां समिधां रक्षणमात्रमायतनेषु क्रियते, यागकाल एव तु तासां प्रज्वलनम् । अन्वाधानानन्तरमग्नीनां त्रिवार परिसमूहनपर्युक्षणे[1] विधीयेते । तत्र जलसहितेन पाणिना अग्न्यायतनोपरिष्टाद् भागे ऐशानदिश आरभ्य पुनस्तद्दिक्पर्यन्तं प्रदक्षिणं संमार्जनं परिसमूहनमित्युच्यते ।।

७०. **पर्युक्षणम्**—तथैव दूरतो ऽस्पर्शनेन प्रदक्षिणं जलपरिषेकमात्रं पर्युक्षणपदवाच्यम् ।।

७१. **अलंकरणम्**—पर्युक्षणानन्तरं अग्न्यायतनानां अक्षतरङ्गवल्यादिभिर्यत्सुशोभितकरणं सकृद्गोमयसंमार्जनपूर्वकम् अध्वर्युयजमानतदाकर्तृकं तद् अग्न्यलङ्करणमित्युच्यते ।।

७२. **व्रतोपायनम्**—अग्न्यलङ्करणानन्तरं यजमानस्तीर्थेन[2] निर्गत्य, अग्नेणाहवनीयं परीत्य, पूर्वोक्ते स्वायतने उपविश्य, पाणौ सायं प्रादेशमात्रमुदगग्रं दर्भद्वयं धृत्वा, तेनैव दक्षिणेन पाणिना पयस्वतीमन्त्रेण त्रिरप आचामति । तत आहवनीयं तूष्णीं पर्युक्षणवत्सकृत्पर्युक्ष्य चतुर्भिर्मन्त्रैश्चतस्रः समिध आहवनीय आधाय पूर्ववत्परिषिञ्चति । तदेतद् यजमानकर्म व्रतग्रहणं व्रतोपायनमिति चोच्यते ।।

७३. **तीर्थम्**—आहवनीयायतनस्योत्तरतः प्राग्ग्रेषु दर्भेषु प्रणीताप्रणयने प्रणीता नाम आप आमाद्यन्ते । तासां पश्चिमदेशः उत्करस्य तु पूर्वदेशः विहारप्रवेशनिर्गमयोर्मार्गः तीर्थसंज्ञकः ।।

---

१. पर्युक्षण-पदार्थः ७० । २. पदार्थः ७३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७४. प्राणीताऽभाववति कर्मणि आहवनीयोत्तरदेशे आसादितस्य इध्मस्य पश्चिमभाग उत्करस्य पूर्वदेशस्तीर्थमित्युच्यते ।।

७५. चात्वालवत्सु कर्मसु चात्वालपश्चिमदेश उत्करपूर्वदेश एव तीर्थपदवाच्यः ।

७६. **शाखाहरणम्**—व्रतोपायनान्ते सन्नयति यजमाने अध्वर्युः प्राचीमुदीचीमैशानीं वा दिशं गत्वा पलाशस्य शम्या वा प्राचीमुदीचीमैशानीं वा शाखां असिदेन[1] छिनत्ति समन्त्रकम् । ततस्तां शाखां मन्त्रेण विहारदेशं प्रत्याहरति । तदेतत्कर्म शाखाहरणमित्युच्यते ।।

७७. **सन्नयन्**—यः सोमेनेष्टवान् तस्य यजमानस्य दर्शेष्टौ इन्द्राग्निदेवतास्थाने इन्द्रो महेन्द्रो वा देवतात्वेन विहितः । तत्र सत्यपि पुरोडाशद्रव्ये अधिकं द्रव्यद्वयं विहितम्—तत्रैकं पयः द्वितीयं दधि । तदेतद् द्वयं होमार्थं सम्यग् नयतीति कर्तृव्युत्पत्त्या तादृशो यजमानः सन्नयन्नित्यभिधीयते ।

७८. **सान्नाय्यम्**—दधिपयसी च 'पाय्यसान्नाय्य०' (अष्टा०३।१।१२९) इति सूत्रेण निपातनात् कर्मव्युत्पत्त्या सान्नाय्यपदाभिधेये ।।

७९. **वत्सापाकरणम्**—सान्नाय्यदधिपयसोः संपादने गवां संख्या अशक्तत्वात् न्यूना क्रियते चेत् षट्त्वसंख्यातो न्यूना न कार्या, षड्भ्यो गोभ्यो न्यूनसंख्याका गावो न कर्तव्याः, ततोऽधिकाश्चेदिष्टापत्तिरेव । पूर्वमाहृतया शाखया एतासां गवां वत्सानां दूरीकरणं समन्त्रकं वत्सापाकरणमित्युच्यते ।।

८०. **उपवेषः**—ततस्तस्याः शाखायाः पर्णानि छित्त्वा यं मूलभागं प्रादेशमात्रं छित्त्वा घष्टचकारं करोति, सान्नाय्यसंस्कारकाले गार्हपत्याङ्गाराणामुदग्दिशि निरूहणादौ उपयोगी, स उपवेष इति गीयते ।।

८१. **शाखापवित्रम्**—अग्रभागस्तु त्रिभिर्दर्भवेण्याकारेण निबद्धः शाखापवित्रपदवाच्यः तस्य सायंदोहादावुपयोगः ।।

८२. **असिदः**—असन्नयतस्तु यजमानस्य शाखाहरणाभावात् व्रतोपायनानन्तरं अध्वर्युः गार्हपत्यस्योत्तरतो विद्यमानमसिदं श्वपरशु[2] वाऽऽदत्ते मन्त्रेण । लोहमयक्षुरः छेदनोपयोगी असिद इत्युच्यते ।।

८३. **श्वपरशुः**—एवं बर्हिश्छेदनाद्युपयोगी श्वसदृशः कुठारः श्वपरशुरित्युच्यते ।।

---

१. पदार्थः ८२ । २. पदार्थः ८३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८४. **परिग्रहणम्**—तयोरन्यतरद् गृहीत्वा मन्त्रेणाहवनीयदेशं गत्वा मन्त्रेण वेदिमवेक्ष्य दर्भदेशं गत्वा प्रस्तरपर्याप्तं दर्भमुष्टिं परिगृह्णाति। असिदादिना छेदनीयदर्भमुष्टेः आसमन्तात् भेदाय भ्रामणं परिग्रहणपदवाच्यम् ॥

८५. **छेदनम्**—छिन्ने दर्भमुष्टौ भूमौ यो मूलभागो दृश्यते स छेदनक्रियाया आधारत्वात् अधिकरणे ल्युटा छेदनपदवाच्यः ॥

८६. **उदकोपस्पर्शनम्**—'छेदने भेदने चैव खनने पितृरक्षसोः, रौद्राभिचारणीयेषु उदकस्याभिमन्त्रणम्' इति वचनात् छेदनभेदनखननपैतृकराक्षसरौद्राभिचारणकर्मसु कृतेषु शुद्धयर्थं विहितं दक्षिणकरस्य जलेन प्रक्षालनं उदकोपस्पर्शनमुच्यते ॥

८७. **प्रस्तरः**—तत्र प्रकृतीष्टौ चतस्रो दर्भमुष्टयश्छिद्यन्ते। प्रथमा दर्भमुष्टिर्मन्त्रैः संस्कृता वेद्यां जुहूर्यस्यान्निधीयते, विधृतिसंज्ञकयोः उदगग्रयोर्दर्भयोरुपरि च या प्रागग्रा स्थापिता भवति सा (दर्भमुष्टिः) प्रस्तर इत्युच्यते ॥

८८. **बर्हिः**—अन्यास्तिस्र अमन्त्रकत्वकलक्रियामात्रसाध्याः वेद्यास्तरणार्थाः हविषां पात्राणां स्थापनयोग्या बर्हिःपदवाच्याः ॥

८९. **बर्हिसन्नहनम्**—दर्भत्रयं गृहीत्वा प्रदक्षिणमावेष्टय अग्रभागे अन्यद् दर्भत्रयं मूलेन संयोज्य वेष्टनेन ग्रथितमिव कृत्वा तदपि तथैवावेष्टय तदग्रभागे अन्यद् दर्भत्रयं तथैव कृत्वा पुनस्तदग्रभागे तथा करोति। एवं कृते सन्धित्रयं मध्ये संपद्यते, तद् दर्भसूत्रं द्विगुणं कृत्वा अन्ते ग्रन्थिः कार्यः। अनेन बर्हिर्बध्यते। अत एतद् बर्हिःसंनहनं नाम शुल्बनामकम् ॥

९०. **इध्मसन्नहनम्**—एवमिध्मबन्धनार्थं इध्मसंनहनं नाम शुल्बनामकम् ॥

९१. **परिधयः**—बर्हिः संभरणानन्तरम् अध्वर्युरिध्मदेशं गत्वा असिदेन श्वपरशुना वा इध्मं छिनत्ति तूष्णीम्, तस्मिन्नेकविंशतिसंख्याकानि काष्ठानि भवन्ति। तत्र त्रितयं काष्ठानामाहवनीयस्य पश्चाद् दक्षिणत उत्तरतश्च प्रथममेखलाया उपरि स्थापनार्थं मेखलापरिमितायामम् परित आहवनीयस्य निधानात् पुरस्तात्सूर्यस्य मनसा परिधित्वकल्पनात् परिधिसंज्ञकं भवति ॥

९२. **समिधः**—अन्यानि काष्ठानि [1]प्रादेशमात्राणि। तत्र पञ्चदशसामिधेन्यर्थानि। एकमनुयाजार्थं द्वे आहवनीयायतनस्यान्तरूर्ध्वाग्रे दक्षिणोत्तरयोर्भागयो रोपणार्थे। एतान्यष्टादश काष्ठानि समित्पदवाच्यानि ॥

---

१. प्रसृताङ्गुष्ठकनिष्ठापरिमाणः। द्र०—अमरकोश २।६।३४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९३. **इध्मानि**—क्वचिद्विकृतीष्ट्यादिषु अधिका अपि समिधः सामिधेनी-वृद्धा गृह्यन्ते एवमेकविंशतिदारुकः संघ इध्मपदवाच्यः ॥

९४. **इध्मप्रव्रश्चनानि**—इध्मस्य छेदनकाले यानि काष्ठशकलानि इतस्ततः पतन्ति तानि करणव्युत्पत्त्या इध्मप्रव्रश्चनपदेनाभिधीयन्ते ॥

९५. **अन्वाहार्यः**—चतुर्णामप्यृत्विजां भोजने पर्याप्तः दक्षिणाग्नौ सुशृत ओदनः अनु पश्चात् यागानन्तरमृत्विग् भोजनार्थमाह्रियते इति कर्मव्युत्पत्त्या अन्वाहार्यपदवाच्यः ॥

९६. **अन्वाहार्य स्थाली, अन्वाहार्यपचनी वा**—अन्वाहार्य ओदनो यस्यां स्थाल्यां श्रप्यते सा अन्वाहार्यस्थालीत्युच्यते ॥

९७. **मदन्ती**—मदन्तीनामिका आपो यस्मिन् पात्रे संताप्यन्ते, तत्पात्र-मपि मदन्तीपदेन व्यवह्रियते ॥

९८. **फलीकरणम्**—पुरोडाशचरुसंबन्धिव्रीह्यादीन् उलूखले मुसलेना-वहत्य पत्नी शूर्पेण निस्तुषकरणरूपं फलीकरणं करोति। तत्र ये तुषादयः-पतन्ति ते करणव्युत्पत्त्या फलीकरणपदवाच्याः ॥

९९. **फलीकरणपात्रम्**—तेषां यागानन्तरं दक्षिणाग्नौः जुह्वा चतुर्गृ ही-तेनाज्येन सह होमो विहितः। अतः यागसमाप्तिपर्यन्तं तेषां [फलीकरणानां] स्थापनाय निर्मितं अश्वत्थमयं पात्रं फलोकरणपात्रमित्युच्यते ॥

१००. **अन्तर्धानकटम्**—यदा गार्हपत्ये अध्वर्युः पत्नीसंयाजः प्रचरति तदा देवानां पत्नीयागकाले स्वीयहविर्भागग्रहणार्थमागतानां देवानां पत्नीनां स्त्रीत्वाल्लज्जया तिरोधानाय अश्वत्थकाष्ठनिर्मितं तिरोधानकरणयोग्यं कटाकारत्वात् अन्तर्धानकटमित्युच्यते ॥

१०१. **इडाजपः**—अध्वर्युस्तीर्थप्रवेशानन्तरं गार्हपत्यस्योत्तरत उपविश्य इडाजपं कृत्वा **'देवा गातुविद'** इत्यृचं जपति तस्यामृचि यतो वातशब्दो वर्तते श्रुतौ वातशब्देन यागारम्भसमाप्तयोर्वर्णनात् **'इडा देवहूः'** इति यजुर्मन्त्रजप इडाजपपदेनोच्यते ॥

१०२. **पाणिसमर्शनम्**—तत आहवनीयस्योतरतस्तिष्ठन् हस्तौ मन्त्रंग संमृशते। एतत्कर्म पाण्योः सावधानत्वाय करिष्यमाणकर्मसुप्रेरणारूपं पाणि-संमर्शनमित्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०३. **परिस्तरणम्**—तत[1] आहवनीयदक्षिणाग्निगार्हपत्यान् क्रमेण दर्भैः परिस्तृणाति। 'अग्नेः षोडशभिर्दर्भैः प्राच्यादिषु परिस्तृतिः' इति वचनात् प्राच्यां प्रथममेखलोपरि चतुर्भिर्दर्भैस्तथैव दक्षिणस्यां प्रतीच्यामुदीच्यां च क्रमेण स्तरणं परिस्तरणपदार्थः॥

१०४. **पात्रासादनम्**—ततो गार्हपत्यस्य पुरस्ताद् वेद्यां [2]परिभोजनीयदर्भानास्तीर्य तेषु द्वन्द्वं न्यञ्चि प्रक्षालितानि यज्ञपात्राणि प्राक्संस्थानि उदगपवर्गाणिस्थापयति। तदेतत्कर्म पात्रासादनपदार्थः॥

१०५. **पृष्ट्यास्तरणम्**—ततो ब्रह्मणि स्वायतने उपविष्टे यजमानेन च समन्त्रकद्वितीयवरणेन वृते परिभोजनीयदर्भैः संततां पृष्ठ्यां गार्हपत्यमध्यादारभ्याहवनीयमध्यपर्यन्तं स्तृणाति मन्त्रेण। एतत् कर्म पृष्ठ्यास्तरणमित्युच्यते॥

१०६. **पवित्रकरणम्** ततो मन्त्रेण पूर्वं निरुक्तं पवित्रमादाय समन्त्रकं सव्यहस्ते पवित्रं धृत्वा दक्षिणहस्तेन जलेनानुमार्ष्टि। एतत्कर्म पवित्रकरणं नाम॥

१०७. **अभिमर्शनम्**—अभिमर्शनं नाम यदभिमृशेदिति विधीयते मन्त्रजंपसमकालं तत्पदार्थस्पर्शनम॥

१०८. **दशहोतृपदानि**—[3]चित्तिरित्यादीनि दश वाक्यानि दशहोतृपदवाच्यानि॥

१०९. **निर्वापः**—अध्वर्युः पवित्रवत्यामग्निहोत्रहवण्यां मुष्टिमात्रं निधाय तया शूर्पे तन्मुष्टिमात्रं व्रीह्यादिकं प्रक्षिपति। एतत्कर्म निर्वापपदवाच्यम्॥

११०. **प्रोक्षणम्**—ततः सशूकायामेवाग्निहोत्रहवण्यां तिरःपवित्रमपआनीय त्रिरुत्पूय [4]उन्महयन्नुपस्थायतेन जलेन सपवित्रेणोत्तानेन दक्षिणपाणिना मेचनं पुरोडाशीयादीनां[5] यत् तत् प्रोक्षणमित्युच्यते॥

१११. **यज्ञायुधानि यज्ञपात्राणि वा**—स्फ्यः कपालानि अग्निहोत्रहवणी

---

१. कर्कदेवयाज्ञिकादयस्तु कार्यक्रमेणाग्नीनां परिस्तरणमाहुः। तेन आदावाहवनीयस्य परिस्तरणं ततो गार्हपत्यदक्षिणाग्न्योरिति क्रमः कर्काद्यनुयायिनाम्।

२. परिभोजनीय पदार्थः—द्र० पृष्ठ ३१, टि० १।

३. चित्तिः स्रुक्, चित्तमाज्यम्, वाग्वेदिः, आधीतं बर्हिः, केतो अग्निः, विज्ञातमग्निः, वाक्यतिहोता, मन उपवक्ता, प्राणो हविः, सामाध्वर्युः। दर्शपूर्णमास प्रकाश, पृष्ठ ५२९। ४. उन्नहनपदार्थः—११३। ५. हविषामित्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शूर्पं कृष्णाजिनं शम्या उलूखलं मुसलं दृषत् उपला जुहूः उपभृत् स्रुवः ध्रुवा प्राशित्रहरणं इडापात्रं मेक्षणं पिष्टोद्वपनी प्रणीताप्रणयनं आज्यस्थाली वेदः दारुपात्री योक्त्रं वेदपरिवासनानि धृष्टिः इध्मप्रव्रश्चनानि अन्वाहार्यस्थाली मदन्ती फलीकरणपात्रं अन्तर्धानकटं च एते पदार्था अन्ये च ये विकृतिषु उपयुक्तास्ते सर्वे यज्ञायुधपदेन यज्ञपात्रपदेन च श्रुतौ गीयन्ते ॥

११२. **उत्पवनम्**—उत्पवनं नाम द्रवद्रव्यस्याज्यादेः कस्मिंश्चित्पात्रे स्थितस्य दक्षिणोत्ताराभ्यां हस्ताभ्यां परस्परम् असंसृष्टे पवित्रे धृत्वा ताभ्यां तस्य द्रव्यस्य ऊर्ध्वभागे प्लवनम् उत्पवनमित्युच्यते ॥

११३. **उन्महनम्**—उन्महनं नाम स्तुतियुक्तमन्त्रोच्चारणेन पूजनरूपम् ॥

११४. **समाहननम्**—समाहननं नाम आग्नीध्रकर्तृकं शम्याकरणकं यज्ञपात्राणां वादनम् ॥

११५. **परावपनम्**—परावपनं नाम अध्वर्युकर्तृकं व्रीह्यादीनामुलूखले अवहतानां शूर्पेण फलानामन्तरेऽवस्थितिर्यथा स्यात् तथा तुषादेर्निरसनम् ॥

११६. **यज्ञयोगमन्त्रः**—व्रीह्यादेरवघातानन्तरं यजमानो यं मन्त्रं किंशब्दवन्तं जपति स मन्त्रो यज्ञयोगमन्त्र इत्युच्यते ॥

११७. **अधिवपनम्**—पुरोडाशीयानां पेषणार्थं दृषदि स्थापनमधिवपनमित्युच्यते ॥

११८. **प्रोहणम्**—दृषदि अध्युप्तानां पुरोडाशीयतण्डुलादीनामुपर्युभाभ्यां हस्ताभ्यामुपलायाः तिर्यक्स्थापितायाः पूर्वस्यां दिशि कर्षणं ततः प्रतीच्यां कर्षणं च प्रोहणमित्युच्यते ॥

११९. **प्रस्कन्दनम्**—दृषदः सकाशत् उपलया पिष्टानां दृषदधःस्थापितकृष्णाजिने पातनम्, यस्य कस्यापि द्रव्यस्य पात्रात् हस्ताद्वाऽधः पतनं च प्रस्कन्दनमित्युच्यते ॥

१२०. **कपालोपधानम्**—अध्वर्युः पेषणानन्तरं गार्हपत्यस्य पश्चात् धृष्ट्वा पुरोडाशभर्जनार्थं गार्हपत्याङ्गारैः संतापयितुं यथाविहितानि प्रतिपुरोडाशं समुदितानि अश्वशफमात्राण्यश्वशफाकारतामापन्नानि कपालानि मन्त्रैर्विहितक्रमेण स्थापयति । तदेतत्कपालोपधानमित्युच्यते ॥

१२१. **उपधानम्**—उपधानं नाम 'उपधानं तूपबर्हः शय्यायां शयनीयवद्' इति कोशात् (अमर २।६।३९) कस्यचित्पूजनीयस्य पदार्थस्य स्थापनार्थं उपबर्हस्थानीयाधाररचनम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२२. **पत्रासादानम्**—एवमासादनं नाम यज्ञपात्रदीनां सुशोभिततया रचनम् ॥

१२३. **निधानम्**—निधानं यथाकथंचित् स्थापनमात्रम् ॥

१२४. **योगः**—उपहितानि कपालानि येन मन्त्रेण परस्परसंयुक्तानि क्रियन्ते, स मन्त्रो योग इत्युच्यते ॥

१२५. **अधिश्रयणम्**—अधिश्रयणं नाम वह्नौ स्थापयित्वा संतापनम् ॥

१२६. **परिकर्म**—'परिकर्माङ्गसंस्कार' इति कोशात् (अमर २।३।२२) परिकर्मशब्द ऋत्विग्यजमानभिन्नस्य कर्तव्यत्वेन विहितस्य कर्मणो वाचकः ।

१२७. **परिकर्मी**—तत्कर्मकर्ता परिकर्मी भवति ॥

१२८. **अनुमन्त्रणम्**—अनुमन्त्रणं नाम स्वयमन्येन वा कर्मणि कृते पश्चात् तत्कर्मकरणमन्त्रोच्चारणम् ॥

१२९. **मन्त्रः**—'मन्त्राश्च कर्मकरणाः' (आश्व० श्रौत १।१।२१) इति सूत्रात् यैः कर्म क्रियते ते मन्त्रपदवाच्याः ॥

१३०. **निर्वापः**—गार्हपत्यस्य पश्चात् शकटं स्थापितं भवति । तत्र विद्यमानस्य व्रीह्यादिद्रव्यस्य सपवित्रायामग्निहोत्रहवण्यां मुष्टिमात्रं निधाय तया मन्त्रेण कांचिद् देवतामुद्दिश्य शूर्पे प्रक्षेपोऽथवा शकटाभावपक्षे गार्हपत्यस्य पश्चादुदगग्रं स्रुवं निधाय तदुपरि दारुपात्रीं प्रागग्रां निधाय तस्यां पुरोडाशीयानोप्य तस्याः सकाशात् गृहीत्वा अग्निहोत्रहवण्यां निधाय पूर्ववत् शूर्पे प्रक्षेपणं निर्वाप इत्युच्यते ॥

१३१. **अनधःसादनम्**—यत्र 'अनधः सादयति' इति विधीयते तत्र दर्भतृणादिकं किंचित् निधाय तदुपरि स्थापनम् अधःसादनमुच्यते ॥

१३२. **अभिमन्त्रणम्**—'गार्हपत्यमभिमन्त्रयते' इत्यादौ अभिमन्त्रणं नाम गार्हपत्यादेरवेक्षणसमकालं मन्त्रजपः ॥

१३३. **प्रोच्छनम्**—यस्मिन् यागे व्रीह्यादेद्रव्यस्य निर्वापानन्तरमन्यद्रव्यनिर्वापः कर्तव्यो भवति, तत्र एकस्य निर्वापानन्तरं निर्वापे करणभूताया अग्निहोत्रहवण्या वस्त्रादिना संमार्जनं पश्चान्निरुप्यमाणद्रव्ये पूर्वनिरुप्तद्रव्यसंबन्धितुषादिसंसर्गाभावार्थं क्रियते तत्, यच्च तादृशयागे निरुप्तद्रव्यप्रोक्षणात् प्राग्वस्त्रसंमार्जनं तदपि प्रोच्छनमित्युच्यते ॥

१३४. **प्रोक्षण्यः**—व्रीह्यादिप्रोक्षणार्थम् अग्निहोत्रहवण्यां गृहीताः संस्कृता आपः प्रोक्षणीपदवाच्याः ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३५. **तूष्णीम्**—मन्त्रं विना क्रियमाणं कर्म तूष्णीमित्युच्यते ।।

१३६. **हविष्कृत्**—हविः करोतीति हविष्कृदिति व्युत्पत्त्या ऐष्टिकादिकर्मणि अध्वर्योः कार्ये हविःसंपादने सहायत्वमात्रेण, सोमे तु सवनीयनिर्वापप्रभृतिपुरोडाशाद्यासादनान्तस्य हविःसंपादनस्य स्वकर्तृकत्वेन, सोमाङ्गभूते प्रवर्ग्याख्ये कर्मणि रौहिणसंज्ञकपुरोडाशाधिश्रयणादिकर्मकर्तृत्वेन च आग्नीध्र एव हविष्कृत्पदवाच्यः ।।

१३७. **समाहननम्**—समाहननं नाम यज्ञपात्राणां तूष्णीं शम्या ताडनम्, तत्र दृषदुपलयोस्तु त्रिः समन्त्रकम् ।।

१३८. **अवहननम्**—अवहननं नाम उलूखले उप्तानां व्रीह्यादीनां नैस्तुष्यसिद्ध्यर्थं मुसलेन कण्डनम् ।।

१३९. **परापवनम्**—परापवनं नाम कण्डनेन पृथग्भूतानां तण्डुलादीनामेव शूर्पे स्थितिर्यथा स्यात् तुषादीनां तु अधःपतनम्, तथा कौशलेन शूर्पचालनम् ।।

१४०. **आप्लावनम्**—पात्रीस्थानां पिष्टानामुपरि संतप्तमदन्तीजलप्रक्षेप आप्लावनमित्युच्यते ।।

१४१. **सयवनम्**—मेक्षणेन जलपिष्टयोर्मिश्रणं संयवनमुच्यते ।।

१४२. **पुरोडाशः**—मदन्तीजलेन सिद्धस्य पिष्टपिण्डस्य चतुर्थ्यन्तदेवतानामपूर्वकत्वेतिपदान्तेन मन्त्रेण अभिमर्शनानन्तरं कूर्मवदाकारे कृते पुरोडाशपदवाच्यता ।।

१४३. **प्रत्यूहनम्**—गार्हपत्यादेः सकाशाद् बहिष्कृतानामङ्गाराणां पुनर्गार्हपत्यादौ प्रक्षेपः प्रत्यूहनम् ।।

१४४. **प्रथनम्, त्वग्ग्रहाणं च**—पुरोडाशस्य सर्वकपालस्पर्शनं प्रथनमित्युच्यते । पुरोडाशस्य त्वक्सिद्ध्यर्थं पिष्टोद्वपनीस्थजलेन सर्वतः संमर्शनं त्वग्ग्राहणमित्युच्यते ।।

१४५. **पर्यग्निकरणम्**—हविषामासमन्तात् प्रादक्षिण्येन उल्मुकस्य परिभ्रामणं पर्यग्निकरणमित्युच्यते ।।

१४६. **अभिवासनम्**—संतप्तेषु कपालेषु निहितस्य पुरोडाशस्य गार्हपत्यस्य भस्मना तूष्णीं प्रच्छादनम् अभिवासनमित्युच्यते ।।

१४७. **पुरोडाशश्रपणम्**— ततोऽध्वर्युर्मन्त्रेण साङ्गारं भस्म वेदेन पुरो-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

डाशस्योपरि प्रक्षिप्य परिकर्मिणः संप्रेष्यति। ते च [परिकर्मिणो] यथा सुशृतः स्यात् तथा श्रपयन्ति। तदेतत् पुरोडाशश्रपणमित्युच्यते ॥

१४८. चरुः—गार्हपत्याङ्गारान् मन्त्रेण गार्हपत्यायतनाद् बहिः पश्चाङ्गिरूह्य ते चाङ्गारा यथा मध्ये स्युस्तथा चुल्लीं स्थापयित्वा तस्यां नपुंसकलिङ्गस्थाने स्त्रीलिङ्गवत्पदघटितप्रथमकपालोपधानमन्त्रेण सजलां स्थालीमधिश्रित्य, तस्यां मन्त्रेण पूर्वसंस्कृतानां तण्डुलानां प्रक्षेपणं क्रियते। ते च परिपक्वास्तण्डुलाः चरुपदवाच्याः ॥

१४९. पयसिचरुः—यदि पयःसहितां स्थालीमधिश्रित्य चरुः साध्यते, तदा स पयसिचरुरित्युच्यते ॥

१५०. प्रतिपत्तिकर्म—हविःश्रपणानन्तरं पात्रीसंक्षालनोदकं गार्हपत्योल्मुकेनाभितप्यान्तर्वेदि पस्येन प्राचीस्तिस्रो लेखाः कृत्वा प्रत्यक् त्रिर्निनयति त्रिभिः स्वाहान्तैर्मन्त्रैः। एतादृशं कर्म अन्यत्रापि क्रियमाणं यथा 'उल्मुकं प्राच्यां निरस्येद्' इत्यादौ कस्यचिद्वस्तुनो जाते कार्ये विधिप्राप्तनियोगकरणं प्रतिपत्तिकर्मेत्युच्यते ॥

१५१. पूर्वपरिग्राहः—अध्वर्युर्मन्त्रेण वेदमादाय मन्त्रेण सकृत् द्विस्तूष्णीं वेदेन उदगपवर्गं प्रागवसन्नं वेदिं संमृज्य, वेद्याः पश्चादुरविश्य मन्त्रेण दर्भाभ्यां सह स्फ्यमादाय अन्यतरेण दर्भेण स्फ्यं निमृज्य, अवशिष्ट दर्भं वेदिपूर्वतृतीयभागे मन्त्रेण उदगग्रं निधाय, मन्त्रेण तस्मिन् स्फ्येन प्रहृत्य मन्त्रेण मृदासहितं स्फ्यमादाय मन्त्रेण मृदं हृत्वा मन्त्रेण वेदिमवेक्ष्य मन्त्रेण मृदमुत्करे निवपति। आग्नीध्रस्तां मृदं तत्रैवोत्तानाभ्यां पाणिभ्यां गृह्णाति एवं प्रहरणादि मृन्निवपनान्तं सममन्त्रकं त्रिवारं कृत्वा तूष्णीं चतुर्थं करोति। तत्र चतुर्थे मृदो हरणे प्रहृतस्य दर्भस्थापितया सह हरणं क्रियते। तदनन्तरं मन्त्रेण स्फ्येन वेदिदक्षिणांसमारभ्य दक्षिणश्रोणिपर्यन्तं वेदिदक्षिणप्रान्तं स्पृशति, तथैव दक्षिणश्रोणिमारभ्य उत्तरश्रोणिपर्यन्तं वेदिपश्चिमप्रान्तं स्पृशति, तथैव उत्तरश्रोणिमारभ्य उत्तरांसपर्यन्तं वेद्युत्तरप्रान्तं स्पृशति। इदं स्फ्येन वेदिप्रान्तभागस्पर्शनं वेद्याः परितो यागार्थं करणरूपत्वात् उत्तरपरिग्राहापेक्षया पूर्वत्वाच्च पूर्वपरिग्राह इत्युच्यते ॥

१५२. वेदिकरणः (मन्त्रः)—पूर्वपरिग्राहानन्तरं यं मन्त्रं जपति स मन्त्रो 'वेदिः क्रियते अनेन' इति करणव्युत्पत्त्या वेदिकरण इत्युच्यते ॥

१५३. उद्धननम्—वेदिकरणजपानन्तरं स्फ्येन मंत्रेण प्राक्संस्थं वेदिं त्रिः खनति। एतादृशं खननम् उद्धननमित्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५४. **उत्तरपरिग्राहः**—अध्वर्युप्रेषित आग्नीध्रः उद्धतदेशात् त्रिर्मृदम् उद्धृत्य उत्करे निवपति। ततो ऽध्वर्युरुत्तरपरिग्राहग्रहणार्थं ब्रह्माणमनुज्ञापयति। तेनानुज्ञातः पूर्ववत् स्फ्येन अन्यैस्त्रिभिर्मन्त्रैर्दक्षिणपश्चिमोत्तरप्रान्तभागान् स्पृशति एतत्स्पर्शनं पूर्वपरिग्राहापेक्षया उत्तरत्वादुत्तरपरिग्राह इत्युच्यते ॥

१५५. **वेदिकरणम्**—उत्तरपरिग्राहानन्तरम् उत्करे न्युप्तां मृदं वेद्यामानीय स्फ्येन मन्त्रेण समीकरोति। वेदिसंमार्जनप्रभृति समीकरणपर्यन्तं वेदेः करणमिति व्युत्पत्त्या वेदिकरणमित्युच्यते ॥

१५६. **समित्**—पलाशस्य अन्यस्य वा यज्ञियवृक्षस्य प्रादेशपरिमाणं काष्ठं समित्पदवाच्यम् ॥

१५७. **आज्यावेक्षणम्**—अध्वर्युप्रेरणया वेद्यां विद्यमानस्य आज्यस्य समन्त्रकम् अधोमुखतया यजमानकर्तृकमीक्षणम् आज्यावेक्षणमित्युच्यते ॥

१५८. **पुनराहारः**—'आज्यं पुनराहारमुत्पुनाति' इत्यत्र पवित्राभ्यामाज्यं प्राङ्नीत्वा पुनः पश्चादानयनं पुनराहारपदवाच्यम् ॥

१५९. **आज्यग्रहणम्**—आज्यस्थाल्या उत्तरतो वेद्यां प्रागग्रमुदगग्रं वा वेदं निधाय तस्मिन् प्रागग्रां जुहूं स्थापयित्वा तस्यां मन्त्रावृत्त्या आज्यस्थाल्याः सकाशात् स्रुवेणाज्यं गृह्णाति, यजमानः प्रतिग्रहणमनुमन्त्रयते। अध्वर्युर्दक्षिणहस्तेन जुहूं संमृज्य परिकर्मिणे प्रयच्छति। स च प्रणीतोत्तरतः स्थापितयोरिध्मबर्हिषोः पश्चिमदेशे जुहूप्रभृतिः स्रुच उदक्संस्थाः स्थापयति। अध्वर्युः पूर्ववत् उपभृति आज्यं अष्टकृत्वो गृह्णाति। ततस्तथैव संमृज्य पूर्ववत् प्रयच्छति। स च परिकर्मी तथैव सादयति। अध्वर्युः पूर्ववत चतुष्कृत्वो ध्रुवायामाज्यं गृह्णाति, तूष्णीं पूरयति, तथैव प्रयच्छति। अन्यश्च तथैव सादयति। तदेतत्कर्म आज्यग्रहणमित्युच्यते ॥

१६०. **बर्हिरास्तरणम्**—प्रोक्षणीनामुन्महनादि कृत्वा, समन्त्रकम् इध्मवेदिबर्हींषि क्रमेण प्रोक्ष्य, बर्हिरिध्मप्रणीतयोर्मध्येन प्राङ् नीत्वा, प्रणीताऽऽहवनीययोर्मध्येन पुनराहृत्य, वेद्यां पुरोग्रन्थ्यूर्ध्वाग्रं निधाय, तिष्ठन्नग्राणि मन्त्रेण प्रोक्ष्य, प्रह्वो मन्त्रेण मध्यानि प्रोक्ष्य, आसीनो मन्त्रेण मूलानि प्रोक्ष्य, प्रत्यङ्मुखाभ्यां स्रुक्पाणिभ्यां ग्रन्थिमासिच्य, शिष्टं दक्षिणश्रोणिमारभ्य उत्तरश्रोणिपर्यन्तं प्रथमं प्रस्तरं गृहीत्वा मन्त्रेण मन्त्रेण निनयति। ततः प्रोक्षणीधानं निरस्यं, बर्हिर्विस्रस्य, मन्त्रेण तस्मिन् पवित्रे संयोज्य, प्रस्तरं यजमानाय ब्रह्मणे वा दत्त्वा, बर्हिःसन्नहनं विस्रस्य, दक्षिणश्रोणिमारभ्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उत्तरांसपर्यन्तं निधाय, तदुपरि प्रथमं दर्भमुष्टिं मन्त्रेण स्तृणाति। तस्य पश्चात् द्वितीयं प्रागास्तृतदर्भमूलानि आच्छादितानि यथा स्युः, ततस्तृतीयं तथैव स्तृणाति। तदेतत्कर्म बर्हिरास्तरणं नाम ॥

१६१. **अग्निपरिधानम्**—ततः प्रस्तरं गृहीत्वा प्राङभिसृप्य मन्त्रेण आहवनीयस्य पश्चात् प्रथममेखलोपरि उदगग्रं मध्यमं परिधिं परिदधाति। यजमानो ऽनुमन्त्रयते। एवं दक्षिणोत्तरौ परिधी दक्षिणोत्तरयोः क्रमेण प्रागग्रौ स्थापयति। अग्रे सूर्यमन्त्रेण परिधिं कल्पयति। एतत्कर्म अग्निपरिधानमित्युच्यते ॥

१६२. **विधृतिः**—परिभोजनीयेभ्यो[1] मध्यमबर्हिर्मुष्टेर्वा अन्यतो वा आहृतं सारं दर्भद्वयं विशेषेण धृतिः धारणं, प्रस्तरादीनां धारणं यस्मिन् इति व्युत्पत्त्या विधृतिपदवाच्यम् ॥

१६३. **स्रुगासादनम्**—ते च विधृती वेद्यां मन्त्रेण उदगग्रे निधाय, तयोरुपरि मन्त्रेण प्रागग्रं प्रस्तरं [निधाय] तदुपरि मन्त्रेण जुहूं प्रागग्रां, तस्या उत्तरतो विधृत्यारधस्तात् मन्त्रेणोपभृतं,तदुत्तरतस्तथैव ध्रुवां निधाय,मन्त्रेणाभिमृशति तदेतत् स्रुगासादनमुच्यते ॥

१६४. **अपोहनम्**—स्रुगासादनानन्तरं स्रुचामुत्तरतः सस्रुवामाज्यस्थालीं निधाय, सर्वाण्याज्यान्यभिमन्त्र्य, दक्षिणेन सस्रुवामाज्यस्थालीं सव्येन दारुपात्रीं वेदं चादाय प्रदक्षिणमावृत्य, प्रत्यङ् आहृत्य, गार्हपत्यस्य पश्चादुपविश्य, दारुपात्र्यां पुरोडाशसंख्यया मन्त्रावृत्योपस्तृणाति। ततः प्रथमं दक्षिणपुरोडाशस्याङ्गारानपोहति। तत्र अपोहनं नाम पूर्वं प्रक्षिप्तानां भस्ममिश्राङ्गाराणां धृष्टया दूरीकरणम् ॥

१६५. **पुरोडाश-प्रकाशनम्**—मन्त्रेण पुरोडाशस्य प्रकटीकरणं पुरोडाशप्रकाशनमुच्यते ॥

१६६. **पुरोडाशोद्वासनम्**—ततो वेदेन विरजसं कृत्वाऽभिधार्य मन्त्रेण पात्र्याः सकाशात् पुरोडाशमुदगृह्णाति। इदं पुरोडाशोद्वासनमुच्यते ॥

१६७. **[पुरोडाशस्य] आर्द्रीकरणम्**—ततो मन्त्रेण पुरोडाशस्योपरि सर्वत आज्यप्रक्षेप आर्द्रीकरणमित्युच्यते ॥

१६८ **अधस्तादभ्यञ्जनम्**—तथैव ततः अधोभागे आज्यलेपनम् अधस्तादभ्यञ्जनमित्युच्यते ॥

---

१. शास्त्रीयलवनादिसंस्काररहिताः दर्भाः। एदादृशदर्भाणां मुष्टिरपि 'परिभोजनीया' इत्युच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६९. **हविरासादनम्**—ततः पुरोडाशं पात्र्यां तूष्णीं निधाय अन्यानपि पुरोडाशादीन् एवमेव उद्वास्य पात्र्यां निधाय स्रुवमभिपूर्यं पुरोडाशयोर्मध्ये स्थापयित्वा सर्वाणि हवींष्यादाय वेदिमध्ये स्रुचां पश्चात् तूष्णीं सादयति यजमानस्तु व्याहृतिमन्त्रेण । एतद् हविरासादनमित्युच्यते ॥

१७०. **आमन्त्रणम्**—आमन्त्रणं नाम संबोधनप्रथमान्तपदोच्चारणानन्तरम् 'एहि' इत्यस्यानुषङ्गेणाकारणम् ॥

१७१. **अवस्थानम्**—'प्रागुदगाहवनीयादवस्थाय' इत्यादौ अधोमुखतया स्थानम् अवस्थानमित्युच्यते ॥

१७२. **यज्ञोपवीतम्**—'उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे'[1] इति कोशात् दक्षिणबाहुना उद्धृतं सव्यांसस्थितं स्मृत्युक्तरीत्या निर्मितं यज्ञोपवीतमित्युच्यते ॥

१७३. **प्राचीनावीतम्**—एतद्विपरीतं सव्योद्धृतं दक्षिणांसस्थितं [2]प्राचीनावीतमित्युच्यते ॥

१७४. **निवीतम्**—मालावत् कण्ठलम्बितं [3]निवीतमित्युच्यते ॥

१७५. **आचमनम्**—केशवादिभिस्त्रिभिर्नामभिश्चतुर्थ्यन्तैरुदकं[4] ब्राह्मेण तीर्थेन पीत्वा, द्वाभ्यां करौ प्रक्षाल्य, द्वाभ्यामोष्ठौ संमृज्य, द्वाभ्यां मुखमवाङ्निमृज्य, एकेन वामकरं प्रक्षाल्य, एकेन पादौ संप्रोक्ष्य, एकेन मूर्धानं संस्पृश्य, एकेन ऊर्ध्वोष्ठमङ्गुल्यग्रैः संमृज्य, द्वाभ्यां क्रमेण अङ्गुष्ठतर्जनीभ्यां दक्षिणवामनासारन्ध्रे संमृज्य, द्वाभ्यां क्रमेण दक्षिणवामाक्षिणी अङ्गुष्ठानामिकाभ्यां निमृज्य, द्वाभ्यां क्रमेण दक्षिणवामश्रोत्रे अङ्गुष्ठकनिष्ठिकाभ्यां संमृज्य, एकेन अङ्गुल्यग्रैर्नाभिं संमृज्य, एकेन पाणितलेन हृदयम्, एकेन अङ्गुल्यग्रैः शिरः संमृज्य, द्वाभ्यां क्रमेण तैरेव दक्षिणवामभुजौ संमार्ष्टि । तदेतत्स्मृत्युक्तम् आचमनमित्युच्यते ॥

१७६. **दक्षिणावृत्**—दक्षिणेनाङ्गेन य आवर्त्तते पर्यावृत्तो भवति स दक्षिणावृदित्युच्यते ॥

१७७. **सव्यावृत्**—एवं सव्येनावर्तमानः सव्यावृत्पदवाच्यः ॥

---

१. अमरकोश २।७।४९ ॥ २. वही, २।७।४९ ॥

३. वही, २।७।४९ ॥

४. नैतत् श्रौतसूत्रेषु दृश्यते । अत एव ग्रन्थकारेणान्ते 'स्मृत्युक्तम्' इति निर्दिष्टम् । मनुस्मृतौ तु ब्राह्मतीर्थेन अपां पानमात्रमाचमनं विहितम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७८. **अङ्कधारणा**—सव्योत्तरिणोपस्थेन दक्षिणोत्तरिणोपस्थेन वा आसनम् अङ्कधारणापदवाच्यम् ।।

१७९. **विहाराव्यावृत्तिः**—विहारसंमुखं स्वपृष्ठभागो यथा न भवेत् तथा कर्मकाले इतस्ततो गमनं विहाराव्यावृत्तिरित्युच्यते ।।

१८०. **पार्ष्णी**—'वेदिश्रोण्योत्तरया पार्ष्णीं समां निधाय' इत्यादौ 'तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णीरघस्तयोः'[1] इत्यमरकोशात् पुंल्लिङ्गोऽपि अत्र स्त्रीलिङ्गः पार्ष्णीशब्दो घुटिकाधोभागवाचकः ।।

१८१. **प्रपदः**—'प्रपदेन बर्हिराक्रम्य' इत्यादौ प्रपदशब्दः 'पादाग्रं प्रपदं पादः'[2] इति कोशात् अङ्गुलिपश्चाद्भागस्य पादाग्रस्य वाचकः ।।

१८२. **आक्रमणम्**—तत्रैव आक्रमणं नाम बर्हिष उपरि प्रपदस्थापनम् ।।

१८३. **अवकर्षणम्**—'अङ्गुल्यग्राण्यवकृष्य' इत्यत्र अवकर्षणं नाम आकुञ्चनम् ।।

१८४. **प्रतिसंधानम्**—एवं 'प्रति संदध्याद्' इत्यत्र प्रसारणं प्रतिसंधानमित्युच्यते ।।

१८५. **सामधेनीः**—'सामिधेनीरन्वाह' इत्यादौ अध्वर्युप्रेषितो होता उत्तरया वेदिश्रोण्या समां पार्ष्णीं निधाय प्रपदेन बर्हिराक्रम्य संहितौ करौ हृदयदेशे अङ्कदेशे वा प्राञ्चौ धारयन् प्राङ्मुखस्तिष्ठन् प्रकृतीष्टौ पञ्चदश, विकृतौ पाशुकादौ च ताभ्यो न्यूना अधिका वा या ऋचो **मन्द्रस्वरेण पठति**, ता ऋचः समिधाः आधीयन्ते याभिरिति करणव्युत्पत्त्या सामिधेनीपदेनोच्यन्ते ।।

१८६. **अभिहिंकारः**—'अन्वाह' इत्यनुवचनं विधीयते । तत्र सामिधेनीनामनुवचने ऋक्पाठात्पूर्वं त्रिमात्रं 'हिं' इत्युच्चार्य उपांशुसंहितया प्रणवान्ता व्याहृतीः पठति । तस्य उच्चैरुपांशुपठ्यमानस्य समुदितस्य आश्वलायनसूत्रे (१।२।३-४) व्यवहारार्थं अभिहिंकार इति संज्ञा कृता ।।

१८७. **अभ्यासः**—तदनन्तरं पठ्यमानायाः प्रथमाया ऋचः त्रिवारं पाठो विहितः, एवमन्तिमाया अपि । अस्य त्रिःपाठस्य तत्रैव सूत्रे अभ्यास इति संज्ञा कृता ।।

१८८. **अध्यर्धकारम्**—सामिधेनीनां प्रथमाया ऋचः द्वयोरर्धर्चयोः संहितया पाठः, ऋगन्ते टेः स्थाने त्रिमात्रः प्रणवः, तदन्ते मकारः, तेन च

१. अमरकोश २।६।२३ ।। २. अमरकोश २।६।२२ ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मकारेण सह उत्तरस्या ऋचः प्रथमार्द्धर्चेन संधानं कार्यम्, समाप्ते द्वितीयसामिधेन्यर्द्धर्चे उच्छ्वासः कार्यः। एतदेकमवसानम्। ततः द्वितोयार्द्धर्चेन तृतीयसामिधेन्यर्द्धर्चं संधाय तेन च द्वितीयार्द्धर्चं प्रणवान्तं संधाय प्रणवान्तिममकारेण चतुर्थसामिधेन्यर्द्धर्चं, तस्मिन्नेवार्धर्चे उच्छ्वसेत्। एतद् द्वितीयमवसानम्। एवं च प्रथमोच्छ्वासे त्रयोऽर्धर्चाः, द्वितीये तु चत्वारः, संपद्यन्ते संकलनेन सप्त संपन्नाः। तत्र त्रिः पठ्यमानायाः प्रथमाया ऋचः षड् अर्धर्चाः द्वितीयस्या ऋच एकोऽर्धर्चः एतदनन्तरं प्रत्युच्छ्वासं द्वावर्धर्चौ भवतः। एवं प्रथमावत् उपान्त्याया द्वितीयार्धर्चमारभ्य तदीयप्रणवमकारेण अन्तिमाया अर्धर्चं संधाय, तेन च द्वितीयार्धर्चं संधाय तदन्तिमप्रणवेन उत्तरस्या अधर्चं संधाय तदन्ते विरमेत्। अन्तिमायां त्रिः पठ्यमानायाम् एतदेकमवसानम्,ततो द्वितीयार्धर्चमारभ्य तदन्तिमप्रणवमकारेण उत्तरस्या अर्धर्चः संधाय तेन च द्वितीयार्धर्चं संधाय तदन्तिमप्रणवमकारेण द्वादशाक्षरं [1]निगदभागं संधाय तदन्ते विरमेत्। एतत् अन्तिमायां द्वितीयमवसानम्। अनया रीत्या सामिधेनीनामाद्यन्त्ययोर्ऋचोः पठनम् अन्यासामृचामपेक्षया अधिकस्य अर्धर्चस्य एकैकस्मिन् उच्छ्वासे उच्चारणात् 'अध्यर्धकारमन्वाह' इति णमुलन्तेन अध्यर्धकारमित्यनेन पदेन आश्वलायनसूत्रे (१।२।१९) व्यवहृतम्॥

१८९. **सन्ततम्**—ऋगारम्भे प्रथमार्धर्चेऽवसाय ततो द्वितोयार्धर्चप्रणवमकारेण उत्तरस्या ऋचः प्रथमार्धर्चं संधाय तदन्ते विरमेत्। एवं सर्वा ऋचः पठित्वा अवशिष्टम् अन्तिमाया ऋचः द्वितीयार्धर्चं केवलं चतुर्मात्रिप्रणवान्तं उक्त्वा विरमेत्। एतादृशं पठनं तत्रैव सूत्रे (२।२।६) संततमित्युच्यते॥

१९०. **अनुवचनम्**--एतस्य सामिधेन्यनुवचनस्य अध्यर्धकारं पठनरहितस्य अभिहिंकारपूर्वकस्य चतुर्मात्रप्रणवान्तस्य शस्त्रे याज्यायां निगदे अनुवचने अभिष्टवने संस्तवने च अतिदेशः आश्वलायनसूत्रे कृतः। अन्वाह अनुब्रूयात् इत्यादिशब्दैर्विहितम् अभिहिंकारपूर्वकम् अभ्यासविशिष्टं प्रथमाया ऋचः प्रथमार्धर्चं अवसाय, द्वितीयार्धर्वान्त्यप्रणवेन प्रथमाया एव ऋचः द्वितीयपाठगतप्रथमार्थर्चं संधाय तदन्तेऽवस्येत्। अनया रीत्या सर्वा ऋचः पठित्वा अन्तिमाया ऋचः तृतीयपाठगतद्वितीयार्धर्चस्य अन्ते चतुर्मात्रप्रणवविशिष्टस्य परिशेषात् केवलस्य तावन्मात्रस्य पठनं अनुवचनमित्युच्यते॥

१९१. **अन्तापत्तिः**—एकस्या ऋचः द्वयोर्वा ऋचोरनुवचने अभ्यासो न भवति। समिधेन्यनुवचने अध्यर्धकारं पठनं विशेषः। अनुवचनमात्रे अवसाने

---

१. 'अग्ने महां असि ब्राह्मण भारत'। द्र० आश्व० श्रौत १।२।१७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यः प्रणवः स चतुर्मात्रो भवति,अन्यत्र तु त्रिमात्र एव। तदन्तिमस्य मकारस्य स्थाने स्पर्शेषु परेषु तत्तद्वर्गस्थः पञ्चमो वर्ण आदेशो भवति, यत्रलेषु परेषु क्रमेण अनुनासिकायवला आदेशा भवन्ति, रेफोष्मसु परेषु अनुस्वार आदेशा भवति, अन्यत्र अविकृत एव मकारः। एतस्य विकारमात्रस्य आश्वलायनसूत्रे (१।२।१५) अन्तापत्तिरिति संज्ञा ॥

१९२. **एकश्रुतिः**—'एकश्रुति अनुब्रूयात्' इति उच्यते। तथा च अनुवचनमात्रे एकश्रुतिः सिद्धचति। तत्र एकश्रुतिर्नाम उदात्तानुदात्तस्वरितानां स्वराणामभावः ॥

१९३. **वाजनम्**—अध्वर्युः सामिधेन्यारम्भे एकां समिधमाहवनीये ऽभ्याधाय, प्रणवेप्रणवे द्वितीयाद्येकादश समिधो ऽभ्याधाय, उपान्त्यायाः प्रणवे तिस्रः समिधः सहैवाभ्याधाय आहवनीयस्योपरि प्रक्षिप्तानां समिधां प्रदीपनानुकूलवातोत्पादनार्थम् अन्तिमायाः ऋचः अभ्यासकाले वेदं त्रिवारं प्राक् कम्पयति। एतत् कम्पनम् वाजनमित्युच्यते ॥

१९४. **उपहननम्**—'ध्रुवाज्यात् स्रुवेणोपहत्य' इत्यादौ उपहननं ग्रहणमेवोच्यते ॥

१९५. **आघारः**—वह्नेः कंचिद् देशमारभ्य देशान्तरपर्यन्तं समन्त्रकं आज्यधारायाः आहरणं प्रक्षेपणम् आघार इत्युच्यते ॥

१९६. **स्रौवाघारः, तिर्यगाघारो वा**—स्रुवस्याधस्ताद् वेदं धृत्वा तेन दक्षिणं परिधिमारभ्य उत्तरपर्यन्तं समन्त्रकम् आज्यधाराहरणं स्रौवाघार इति तिर्यगाघार इति चोच्यते ॥

१९७. **प्रादेशः**—'प्रादेशतालगोकर्णास्तर्जन्यादियुते तते अङ्गुष्ठे'[1] इति कोशात् विस्तृताङ्गुष्ठाग्रमारभ्य विस्तृततर्जन्यग्रपर्यन्तः प्रादेश इत्युच्यते ॥

१९८. **प्रादेश-करणम्**—तस्य वेद्यां प्रागग्रतया मन्त्रेण स्थापनं प्रादेशकरणमित्युच्यते ॥

१९९. **व्यूहनम्**—प्रादेशकरणपर्याप्तवेद्यन्तर्गतभूमेः सकाशाद् वेद्यास्तृतबर्हिषः उदग्देशे वेद्यामेव नयनं व्यूहनमित्युच्यते ॥

२००. **प्रवराः**—सामिधेन्यनुवचनानन्तरं होतृकर्तृकम् प्रवरप्रवरणं विहितम्। तत्र प्रवरो नाम आश्वलायनादिभिः प्रवराध्याये यद् गोत्रस्य

---

१. अमर कोश २।६।३४ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यावन्तः प्रकर्षेण वराः ऋषयः संबुद्धयन्तपदेन उक्तास्ते । ते यथा—शण्डिलानां शाण्डिलासितदैवलेति । तत्र क्षत्रियवैश्ययोर्यजमानयोः पुरोहितस्य प्रवरा वक्तव्याः । प्रवरसंशये मानव इत्येव प्रवरो वक्तव्यः ॥

२०१. **प्रवरणम्**—तेषामुच्चारणं प्रवरणमित्युच्यते ॥

२०२. **निगदः**—प्रवरानन्तरम असर्वो निगदशेषो वक्तव्यः । तत्र गायत्र्यादिच्छन्दोरहितः ऋग्वेदे विहितः[1] यजुर्मन्त्रः निगद इत्युच्यते ॥

२०३. **देवताह्वानम्**—होता निगदपाठानन्तरम् द्वितीयान्तम् देवतावाचकं शब्दमुच्चार्य संबुद्धयन्तमग्निशब्दमुच्चार्य 'आवह' इति पदं प्लुताद्यक्षरं पठित्वा अवस्यति । ततः द्वितीयादिदेवतावाचिकानि पदानि पूर्ववत् अग्निपदरहितानि आवहशब्दान्तानि पठति । एतद्देवताह्वानमित्युच्यते ॥

२०४. **आवहननिगदः**—आह्वानानन्तरं त्रयोदशाक्षरं निगदशेषं ब्रूयात् अयं सर्वो निगदः देवताह्वानगर्भत्वात् आवाहननिगद इत्युच्यते ॥

२०५. **पूर्वोऽग्निसंमार्गः**—अध्वर्युप्रेषितः आग्नीध्र इध्मसंनहनवेष्टितेन स्फ्येन मूलमारभ्य अग्रपर्यन्तम् मध्यमदक्षिणोत्तरान् परिधीन् क्रमेण संमृज्य, मन्त्रेणाहवनीयं संमार्ष्टि । यागापेक्षया पूर्वत्वादयं पूर्वोऽग्निसंमार्ग इत्युच्यते ॥

२०६. **अञ्जलिकरणम्**—ततोऽध्वर्युः जुहूपभृतोरग्रे प्राञ्चमञ्जलिं निधाय अग्निं नमस्करोति मन्त्रेण । एतत्कर्म अञ्जलिकरणमित्युच्यते ॥

२०७. **अत्याक्रमणम्**—देवताह्वानकाले दक्षिणहस्तेन मन्त्रेण जुहूमादाय सव्येन तथैवोपभृतमादाय दक्षिणेन सव्येन वा पादेन अग्न्याज्ययोर्मध्यमार्गेण मन्त्रेण वेद्या दक्षिणतो गच्छति । तदेतत्सर्वं समन्त्रकं गमनं द्वितीयादिकममन्त्रकम् गमनं च अत्याक्रमणमित्युच्यते ॥

२०८. **अध्वर्युस्थानम्**—तत आहवनीये आहुतिप्रक्षेपार्थं तस्य दक्षिणतः मन्त्रेण स्वस्य स्थानं कल्पयति । एतदध्वर्युस्थानमित्युच्यते ॥

२०९. **जौहवः प्राक्संस्थो वा आघारः**—ततः यजमानेन स्रुचि अन्वारब्धः सन् मध्यमपरिधेर्मध्यम् जुह्वग्रेण संस्पृश्य मन्त्रेण अविच्छिन्नं प्राक्संस्थमाघारमाघारयति । अयमाघारो जौहव आघारः प्राक्संस्थ आघार इति चोच्यते ॥

---

१. निगदानां यजुष्ट्वं व्यवस्थापितं जैमिनिना । द्र० मीमांसा २।१। अधि० १३। सूत्र ३८-४५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२१०. **उद्ग्रहणम्**—आघारहोमार्थं वह्नेः संनिधौ अधःकृतां जुहूं मन्त्रेण ऊर्ध्वां करोति। एतत् उद्ग्रहणमित्युच्यते ॥

२११. **प्रत्याक्रमणम्**—ततः सव्यपादेनैव प्राङ्मुख एव मन्त्रेण पूर्वमार्गेणैव वेद्या उत्तरत आगच्छति। तदेतदागमनं द्वितीयादिकममन्त्रकम् चागमनम् प्रत्याक्रमणमित्युच्यते ॥

२१२. **ध्रुवासमञ्जनम्**—ततः सकृत् मन्त्रेण द्विस्तूष्णीं जुह्वा ध्रुवायामाज्यं स्रावयति। एतद् ध्रुवासमञ्जनमित्युच्यते ॥

२१३. **यथायतन-सादनम्**—'यथायतनं स्रुचौ सादयति' इत्यादौ पूर्वं यस्मात् स्थानात् स्रुचौ गृहीते तस्मिन्नेव स्थाने पुनः स्थापनम् यथायतनसादनमित्युच्यते ॥

२१४. **अध्वर्युकर्तृप्रवरणम्**—ततः उत्करदेशे संसृष्टम् ऊर्ध्वाग्रं स्फ्यं धृत्वा स्वपृष्ठभागे आग्नीध्रमुपश्लिष्टं कृत्वा आश्राव्य आग्नीध्रेण प्रत्याश्राविते एकश्रुत्या मन्त्रं पठति। तस्य मन्त्रस्य भरतवत्सदानन्तरं यजमानप्रवरान् तद्धितप्रत्ययरहितान् होतुर्विपरीतान् वतिप्रत्ययान्तान् पठित्वा अवशिष्टं ब्रह्मण्वदित्यादिमन्त्रभागं पठति। तदेतत् अध्वर्युकर्तृकप्रवरणमित्युच्यते ॥

२१५. **उपोत्थानम्**—ततो ऽमुकशर्मा मानुष इति होतुर्नाम गृह्णाति। तत् श्रुत्वा होता मन्त्रेण उत्थाय अन्यं मन्त्रं जपति। एतदुपोत्थानमित्युच्यते ॥

२१६. **अभिक्रमणम्**—ततो मन्त्रेण अध्वर्युं समीपं गच्छति। एतद् गमनम् अभिक्रमणमित्युच्यते ॥

२१७. **अध्वर्व्वाग्नीध्रान्वारम्भः**—तत एकेनैव मन्त्रेण दक्षिणहस्तेन दक्षिणेंऽसे अध्वर्युं दक्षिणेनोरुणा सव्यहस्तेन वा आग्नीध्रं च स्पृशति। अयमध्वर्व्वाग्नीध्रान्वारम्भ इत्युच्यते ॥

२१८. **मुखसंमार्गः**—ततः स्फ्यवेष्टनेध्मसंनहनाग्रैः सकृन्मन्त्रेण द्विस्तूष्णीं स्वमुखमभ्यात्मं स्पृशति। तन्मुखसंमार्ग इत्युच्यते।

२१९. **होतृषदनम्**—ततो होतृषदनं होता अभिमन्त्रयते तत्र होतृषदनं नाम वेद्युत्तरश्रोण्युत्तरदेशः होतुरुपवेशनस्थानम् ॥

२२०. **निरसनम्**—होतृषदने उपवेशनार्थमास्तीर्णानां दर्भाणां किञ्चि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देकं तृणं अङ्गुष्ठानामिकाभ्यां गृहीत्वा मन्त्रेण नैर्ऋत्यां प्रक्षिपति। तत् प्रक्षेपणं निरसनमित्युच्यते ॥

२२१. **निरसनः** [मन्त्रः]—करणव्युत्पत्त्या मन्त्रोऽपि निरसन इत्युच्यते ॥

२२२. **उपवेशनः** [मन्त्रः]—ततो मन्त्रेण होता स्वस्थाने उपविशति दक्षिणोत्तरिणोपस्थेन। उपविश्यतेऽनेनेति करणव्युत्पत्त्या स मन्त्र उपवेशन इत्युच्यते ॥

२२३. **बर्हिरुपस्पर्शनम्**—ततो वेद्यास्तृतबर्हिः दक्षिणजानुशिरसा मन्त्रेण स्पृशति। तदेतद् बर्हिरुपस्पर्शनमित्युच्यते ॥

२२४. **स्रुगादापनः** [निगदः]—होता इध्मप्रदीपनसमये एकं यजुर्मन्त्रं पञ्च ऋचश्च जपित्वा इध्मे प्रदीप्ते सति यस्य निगदस्य षडक्षरो मध्यभागः उपांशु पठ्यते तं निगदमुच्चैः एकश्रुत्या पठति। तन्निगदघटक **धृतीवती**-शब्दस्य श्रवणानन्तरम् अध्वर्युः प्रयाजहोमाद्यर्थं जुहूपभृतौ गृहीत्वातिक्रामति। स्रुचौ जुहूपभृतौ आदाप्येते अनेनेति करणव्युत्पत्त्या स निगदः **स्रुगादापन** इत्युच्यते ॥

२२५. **आश्रावणम्, आश्रुतं च**—अध्वर्युर्जुहूपभृतावादाय अत्याक्रम्य स्वस्थाने तिष्ठन् आश्रावयति। तत्र आश्रावणं इति च प्लुताकारपूर्वक-प्लुतादिश्रावयेति पदोच्चारणम् आश्वलायनसूत्रे तु प्लुतो य ओकारस्तत्पूर्व-कश्रावयेतिपदोच्चारणम् ॥

२२६. **प्रत्याश्रावणम्, प्रत्याश्रुतं च**—आग्नीध्र इध्मसन्नहनवेष्टितं स्फ्य-मूर्ध्वाग्रं घृत्वा उत्करे दक्षिणामुखः तिष्ठन् सर्वदा आश्रावणानन्तरम् अस्तु-शब्दपूर्वकप्लुतादिश्रौषट्पदमुच्चारयति। तदेतत् प्रत्याश्रवणं प्रत्याश्रुतमिति चोच्यते ॥

२२७. **प्रैषः**—यजेत्यादिलोण्मध्यमपुरुषान्तपदघटितेन येन वाक्येन अध्व-र्यवादिना होत्रादिः प्रेर्यते तद्वाक्यं प्रैष इत्युच्यते ॥

२२८. **पुरोनुवाक्या, अनुवाक्या च**—अध्वर्युप्रेषितो होता एकश्रुत्या पुरोनुवाक्यां पठति। सा च प्रायः एकैव ऋक् भवति। तस्याः प्रथमार्धर्चे एकमवसानं चतुर्मात्रप्रणवान्तद्वितीयार्धर्चे द्वितीयमवसानम्। यस्मिन् यागे मैत्रावरुणो भवति तत्र स एव पुरोनुवाक्यां पठति। पुरः पूर्वं यागाद् देवताम् अनुकलयितुं या ऋगुच्यते इति व्युत्पत्त्या पुरोनुवाक्यापदं अनुवाक्यापदं च ऋग्विशेषबोधकम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२२९. **आगूः**—यच्छब्दस्य प्रथमाबहुवचने 'ये' इति भवति तत्र एकारः प्लुतः पाठ्यः, तत्पूर्वकम् 'यजामहे' इति तिङन्तं रेफान्तेन आगूः शब्देनोच्यते ॥

२३०. **आगूः**—पित्र्यायामिष्टौ तु 'यजामहे' इत्यस्य स्थाने 'स्वधामहे' इति पठ्यते सैव तत्र आगूरित्युच्यते ॥

२३१. **वषट्कारः**—वकारोत्तरवर्त्यकारस्य स्थाने प्लुतमौकारं [वौषट्] कृत्वा वषट् इति शब्दः पठ्यते । स वषट्कार इत्युच्यते ॥

२३२. **वषट्कारः**—पित्र्यायां तु वषट्कारस्थाने स्वधापदपूर्वकं 'नमः' इति पदं पठ्यते स एव तत्र वषट्कारो भवति ॥

२३३. **याज्या**—आगूःपूर्विका वषट्कारान्ता प्रायशोऽर्धर्चावसाना बहुस्थानेषु एकैव ऋक् क्वचिदनृगपि याज्यापदेनोच्यते ।

२३४. **याज्यापठनप्रकारः**—याज्याया ऋचां मध्ये अन्त्योऽच् प्लुतो भवति । रुस्थानिको विसर्गः याज्याया अन्ते भवति चेत् वषट्कारेण संधौ अवसानाभावात् रेफ एव विसर्गस्थाने ऽवतिष्ठते । रेफस्थानिको विसर्गो यत्र तत्र लोप एव विसर्गस्य भवति । याज्यान्तानामन्येषां तु व्यञ्जनानां यथाव्याकरणं वषट्कारेण सह संधिर्भवति । एकारस्य ऐकारस्य वा याज्यान्तत्वे तयोः संध्यक्षरत्वात् प्लुतमकारं पृथगुच्चार्य इकारं ह्रस्वमेव अन्ते पठित्वा वषट्कारं पठेत् । एवं ओकारस्य औकारस्य वा तथात्वे तयोरपि प्लुतम् अकारं पृथगुच्चार्य उकारमन्ते पठित्वा वषट्कुर्यात् । तत्र केवलः रकार रेफ इत्युच्यते ॥

२३५. **व्यञ्जनानि**—कादयो मान्ताः यादयो हान्ताश्च वर्णा व्यञ्जनपदवाक्याः ।

२३६. **अचः, स्वराश्च**—एकारादयश्चत्वारः अइउऋलृ इति च पञ्च वर्णाः अच इति स्वरा इति चोच्यन्ते ॥

२३७. **सन्ध्यक्षराणि**—'सन्धिसंपन्नानि अक्षराणि' इति समासे एकारादयश्चत्वारो वर्णाः संध्यक्षराणीत्युच्यन्ते ॥

२३८. **मन्द्रस्वरः**—सामिधेनीप्रभृतिप्रयाजान्तं शंयुवाकानन्तरं च मन्द्रस्वरेण पठ्यते । 'मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् । प्रातःएवनयोगं तं छन्दो गायत्रमाश्रितम्' इति शिक्षोक्तया[1] 'मन्द्रस्तु गम्भीरे' (१।७।२)

१. पाणिनीय (श्लोकात्मिका) शिक्षा, ७।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इत्यमरोक्त्या च कायाग्निप्रेरितो वायुः उरोदेशे संचारं कृत्वा मुखं प्राप्य यथास्थानं यत्र गम्भीरे स्वरे वर्णानुत्पादयति, गानशास्त्रे यं प्रथमग्राम इति वदन्ति, स मन्द्रस्वर इत्युच्यते ॥

२३९. **यमाः**—तस्य सप्त यमा भवन्ति। तत्र षष्ठेन यमेन याज्या पठ्यते, सप्तमेन वषट्कारः 'उच्चैस्तरां बलीयान् याज्यायाः'[1] इत्याश्वलायन-सूत्रात् 'उच्चैस्तरां वा वषट्कारः'[2] इति पाणिनिसूत्राच्च तत्र उच्चनीच-भावेन आरोहणावरोहणक्रमेण संपाद्यमानाः गानशास्त्रे षड्जादिनामभिः प्रसिद्धा यमा इत्युच्यन्ते ॥

२४०. **दर्शः**—'दर्शश्च पूर्णमासश्च यागौ पक्षान्तयोः पृथक्'[3] इति कोशात् अमावास्यायामन्वाधानं कृत्वा प्रतिपदि यागः क्रियते स यागो दर्श इत्युच्यते ॥

२४१. **पूर्णमासः**—पौर्णमास्यामन्वाधाय प्रतिपदि क्रियमाणो यागः 'पौर्णमासेनेष्टिपशुसोमा उपदिष्टाः' इति सूत्रात् पूर्णमासे भव इति व्युत्पत्त्या पौर्णमासशब्दप्रतिपाद्य दर्शशब्दवत् लक्षणया पूर्णमासशब्दप्रतिपाद्यश्च भवति ॥

२४२. **प्रकृतिः**—दर्शपूर्णमासयोरेव श्रुत्यादिषु सर्वविधेरुपदेशात् अन्यत्र च अत्रत्यस्य सर्वेतिकर्तव्यताकलापस्य अतिदेशात् दर्शपूर्णमासौ प्रकृतिप-दवाच्यौ ॥

२४३. **विकृतिः**—यत्रयत्र अतिदेशः प्रवर्त्तते स यागो विकृतिपदेन व्यवह्रियते ॥

२४४. **प्रयाजाः**—प्रधानयागात् पूर्वम् इज्यते यैरिति व्युत्पत्त्या एते सर्वे प्रयाजा इत्युच्यन्ते ॥

प्रयाजसंख्याः—तत्र प्रकृतौ पञ्च प्रयाजा भवन्ति। ते च आगुरादयो यजूरूपाः वषट्कारान्ताः याज्यात्वात् भवन्ति। तेषामन्ते वषट्कारात् पूर्वं सूत्रे 'वेतु वीता व्यन्तु' इति पदत्रयमध्ये अन्यतमं पदं पठितमस्ति याज्यान्त-त्वप्रयुक्ता प्लुतिश्च तस्यैव भवति ॥ चतुर्णां प्रायाजानां वसन्तग्रीष्मवर्षा-शरदो देवताः। पञ्चमस्य तु हेमन्तशिशिरौ समस्तौ देवता। तत्र

---

१. आश्वलायन श्रौत सूत्र १।५।६ ॥

२. अष्टा० १।२।३५ ॥ ३. अनुपलब्धमूलम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयः प्रयाजः यजमानस्य गोत्रेण वासिष्ठत्वे शौनकत्वे आत्रेयत्वे वाध्रयश्वत्वे क्षत्रियत्वे वा आदौ नराशंसपदघटितः, अन्येषां तु तनूनपात्पदादिः ॥

चातुर्मास्यगतमुख्येष्टिषु नव प्रयाजा भवन्ति । तत्र आद्याश्चत्वारः प्राकृता एव । तदुत्तरं चत्वारो ऽपूर्वाः विहिताः । तेषां मध्ये प्रथमस्य देव्यो द्वारो देवता, द्वितीयस्य उषासानक्ता, तृतीयस्य दैव्यौ होतारौ, चतुर्थस्य तिस्रो देव्यः, नवमो ऽपि प्राकृत एव । पाशुके तु एकादश प्रयाजा भवन्ति । ते च सर्वे ऽपि ऋग्रूपाः ॥

२४५. **नाराशंसवन्तः प्रयाजाः**—तत्र शाकलसंहितायां वसिष्ठेन दृष्टानि यानि सूक्तानि तदन्तर्गता एकादश ऋचः वासिष्ठगोत्रस्य यजमानस्य भवन्ति । एवमात्रेयगोत्रस्य तद्दृष्टसूक्तान्तर्गताः वध्र्यश्वदृष्टसूक्तान्तर्गतास्तद्गोत्राणां, गृत्समदस्य शौनकत्वात् गृत्समददृष्टसूक्तान्तर्गताः शौनकगोत्रस्य भवन्ति । अत्र सर्वत्र द्वितीया ऋचो नराशंसपदघटिताः । एते चतुर्विधाः प्रयाजा नाराशंसवन्त इत्युच्यन्ते ॥

२४६. **उभयवन्त, प्रयाजाः प्रैषाश्च**—मेधातिथिदृष्टसूक्तान्तर्गताः द्वादश ऋचः । तत्र द्वितीयतृतीये ऋचौ क्रमेण तनूनपान्नराशंसपदघटिते । अत एव ताः सर्वविधयजमानार्थाः । एवं दीर्घतमसा दृष्टा अपि द्वादश व्यवस्थया पूर्वोक्तया एकादश सर्वार्था भवन्ति । तत्र एकादश प्रयाजास्तत्र तेषां प्रैषां-मैत्रावरुणेन पठ्यमाना द्वादश प्रैषसूक्ते पठिता अपि पूर्वोक्तव्यवस्थया एकादशैव भवन्ति । अत्र सूक्तद्वयगताः प्रयाजाः प्रैषश्च उभयवन्त इत्युच्यन्ते ॥

२४७. **तनूनपात्वन्तः प्रयाजाः**—ऋष्यन्तरदृष्टाः प्रयाजास्तनूनपात्पदघटितद्वितीयप्रैषवत्त्वात् तनूनपात्वन्त इत्युच्यन्ते ॥

२४८. **वषट्कारानुमन्त्रणम्**—होता अन्यो ऽपि वा वषट्कारानन्तरं नियमेन यं मन्त्रं जपति, स वषट्कारानुमन्त्रणमित्युच्यते ॥

२४९. **त्यागः**—वषट्कारसमकालं अध्वर्युर्जुहोति । तदानीमेव चतुर्थ्यन्तं देवतानाम उद्दिश्य 'न मम' इति यजमानः पठति । स त्याग इत्युच्यन्ते ॥

२५०. **वीतवत्पादान्ताः प्रयाजाः**—अनृग्रूपाः प्रयाजाः वीषातूत्तरलोडन्तपदान्तकत्वात् वीतवत्पदान्ता इत्युच्यन्ते ॥

२५१. **प्रयाजशेषाभिधारणम्**—अध्वर्युः प्रयाजैरिष्ट्वा उदङ्ङत्याक्रम्य जुहूस्थाज्यशेषेण ध्रुवामभिधार्य क्रमेण हवींष्यभिधार्य उपभृतमभिधारयति । तदेतत् प्रयाजशेषाभिधारणमुच्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२५२. **चतुरवत्तम्**—अध्वर्युः ध्रुवाज्यात् स्रुवेण जुह्वाम् एकवारमाज्यं गृहीत्वा अनुवाक्यापठनार्थं होतारं 'अनुब्रूहि' इत्यन्तेन मन्त्रेण संप्रैष्य पुनस्त्रिवारं गृह्णाति । तदेतत् चतुरवत्तमित्युच्यते ॥

२५३. **चतरवत्ती**—यस्यैवं भवति स यजमानश्चतुरवत्ती भवति ॥

२५४. **पञ्चावत्तम्**—'जामदग्न्या वत्सबिदावार्ष्टिषेणास्तथैव च । भार्गवाश्च्यावना और्वाः पञ्चावत्तिन ईरिताः' इति वचनात् एतद्वचनोक्तगोत्राणां यजमानानां पञ्चवारमवद्यति । एतत्पञ्चावत्तमित्युच्यते ॥

२५५. **पञ्चावत्ती**—यजमानश्च पञ्चावत्ती भवति ॥

२५६. **अवदानम्**—दो अवखण्डने इति पठितत्वात् स्थापितहविषः होमपरिमितस्य भागस्य ग्रहणार्थं खण्डनम् अवदानमित्युच्यते ॥

२५७. **आज्यभागौ**—अनया रीत्या अवदाय गृहीत्वा अत्याक्रम्य, दक्षिणाभिमुख्या स्रुचा आहवनीयस्यैशानभागे आग्नेयमाज्यभागं हुत्वा, उदङ्ङत्याक्रम्य पूर्ववदवदाय गृहीत्वा अत्याक्रम्य उदङ्मुख्या स्रुचा अग्नेयदेशे सौम्यमाज्यभागं जुहोति । तत्रा आज्यं भागो ययोरिति व्युत्पत्त्या तद्देवते अग्नीषोमौ आज्यभागपदार्थौ ॥

२५८. **चरुपुरोडाशाद्यवदानम्**—आज्यभागानन्तरं जुह्वामुपस्तीर्य मन्त्रेण दक्षिणहस्ततत्संस्कारेण पुरोडाशादिरूपं हविरुपस्थाय उपविश्य मन्त्रेण हविरभिमृश्य पञ्चभिरङ्गुलिभिः अङ्गुष्ठमध्यमानामिकाभिर्वा प्रथमपुरोडाशादेः पूर्वार्धात् अवदाय चर्वादिद्रव्यस्य तु मेक्षणेनैवावदाय द्वितीयं पश्चार्धादवदाय, पञ्चावत्तिनस्तु मध्यात् पूर्वार्धात् पश्चार्धादिति त्रिरवदाय अभिधारयति । एवं रीत्या क्रियमाणं चरुपुरोडाशाद्यवदानमुच्यते ॥

२५९. **प्रत्यञ्जनम्**—अवत्तं हविरभिधार्य आज्यस्थाल्याज्येन मन्त्रेण अवदानस्थानान्याप्याययति । तदेतत् प्रत्यञ्जनमित्युच्यते ॥

२६०. **प्रधानयागः**—एवं रीत्या अवदाय अत्याक्रम्य वषट्कृते प्राक्संस्था उदक्संस्था वा प्रधानाहुतीर्जुहोति सोऽयं प्रधानयाग इत्युच्यते ॥

२६१. **पुरस्तादाहुतिः**—प्रधानयागे अवदानानन्तरं अत्याक्रमणात् पूर्वं ध्रौवाज्येन स्रुवेण तूष्णीं करिष्यमाणतत्तत्प्रधानहोमदेशे स्विष्टकृद्धोमदेशे च एकामाहुतिं जुहोति । सा पुरस्तादाहुतिरित्युच्यते ॥

२६२. **उपरिष्टादाहुतिः**—एवं प्रत्याक्रमणानन्तरं प्रक्षिप्तस्य हविष उपरि अन्यामाहुतिं जुहोति सा । उपरिष्टादाहुतिरित्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२६३. **पार्वणहोमः**—प्रधानहोमानन्तरं उपस्तीर्य सर्वेषां हविषां उत्तरार्धात् सकृत्सकृदवदानं, पञ्चावत्तिनस्तु द्विरवादनं भवति। एवं ततो द्विरभिधारयति। अवत्ते स्विष्टकृति स्रुवेण दर्शे अमावास्यादेवताकां पौर्णमासे पौर्णमासीदेवताकामाहुतिं जुहोति। स पार्वणहोम इत्युच्यते॥

२६४. **स्विष्टकृद्धोमः**—अत्र पुरोडाशादेरुपस्थानाभिमर्शने न भवतः। अवदानदेशानां प्रत्यञ्जनं च न भवति। एवमवदाय अत्याक्रम्य वषट्कृते अग्नौ ऐशानदेशे जुहोति। सोऽयं स्विष्टकृद्धोम इत्युच्यते।

२६५. **देवतादेशः**—होता आज्यभागप्रभृति स्विष्टकृत्पर्यन्तं याज्यापाठे आगुरम् उच्चार्य संहितया द्वितीयान्तं देवतानाम उच्चार्य याज्यां संहितया पठति। तदेतत् देवतानामोच्चारणं देवतादेश इत्युच्यते॥

२६६. **स्विष्टकृन्निगदः**—'स्विष्टकृतं यज' इति श्रुत्वा आगुरमुच्चार्य देवतामादिश्य निगदं पठित्वा याज्यासंज्ञामृचं पठति। स स्विष्टकृन्निगद इत्युच्यते॥

२६७. **अन्तःपरिधिनिनयनम्**—अध्वर्युः स्विष्टकृद्धोमानन्तरं प्रत्याक्रम्य उपरिष्टादाहुतिं हुत्वा जुह्वां जलं गृहीत्वा संक्षाल्य तज्जलं मध्यमपरिधेरन्तर्दशे मन्त्रेण उदकसंस्थं प्रक्षिपति। तत् अन्तःपरिधिनिनयनमित्युच्यते॥

२६८. **बहिःपरिधिनिनयनम्**—पुनर्जुहूं जलेन प्रक्षाल्य वह्नौ निष्टप्य पूरयित्वा मन्त्रेण परिधेर्बहिः जलं पूर्ववत् प्रक्षिपति। तत् बहिःपरिधिनिनयनमित्युच्यते॥

२६९. **प्राशित्रः**—तत उपभृति विद्यमानमाज्यं जुह्वां कृत्वा यथायतनं जुहूपभृतौ सादयित्वा मन्त्रेण प्राशित्रहरणे प्रथमप्रधानद्रव्यसम्बन्धिनं प्राशित्रमवद्यति। स्रुवदण्डेनाभिघार्य प्रणीतानां पश्चिमतः सादयति। स भागः प्राशितुः ब्रह्मणः अयमिति विग्रहेण प्राशित्रपदवाच्यः॥

२७०. **यजमानभागः**—तत इडापात्रं वेद्यां उदगग्रं निधाय तस्मिन् यावन्ति प्रधानद्रव्याणि तावदर्थं सकृदेव उदक्सस्थं आज्यस्थाल्याज्येनोपस्तीर्य प्रथमप्रधानद्रव्यदक्षिणार्धाद् अवदानदेशसंस्पर्शमकुर्वन् मन्त्रेण अवदाय इडापात्रे उपस्तीर्णदेशे निधाय उत्तरार्धात्तु तूष्णीं अवदानदेशसंस्पर्शं कुर्वन्नेवावदाय तथैव निदधाति। ततस्तस्यैव द्रव्यस्य पूर्वभागात् त्र्यङ्गुलं चतुरङ्गुलं खण्डं तूष्णीमवदाय आज्यस्थाल्याज्येन सुसंतृप्तं संतर्प्य ध्रुवायाः पूर्वभागे निदधाति। तत् खण्डं यजमानकर्तृकप्राशनार्थत्वात् यजमानभाग इत्युच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२७१. **इडावदानम्**—ततः द्वितीयादिप्रधानद्रव्याणां प्रथमवदवदाय निधाय उपस्तरणवद् अभिघारयति। एतदिडावदानमुच्यते॥

२७२. **अङ्गुलिपर्वाञ्जनम्**—होतुः प्रदेशिन्याः उत्तमे पर्वणी आज्येन स्रुवेण अनक्ति। तदङ्गुलिपर्वाञ्जनमुच्यते॥

२७३. **ओष्ठनिमार्गः**—ततः होता उत्तरेण पर्वणा उत्तरं स्वीयमोष्ठं मन्त्रेण निमृज्य अधरं ओष्ठं अधरेण पर्वणा मन्त्रेण निमार्ष्टि। अयमोष्ठनिमार्ग इत्युच्यते॥

२७४. **अवान्तरेडा**—ततोऽपः स्पृष्ट्वा अध्वर्युणा दीयमानामिडापात्रीं अञ्जलिना प्रतिगृह्य सव्ये पाणौ कृत्वा तस्याः पश्चात् उदगङ्गुलि पाणिमुपधाय तस्मिन् अध्वर्युः उपस्तरणपूर्वकम् इडायाः कञ्चिदंशं ददाति। तं गृहीत्वा अङ्गुल्यङ्गुष्ठयोर्मध्येन स्वयं द्वितीयमंशं गृह्णाति। अध्वर्युस्तदुपरि अभिघारयति। होता तत् भागद्वयमङ्गुष्ठेनाभिसंगृह्य अङ्गुलीः प्रत्याहृत्य मुष्टिमकृत्वा दक्षिणभागे इडापात्रं प्रागग्रमुदगग्रं वा प्रतिगृह्य मुखसंमितं नासिकासंमितं वा धारयति। तत्र पाणिगृहीतं भागद्वयम् अवान्तरेडा इत्युच्यते॥

२७५ **चतुर्धाकरणम्**—तथा धारयित्वा कंचिन्मन्त्रं जपित्वा उच्चैरन्यं मन्त्रं पठति। तत्र मन्त्रे 'यदध्वर्यव' इति पदं तत् श्रुत्वा अध्वर्युः प्रथमं पुरोडाशं चतुर्धा कृत्वा बर्हिषि निदधाति। तदेतत् चतुर्धाकरणमित्युच्यते॥

२७६. **इडोपह्वानम्**—अनया रीत्या इडापात्रं धारयित्वा मन्त्रपठनम् इडोपह्वानमित्युच्यते॥

२७७. **षडवत्तम्**—उपहूतायामिडायाम् अध्वर्युराग्नीध्रस्य हस्ते उपस्तीर्यं प्रथमम् इडायाः कंचिदंशं दत्त्वा अभिघार्य पुनरुपस्तीर्यं द्वितीयं दत्त्वा अभिघारयति। तदेतत् षडवत्तमित्युच्यते॥

२७८. **इडाप्राशनम्**—ततो ब्रह्मणे होत्रे च इडाभागं दत्त्वा स्वं भागं गृहीत्वा यजमानाय ददाति। होता पाणिगृहीतामवान्तरेडां मन्त्रेण भक्षयति। 'जुष्टिरसि' इत्यादिमन्त्रेण यजमानोऽनुमन्त्रयते। ततः सर्वे ऋत्विजः सयजमाना इडां भक्षयन्ति। तदेतदिडाप्राशनमित्युच्यते॥

२७९. **इडा**—इडापात्र्यां पूर्वविधिना गृहीतं हविरिडेत्युच्यते॥

२८०. **इडामार्जनम्**—ततः अध्वर्व्वाग्नीध्रौ बर्हिषि उत्तानं दक्षिणं हस्तं निधाय तस्मिन् जलं सिञ्चतः। होतृब्रह्माणौ तु परिस्तरणस्याधस्तादञ्जलिं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निधाय अन्येन जलं सेचयतः। यजमानस्तु मन्त्रं पठन् प्रस्तरस्याधस्ता-दञ्जलिं निधाय अध्वर्युणा जलं सेचयति। तदेतत् सर्वम् इडामार्जनमि-त्युच्यते ॥

२८१. **प्राशित्रपरिहरणम्**—अध्वर्युणा प्रेषितः आग्नीध्रः प्रणीता-पश्चिमतः स्थापितं प्राशित्रहरणं गृहीत्वा आहवनीयपूर्वमार्गेण गत्वा ब्रह्मणे ददाति। ब्रह्मा मन्त्रेण तत् प्राशित्रं दृष्ट्वा मन्त्रेण अञ्जलिना प्रतिगृह्य वेद्यां कुशेषु प्राग्दण्डं मन्त्रेण निदधाति। तदेतत्कर्म प्राशित्रपरिहरणमित्युच्यते ॥

२८२. **प्राशित्रप्राशनम्**—ब्रह्मा पात्रात् प्राशित्रभागमादाय स्थानान्तरं गत्वा मन्त्रेण प्राश्नाति। एतत्प्राशित्रप्राशनमित्युच्यते ॥

२८३. **अन्वाचमनम्**—ततः स्मृत्युक्तमाचमनं कृत्वा मन्त्रेण पुनरा-चामति। तदन्वाचमनमित्युच्यते ॥

२८४. **नाभ्यालम्भनम्**—ततः मन्त्रेण सोदकेन पाणिना नाभिं स्पृशति। तत् नाभ्यालम्भनमित्युच्यते ॥

२८५. **अभ्यात्माब्भिननयनम्**—ततः स्वस्थाने उपविश्य प्राशित्रहरणं प्रक्षाल्य तस्मिन् जलं प्रक्षिप्य तेन आत्माभिमुखं त्रिवारं भ्रूमौ सिञ्चति। एतत् अभ्यात्माब्भिननयनमुच्यते।

२८६. **चतुर्धाकृतभागदानम्**—अध्वर्युकर्तृकप्राशित्रपरिहरणप्रैषोच्चार-णानन्तरं यजमानो बर्हिषि निहितान् प्रथमपुरोडाशस्य चतुरो भागान् अनुमन्त्र्य एकैकं भागं दर्भेण स्पृष्ट्वा 'इदं ब्रह्मणः' 'इदं होतुः' 'इदमध्वर्योः' 'इदमाग्नीध्रस्य' इति उद्दिशति। तदेतत् चतुर्धाकृतभागदानमित्युच्यते ॥

२८७. **चतुर्धाकृतभागपरिहरणम्**—ततोऽध्वर्युराग्नीध्रभागं द्वेधा कृत्वा आग्नीध्रहस्ते उपस्तीर्य भागस्यैकदेशं दत्त्वा पुनरुपस्तीर्य द्वितीयमेकदेशं दत्त्वा द्विरभिघारयति। अत्र एतादृशं षडवत्तं भवति। इडाभागे अन्यादृशं षडवत्तमुक्तम् ततो वेदेन ब्रह्मणे ब्रह्मभागं ददाति,स्रुवेण होत्रे होतृभागं दत्त्वा स्वयं स्वभागं जुहूां गृह्णाति। एतत् चतुर्धाकृतभागपरिहरणमित्युच्यते ॥

२८८. **भागनिधानम्**—ब्रह्मा स्वभागं गृहीत्वा अब्निनयनानन्तरं वेद्यां कुशेषु स्थापिते प्रत्यग्दण्डे प्राशित्रहरणे निधाय अध्वर्युणा पूर्वं ध्रुवायाः पूर्व-देशे स्थापितं यजमानभागं,तस्य पश्चात् कुशेषु निदधाति। इदं भागनिधान-मित्युच्यते ॥

२८९. **भागप्रतिग्रहः**—ततः सर्वे ऋत्विजः स्वं-स्वं भागं स्व-स्वमन्त्रैः कामस्तुतिनामकैः प्रतिगृह्णन्ति। स भागप्रतिग्रह इत्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२९०. **अन्वाहार्यावेक्षणम्**—ततो ब्रह्मा आहवनीयस्य पूर्वमार्गेण वेद्या उत्तरतः गार्हपत्यस्य पश्चिमतश्च गत्वा दक्षिणाग्नौ सुशृतं अध्वर्युणा अभिघार्य दक्षिणस्यां श्रोण्यां स्थापितं अन्वाहार्यं मन्त्रेण पश्यति। तदन्वाहार्यावेक्षणमित्युच्यते ॥

२९१. **अन्वाहार्यावघ्राणम्**—ततो मन्त्रेण स्पर्शमकुर्वन् तदीयगन्धं जिघ्रति। तदन्वाहार्यावघ्राणमुच्यते ॥

२९२. **यजमानकर्तृकमन्वाहार्यावेक्षणम्**—ततो ब्रह्मणि अङ्गुष्ठानामिकाभ्यामन्वाहार्यैकदेशं गृहीत्वा यथागतमागत्य स्वस्थाने उपविश्य ब्रह्मभागे प्राशित्रहरणस्थे तमेकदेशं स्थापयति सति, अध्वर्युरन्वाहार्यस्थालीं वेद्यां यजमानसंमुखां स्थापयति। यजमानस्तन्मध्यगतमन्वाहार्यं पश्यति। तद्यजमानकर्तृकमन्वाहार्यावेक्षणमुच्यते ॥

२९३. **अन्वाहार्यदानम्**—ततः सर्वान् ऋत्विजः संबोध्य 'अयं वः ओदनः, यूयं यथाभागं प्रतिगृह्णीध्वम्' इति वदति। तदन्वाहार्यदानमित्युच्यते ॥

२९४. **अन्वाहार्यप्रतिग्रहः**—अध्वर्वाग्नीध्रौ, सप्तदशकृत्वोऽपान्य[1] मन्त्रेण प्रतिगृह्णीतः, होतृब्रह्माणौ आश्वलायनसूत्रपठितेन कामस्तुतिसंज्ञकेन मन्त्रेण प्रतिगृह्णीतः। सोऽयमन्वाहार्यप्रतिग्रह इत्युच्यते ॥

२९५. **अपाननम्**—अपाननं नाम बाह्यवायोः नासापुटाभ्यामन्तराकर्षणम् ॥

२९६. **हविरुद्वासनम्**—ततो वेद्यां विद्यमानानां हविःशेषाणां वेद्या बहिः उत्तरतः प्रक्षेपणं हविरुद्वासनमित्युच्यते ॥

२९७. **अनुयाजसमिदाधानम्**—ततः [अध्वर्युः] एकविंशतिदारुकेध्मसंबन्धिनीं परिशेषितां समिधम् आहवनीये प्रक्षेप्तुं ब्रह्मणोऽनुज्ञां याचमानः आग्नीध्रम् आहवनीयसंमार्गे प्रेष्यति। ब्रह्मा च कंचिन्मन्त्रं जपित्वा उच्चैरनुज्ञां ददाति। अध्वर्युस्तां समिधमनुयाजहोमार्थमाहवनीये ऽभ्यादधाति। तदनुयाजसमिदाधानमित्युच्यते ॥

२९८. **उत्तराहवनीयसंमार्गः**—आग्नीध्रः स्फ्ये पूर्वं वेष्टितमिमध्मन्नहनं विमुक्तं कृत्वा तेन पूर्ववत् सकृत् परिधीन् संमृज्य मन्त्रेण आहवनीयं संमार्ष्टि। सोऽयमुत्तराहवनीयसंमार्ग इत्युच्यते ॥

---

१. द्र० पदार्थः २९५।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२९९. **अनुयाजप्रचारः, अनुयाजहोमश्च**—अध्वर्युर्जुहूपभृतावादायात्याक्रम्याश्राव्य आग्नीध्रेण इध्मसंनहनरहितस्फ्यहस्तेन प्रत्याश्राविते होतारं याज्यापठनार्थं प्रेष्यति। होत्रा वषट्कृते प्रक्षिप्तसमित्पूर्वार्धे जुहोति। पुनस्तथैवाश्रावणादि कृत्वा वषट्कारे समिन्मध्ये जुहोति। पुनस्तथैव कृत्वा वषट्कृते समिधो मूलमारभ्याग्रपर्यन्तं संततधारया जुहोति। सो ऽयमनुयाजप्रचारो ऽनुयाजहोमश्चोच्यते ॥

३००. **अनुयाजाः [मन्त्राः]**—अत्र अनु पश्चात् प्रधानयागानन्तरं इज्यते यैरिति व्युत्पत्त्या होत्रा पठ्यमाना याज्यामन्त्रा अनुयाजा इत्युच्यन्ते॥

३०१. ते च वीधातुप्रकृतिकलोट्प्रथमपुरुषान्ताः वीतवत्पदान्ता इति प्रयाजवदुच्यन्ते ॥

३०२. **स्रुग्व्यूहनम्**—अनुयाजप्रचारानन्तरं उदगागत्य यथास्थानं स्रुचौ सादयित्वा यजमानेन सह मन्त्रेण जुहूमूर्ध्वाम् उत्तानेन दक्षिणहस्तेन गृह्णाति। एवं नीचेन सव्यहस्तेन अधस्तात् उपभृतम् अध्वर्युयजमानौ कुरुतः। तत उभौ प्रागग्रां जुहूं मन्त्रेण दक्षिणांसपर्यन्तं प्रापयतः। तथैवोपभृतं प्रत्यग्गग्रां उत्तरश्रोणिपर्यन्तं प्रापयतः। तदेतत्कर्म स्रुग्व्यूहनमित्युच्यते ॥

३०३. **परिध्यञ्जनम्**—ततो ऽध्वर्युर्जुहूं ह्वा मध्यमदक्षिणोत्तरान् परिधीन् क्रमेण पृथक्-पृथक्मन्त्रैरनक्ति। एतत्कर्म परिध्यञ्जनमित्युच्यते ॥

३०४. **प्रस्तराञ्जनम्**—ततः उपभृतं जलेन संस्पृश्य यथास्थानं स्रुचौ सादयित्वा जुहूं ह्वा आधारभूतं सविधृतिपवित्रं प्रस्तरं गृहीत्वा मन्त्रेण प्रस्तराग्राणि जुहूमनक्ति, तथैवोपभृतिमध्यानि अनक्ति, तथैव ध्रुवायां मूलानि अनक्ति। तदेतत्प्रस्तराञ्जनमित्युच्यते ॥

३०५. **सूक्तवाकप्रैषः**—प्रस्तरसंबन्ध्येकं तृणमादाय प्रज्ञातं निधाय दक्षिणोत्तराभ्यां हस्ताभ्यां प्रस्तरं धृत्वा जुहूमूर्ध्वाग्रमवष्टभ्य आश्राव्य प्रत्याश्राविते प्रैषं पठति। स सूक्तवाकप्रैष इत्युच्यते ॥

३०६. **सूक्तवाकः**—अध्वर्युप्रेषितो होता यं मन्त्रं पठति स सूक्तवाक इत्युच्यते ॥

३०७. **उज्जितवाचनम्**—सूक्तवाकान्तर्गतमन्त्रविशेषपठनकाले अध्वर्युर्यद् यजमानं मन्त्रं पाठयति तत् उज्जितिवाचनमित्युच्यते ॥

३०८. **प्रस्तरप्रहरणम्**—सूक्तवाकस्य अन्तिमं देवेभ्य इति श्रुत्वा तिर्यञ्चं हस्तं कृत्वा कर्षन्निव प्रस्तरमाहवनीयेऽनुप्रहरति मन्त्रेणाध्वर्युः। तत् प्रस्तरप्रहरणमिति गीयते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३०९. **तृणप्रहरणम्**—ततः पूर्वं प्रज्ञातं यथास्यात्तथा निहितं तृणं गृहीत्वा आग्नीध्रं संबोधयति **'अग्नीत्'** इति। आग्नीध्रस्तु अध्वर्युं प्रति **'संवदस्व'** इति वदति। पुनरध्वर्युस्तमाह—**'अगानग्नीत्'** इति पुनराग्नीध्रस्तमाह—**'अगन्'** इति। पुनरध्वर्युस्तमाह—**'आ३श्रावय'** इति पुनराग्नीध्रस्तमाह—**'श्रौ३षट्'** इति। पुनरध्वर्युर्गृहीतं तृणं प्रदर्शयन्नाग्नीध्रं प्रत्याह—**'इदं ब्रू३हि'** इति। तत आग्नीध्रस्तं प्रत्याह—**'अनुप्रहर'** इति। ततोऽध्वर्युस्तत् तृणमाहवनीयेऽनुप्रहरति। तदेतत् तृणप्रहरणमित्युच्यते॥

३१०. **शंयुवाकप्रैषः**—ततोऽध्वर्युर्होतारं [शंयुवाकार्थं] प्रेष्यति। स शंयुवाकप्रैष इत्युच्यते॥

३११.—**शंयुवाकः**—अध्वर्युप्रेषितो होता यामृचम् अर्धर्चे अवसाय एकश्रुत्या अन्ते प्रणवरहितां पठति, सा ऋक् शंयुपदघटितत्वात् शंयुवाक इति गीयते॥

३१२. **मध्यमस्वरः**—आज्यभागप्रभृति सर्वं प्रधानयाज्यादिकं मध्यमस्वरेण पठनीयम्। तत्र 'कण्ठे माध्यन्दिनयुगं मध्यमम्'[1] इति शिक्षोक्तेर्जठराग्निना प्रेरितो वायुः कण्ठदेशे संचारं कृत्वा मुखं प्राप्य यथास्थानं यत्र वर्णानामभिव्यक्तिं करोति। स मध्यमस्वर इति उच्यते।

३१३. **उत्तमस्वरः**—स्विष्टकृत्प्रभृति शंयुवाकान्तमुत्तमस्वरेण पठ्यते। तत्र 'तारं तृतीयसवनं शीर्षण्यम्'[2] इति शिक्षावचनात् जठराग्निप्रेरितो वायुः मस्तकदेशे संचारं कृत्वा पूर्ववत् वर्णानभिव्यञ्जयति। स उत्तमस्वर इति पठ्यते॥

३१४. **पत्नीसंयाजप्रचारः**—शंयुवाकानन्तरम् अध्वर्युर्होत्रे वेदं प्रदाय दक्षिणहस्तेन स्रुवमाज्यस्थालीं सव्येन जुहूमादाय दक्षिणेन यदा गार्हपत्यदक्षिणाग्न्योर्मध्येन गत्वा स्वयं पत्नीपश्चाद्भागेन गत्वा स्रुवादीनि पत्नीपुरोभागेन नीत्वा गार्हपत्यस्य पश्चादूर्ध्वजानुरुपविश्य, होतुः सकाशात् वेदं गृहीत्वा जुह्वा अधस्तादुपभृत्स्थाने धृत्वा आश्राव्य प्रत्याश्रावितो होतारं यजेति प्रेष्य तेन वषट्कृते आज्यस्थाल्याज्येन चतुरवत्तेन जुह्वा गार्हपत्ये सोमाय जुहोति। पुनश्चतुरवत्तेन त्वष्ट्रे, ततो देवानां पत्नीभ्यः, ततो यजमानस्य प्रजाकामत्वे राकायै सिनीवाल्यै कुह्वै अनुमत्यै च पृथक्-पृथक्

---

१. द्र० पणिनीया (श्लोकात्मिका) शिक्षा ३६।

२. वही, २६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुरवत्तेन हुत्वा स्वाहान्तैरेतैरेव चतुर्भिर्नाममन्त्रैः स्रुवाहुतीर्हुत्वा त्रिभिर्ऋङ्मन्त्रैः स्रुवाहुतीरेव हुत्वा आश्रावणादि कृत्वा अग्नये गृहपतये यजति, देवानां पत्नीनां यागकाले गार्हपत्यकुण्डस्योपरि पूर्वभागे अन्तर्धानाय अन्तर्धानिकटम् उदग्रं स्थापयित्वा देवानां पत्नीरिष्ट्वा होतुरग्रेण गच्छति। सोऽयं पत्नीसंयाजप्रचार इत्युच्यते ॥

३१५. **आज्येडा**—तत्र गत्वा पूर्ववत् होतुरङ्गुलिपर्वणी अङ्क्त्वा होतुर्हस्ते चतुष्कृत्व आज्यं स्रुवेण ददाति। एतदाज्यं आज्येडा इत्युच्यते ॥

३१६. **आज्येडोपह्वानम्**—पूर्वम् इडापात्रं गृहीत्वा होता कांश्चिन्मन्त्रान् उच्चैः कांश्चिदुपांशु पठति। तदा अध्वर्युर्यजमानाग्नीध्राः इडापात्रमन्वारभन्ते। आज्येडां गृहीत्वा यदा पूर्ववत् मन्त्रान् पठति तदा अध्वर्युः पत्नी चान्वारभते। अयं मन्त्रपाठः आज्येडोपह्वानमित्युच्यते ॥

३१७. **आज्येडाप्राशनम्**—ततो ऽध्वर्युराग्नीध्रहस्ते षट्कृत्वः आज्यं स्रुवेण ददाति। होता स्वहस्तगतमाज्यं प्राश्नाति। आग्नीध्रश्च स्वहस्तगतमाज्यं प्राश्नाति। अत्र होतृकर्तृकं प्राशनम् आज्येडाप्राशनमित्युच्यते ॥

३१८. **आज्येडामार्जनम्**—तत आचम्य होता परिस्तरणैरञ्जलिमन्तर्धाय अन्येनापः सेचयति। आग्नीध्रस्तं बर्हिषि दक्षिणम् उत्तानं हस्तं निधाय सव्येन जलं सिञ्चति। एतदाज्येडामार्जनमित्युच्यते ॥

३१९. **दक्षिणाग्निप्रायश्चित्तहोमः**—एतदनन्तरं[1] शंयुवाकस्य विकल्पः अध्वर्युर्जुह्वां चतुर्गृहीतं गृहीत्वा सव्येनाङ्गेन होतुरग्रेण गार्हपत्यस्य पश्चिममार्गेण गत्वा दक्षिणाग्नौ मन्त्रेण जुहोति। अयं दक्षिणाग्निप्रायश्चित्तहोम इत्युच्यते ॥

३२०. **फलीकरणहोमः**—अपरं चतुर्गृहीतं गृहीत्वा इध्मप्रव्रश्चनान्यभ्याधाय जुह्वां फलीकरणानोप्य मन्त्रेण जुहोति। अयं फलीकरणहोम इत्युच्यते ॥

३२१. **वेदवाचनम्**—ततः अपरेण गार्हपत्यम् उत्तरतो गत्वा यजमानाय वेदं दत्त्वा मन्त्रं वाचयति। ततो यजमानाद् वेदमादाय होत्रे प्रददाति। इदं वेदवाचनमित्युच्यते ॥

३२२. **पत्नीवेदवाचनम्**—होता 'वेदं पत्न्यै प्रदाय मन्त्रं वाचयति'। अत्र

---

१. अत्र मूलपाठे ३१९–३२० संख्ययोः पदार्थौ व्यामिश्रितावित्वास्ताम्। तौ पृथक् प्रदर्शितौ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'होताध्वर्युर्वा' इत्याश्वलायनसूत्रात् (१।११।७) अध्वर्युर्वा वाचयति। एतत् पत्नीवेदवाचनमित्युच्यते ॥

३२३. **वेदशिरःकरणकनाभ्यालम्भनम्**—ततः पत्नी वेदशिरसा मन्त्रेण स्वनाभिं स्पृशति। एतद् वेदशिरःकरणकनाभ्यालम्भनमित्युच्यते ॥

३२४. **पत्नीयोक्त्रविमोचनम्**—बौधायनसूत्रपठितत्वादध्वर्युः, आश्वलायनसूत्रपठितत्वात् होता वा पत्न्याः कटौ आग्नीध्रेण पूर्वं निबद्धं योक्त्रं मन्त्रेण स्वस्वसूत्रपठितेन विमुञ्चति। एतत्पत्नीयोक्त्रविमोचनमित्युच्यते ॥

३२५. **मुखविमार्जनम्**–ततः पूर्ववत् होताध्वर्युर्वा तद्योक्त्रं पत्न्यञ्जलौ निधाय तस्मिन् जलमानयति मन्त्रेण। पत्नी तु तेन जलेन स्वमुखमाजनं बाह्याङ्गे करोति। इदं मुखविमार्जनमित्युच्यते ॥

३२६. **उत्तरगार्हपत्यसमिदाधानम्**—ततो गार्हपत्यं परिषेचयित्वा चतस्रः समिधो मन्त्रैः आधापयित्वा पुनः परिषेचयति। एतद् उत्तरगार्हपत्यसमिदाधानमित्युच्यते ॥

३२७. **पत्नीनिष्क्रमणम्**—ततः पत्नी तूष्णीं यथागतं तीर्थेन विहाराद् बहिर्निष्क्रामति। एतत् पत्नीनिष्क्रमणमित्युच्यते ॥

३२८. **ध्रुवाप्यायनम**—अध्वर्युः उत्तरेण गार्हपत्यं प्राङागत्य आज्यस्थाल्याज्येन ध्रुवां मन्त्रेण पूरयति। यजमानोऽपि तं मन्त्रं पठति। एतत् ध्रुवाप्यायनमित्युच्यते ॥

३२९. **यजमानभागप्राशनम्**—ततो यजमानः स्वभागं ब्रह्मणा प्राशित्रहरणस्य पश्चात् कुशेषु वेद्यां स्थापितं मन्त्रेण प्राश्नाति। एतद् यजमानभागप्राशनमित्युच्यते।

३३०. **अध्वर्युकर्तृकनित्यप्रायश्चित्तहोमः**—ततोऽध्वर्युः आहवनीये आज्यस्थाल्याज्येन स्रुवेण देवदेवताकया ऋचा एकामाहुतिं हुत्वा, तथैव अल्पाक्षरैर्यजुर्मन्त्रैर्नवाहुतीर्हुत्वा, चतसृभिर्व्याहृतिभिश्चतस्र आहुतीर्हुत्वा, द्वाभ्यामग्नीवरुणदेवताकाभ्यां ऋग्भ्यां हुत्वा, द्वाभ्यामृग्भ्यां अयसे अग्नये हुत्वा, देवदेवताकया एकया ऋचा हुत्वा, एकया ऋचा अग्नये स्विष्टकृते हुत्वा, प्रजापतिदेवताकया एकया ऋचा जुहोति। अयं होमः अध्वर्युकर्तृकनित्यप्रायश्चित्तहोम इत्युच्यते ॥

३३१. **बर्हिरेकदेशानुप्रहरणम्**—ततो वेद्यास्तृतसर्वबर्हिर्मुष्टिभ्यः प्रत्येकं किंचित् किंचिद् गृहीत्वा ध्रुवायां मन्त्रेण समज्य मन्त्रेणाहवनीये प्रक्षिपति। तदेतद् बर्हिरेकदेशानुप्रहरणमित्यच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३३२. **समिष्टयजुर्होमः**—तत उत्थाय दक्षिणं पादं वेदिमध्ये निधाय ध्रुवया मन्त्रेण जुहोति । सोऽयं समिष्टयजुर्होम इत्युच्यते ।।

३३३. **समिष्टयजुः [मन्त्रः]**—येन मन्त्रेण जुहोति स मन्त्रः समिष्टयजुरित्युच्यते ।।

३३४. **प्रणीताप्रणयननिनयनम्**—ततः प्रणीतापात्रं वेद्यां निधाय यजमानं मन्त्रं वाचयति । ततो ऽध्वर्युयजमानौ प्रतिदिशं प्रणीताजलेन कुशैर्मार्जयतः । **'प्राच्यां दिशि देवाम्'** इत्यादिमन्त्रेण प्राच्यां, **'दक्षिणस्याम्'** इत्यादिमन्त्रेण दक्षिणस्यां, ततोऽप उपस्पृश्य **'प्रतीच्याम्'** इत्यादिमन्त्रेण प्रतीच्याम्, **'उदीच्याम्'** इत्यादिमन्त्रेणोदीच्याम् । ततो ऽध्वर्युः प्रणीताजलशेषं वेद्यां मन्त्रेण प्रक्षिपति । एतत् प्रणीताप्रणयननिनयनमित्युच्यते ।।

३३५. **उदकोदुक्षणम्**—होता तु पूर्वोक्तपत्नीयोक्त्रविमोचनानन्तरमेव तद् योक्त्रं गृहीत्वा गार्हपत्यस्य पश्चाद् द्विगुणं प्राक्पाशं निधायोपरिष्टादस्योदगग्राणि वेदतृणानि निधाय, अग्निहोत्रहवणीं जलपूर्णां तस्योपरि पिधाय, वेदतृणैरभिमृश्य, पत्नीं मन्त्रं वाचयति । ततः प्रतिदिशमुदकमूर्ध्वं सिञ्चन् तथैवोदकमूर्ध्वं सिञ्चतीं पत्नीं मन्त्रं वाचयति । तदेतदुदकोदुक्षणमित्युच्यते ।।

३३६. **अग्निहोत्रहवणीजलनिनयनम्**—तत एकया ऋचा एकेन यजुर्मन्त्रेण च अग्निहोत्रहवणीगतेन जलेन दर्भैर्होता पत्नी च आत्मानं मार्जयेते । ततो यजुर्मन्त्रेण उभौ निर्ऋतिदिशि जलं सिञ्चतः । ततो होता वेदतृणानामधस्तात् कृतायां पत्न्यञ्जलौ तथाकृते स्वसव्यहस्तेन च दक्षिणहस्ते अग्निहोत्रहवणीमादाय तज्जलं सर्वं प्रक्षिपति । तदेतदग्निहोत्रहवणीजलनिनयनमित्युच्यते ।।

३३७. **वेदस्तरणम्**—होता वेदतृणानि अग्रभागे दक्षिणहस्तेन धृत्वा तन्तुशब्दवता मन्त्रेण गार्हपत्यादारभ्याहवनीयपर्यन्तम् अविच्छिन्नं स्तृणाति । एतत् वेदस्तरणमित्युच्यते ।।

३३८. **होतृकर्तृकनित्यप्रायश्चित्तहोमः**—तत आहवनीयस्य वायव्यदेशे तिष्ठन् आज्यस्थाल्याज्येन स्रुवेण त्रिभिर्ऋङ्मन्त्रैः प्रत्येकं हुत्वा तिसृभिर्व्याहृतिभिश्च प्रत्येकं हुत्वा, समस्तव्याहृतिमन्त्रेण जुहोति । अयं सप्ताहुतिहोमः होतृकर्तृकनित्यप्रायश्चित्तहोम इत्युच्यते ।।

३३९. **संस्थाजपः**—ततस्तत्रैव तिष्ठन् एकया ऋचा आहवनीयमुप-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिष्ठते । ततस्तीर्थेन निष्क्रामति । सा ऋक् होतृकर्मणां मध्ये चरमकर्मकरणत्वात् संस्थाजप इत्युच्यते ।।

३४०. **ब्रह्मकर्तृकनित्यप्रायश्चित्तहोमः**—ब्रह्मा तु प्रणीताप्रणयननिनयनानन्तरं होतृवत् तत्रैव तिष्ठन् आहवनीये सप्ताहुतीर्हुत्वा संस्थाजपेनोपस्थाय तीर्थेन निष्क्रामति । अयं होमो ब्रह्मकर्तृकनित्यप्रायश्चित्तहोम इत्युच्यते ।।

३४१. **विष्णुक्रमक्रमणम्**—एतद्धोमानन्तरं यजमान उत्थाय प्राङ्मुखो भूत्वा स्वस्थानादारभ्य त्रिभिर्यजुर्मन्त्रैः प्रत्येकं दक्षिणेन पदा द्वाभ्यां पादाभ्यां उड्डीय वा प्राचीं दिशं गच्छति । तत्रैव स्थित्वा एकं यजुर्मन्त्रं पठति । एतत्कर्म विष्णुक्रमक्रमणमित्युच्यते ।।

३४२. **विष्णुक्रममन्त्रा**—ते च मन्त्रा विष्णुक्रमपदवाच्या भवन्ति ।।

३४३. **आहवनीयोपस्थानम्**—ततस्तत्रैव तिष्ठन् मन्त्रेणाहवनीयमुपतिष्ठते । एतदाहवनीयोपस्थानमित्युच्यते ।।

३४४. **आदित्योपस्थानम्**—ततो बहिर्निष्क्रम्य तत्रैव वा तिष्ठन् मन्त्रेणादित्यमुपतिष्ठते । एतदादित्यापस्थानमित्युच्यते ।।

३४५. **आत्ममार्जनम्**—ततो द्विषन्त ध्यायन् मन्त्रेण दर्भेणात्मानं मार्जयते । एतदात्ममार्जनमित्युच्यते ।।

३४६. **हृदयाभिमर्शनम्**—ततो दर्भं निरस्याप उपस्पृश्य स्वहृदयं मन्त्रेणाभिमृशति । तदेतत् हृदयाभिमर्शनमित्युच्यते ।।

३४७. **यजमानावर्तनम्**—ततोऽप उपस्पृश्य उदङ्मुखः सन् मन्त्रेण प्रदक्षिणमावृत्य मन्त्रेणापसव्यमावर्तते । एतद् यजमानावर्तनमित्युच्यते ।।

३४८. **यजमानकर्तृकगार्हपत्योपस्थानम्**—तत उपविश्याहवनीये मन्त्रेण समिधमाधाय, मन्त्रेणाहवनीयमुपस्थाय, स्वायतन एव तिष्ठन् द्वाभ्यामृग्भ्यां एकेन यजुर्मन्त्रेण च गार्हपत्यमुपतिष्ठते । तस्मिन् यजुर्मन्त्रे तु मह्यमिति-पदानन्तरं स्वनाम शर्मपदघटितं चतुर्थ्यन्तमुक्त्वा **ज्योतिष्मतीमित्यादिमन्त्र**-शेषं ब्रूयात् । ततो यावन्तो यजमानस्य पुत्राः तावतां ज्येष्ठानुक्रमेण प्रत्येकं स्वनामवत् चतुर्थ्यन्तमुक्त्वा ज्योतिष्मतीमित्यादिमन्त्रशेषमुक्त्वा अन्ते 'तन्तवे' इति चतुर्थ्यन्तमुक्त्वा ज्योतिष्मतीमित्यादि ब्रूयात् । एतद् यजमानकर्तृकगार्हपत्योपस्थानमित्युच्यते ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३४९. **यज्ञविमोकः**—तत एकं यजुर्मन्त्र पठति। स यज्ञसमाप्तौ पठ्यमानत्वात् यज्ञविमोक इत्युच्यते ॥

३५०. **उत्तराहवनीयपरिषेकः**—ततः पूर्ववत् तिरः पवित्रमप आचम्य आहवनीयं परिषिच्य समन्त्रकं चतस्रः समिध आधाय पुनः परिषिञ्चति। अयमुत्तराहवनीयपरिषेक इत्युच्यते ॥

३५१. **यज्ञस्य पुनरालम्भः**—तत एकामृचं जपति। सा ऋक् यज्ञस्य पुनरालम्भ इत्युच्यते ॥

३५२. **गोमतीजपम्**—ततः प्रागुद्वोय गोपदवतीमृचं जपति। अयं गोमतीजप इत्युच्यते ॥

३५३. **आत्मसंप्रेषः**—ततो ब्राह्मणभोजनाय आत्मानं बौधायनसूत्रोक्तमार्गेण प्रेष्यति। सोऽयमात्मसंप्रेष इत्युच्यते ॥

उक्तान्यैष्टिकपदार्थानां नामानि।

इदानीमाधानसंबन्धिनां पदार्थानां नामान्युच्यन्ते—

३५४. **अग्न्याधानम्, आधानं च**—तत्र गार्हपत्यदक्षिणाग्न्याहवनीयनामकानां त्रयाणामग्नीनां तत्तदायतनेषु स्व-स्वसूत्रोक्तविधिना स्थापनम् अग्न्याधानमाधानमिति चोच्यते ॥

३५५. **कूष्माण्डहोमः**—समस्तपातकनिबर्हणार्थम् आधानाधिकारसिध्यर्थम् आधानात् प्राक् स्थण्डिलकरणाद्यग्निप्रतिष्ठापनान्तं कृत्वा, आधारहोमानन्तरं गायत्रीमन्त्रेण सवित्रे चरुं हुत्वा, स्विष्टकृदर्थम् अवदाय, अन्तःपरिधि सादयित्वा, एकविंशत्यृचस्य **यद्देवा** इत्यादिकस्य प्रथमानुवाकस्य एकैकया ऋचा आज्याहुतीर्हुत्वा, त्रयोदशर्चस्य **यददीव्यमित्यादिकस्य** द्वितीयानुवाकस्य एकैकयर्चा तथैव हुत्वा, सप्तदशर्चस्य **आयुष्ट** इत्याद्यनुवाकस्य ऋग्भिस्तथैव हुत्वा **सिंहे व्याघ्र** इत्यादिकस्याष्टर्चस्यानुवाकस्य **ऋग्भिस्तथैव** हुत्वा, समित्पाणिर्यजमानः स्वायतने तिष्ठन् **वैश्वानरायेत्यादिकेन** द्वादशर्चेनानुवाकेनाग्निमुपस्थाय, त्रयोदश समिध आधाय, एकया ऋचा हुत्वा, स्विष्टकृदादिहोमशेषं समाप्य, वरं[1] दत्त्वा, अग्नेः पुरस्तात् अश्वत्थपर्णेषु हुतशेषं निदध्यात्। अयं होमः पापतारतम्यानुसारेण संवत्सरं मासं चतुर्विंशतिदिनानि षट् दिनानि त्रीणि दिनानि वा क्रियते। अस्य होमस्य अमावास्यायां पौर्णमास्यां वा आरम्भः यावन्ति होमदिनानि तावत्सु दिनेषु स्त्रीसंगममांसभक्षणपर्यङ्कशयनासत्यभाषणवर्जनम्। अयं कूष्माण्डपदेन श्रुत्यादिषु प्रसिद्धः ॥ [१. द्र० पदार्थः ३५८]

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३५६. **गणहोमः**—अथान्यो होमः तत्र पूर्वाह्णे गृह्यमग्निं प्रतिष्ठाप्य आधारहोमान्तं कृत्वा गायत्र्या सवित्रे चरुणा हुत्वा **'अग्ने नय'** इति षड्चेनानुवाकेन प्रत्यृचं चरुणा हुत्वा **'सहस्रशीर्षा'** इत्यष्टादशर्चेनानुवाकेन प्रत्यृचं हुत्वा **'अग्नेर्मन्व'** इति द्वाविंशत्यृचेनानुवाकेन तथैव हुत्वा **'या वामिन्द्र'** इति चतसृभिर्ऋग्भिस्तथैव हुत्वा **'यो वामिन्द्र'** इत्यष्टाभिर्ऋग्भिस्तथैव हुत्वा **'पवमानसुवः'** इति सप्तदशर्चेनानुवाकेन तथैव हुत्वा **'यद्देवा'** इति विंशत्यृचेनानुवाकेन तथैव हुत्वा **'वैश्वानरो न'** इत्यष्टाभिर्ऋग्भिस्तथैव हुत्वा चतसृभिर्व्याहृतिभिः प्रत्येकं हुत्वा स्विष्टकृदादिहोमशेषं समापयेत। ततो जलपूर्णं पात्रं गृहीत्वा नैर्ऋतीं दिशं गत्वा चतुष्पथे गोमयेनोपलिप्य तत्रोपविश्य जलपात्रं पुरस्तान्निधाय तस्य जले आत्मनः प्रतिबिम्बं अवेक्षमाणो मन्त्रान् जपेत्। ते च मन्त्राः **'सिंहे मे'** इत्यादयस्त्रिसप्ततिसंख्याकाः। ततस्तत्पात्रगतं जलं नैर्ऋत्यां दिशि स्ववैरिणो यस्यां दिशि निवसन्ति तस्यां वा दिशि मन्त्रेण निनयति। ततस्तत्पात्रं तस्यामेव दिशि परास्य पृष्ठतो ऽनवेक्षमाणः सन् यथागतमागत्य हस्तौ पादौ प्रक्षाल्य आचमनं कुर्यात्। एवमेकाहं त्र्यहं सप्ताहं पञ्चदश दिनानि एकं मासं मासद्वयं षण्मासं संवत्सरं वा शक्तचनुसारेण कुर्यात्। कर्मान्ते ब्राह्मणान् पायसान्नेन भोजयेत्, गोहिरण्यादि च ब्राह्मणेभ्यो दद्यात। अयं होमः आधानाधिकारसंपादकसमस्तपापक्षयकरः, अथ च सर्वकर्मानुष्ठानाधिकारसंपादकः। सोऽयं गणहोम इत्युच्यते॥

३५७. **स्थण्डिलम्**—मृदा निर्मितं समचतुरस्रं प्रतिदिशम् अष्टादशाङ्गुलविस्तृतं होमानुसारेण ततोऽधिकं वा न तु ततो न्यूनं चतुरङ्गुलोच्चं मध्योन्नतं स्थण्डिलमित्युच्यते॥

३५८. **वरः**—दक्षिणात्वेन दीयमानं धेनुसुवर्णादिकं व्रियतेऽनेनेति करणव्युत्पत्त्या वर इत्युच्यते॥

३५९. **नान्दीश्राद्धं वृद्धिश्राद्धं वा**—आधानात् पूर्वदिने नान्दीश्राद्धं[1] क्रियते। यत्र सत्यवसुसंज्ञका विश्वेदेवाः तिलकार्यं यवैरेव क्रियते, पैतृकमपि कर्म सव्येनैव क्रियते, विश्वेषां देवानां पूजनानन्तरं मातृपितामहीप्रपितामह्य इज्यन्ते, ततः पितृपितामहप्रपितामहाः, ततो मातामहमातुःपितामहमातुःप्रपितामहाः सपत्नीकाः। दर्भास्तु ऋजवोऽमूलाः साग्राः पितृकार्येऽपि भवन्ति। ब्राह्मणाश्च पितृस्थानेऽपि युग्मा भवन्ति। द्राक्षाः आमलकी

१. स्मार्तमाधुनिकमेतन्नान्दीश्राद्धम्, नहि श्रौतसूत्रेषूपलभ्यते। अग्रेऽपि बहवः पदार्था उच्छ्रौतसूत्रं निर्दिश्यन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

फलानि च दक्षिणात्वेन दीयन्ते । पितृणां नामगोत्रोच्चारणं नैव क्रियते, किंतु तस्य स्थाने सर्वत्र नान्दीमुखा इत्युच्यते । सर्वत्र मन्त्रान्ते वृद्धिरिति पदमुच्चार्यते तत् नान्दीश्राद्धं वृद्धिश्राद्धमिति चोच्यते ॥

३६०. **उदकशान्ति**—आधानात् पूर्वदिने रात्रौ उदकशान्तिः प्रतिसरबन्धश्च[1] क्रियते । शुचिर्भूत्वा कर्म आधानाङ्गभूतत्वेन संकल्प्य, गोमयेन गोचर्ममात्रं स्थलम् उपलिप्य, दर्भेण यज्ञियकाष्ठेन वा तूष्णीं भूमिमुद्धृत्य, जलेन तूष्णीमवोक्ष्य, तत्र पञ्चप्रस्थपरिमितव्रीहीणां तन्दुलानां वा स्थण्डिलं कृत्वा, स्थण्डिलमध्ये प्रतीचीमारभ्य प्राचीपर्यन्तं मन्त्रेण दर्भेण लेखां कृत्वा, स्थण्डिलोपरि दक्षिणभागे मन्त्रेण पूर्ववल्लेखां कृत्वा, उत्तरभागे तथैव लेखां कृत्वा, स्थण्डिलमध्ये दक्षिणां दिशमारभ्य उदीचीपर्यन्तं लेखां कृत्वा, अप उपस्पृश्य नैर्ऋतीं दिशमारभ्य वायवीपर्यन्तं लेखां मन्त्रेण कृत्वा, आग्नेयीमारभ्य ऐशानीपर्यन्तं लेखां मन्त्रेण कृत्वा, लेखाकरणं दर्भं यज्ञियकाष्ठं वा व्याहृतिमन्त्रेण उत्तरस्यां दिशि निरस्य, स्थण्डिलाद् बहिःरुत्तरतः प्रागग्रान् दर्भानास्तीर्य, तेषु प्रोक्षणीमुदकुम्भं पञ्चप्रस्थयवपूर्णकांस्यपात्रे सूत्रद्वयं च सादयित्वा, सर्वाणि पात्राणि दर्भैः प्रच्छाद्य, पवित्रं तूष्णीं कृत्वा, प्रोक्षणीपात्रमुत्तानं कृत्वा, तत्र उदगग्रं पवित्रं निधाय, उदकमानीय तूष्णीं त्रिरुत्पूय, प्रोक्षणीं पवित्रेण प्रोक्ष्य, उदकुम्भमुत्तानं कृत्वा, पवित्रेण प्रोक्ष्य, कांस्यापात्रस्थसूत्रद्वयं च प्रोक्ष्य, उदकुम्भं सुगन्धिद्रव्येण गुग्गुल्वादिना धूपयित्वा, स्थण्डिलोपरि प्रागग्रान् दर्भानास्तीर्य, गन्धोदकेनाक्षतपुष्पैः फलैश्चावकीर्य, तत्रोदकुम्भं निधाय, तस्योपरि पवित्रमुदगग्रं निधाय, उदकुम्भे उदकं मन्त्रेण पूरयति । उदकुम्भे गायत्रीमन्त्रेण यवाक्षततन्दुलानोप्य, उदकुम्भस्य समन्तात् व्याहृतिमन्त्रेण पुष्पदूर्वाफलान्यवकीर्य, उदकुम्भं दूर्वादर्भैः प्रच्छाद्य, उदकुम्भस्य पुरस्तात् उदगग्रान् दर्भान् मन्त्रेण परिस्तीर्य, दक्षिणतो व्याहृतिमन्त्रेण प्रागग्रान् पश्चिमतः उदगग्रान् मन्त्रेण उत्तरतः प्रागग्रान् मन्त्रेण परिस्तीर्य, चतुरो ब्राह्मणान् चतसृषु पूर्वादिदिक्षु जपकर्तॄन् वृत्वा, यजमानो ब्राह्मणाश्च दर्भहस्ताः दर्भाग्रैः कुम्भं स्पृशन्तो जपन्ति, **'शं न'** इत्यृचं गायत्रीं पच्छोऽर्द्धर्चशः सर्वां च, ततो वेदादीन् चतुरः, ततः **'कृणुष्व'** इति सूक्तं रक्षोघ्नं **'मदे चिद्'** इत्यर्धर्चम् **'इन्द्रो दधीच'** इत्यनुवाकं **'यत इन्द्र'** इति द्वे ऋचौ **'महां इन्द्र'** इति द्वे ऋचौ **'यद्देवाः पुरःसद'** इति पञ्चपर्यायान् **'अग्नये रक्षोघ्ने'** इति पञ्च **'अग्निरायुष्मान्'** इति पञ्च **'या वामिन्द्र'** इति चतस्रः

---

१. द्र० पदार्थः ३६१, ३६२ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो वामिन्द्र' इत्यष्टौ **'अग्ने यशस्विन्'** इति चतस्रः **'हिरण्यवर्णाः शुचयः'** इति चतस्रः **'ऋताषाड्ऋत'** इत्यनुवाकं **'नमो अस्तु सर्पेभ्य'** इति चतस्रः **अयं पुरो हरी**ति पञ्च पर्यायान्, **आशुः शिशान** इत्यनुवाकं, **शं च म** इत्यनुवाकं **ममाग्ने वर्चः** इत्यनुवाकम् **अग्नेर्मन्वः** इत्यनुवाकं **समीची नामासि** इति षट् पर्यायान् **हेतयो नाम स्थ** इत्यनुवाकं **शतायुधाय** इति पञ्च **भूतं भव्यं भविष्यद्** इत्यनुवाकं **चक्षुषो हैतिः** इत्यारभ्य **भ्रातृव्यं पातयामि** इत्यन्तं **प्राणो रक्षति** इत्यनुवाकं **सिंहे व्याघ्रे** इत्यनुवाकम् **अहमस्मि** इत्यनुवाकं **ता सूर्या** इत्यनुवाकम् **अग्निर्नः पातु** इत्यनुवाकम् **ऋध्यास्म** इत्यनुवाकं **नवो नव** इत्यनुवाकम् **अग्नये** इत्यादीनुपहोममन्त्रान् **दधिक्राव्ण** इत्यृचम् **आपो हि** इत्यृच **यच्चिद्धि ते** इत्यृचम् **इमं म** इत्यृचं **पावमानीः उदुत्तमम्** इति सूक्तं **परि णो रुद्रस्य** इति सूक्तं **ब्रह्म जज्ञानम्** इति ब्रह्मसूक्तं **विष्णोर्नु कम** इति विष्णुसूक्तं **जातवेदस** इति सूक्तं **हिरण्यवर्णाम्** इति श्रीसूक्तं **तच्छयोः** इत्यनुवाकं **नमो ब्रह्मणे** इति मन्त्रं त्रिवारं जपन्ति। ततः प्रणवेनोदकुम्भमुत्थाप्य प्रणवं त्रिरुच्चार्य पुनरुदकुम्भं तत्रैव स्थापयित्वा, वृता ब्राह्मणाः सपत्नीकं यजमानं उदकुम्भोदकेन दर्भाग्रैः व्याहृतिभिः प्रोक्षन्ति। इदं सर्वं कर्म उदकशान्तिरित्युच्यते ॥

३६१. **प्रतिसरबन्धः**—अथ ब्राह्मणाः सूत्रद्वयमादाय नागेशं वासुकिं तत्र ध्यात्वा **त्र्यम्बक**मन्त्रेण त्रिवारम् ऊर्ध्वं भस्मना सूत्रद्वयमालिप्य **अग्निरायुष्मान्** इति मन्त्रेण यजमानस्य दक्षिणहस्तं गृहीत्वा **बृहत्सामा** इति मन्त्रेण एकसूत्रमपरं सूत्रं पत्न्या वामहस्ते बध्नीयुः। बन्धनस्थाने **यो ब्रह्मणा** इति मन्त्रेण भस्मना रक्षां कुर्युः। यजमानः पूर्वस्यां दिशि जपकर्त्रे ब्राह्मणाय हिरण्यं दद्यात्, दक्षिणस्यां दिशि जपकर्त्रे रजतं, पश्चिमदिशि जपकर्त्रे कांस्यं, उत्तरस्यां दिशि जपकर्त्रे वस्त्रं दद्यात्। इदं कर्म प्रतिसरबन्ध इत्युच्यते ॥

३६२. **प्रतिसरम्**—बध्यमानं सूत्रद्वयं प्रतिसरपदवाच्यम् ॥

३६३. **पवनम्**—ततः प्रातःकाले एकविंशतिदर्भाणां त्रीणि पिञ्जूलानि[1] कृत्वा एकेन पिञ्जूलेन कण्ठमारभ्य मुखपर्यन्तं मार्जयेद्, द्वितीयेन नाभिमारभ्य कण्ठपर्यन्तं मार्जयेत्, तृतीयेन नाभेरधस्तात् गुल्फपर्यन्तं मार्जयेत्। ततः पिञ्जूलानि प्रोक्ष्य उदीच्यां दिशि परित्यजेत्। ततोऽप उपस्पृशति। एतत्कर्म पवनमित्युच्यते ॥

३६४. **पिञ्जूलम्**—सप्तानां दर्भाणां स्तबकः[2] पिञ्जूलमित्युच्यते।

---

१. द्र० पदाङ्कः ३६४। २. गुच्छकस्तु स्तबकः। अमर २।४।१६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३६५. **मन्त्राचमनम्**—ततः **'आपो हि ष्ठा'** इति तिसृभिर्ऋग्भिः प्रत्यृचं जलमाचामेत् । एतत् मन्त्राचमनमित्युच्यते ॥

३६६. **मन्त्रमार्जनं, मन्त्रप्रोक्षणं वा**—ततः आत्मानं मन्त्रैर्मार्जयते । ते च मन्त्राः **दधिक्राव्णः** इत्येका, **यत्किं चेदम्** इत्येका, **कितवास** इत्येका **हिरण्यवर्णा** इति चतस्रः, **पवमानः सुवः** इत्यनुवाकः, **कया नः** इति तिस्रः, **तरत्समन्दी** इति चतस्रः, समस्तव्याहृतिः, **शं नो देवीः** इत्येका, एवं पत्न्यपि पवनादि कुर्यात् । इदं मन्त्रमार्जनं मन्त्रप्रोक्षणमिति चोच्यते ॥

३६७. **पुण्याहवाचनम् स्वस्तिवाचनं वा**—ऋत्विजश्च पवनादित्रयं कुर्युः । ततः पुण्याहवाचनम्, तत्राग्निः प्रीयतामिति विशेषः । तच्चेत्थम्—आदौ गणपतिं षोडशोपचारैः संपूज्य **महीद्यौः** इति भूमिं संप्रार्थ्य **ओषधयः सम्** इति भूमौ शक्तचनुसारेण व्रीहीणां राशिद्वयं उदक्संस्थं विधाय, **आकलशेषु** इति राश्याः कलशद्वयं निधाय, **इमं मे गङ्गे** इति कलशयोर्जलमापूर्य **गन्धद्वाराम्** इति गन्धं प्रक्षिप्य, **या ओषधीः** इति सप्तधान्यानि प्रक्षिप्य, **काण्डात्काण्डात्** इति दूर्वाः **अश्वत्थेव** इति पञ्च पल्लवान्, **स्योना पृथिवी** इति सप्त मृदः, **स हि रत्नानिः** इति पञ्च रत्नानि, **हिरण्यरूप** इति हिरण्यं च प्रक्षिप्य, **युवा सुवासाः** इति द्विसूत्र्या कलशकण्ठौ वेष्ठयित्वा, **पूर्णा दर्वी** इति कलशयोरुपरि पूर्णपात्रे स्थापयेत् । ततः कलशयोस्तत्त्वायामीति वरुणमावाह्य षोडशोपचारैः पूजयित्वा युग्मान् ब्राह्मणान् उदङ्मुखानुपवेशयेत् । ब्राह्मणास्तु सपत्नीकं यजमानं प्रति ब्रूयुः—**मातृदेवो भव पितृदेवो भव आचार्यदेवो भव अतिथिदेवो भवेति** । एताः सत्या आशिषः सन्तु इति यजमानो ब्रूयात् । ततः अवनिकृतजानुमण्डलः कमलमुकुलसदृशमञ्जलिं शिरस्याधाय दक्षिणेन पाणिना सुवर्णपूर्णमुत्तरकलशं धारयित्वा दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च तेनायुःप्रमाणेन पुण्याहं **दीर्घमायुरस्तु** इत्यनेन मन्त्रेण उत्तरकलशं स्वशिरसा पत्नीशिरसा विवाहादौ संस्कार्यं शिरसा च संयोज्य, कलशस्थाने कलशं स्थापयित्वा पुनर्गृहीत्वा मन्त्रेण तथैव कृत्वा पुनर्गृहीत्वा मन्त्रेण तथैव इति त्रिवारं कुर्यात । ततो यजमानः **शिवा आपः सन्त्विति भवन्तो ब्रुवन्त्विति** ब्राह्मणहस्ते जलं दद्यात् । ब्राह्मणाश्च **शिवा आपः सन्त्विति** वदेयुः । ततो यजमानो 'गन्धाः पान्तु सुमङ्गल्यं चास्तु' इति 'भवन्तो ब्रुवन्तु' इति ब्राह्मणहस्ते चन्दनं दद्यात् । ब्राह्मणास्तु 'गन्धाः पान्तु सुमङ्गल्यं चास्तु' इति वदेयुः । अक्षताः पान्तुः आयुष्यमस्तु' इति 'भवन्तो ब्रुवन्तु' इति यजमानः अक्षतान् दद्यात् । ते च

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'अक्षताः पान्तु आयुष्यमस्तु' इति ब्रूयुः। ततः 'पुष्पाणि पान्तु सौश्रियमस्तु' इति 'भवन्तो ब्रुवन्तु' इति यजमानः पुष्पाणि दद्यात्। ब्राह्मणास्तु 'पुष्पाणि पान्तु सौश्रियमस्तु' इति ब्रूयुः। 'ताम्बूलानि पान्तु ऐश्वर्यमस्तु' इति 'भवन्तो ब्रुवन्तु' इति यजमानस्ताम्बूलानि दद्यात्। ब्राह्मणास्तु 'ताम्बूलानि पान्तु ऐश्वर्यमस्तु' इति ब्रूयुः। 'दक्षिणाः पान्तु बहुधेयं चास्तु' इति यजमानो दक्षिणां दद्यात्। ब्राह्मणास्तु 'दक्षिणाः पान्तु बहुधेयं चास्तु, इति ब्रूयुः। यजमानो 'दीर्घमायुः श्रेयः शान्तिः पुष्टिस्तुष्टिश्चास्तु' इति जलं दद्यात्। ब्राह्मणास्तु दीर्घमायुरित्यादि अस्त्वित्यन्तं ब्रूयुः। ततो यजमानः यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्तन्ते, तमहमोङ्कारमादिं कृत्वा ऋग्यजुःसामाशीर्वचनं बह्वृषिमतं संविज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये इति ब्रूयात्। ब्राह्मणाः वाच्यतामिति ब्रूयुः। यजमानः **भद्रं कर्णेभिरित्यृचं द्रविणोदा द्रविणस** इत्यृचं **सविता पश्चातादित्यृचं नवो नव** इत्यृचं **उच्चा दिवीत्यृचं सं त्वा सिञ्चामि** इत्यर्धर्चं च पठित्वा 'व्रतनियमतपःस्वाध्यायक्रतुदमदानविशिष्टानां ब्राह्मणानां मनः समाधीयताम्' इति प्रार्थयेत्। 'समाहितमनसः स्मः' इति ब्राह्मणा वदेयुः। 'प्रसीदन्तु भवन्तः' इति यजमानः, 'प्रसन्नाः स्मः' इति ब्राह्मणाः। ततो यजमानः 'शान्तिरस्तु' इत्यादिभिः 'इष्टसम्पदस्तु' इत्यन्तैराशीर्मन्त्रैः पात्रे जलं सिञ्चति। 'अरिष्टनिरसनमस्तु, यत्पापं तत्प्रतिहतमस्तु' इति मन्त्राभ्यां पात्राद् बहिर्जलं सिञ्चेत्। पुनः 'यच्छ्रेयस्तदस्तु' इत्यादिभिः 'सर्वा इष्टदेवताः प्रीयन्ताम् इत्यन्तैर्मन्त्रैः पात्रे जलं सिञ्चेत्। ततो 'हता ब्रह्मद्विषः' इत्यादिभिः 'शाम्यन्त्वीतयः' इत्यन्तैर्बहिर्जलं सिञ्चति। ततः 'शुभानि वर्धन्ताम्' इत्यादिभिः 'महासेनः प्रीयताम्' इत्यन्तैः पात्रे सिञ्चति। ततः पुण्याहकालान् वाचयिष्ये इति ब्रूयात्। ब्राह्मणास्तु वाच्यतामिति ब्रूयुः। यजमानः **उद्गातेव शकुन** इत्यृचं (ऋ० २।४३।२) **याज्ययेत्यादि संस्कुरुते** इत्यन्तम् ऐतरेयब्राह्मणं (२।४०) **यत्पुण्यमित्यादि कुरुते** इत्यन्तं तैत्तिरीयब्राह्मणं (१।५।२१) च पठित्वा मह्यं सह कुटुम्बिने महाजनान् नमस्कुर्वाणाय आशीर्वचनमपेक्षमाणाय करिष्यमाणस्य अमुष्य कर्मणः पुण्याहं भवन्तो ब्रुवन्त्विति ब्रूयात्। ब्राह्मणास्तु ओं पुण्याहमिति प्रतिब्रूयुः। इमे वचनप्रतिवचने त्रिवारं पठनीये ततो यजमानः **स्वस्तये वायुमित्यृचं** (ऋ० ५।५१।१२) **आदित्य उदयनीय** इत्यादि **स्वस्त्युद्यन्तीत्यन्तम्** ऐतरेयब्राह्मणं (१।११) **अष्टौ देवा** इत्यादि **अमृतं स्वस्तीत्यन्तं** तैत्तिरीयं च ब्राह्मणं (३।१।२।६) पठित्वा मह्यमित्यादि करिष्यमाणाय अमुष्मै कर्मणे स्वस्ति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भवन्तो ब्रुवन्त्विति ब्रूयात्। ब्राह्मणास्तु आयुष्मते स्वस्तीति ब्रूयुः। एवं पूर्ववत् त्रिवारं कुर्यात्। यजमानः **ऋध्याम स्तोमं**मित्यृचं (ऋ० १०।१०६।११) **सर्वामृद्धि**मित्यादि **य एवं वेदे**त्यन्तं ऐतरेयब्राह्मणं (४।२३) **ऋध्यास्म हव्यै**रित्यादि **प्रतितिष्ठती**त्यन्तं तैत्तिरीयब्राह्मणम् (३।१।२) च पठित्वा महच्चमित्यादि कर्मणः ऋद्धिं भवन्तो ब्रुवन्त्विति ब्रूयात्। ब्राह्मणास्तु कर्म ऋध्यतामिति ब्रूयुः। एवं पूर्ववत् त्रिवारं कुर्यात्। यजमानः **श्रिये जात** इत्यृचं (ऋ० ९।९४।४) **श्रिय एवे**त्यादि **य एवं वेदे**त्यन्तं ऐतरेयब्राह्मणम् (३।७) **यस्मिन् ब्रह्मे**त्यादि (तै० ब्रा० ३।१।२।५) **अमृतासता**मित्यन्तं तैत्तिरीयब्राह्मणं च पठित्वा महच्चमित्यादि अमुष्य कर्मणः श्रीरस्त्विति भवन्तो ब्रुवन्त्विति ब्रूयात्। ब्राह्मणास्तु अस्तु श्रोः इति ब्रूयुः। एवं त्रिवारं कुर्यात्। ततो मङ्गलानि भवन्तु वषशतं पूर्णमस्तु गोत्राभिवृद्धिरस्तु इत्युक्त्वा कर्मप्रधानदेवतानाम प्रथमान्तमुक्त्वा अन्ते प्रीयतामित्युक्त्वा **शुक्रेभिरङ्गै**रित्यृचं **तदप्येष** इत्यादि **सभासद** इत्यन्तम् ऐतरेयब्राह्मणं च पठित्वा **शिवं शिव**मित्युक्त्वा पत्नीं वामभागे उपवेश्य **वाष्तोष्पते** इति चतस्र ऋचः पठन् दक्षिणकलशं वामहस्ते उत्तरकलशं दक्षिणहस्ते गृहीत्वा उभयोः कलशयोः संततधारां पात्रान्तरे कुर्यात्। ततस्तेन जलेन युग्मा ब्राह्मणाः पत्नी यजमानयोरभिषेकं दूर्वाङ्कुरैः आम्रपल्लवैश्च **समुद्रज्येष्ठा** इति चतसृभिः **त्रायन्ता**मिति तिसृभिः **इमा आप** इति तिसृभिः **देवस्य त्वेति** यजुषा समस्तव्याहृतिभिः अभिषिञ्चन्ति। ततो यजमानः ब्राह्मणेभ्यो दक्षिणां दत्त्वा पुण्याहवाचनफलसमृद्धिरस्त्विति भवन्तो ब्रुवन्त्विति ब्रूयात्। ब्राह्मणाः पुण्याहवाचनफलसमृद्धिरस्त्विति ब्रूयुः। ततो यजमानो नानानामगोत्रेभ्यो ब्राह्मणेभ्यो भूयसीं दक्षिणां ददाति। इदं सर्वं कर्म पुण्याहवाचनमिति स्वस्तिवाचनमिति चोच्यते॥

३६८. **मातृकापूजनम्**—ततो गौरी पद्मा शची मेधा सावित्री विजया जया देवसेना स्वधा स्वाहा मातरो लोकमातरः धृतिः पुष्टिः तुष्टिः आत्मनः कुलदेवता ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही इन्द्राणी चामुण्डा गणपतिः एतासां देवतानां षोडशोपचारैः पूजनं मातृकापूजनमित्युच्यते॥

३६९. **आधानसंकल्पः**—ततः गृह्याग्नेः पश्चात् प्रागग्रान् दर्भानास्तीर्य तेषु दक्षिणतः पत्नी उपविशति उत्तरतो यजमानः। तयोरुत्तरतः प्राङ्मुखाः सर्वे ऋत्विजः। ततः सपत्नीको यजमानः **पुरुष एवेद**मिति विष्णुं स्मृत्वा **पुरस्तादि**त्यादि **निविष्ट**मित्यन्तं जपित्वा मासपक्षाद्युल्लिख्य अग्नीनाधास्ये इत्युपांशु त्रिरुच्चार्य उच्चैस्त्रिर्वदेत्। ततः तन्म इत्यादि **काम** इत्यन्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऋत्विजः प्रत्याह । ऋत्विजस्तु **तत्त** इत्यादि **काम** इत्यन्तं प्रतिब्रुयुः । यजमानः प्रणवपूर्वकं तथेत्याह । तदेतत् सर्वम् आधानसंकल्प इत्युच्यते ।।

३७०. **ऋत्विग्वरणम्**—ततः सपत्नीको यजमानः ब्रह्मणः पादौ उपसंगृह्य—अमुकशर्माहं ब्रह्मत्वेन त्वा गच्छामि याजयतु मां भवान् चन्द्रमा मे ब्रह्मा स मे ब्रह्मा ब्रह्माणं त्वामुकशर्माणं वृणे इति ब्रह्माणं वृणीते । ब्रह्मा **महन्मे** इत्यादि **भुक्षिषीयेत्यन्तं** जपित्वा चन्द्रमास्ते ब्रह्मा स ते ब्रह्मा ब्रह्माहं ते मानुष इति ब्रूयात् । ततो होतारं वृणीते—अमुकशर्माहं हौत्रेण त्वा गच्छामि याजयतु मां भवान् अग्निर्मे होता स मे होता होतारं त्वामुं वृणे । ततो होता **महन्मे** इत्यादि जपित्वा अग्निष्टे होता स ते होता होताहं ते मानुष इति ब्रूयात् । ततोऽध्वर्युं वृणीते—अमुकशर्माहं आध्वर्यवेण त्वा गच्छामि याजयतु मां भवान् आदित्यो मेऽध्वर्युः स मे ऽध्वर्युरध्वर्युं त्वामुं वृणे । ततोऽध्वर्युः **महन्मे** वोच इत्यादि जपित्वा आदित्यस्तेऽध्वर्युः स तेऽध्वर्युरध्वर्युरहं ते मानुषः इति ब्रूयात् । तत उद्गातृवरणं विकल्पेन—अमुकशर्माहं औदगात्रेण त्वा गच्छामि याजयतु मां भवान् पर्जन्यो म उद्गाता स म उद्गातोद्गातारं त्वामुं वृणे । तत उद्गाता **महन्म** इत्यादि जपित्वा पर्जन्यस्त उदगाता स त उद्गातोद्गाताहं ते मानुषः इति ब्रूयात् । तत आग्नीध्रं वणीते—अमुकशर्माहमाग्नीध्रकर्मणा त्वा गच्छामि याजयतु मां भवान् आग्नीध्रं त्वामुं वृणे । तत आग्नीध्रः आग्नीध्रकर्म करिष्यामीति वदेत् । यजमानः ओं तथेति । ततः सदस्यवरणं विकल्येन अमुकशर्माहं सादस्येन त्वा गच्छामि याजयतु मां भवान् आकाशो मे सदस्यः मे सदस्यः सदस्यं त्वामुं वृणे । ततः सदस्यः **महन्म** इत्यादि जपित्वः आकाशस्ते सदस्यः स ते सदस्यः सदस्योऽहं ते मानुष इति प्रति ब्रूयात् । एतावत् सर्वम् ऋत्विग्वरणमित्युच्यते ।।

ऋत्विग्वरणानन्तरं **मधुपर्कः** क्रियते—

३७१. **विष्टरः**—शुद्धस्थले आसनेषु प्राङ्मुखान् ऋत्विज उपवेश्य वृतान् ऋत्विजो मधुपर्केणार्हयिष्ये इति संकल्प्य प्रथमतः ऋत्विजां पादान् प्रक्षालयेत् । ततः कृताचमनेभ्य ऋत्विग्भ्यो 'विष्टरो विष्टरो विष्टरः प्रतिगृह्यताम्' इतिविष्टरं दद्यात् । ऋत्विजस्तु प्रतिगृह्णामीति विष्टरं हस्ते गृहीत्वा **अहं वर्ष्मेति** मन्त्रान्ते उदगग्रे विष्टरे उपविशन्ति । सङ्घीभूताः अष्टाचत्वारिंशद् दर्भाः मूलप्रदेशमारभ्य अग्रपर्यन्तं द्विगुणितसूत्रवेष्टिताः विष्टरपदवाच्याः ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३७२. **पाद्यम्**—ततः पाद्यं पाद्यं पाद्यं प्रतिगृह्यतामिति पाद्यं दद्यात्। ऋत्विजस्तु प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्णन्ति। ततः पादौ प्रक्षाल्य शुध्यर्थमाचामन्ति। पादप्रक्षालनपर्याप्तं पात्रं सजलं पादार्थं उदकं इति व्युत्पत्त्या 'पादार्घाभ्यां च' (अष्टा० ५।४।२५) इति यत्प्रत्यये पाद्यमित्युच्यते॥

३७३. **अर्घ्यम्**—ततः कृताचमनेषु ऋत्विक्षु यजमानस्तेभ्यः अर्घ्यमर्घ्यमर्घ्यं प्रतिगृह्यतामित्युक्त्वा अर्घ्यं ददाति। ऋत्विजस्तु प्रतिगृह्णामीति प्रतिग्रह्णन्ति। 'मूल्ये पूजाविधावर्घः (अमर ३।४।२८) इति कोशात् अर्घः पूजाविधिस्तदर्थमुदकमिति व्युत्पत्त्या पूर्वोक्तसूत्रेण यत्प्रत्यये गन्धाद्यष्टोपचारसहितम् अर्घ्यपात्रस्थं जलम्अर्घ्यमित्युच्यते॥

३७४. **आचमनीयम्**—ततो यजमानः आचमनीयमाचमनीयमाचमनीयं प्रतिगृह्यतामित्याचमनार्थं जलं ददाति। ऋत्विजस्तु प्रतिगृह्णामीति प्रतिगृह्य **अमृतोपस्तरणमसि** इत्यादि मन्त्रेण आचमनं कुर्वन्ति। ततोऽन्येन जलेन शुध्यर्थमाचमनं कुर्वन्ति। तत्राचमनपात्रस्थं जलमाचमनीयमित्युच्यते॥

३७५. **मधुपर्कः**—ततो यजमानः मधुपर्को मधुपर्को मधुपर्कः प्रतिगृह्यतामिति मधुपर्कं ददाति। ऋत्विजस्तु प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्णन्ति। पूर्वम् आहृीयमाणं मधुपर्कं **मित्रस्य त्वेति** मन्त्रेण प्रतीक्षन्ते **देवस्य त्वेति** मन्त्रेण **अञ्जली** गृहीत्वा वेष्टितं सूत्रं विस्रस्य पिधानकं दूरीकृत्य **मधु वाता** इति ऋचेन मधुपर्कम् अवेक्ष्य तत्पात्रं वामहस्ते कृत्वा तत्रत्यं मधुपर्कम् अङ्गुष्ठानामिकाभ्यां त्रिः प्रदक्षिणमालोड्य **वसवस्त्वेत्यादिमन्त्रेण** प्राच्यां दिशि मधुर्कपम् अङ्गुष्ठानामिकोच्छलनेन प्रोक्षयन्ति। तथैव **रुद्रास्त्वेत्यादिमन्त्रेण** दक्षिणतः प्रोक्षयन्ति, तथैवा**दित्यास्त्वेत्यादिमन्त्रेण** पश्चिमतः, तथैव **विश्वे त्वा देवा** इत्यादिमन्त्रेण उत्तरतः। ततोऽङ्गुष्ठानामिकाभ्यां मध्यात् गृहीत्वा **भूतेभ्यस्त्वेति** मन्त्रेण त्रिवारम् ऊर्ध्वं प्रोक्षयन्ति। ततस्तत्पात्रं भूमौ निधाय मधुपर्कैकदेशं दक्षिणहस्ते गृहीत्वा **विराजो दोह** इत्यादिमन्त्रेण भक्षयन्ति। ततो लौकिकजलेनाचामन्ति। ततः पुनर्मधुपर्कैकदेशं गृहीत्वा **विराजो दोह** इत्यादिमन्त्रेण भक्षयन्ति। पुनर्लौकिकजलेनाचम्य, मधुपर्कैकदेशं गृहीत्वा **मयि दोह** इत्यादिमन्त्रेण भक्षयन्ति ततो लौकिकजलेनाचम्य मधुपर्कशेषं जले प्रक्षिपन्ति। **अमृतापिधानमसीति** मन्त्रेण पूर्वदत्ताचमनीयजलेनाचम्य लौकिकजलेनाचामन्ति। कांस्यपात्राभ्यां संपुटीकृतम् उपरि द्विगुणितसूत्रवेष्टितं मधुमिश्रितं दधि मधुपर्क इत्युच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३७६. **गोदानम्**—ततो यजमानो गौर्गौर्गौः प्रतिगृह्यतामिति प्रत्येकमृत्विग्भ्यो गां ददाति। ऋत्विजस्तु प्रतिगृह्णामीत्युक्त्वा **माता रुद्राणामि**त्यृचं पठित्वा **ओमुत्सृजतेति** मन्त्रेण गोरुत्सर्जनं कुर्वन्ति। यजमानस्तु नववस्त्रयुग्मं यज्ञोपवीतयुग्मं चन्दनं पुष्पमालाम् अलंकारान् फलाद्युपहारं च ऋत्विग्भ्यो ददाति।

३७७. **मधुपर्कपूजा**—सेयं विष्टरदानप्रभृत्येतावत्पर्यन्ता मधुपर्कपूजेत्युच्यते॥

३७८. **देवयजनयाच्ञा**-ततो यजमानस्य देवयजनयाञ्चा विहिता। तत्रादौ अध्वर्यो देवयजनं मे देहि इति अध्वर्युं याचते। ततोऽध्वर्युः **आदित्यो देव** इत्यादि **ददात्वित्यन्तं** पठति। यजमानः प्रणवपूर्वकं तथेत्याह। ब्रह्मन् देवयजनं मे देहि इति ब्रह्माणम्, ततो ब्रह्मा **चन्द्रमा देव** इत्यादि **ददात्वित्यन्तं** पठति यजमानः पूर्ववत्तथेत्याह। होतर्देवयजनं मे देहीति होतारम्, ततो होता **अग्निर्देव** इत्यादि **ददात्वित्यन्तं** पठति यजमानः पूर्ववत्। उद्गातर्देवयजनं मे देहि इति उद्गातारम्, तत उद्गाता **पर्जन्यो देव** इत्यादि पठति यजमानः पूर्ववदाह। सदस्य देवयजनं मे देहि इति सदस्यम्, ततः सदस्यः **आकाशो देव** इत्यादि पठति यजमानः पूर्ववदाह। देवा इज्यन्ते यस्मिन्नित्यधिकरणे ल्युटा देवोद्देश्यकयागभूमिः देवयजनशब्देनोच्यते। तस्य पूर्वोक्तप्रकारेण अध्वर्यवादीन् प्रति याचनं देवयजनयाच्ञा इत्युच्यते॥

३७९. **अवोक्षणम्**—ततोऽध्वर्यवादयो गार्हपत्यस्य पश्चादुपविश्य **इडे**त्यादि **मदन्तित्वत्यन्तं** जपन्ति। अध्वर्युस्तु स्फ्यं गृहीत्वा उदग्देशेन गत्वा यजमानपत्नीभ्यां सह वेद्युत्करयोर्मध्येन प्रविश्य तिष्ठन् यजमानान्वारब्धः गार्हपत्यायतनम् **उद्धन्यमान** इत्यृचा स्फ्येन उद्धन्ति। ततः **शं नो देवी**रित्यृचा जलेनावोक्षति। एवं दक्षिणाग्न्यायतनम् आहवनीयायतनं च उद्धनानावोक्षणाभ्यां संस्करोति। अत्रावोक्षणं नाम अवाचीनेन हस्तेन जलप्रोक्षणम्॥[1]

३८०. **संभाराः**—सिकता ऊषरमृत्तिका मूषकबिलमृत्तिका वल्मीकमृत्तिका महाह्रदमृत्तिका अरण्यवराहविहतमृत्तिका पद्मिनीपत्रं शर्कराः, षट् हिरण्यशकलानि, अश्वत्थः उदुम्बरः पलाशः शमी विकङ्कतः अशनिहतम् अरण्यौ मुञ्जकुलायः, प्रसिद्धाश्वत्थस्य आर्द्राः सपत्राः सप्ररोहाः प्रादेशमात्राः अशुष्काग्रास्तिस्रः समिधः त्रीणि सुवर्णशकलानि त्रीणि रजतशक-

---

१. प्रोक्षणमात्रं सिञ्चनमेव न तु पारिभाषिकम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

लानि, एते विंशतिपदार्थाः सम्भ्रियन्ते संपाद्यन्ते इति कर्मव्युत्पत्त्या संभारा इत्युच्यन्ते ॥

३८१. **सम्भारसम्भरणम्**—एतान् पदार्थान् वेद्यां प्रागग्रान् स्थापयति। तन्मध्ये प्रथमतः **वैश्वानरस्य रूपमित्यृचा** सिकतां स्थापयति। ततः **यदिदं दिव** इत्यृचा ऊषरमृत्तिकाम्, **ऊतीः कुर्वाण** इत्यृचा मूषकबिलमृत्तिकाम् **ऊर्जं पृथिव्या** इत्यृचा वल्मीकमृत्तिकाम् **प्रजापतिसृष्टानामित्यृचा** महाह्रदमृत्तिकाम् **यस्य रूपमित्यृचा** अरण्यवराहविहतमृत्तिकाम्, **यत्पर्यपश्यदित्यृचा** पद्मिनीपत्रम्, **याभिरद्भिर्हदित्यृचा** षट् हिरण्यशकलानि, **अश्वो रूपमत्यृचा** अश्वत्थम् **ऊर्जः पृथिव्या** इत्यृचा उदुम्बरं **गायत्रिया ह्रियमाणस्येत्यृग्भ्यां** पलाशं **या ते सृष्टस्येत्यृचा** शमीं **यत्ते सृष्टस्येत्यृचा** विकङ्कतं **यत्ते तां तस्येत्यृचा** अशनिहतं **चित्रियादश्वत्थादित्यृचा** प्रसिद्धाश्वत्थस्य तिस्रः समिधः **या ते अग्न** इति यजुषा मुञ्जकुलायं **अश्वत्थाद्ध्येति यो अश्वत्थ** इति च द्वाभ्यामृग्भ्यां अरण्यौ **ततीयं त्वा समभरन्नित्यृचा** संभृतान् संभारान् पुनः संभरति। ततः अरणीमुञ्जकुलायप्रसिद्धाश्वत्थसमिद्धिरण्यशकलव्यतिरिक्तानां संभाराणां त्रेधा विभाज्य स्थापनं क्रियते। एतत् सर्वं कर्म संभारसंभरणमित्युच्यते ॥

३८२. **गोपितृयज्ञः**[1]—ततः गोपितृयज्ञो ऽनुष्ठीयते। स चेत्थम्—अध्वर्युः प्राङ्मुखस्यासीनस्य यजमानस्य दक्षिणगोदानप्रदेशे ऊर्ध्वाग्राणि त्रीणि दर्भपिञ्जूलानि निधाय चौलवत्सर्वं करोति। ततः केशादिनखान्तानां कृन्तनं करोति—**प्रवपे देवेनेति** यजुषा **यानि मइत** इति यजुषा। यजमानो ऽभिमन्त्रयते। पत्न्यास्तु तूष्णीं केशव्यतिरिक्तलोमादिकृन्तनं क्रियते। अध्वर्युर्यजमानमुदकुम्भेनाभिषिञ्चन् **इमा म आप** इत्यृचं वाचयति, पत्नीं तूष्णीम्। स्नातौ पत्नीयजमानौ प्राग्देशं गत्वाऽहते वाससी परिधायालंकृत्याञ्जनेनाञ्जाते। ततो यजमान एकविंशतिदर्भपिञ्जूलैस्त्रैधाविभक्तैः शिरोनाभिगुल्फदेशान् क्रमात् तूष्णीं पावयित्वा पत्न्या सह वहिर्गत्वा नैर्ऋत्यां दिशि चतुष्पथे अध्वर्युणा आनीते उदगग्रे आत्मानमवेक्षते। अध्वर्युर्यजमानं **सिंहे म** इत्यनुवाकं वाचयति, पत्नी तूष्णीमवेक्षते। अस्मिन् काले ब्रह्मा दक्षिणत उपविशति। ततस्तदुदकं नैर्ऋत्यां दिशि निनीय उदपात्रं परास्य अप उपस्पृश्य अनवेक्षमाणो यथागतं प्रदक्षिणमावृत्य आगत्य हस्तौ पादौ प्रक्षाल्य आचमनं करोति। ततोऽध्वर्युर्यजमानं **पवमानः सुवरित्यनुवाकं** वाचयन् आत्मानं यजमानं पत्नीं चाद्भिः प्रोक्षति। ततो यजमानः प्राची-

१. पदार्थसंख्या ३८५ पर्यन्तं गोपितृयज्ञकर्म।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नावीती गोपितृयज्ञं करिष्य इति संकल्प्य लौकिकाग्निमाहृत्य दक्षिणाग्नौ प्रणीय ज्वलयित्वा परिस्तीर्य पवित्रे कृत्वा आज्यस्थालीं स्रुवं च सादयित्वा प्रोक्ष्य संस्कृत्य दक्षिणाग्नेरुत्तरतः सादयित्वा चतुर उदकुम्भान् औदुम्बरीं दर्वीं दक्षिणाग्नेर्दक्षिणतः सकृदाछिन्नं बर्हिः एरकोपबर्हणे अञ्जनाभ्यञ्जने पात्रान्तरस्थमाज्यं स्फ्यं दशारहितं वस्त्रं प्रक्षालिते उलूखलमुसले कृष्णाजिनं शूर्पं चरुस्थालीं मेक्षणं आज्यस्थालीं प्रोक्षणीं च सादयित्वा उद्धननावोक्षणे दक्षिणाग्नेर्दक्षिणतः करोति। एकोनपञ्चाशत्संख्याकान् बैभीतकान् अक्षान् उद्धननस्थाने निधाय तद्दक्षिणतः पिण्डनिर्वापस्थाने स्फ्येन **अपहता असुरा** इति यजुषा दक्षिणापवर्गां रेखां करोति। **उदीरतामवर** इत्यृचा रेखामद्भिरवोक्षति। **य आददाना** इत्यृचा उल्मुकमादत्ते। **अग्निः पावक** इत्यृचा उल्मुकेन तां रेखामभितपति। तत उल्मुकमग्निसमीपे पृथङ् निदधाति। उल्मुके आज्यविन्दुं प्रश्चोतयति। **सकृदाच्छिन्नं बर्हिरित्यृचा** रेखायां दक्षिणाग्रान् दर्भान् स्तृणाति। अन्यान् दर्भान् हस्ते गृहीत्वा उत्थाय कृताञ्जलिः प्रह्वो दक्षिणामुखः **उदीराणा इहेति** मन्त्रेण पितॄनाह्वयति। हस्तधृतान् दर्भान् भूमौ निधाय पितॄणां पुरस्ताद् दक्षिणतो वा आसनं **शयनमित्यृचा** एरकोपबर्हणे निदधाति। एकेन उदकुम्भार्घेन तूष्णीं मार्जयति। मधुक्षीरपयोमिश्रसक्तूनां पात्रत्रितयं ब्राह्मणेभ्यो दत्त्वा तादृशमेव पात्रत्रितयं **एतद् वः पितरः पानमिति** मन्त्रेण पितृभ्यो ददाति। अवशेषितोदकुम्भोदकेन तूष्णीं मार्जयति। ततः पूर्वमासादितानामक्षाणां पूर्वतः यजमान उपविशति, दक्षिणतः पुत्रो ज्येष्ठस्ततोऽनुजः पश्चिमतः उत्तरतः कनिष्ठः एवमुपविश्य यदि द्वादशाक्षान् यजमानः ज्येष्ठानुजौ चाकर्षन्ति कृतं कृतमित्युक्त्वा तदा त्रय एते विजयिनः समसंख्याकाकर्षणात् कनिष्ठः पराजितो भवति, विषमसंख्याकाकर्षणात् पुत्रद्वित्वे यजमानो द्विरावृत्त्या चतुर्विंशतिसंख्याकानक्षानकर्षति। एकपुत्रत्वे पत्नी तृतीया यजमानः पूर्ववत् द्विरक्षानाकर्षति, पुत्राभावे पत्नीयजमानौ प्रत्येक द्विवारमाकर्षतः समसंख्याकाकर्षणे जयः विषमसंख्याकाकर्षणे पराजयः एवं त्रिवारमक्षाकर्षणं कृत्वा 'पचत ओदनम्' इत्युक्त्वोत्तिष्ठन्ति। ततः **पितृभ्यस्त्वेत्यादिना उपाकरोमीत्यन्तेन** मन्त्रेण शूर्पे व्रीहीन् सकृन्निर्वपति। तथैव **प्रोक्षामीत्यन्तेन** तेन मन्त्रेण प्रोक्षति। ततः कृष्णाजिने उलूखलं निधाय तस्मिन् व्रीहीनोप्य मुसलेनावहत्य संपन्नान् तन्दुलान् प्रक्षाल्य प्रक्षालनोदकं पात्रान्तरे निधाय दक्षिणाग्नौ चरुमाज्यं चाधिश्रित्य उभयं पर्यग्नि कृत्वा शृते चरौ प्रभूतमाज्यमानीय स्रुवं दर्वीं च संमज्य स्रुवेण चरुमभिघार्य उद्वास्य चरोरेकं पिण्डमुद्धृत्य पात्रान्द्धृतरे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निधाय **यः प्राचीः संभवन्ति** इत्यादिभिर्ऋग्भिः स्रुवेण पञ्चाज्याहुतीर्जुहोति। ततः प्रागुद्धृतं पिण्डं त्रेधा विभज्य उपस्तरणाभिघारणवर्जम् एकैकं भागं दर्व्यां **सोमाय पितृमत** इत्यादिभिर्मन्त्रैः त्रिभिर्जुहोति। ततो दर्वीं तूष्णीमग्नौ निधाय चरोः पिण्डान् कृत्वा प्रोक्षणीयस्योदकुम्भस्यार्धोदकेन पूर्वकृतरेखायां तूष्णीं मार्जयित्वा उपस्तरणाभिधारणे कृत्वा 'एतत्ते पितर्देवदत्तशर्मन्' इत्यादिभिस्त्रिभिर्मन्त्रैः रेखायां बर्हिषि पिण्डान् ददाति। ततः **अत्र पितर** इति यजुषा अनुमन्त्र्य द्वितीयोदकुम्भशेषेण तूष्णीं मार्जयति। तृतीयोदकुम्भजलं तन्दुलप्रक्षालनोदकेन सहालोड्य **यानि रक्षांसीति** मन्त्रेण भूमौ पिण्डसमीपे प्रवाहयेत्। तत **आञ्जतां पितर** इत्यादिमन्त्रेण पिण्डेषु अञ्जनं ददाति। **अभ्यञ्जेतां पितर** इत्यादिमन्त्रेण अभ्यञ्जनं ददाति। ततः पूर्वासादितसूत्रं त्रेधा छित्त्वा **एतानि वः पितर** इत्यादिमन्त्रेण ददाति। ततो **नमो वः पितरो रसायेत्यादिभिः** षड्भिर्मन्त्रैरुपतिष्ठते। ततो **वीरं मे पितरो दत्ते**त्यादिभिर्मन्त्रैः पुत्रं याचते। **उत्तिष्ठत पितर** इत्यादिना मन्त्रेण आवाहितान् पितॄनुत्थापयति। **यन्तु पितर** इत्यादिमन्त्रेण पितॄन् स्वस्थानं गमयन् मनसा ताननुगच्छति। ततस्तान् प्रत्यनुगमनः मनोऽन्वा हुवामह इति तृचेन पुराह्वयते। ततो यजमानः परिहितं वासः गोपितृयज्ञविदे ब्राह्मणाय ददाति। ततोऽन्यत्परित्यागार्हवासः परिधाय आचम्य दक्षिणां दिशं गत्वा चतुर्थोदकुम्भोदकेन स्नानं करोति **या सुगन्धा रसा** इति मन्त्रेण। तत आचम्य तदपि वासः परित्यज्य क्षौमं वासः परिधायाचम्य यज्ञोपवीती दक्षिणाग्नेः समीपं **प्रजापते न त्वदि**त्यृचा गच्छति। अभूदृत इत्यृचा पूर्वग्रो पृथक् कृतमुल्मुकमग्नौ प्रक्षिपति, ब्राह्मणेभ्यः पिण्डान् ओदनं च ददाति।

जयहोमः—अध्वर्युस्तस्मिन्नेवाग्नौ जयसंज्ञकैस्त्रयोदशभिर्मन्त्रैराज्यं जुहोति, स्वाहाकारान्तानि **चित्त चेत्या**दीनि जयनामकानि॥

३८३. **अभ्यातानहोमः**—**अग्निर्भूतानामधिपतिरित्यादिभिः सप्तदश**मन्त्रैस्तथैव जुहोति अष्टादशं यजमानं वाचयति। एतेऽष्टादश मन्त्रा अभ्याताना इत्युच्यन्ते॥

३८४. **राष्ट्रभृद्धोमः**—ततः **ऋताषाड्ऋतधामेत्यादिभिर्द्वाविंशतिमन्त्रै**र्जुहोति। एते च मन्त्रा राष्ट्रभृत्संज्ञकाः॥

३८५. **देव-होमः**—ततो **यद्देवा देवहेडनमित्यादिभिर्द्वाविंशतिमन्त्रै**र्जुहोति, चौलवत्करणादि। **एतावदन्तं कर्म गोपितृयज्ञ इत्युच्यते**॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३८६. **सर्वौषधिहोमः**—यस्मिन् काले सूर्यकिरणा भूमिं त्यक्त्वा वृक्षारूढा भवन्ति, तस्मिन् काले तिलमाषव्रीहियवप्रियङ्गवणुगोधूमश्यामाकनीवारजतिलगवीधुकगार्मुतकुरविन्धवेणुयवान् समुच्चित्य प्रक्षाल्यादाय आज्यस्थालीं स्रुवं श्रुचं दर्भान् शुष्ककाष्ठानि चादाय वाससा प्रच्छन्नाः अध्वर्युब्रह्मपत्नीयजमानाः औपासनाग्निं प्रति व्रजन्ति। ततः काष्ठान्यौपासनाग्नौ प्रक्षिप्य आदीप्य दर्भैः परिस्तीर्य गृह्योक्तविधिना पात्रासादनाद्याज्यसंस्कारान्तं कृत्वा अध्वर्युर्यजमानाञ्जलावुपस्तीर्य तिलमाषादि ओप्य अभिघारयति। यजमानः **अग्नये सर्वौषधाये**त्यादिना मन्त्रेण जुहोति। अयं सर्वौषधिहोम इत्युच्यते॥

३८७. **ब्रह्मौदननिर्वापः**—ततः स्रुवेण **चितं चेत्या**दिभिः स्वाहाकारान्तैर्मन्त्रैः **त्वमग्ने अयासी**त्येतावत्पर्यन्तैर्हुत्वा स्रुचि चतुर्गृहीतं गृहीत्वा **प्रजापते न त्वदेतानी**त्यृचा हुत्वा अपरं चतुर्गृहीतं गृहीत्वा **अन्वग्निरुषसामि**त्यृचा जुहोति। अथ यजमानः शरावे औपासनाग्नेः सर्वानङ्गारान्, अर्धाधानपक्षे त्वर्धानङ्गारान् **आयुषे वो गृह्णामी**ति गृह्णाति। **आयुर्मामाविशत्वि**ति मन्त्रेण अङ्गारानादायोत्तिष्ठति, तानध्वर्यवे ददाति। अध्वर्युणान्वारब्धे यजमाने सर्वे यथागतं गच्छन्ति। अध्वर्युरङ्गारान् गार्हपत्ये निदधाति। ततो गार्हपत्यं परिस्तीर्य उत्तरतः दर्भेषु प्रोक्षणीमाज्यस्थालीं चरुस्थालीं मेक्षणं उद्धरणपात्रीं स्रुवं निर्वपणस्थालीं उलूखलमुसले शूर्पं च सादयति। गार्हपत्याद् दक्षिणतः ब्रह्मा समन्त्रके निरसनोपवेशने करोति। यजमानश्चोपविशति। अध्वर्युः प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्षति। ततः सुलोहितं आनडुहं चर्म प्राचीनग्रीवं उत्तरलोम गार्हपत्यस्य पश्चादास्तीर्य सपवित्रया निर्वपणस्थाल्या तस्मिन् चर्मणि पृष्ठस्थाने **ब्रह्मणे जुष्टं निर्वपामी**ति मन्त्रावृत्त्या चतुष्कृत्वो व्रीहीन्निर्वपति। अयं ब्रह्मौदननिर्वाप इत्युच्यते॥

३८८. **ब्रह्मौदनप्राशनम्**—**आकूत्यै त्वे**त्यादिमन्त्रेण निरुप्तानभिमृशति। व्रीहीन् शूर्पे निधाय **ब्रह्मणे जुष्टं प्रोक्षामी**ति मन्त्रावृत्त्या चतुर्वारं प्रोक्षति। चर्माभ्युक्ष्य निरस्यति। चर्मणि उलूखलं निधाय व्रीहीनवहन्ति। त्रिः फलीकृतान् त्रिः प्रक्षालयति। तण्डुलान् चरुस्थाल्यां पवित्रवत्यां निर्वपणपात्रेण निर्वापवदुदकमानयति। स्थालीमग्नावधिश्रित्य तिरः पवित्रं निधाय तण्डुलानावपति। आज्यं निरुप्याधिश्रयति। उभयं पर्यग्निकृत्वा मेक्षणं स्रुवं च संमृज्य चरुं संस्कृताज्येनाभिघायर्दोगुद्वासयति। अथ परिक्रमिणः गवामागमनकाले ऋत्विग्भ्यः शृतो ब्रह्मौदन इत्याहुः। अध्वर्वादयः सव सहागत्य उत्तरत उपविशन्ति। ब्रह्मा निरसनोपवेशने करोति। यजमानः उद्ध-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रणपात्र्यामुपस्तीर्य ब्रह्मौदनं तस्यां स्थालीमचालयन् उद्धृत्य ओदनमध्ये गर्तं कृत्वा प्रभूतमाज्यमानीय मेक्षणेनावदाय **प्रवेधसे कवय** इति मन्त्रेण जुहोति । ततोऽध्वर्य्वादीन् उत्तरतोऽनुदिशं परस्पराभिमुखमुपविष्टान् आनुपूर्व्येणाचमय्य ओदनसहिताम् उद्धरणपात्रीं तेषां मध्ये भूमिमुपस्पृशन्नाकर्षन्निव प्रवेशयति । **यज्ञो मोपनमत्विति** मन्त्रेण ओदनं चतुर्धा कृत्वा पृथक् पृथक् पात्रेषु परिवेषयति । ऋत्विज ओदनमध्याद् ग्रासत्रयं प्राश्य यजमानं प्रशंसन्ति **राद्धस्ते ब्रह्मौदन** इति । इदं ब्रह्मौदनप्राशनमित्युच्यते ॥

३८९. **अरणीग्रहणम्**—यजमानः ऋत्विग्भ्यः साण्डं वत्सतरं ददाति । ऋत्विजो भुक्त्वाचम्य वत्सतरं प्रतिगृह्णन्ति । अन्यः कश्चिद् ब्रह्मण उत्तरत आसीनः चरुस्थाल्यां संलग्नं क्षामकायमोदनं प्राश्नाति । यजमानस्तस्मै किञ्चिद् ददाति । ततः संस्कृताज्यशेषम् उद्धरणपात्र्यामुर्वरिताज्ये समानीय प्रसिद्धाश्वत्थस्य तिस्रः समिधोऽभ्यज्य **समिधाग्निमित्यृचा** अग्नौ जुहोति[1] **उप त्वाग्न** इत्यृचा द्वितीयां तं **त्वा समिद्भिरित्यृचा** तृतीयाम् । वत्सतरीं ददाति । ततोऽध्वर्युर्यजमानमाह वाचंयमो भविष्यसि 'संशाधि यत्ते संशिष्याम्' इति । यजमानः परिकर्मिणः प्राह—ब्राह्मणान् आशयत, अश्वं तदभावे अनड्वाहं तदभावे अजं तदभावे अजां तदभावे कमण्डलुं वा गोपायत संभारान्निधत्त इति । ततो यजमानः अध्वर्योः सकाशादरणीं गृह्णन् **मही विश्पत्नीत्यादियथायजै** इत्यन्तं जपति । **ऋत्वियवतीस्थ** इति मन्त्रेण **सुवर्गे लोक** इत्यन्तेन अरणी उरसि श्लेषयति । इदं कर्म अरणीग्रहणमित्युच्यते ॥

३९०. **अग्निसमारोपः**—अध्वर्युर्यजमानमाह—अनृतं विहाय सत्यं वद न संकल्पः कार्यः, मानुषं कार्यं विहाय दैवमेव कार्यं कर्तव्यम् इति । ततो यजमानः **इदमहमनृतादित्यादिमन्त्रं** जपति । ऋत्विजः यजमानं वाचंयमं रात्रि जागरयन्त आसते । यजमानः शुष्ककाष्ठैस्तां रात्रिम् **अग्निं समिन्धे शल्कैरग्निमित्यादिमन्त्रेण** अध्वर्युर्गार्हपत्यस्योत्तरतः कल्माषमजं बद्ध्वा यजमानं प्रति दर्शयति प्रजा **अग्ने समिति** मन्त्रेण वाचंयमत्वादि अरणीप्रदानादि च अपररात्रे वा भवति । अध्वर्युः अपररात्रे यजमानहस्ताद् दक्षिणेन हस्तेन उत्तरारणिं सव्येनाधरारणिं गृहीत्वा अरण्योर्ब्रह्मौदनाग्निं समारोपयति **जातवेदो भुवनस्य रेत** इत्यृग्भ्याम् । अयमग्निसमारोपो नाम अनयोरग्निः प्रविष्ट इति भावनया यद् अरण्योर्गार्हपत्ये प्रतपनम् ॥

---

१. प्रथमामिति शेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३९१. **आयतनोपलेपनम्**—ततः ब्रह्मौदनाग्निं शरावे निधाय गार्हपत्याद् दक्षिणतः परिक्रमिणः तं ज्वलयन्त आसते। यद्यस्माद् दक्षिणाग्नेराधानं तदा, नो चेदुपशामयेत्। ततोऽग्न्यायतनानि गोमयेन **अपेत वीते**त्यृचा लेपयति। इदमायतनोपलेपनमित्युच्यते॥

३९२. **आयतने सम्भारनिधानम्**—अध्वर्युर्यजमानेनान्वारब्धः संभाराणां तृतीयं भागमादाय गार्हपत्यायतने **यत्पृथिव्या** इत्यृचा निदधाति। ततः सपत्नीको यजमानः अध्वर्युमन्वारब्धोऽभिमन्त्रयते—**यददश्चन्द्रमिति** मन्त्रेण, यजमानः **दिवस्त्वा वीर्येणेति** मन्त्रेण संभारानग्नित्वेन निश्चिनोति। **संवः सृजामी**त्यृग्भ्यां संभारान् मिश्रयति। ततः **कल्पेतां द्यावपृथिवी** इति यजुषा संभारान् समान् करोति। अध्वर्युर्यजमानेनान्वारब्धः अवशिष्टानां संभाराणाम् अर्धमादाय दक्षिणद्वारेणापनिर्हृत्य अन्वाहार्यपचने **यदन्तरिक्षस्ये**त्यृचा निदधाति। अभिमन्त्रणादि गार्हपत्यवद् भवति। अध्वर्युर्यजमानान्वारब्धः अवशिष्टान् संभारान् पूर्वद्वारेण निर्हृत्य आहवनीयायतने **यद् दिवोने**त्यृचा निदधाति। अभिमन्त्रणादि गार्हपत्यवत्। अध्वर्युर्गोप्तारमाह-एतत् सर्वं रक्षणीयमिति। गोप्ता आह-विहृता अग्नयो मा कश्चनान्तरेण संचारीद्' इति। इदं कर्म आयतने संभारनिधानमित्युच्यते॥

३९३. **अग्निमन्थनीयाः** [ऋचः]—अध्वर्युः प्रदक्षिणमावृत्य गार्हपत्यसंभारेषु पश्चात् कृष्णाजिने वा मुञ्जकुलायं निधाय तस्योपरि प्रागायतामधरारणीं तूष्णीं निदधाति। पश्चिममन्थनप्रदेशे **दशहोतारं** व्याख्याय **वाचस्पते विध** इत्यादि **नृम्णं धात् स्वाहे**त्यन्तेन मन्त्रेण उत्तरारणीं निदधाति। अध्वर्युराह-मन्थेति। मन्थनदेशे अध्वर्युरधरारणीं प्रतीचीनप्रजननाम् **अग्नेर्जनित्र**मित्यादिमन्त्रेण स्थापयति। **उर्वश्यस्यायुरसि पुरूरवा** इति मन्त्रेण मन्थं गृहीत्वा **घृतेनाक्ते** इति मन्त्रेण प्रजननं **वृषणौ स्थ** इति मन्त्रेण अधरारण्यां मन्थस्थापनं **वृषणं दधाथा**मिति मन्त्रेण निष्पीडनस्थापनं **गायत्रं छन्द** इत्यादिमन्त्रेण रज्जुभ्रमणं होतारं प्रेष्यति—**अग्नये मथ्यमाना**येत्यादिना। यजमानः प्रथमं मन्थयति। होता सामिधेनीस्थानस्य पश्चात्पदमात्रेऽवस्थाय अभिहिंकृत्य सामिधेनीवत् **अभि त्वा देव सवितरि**त्यृचं त्रिवारमभ्यस्य **मही द्यौरि**त्यृचं **त्वामग्ने पुष्करादि**त्यृचं **तमु त्वा दध्यङ्** इत्यृचं **तमु त्वा पाथ्य** इत्यृचम् एतावता यद्यग्निर्न जायते तर्हि **अग्ने हंसी**ति सूक्तमावपेत **उत्तिष्ठसि स्वे**त्यृचं **स आहुतो वी**त्यृचं **घृतेनाग्नि**रित्यृचं **जरमाणः**

---

१. द्र०-पृष्ठ १५, पदार्थः १०८।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समित्यृचं तं मर्ता इत्यृचम् **अदाभ्येन शोचिषेत्यृचं स त्वामग्न** इत्यृचं **तं त्वा गीर्भिरित्यृचं** त्रिरभ्यस्यति। एता ऋचः अग्निमन्थनाय हिता इति हेतोः अग्निमन्थनीया इत्युच्यन्ते ॥

३९४. **अग्निमन्थनम्**—उद्गाता मन्थनारम्भकाले अरणी स्पृष्ट्वा **अरण्योरिति** साम गायति, मथ्यमाने **अग्निं नर** इति साम गायति, धूमे उत्पन्ने सति **त्वेषस्ते धूम ऋण्वतीति** साम गायति, अग्नौ जाते यजमानो वरं ददामीति वाचं विसृजते। उद्गाता प्रज्वलितेऽग्नौ **अर्दाश गातुवित्तम** इति साम गायति। अध्वर्युर्यजमानश्च जातमग्निमुपतिष्ठते—**अजीजनन्नमृत-**मिति मन्त्रेण। एतावत्कर्म अग्निमन्थनमित्युच्यते।

३९५. **गार्हपत्याधानम्**—यजमानः अग्नेरुपरि नासापुटाभ्यां वायुं निष्क्रामयति। **प्रजापतेस्त्वा प्राण** इति मन्त्रेण यजमानः गार्हपत्यं निदधाति। निधीयमाने गार्हपत्ये उद्गाता **अग्निमीळे** इति साम गायति। अध्वर्यु-रुद्गातारमाह—**रथन्तरं ब्रू३हीति**। तत उद्गाता रथन्तरं साम गायति। उद्गातुरभावे ब्रह्मन् छन्दांसि **ब्रू३हीति**। ब्रह्मा हि३ इति ब्रवीति **योनिं वा** द्विर्ब्रवीति समस्तव्याहृतीर्वा त्रिर्ब्रवीति। अध्वर्युर्गार्हपत्यं स्पृष्ट्वा **भूर्भुवो घर्म** इत्यादिमन्त्रं जपति। तत्र मन्त्रे भृगूणां **भृगूणां त्वा व्रतपते** इति, अङ्गि-रसां तु **अङ्गिरसां त्वा व्रतपते** इति, एतद् द्वयऽभिन्नानां तु **आदित्यानां त्वा व्रतपते** इति **गायत्रेण छन्दसेत्यादि** यथा यजमानगोत्रोच्चारणम्। अथा-ग्नेरुत्तरतः अग्नौ वा सौवर्णं शकलं **स्वया तनुवेति** मन्त्रेण निदधाति। राजतं शकलं मूर्खाय ब्राह्मणाय वृषलाय वा प्रयच्छति। अध्वर्युर्यजमा-नश्च गार्हपत्यम् **अहं त्वदस्मीत्यृग्भ्यामुपतिष्ठाते**। एतद् गार्हपत्याधानमि-त्युच्यते ॥

३९६. **दक्षिणाग्न्याधानम्**—अथ अध्वर्युः गार्हपत्याद् अन्वाहार्यपचनं निदधाति। तं स्पृष्ट्वा **भूर्भुवो वात** इत्यादिमन्त्रं जपति यथर्षि यथागोत्रं **गायत्रेण छन्दसेति** पूर्ववत् हिरण्यशकलं निदधाति, राजतं ददाति। अध्वर्यु-र्यजमानश्च **इमा उमामित्यृचा** अन्वाहार्यपचनमुपतिष्ठाते। इदं दक्षिणाग्न्या-धानमित्युच्यते ॥

३९७. **आहवनीयाधानम्**—ततः गार्हपत्यं प्रति यथेतमेत्य गार्हपत्ये प्रणयनीयमिध्मं मूलतोऽभ्यादधाति। यथा अर्धोदिते सूर्ये अग्निप्रणयन-योग्यो भवति तथा ज्वलयति। मृत्पूर्णपात्रम् उपयमनं च समीपे गार्हपत्यस्य सादयति। स्नापितस्तरुणोऽश्वः गार्हपत्यस्य पुरस्तात् स्थापितो भवति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अश्वाभावे अनड्वान् अजो वा अविर्वा कमण्डलुर्वा। अग्न्युद्धरणे प्रारब्धे उद्गातारमाह— **वामदेव्यं ब्रू३हीति** । उद्गातुरभावे ब्रह्मन् छन्दांसीति विकल्पः पूर्ववत् । यजमानः प्रदीप्तमिध्मं मृत्पूर्णपात्रे निधाय अग्रत उपयमनेनोपयम्य **ओजसे बलायेत्यादिना** मन्त्रेणोद्यच्छते, अग्निपात्रं जानुमात्रमुद्धृत्य गार्हपत्याहवनीययोर्मध्यदेशं त्रेधा विभज्य प्रथमभागं गच्छति, नाभिमात्रमुद्धृत्य द्वितीयभागं गच्छति, ग्रीवामात्रमुद्धृत्य तृतीयं भागं गच्छति । अश्वं पूर्वं ब्रह्मादयः उत्तरेण नयन्ति । तम् **अश्वं प्राचीमनुप्रदिशमित्यृचानुमन्त्रयते** । **विक्रमस्व महामित्यृचा** गमनमध्ये उपरमन्ति । **अत्वग्निरुषसामित्यृचा** ततो गच्छन्ति । अग्निपात्रम् अन्यस्य हस्ते दत्त्वा प्राङ्मुखमश्वं दक्षिणेन पूर्वपादेन संभाराणामुत्तरदेशे अतिसन्निहिते आक्रमयति । यजमानः प्रदक्षिणमावृत्य अश्वं द्विरभ्युक्ष्य उत्तरत उत्सृज्य अध्वर्यवे ददाति, अन्यमश्वं ब्रह्मणे । ततो ब्रह्मा आहवनीयं परीत्य आहवनीयस्य दक्षिणतः मन्त्रेण निरसनोपवेशने कृत्वा **बृहस्पतिर्ब्रह्मेत्यादि** जपति । यजमानः अर्धोदिते सूर्ये प्रदक्षिणामावृत्य प्रत्यङ्मुखस्तिष्ठन् तमग्निं गृहीत्वा संभारेषु प्रतिष्ठापयति **यदिदमित्यादि गुप्त्यै** इत्यन्तेन मन्त्रेण । तत उद्गातारमाह— **बृहद्वारवन्तीयं श्यैतं ब्रू३हीति** । उद्गातुरभावे पूर्ववत् ब्रह्मणो विकल्पाः । उद्गाता सामानि गायति आहितमग्निं स्पृष्ट्वा **भूर्भुवः सुवरर्क** इत्यादिमन्त्रं जपति ततो राजतशकलदानान्तं पूर्ववत् । अध्वर्युर्यजमानश्चाहवनीयम् **आनशे व्यानश** इत्यादिमन्त्रेणोपतिष्ठाते । रथचक्रं प्रवर्तयति सन्ततं गार्हपत्यादाहवनीयात् । एतदाहवनीयाधानमित्युच्यते ॥

३९८. **उत्तरसर्वौषधिहोमः**—ततः आग्नीन् परिसमूह्य पर्युक्ष्य परिस्तीर्य यजमानः तिलमाषादीनि पूर्वोक्तानि धान्यानि स्वाहाकारान्ताभिर्व्याहृतिभिः सर्वेष्वग्निषु जुहोति । अयमुत्तरसर्वौषधिहोम इत्युच्यते ॥

३९९. **पञ्चसमिद्धोमः**—ततोऽध्वर्युर्यजमानेनान्वारब्धः गार्हपत्ये आज्यं संस्कृत्य स्रुवं जुहूं च संमृज्य एकैकस्मिन्नग्नौ पञ्च पञ्च अश्वत्थोदुम्बरपलाशशमीविकङ्कतवृक्षाणां समिधः संस्कृताज्येनाभ्यादधाति, तत्र आदौ गार्हपत्ये **समिध्यमानः प्रथम** इत्यृचा आश्वत्थीं, **घृतप्रतीको घृतयोनिरित्यृचा** औदुम्बरीं, **त्वामग्ने समिधानमित्यृचा** पालाशीं, **त्वामग्ने प्रदिव** इत्यृचा शमीमयीं, **घृतप्रतीकं व** इत्यृचा वैकङ्कतीम् । एतैरेव मन्त्रैः अन्वाहार्यपचने आहवनीये च समिद्धोमः । अयं पञ्चसमिद्धोम इति प्रसिद्धः ॥

४००. **आहितसर्वोपस्थानम्**—यजमानः प्रदक्षिणमावृत्य गार्हपत्यस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पश्चात्तिष्ठन् उपतिष्ठते **ये ते अग्ने** इत्यादि **त्वा दधे** इत्यन्तैर्मन्त्रैः। एवमन्वाहार्यपचनाहवनीयावुपतिष्ठते। इदमाहितसर्वोपस्थानमित्युच्यते ॥

४०१. **आहितसर्वाग्निजपः**—ततो यजमानो द्वेष्यं ध्यायन् गार्हपत्यसमीपे **यास्ते घोरा** इत्यादि **द्विष्म** इत्यन्तान् मन्त्रान् जपति। एवमेवान्वाहार्यपचनाहवनीयसमीपे उपविश्य जपति। अयमाहितसर्वाग्निजप इत्युच्यते॥

४०२. **आहितप्रत्येकोपस्थानम्**—ततोऽप उपस्पृश्य तिष्ठन् गार्हपत्यमुपतिष्ठते **नर्य प्रजा**मित्यादिमन्त्रैः, **अथर्य पितु**मित्यादिमन्त्रैर्दक्षिणाग्निम्, **शंस्य पशू**नित्यादिमन्त्रैराहवनीयम्। इदं आहितप्रत्येकोपस्थानमित्युच्यते ॥

४०३. **पूर्णाहुतिः**—ततो गार्हपत्ये गृह्योक्तप्रकारेणाज्यं संस्कृत्य स्रुचि चतुर्गृहीत्वा आहवनीये समिधमाधाय आहवनीयमद्भिः परिषिच्य **सप्त ते अग्न** इत्यृचा जुहोति। अध्वर्यवे वरं ददाति। इयमाहुतिः पूर्णाहुतिपदेनोच्यते ॥

४०४. **उत्तरकूष्माण्डहोमः**—पुनराज्यं संस्कृत्य स्रुत्रेण आहवनीये जुहोति **यद् देवा देवहेडनं यददीव्यं नृणाम् आयुष्टे विश्वतो दधदिति** पूर्वोक्तैस्त्रिभिरनुवाकैः प्रत्यृचम्, **ततो वैश्वानराय प्रतीत्यनुवाकेन** पूर्ववदुपस्थाय समिधमाधाय वरं ददाति। **अयमुत्तरकूष्माण्डहोम** इत्युच्यते ॥

४०५. पूर्वकूष्माण्डहोमादि [पदार्थः ३५५] एतावत्पर्यन्तं [पदार्थः ४०४] कर्म अग्न्याधानमित्युच्यते ॥

४०६. **पूर्णाहुत्यन्तमग्न्याधानम्**—अग्न्याधानस्य पूर्णाहुत्या पूर्वोक्तया [पदार्थः ४०३] यदि समाप्तिस्तदा पूर्णाहुत्यन्तमग्न्याधानमित्युच्यते ॥

४०७. **अग्निहोत्रहोमान्तमग्न्याधानम्**—होमान्तत्वपक्षे अग्निसंस्कारकसायंप्रातर्होमौ समस्य करिष्ये इति संकल्प्य वक्ष्यमाणसायंप्रातर्होमौ समस्य सायंहोममन्त्रेण करोति। तदा अग्निहोत्रहोमान्तमग्न्याधानमित्युच्यते ॥

४०८. **इष्टचन्तमग्न्याधानम्**—इष्टचन्तत्वपक्षे आश्वलायनेन इष्टित्रयं विहितम्। तत्र द्वितीया इष्टिराश्वलायनेन विकल्पिता, तथा च आद्यान्त्ययोरेकतन्त्रेण अनुष्ठानं प्रसिद्धम्। तयोर्बौधायनमतानुसारेण प्रधानदेवताः षट् सर्वं पौर्णमासतन्त्रम्। तत्र प्रधानदेवतास्थाने अग्निः, अग्निः पवमानः, अग्निः पावकः, अग्निः शुचिः, इन्द्राग्नी, अदितिः, एता देवता भवन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ताश्च उपांशुधर्मेण इज्यन्ते। सप्तदश सामिधेन्यो भवन्ति। इध्मसंभरण-काले एकविंशतिधेत्यस्य स्थाने त्रयोविंशतिधेत्यूहः। पात्रासादने विशेषः—त्रिचत्वारिंशत्कपालानि चरुस्थाली मेक्षणं च। यथादैवतं निर्वापादि भवति। आग्नेयादयश्चत्वारोऽष्टाकपालाः, ऐन्द्राग्न एकादशकपालः, अदित्यै चरुः। आज्यभागान्ते अग्नेः **अग्निर्मूर्धेति** पुरोनुवाक्या, **अयमग्निः सहस्रिण** इति याज्या; अग्नेः पवमानस्य **अग्न आयूंषीत्यनुवाक्या, अग्ने पवस्वेति** याज्या; अग्नेः पावकस्य **स नः पावकेत्यनुवाक्या, अग्ने पावकेति** याज्या; अग्नेः शुचेः **अग्निः शुचिव्रततम** इत्यनुवाक्या, **उदग्ने शुचयस्तवेति** याज्या; इन्द्राग्न्योः **इन्द्राग्नी अवसेत्यनुवाक्या, गीर्भिर्विप्रः प्रमतिमिति** याज्या; अदित्याः **उत त्वामदिते महीमित्यनुवाक्या, महीमूषु मातरमिति** याज्या; अग्नेः स्विष्ट-कृतः **प्रेद्धो अग्न** इत्यनुवाक्या, **इमो अग्न** इति याज्या॥

अग्न्याधेयदक्षिणा—अन्वाहार्यमासाद्य दक्षिणादाने विशेषः—अग्नीदिदं ते उपबर्हणम्, ब्रह्मन्नयं ते अश्वः, होतरेषा ते धेनुः, अध्वर्यो एष तेऽनड्वान्, उद्गातरेते ते हिरण्यवाससी। हिरण्यं चात्र शतमानम्। भो सर्वे ऋत्विजः युष्माकमेतौ मिथुनौ गावौ वासः पञ्चगावश्च यथाभागं प्रतिगृह्णीध्वम् इति सर्वान् पदार्थान् दर्भेणाभिमन्त्र्य ददाति। प्रतिग्रहे विशेषः—**देवस्य त्वेत्या-दिमन्त्रेणान्वाहार्यं** प्रतिगृह्य पुनर्**देवस्य त्वेत्यादिमन्त्रण ब्रह्मण ओदनमि-त्यस्य** स्थाने ब्रह्मण उपबर्हणमित्याग्नीध्रः ब्रह्मणेऽश्वमिति ब्रह्मा, ब्रह्मणे ऽनड्वाहमित्यध्वर्युः, ब्रह्मणे धेनुमिति होता, ब्रह्मणे हिरण्यवाससी इत्यु-द्गाता। ततः सर्वे **देवस्य त्वेति** मन्त्रे उक्तऽस्थाने ब्रह्मणे मिथुनौ गावौ पुनस्तत्र स्थाने ब्रह्मणे गाः इत्यादि पठित्वा प्रतिगृह्णीयुः। एतादृग्दक्षिणा-दानासामर्थ्ये एकां गां ददाति। तत्राप्यशक्तौ चरुम्। इयमग्न्याधेयदक्षिणे-त्युच्यते॥

४०९. **पवमानेष्टिः**—प्रकृतिभूतपौर्णमासेष्टिवत् ब्राह्मणसन्तर्पणान्तं कर्म भवति। इयं पवमानेष्टिरिति गीयते॥

४१०. **अजस्रधारणम्**—'आधानाद् द्वादशरात्रमजस्रा' इत्याश्वलायन-सूत्रात् [२।१।३५] आधानदिनप्रभृति द्वादशरात्रं त्रयोऽप्यग्नयोऽजस्रा भवन्ति। तावत्पर्यन्तं **नानृतं वदेदित्यादिनिषेधपरिपालनात्मकं व्रतम्**। द्वादश-रात्रमध्ये आधानदिने वा पौर्णमासाप्राप्तौ अजस्रधारणं न भवति। सततं प्रज्वलिता अग्नयः अजस्रा इत्युच्यन्ते॥

४११. **[अग्नि] विहरणम्**—गार्हपत्यस्तु अजस्र एव भवति। अग्नि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

होत्रहोमादिकार्यकाले गार्हपत्याद् दक्षिणाग्निमुद्धृत्य गार्हपत्यादेव आहवनीयायतने आहवनीयं प्रणीय उद्धृतं दक्षिणाग्निं दक्षिणाग्न्यायतने निदधाति। एतत्कर्म [अग्नि]विहरणमित्युच्यते ॥

४१२. **अजस्रधारणपक्षः, विहरणपक्षः, उद्धरणपक्षः**—गतश्रियस्तु[1] यजमानस्य अग्नित्रयस्याप्यजस्रधारणम् 'अत्यन्तं तु गतश्रियः' इत्याश्वलायनसूत्रात् [२।१।३६] सोऽयमजस्रधारणपक्ष इत्युच्यते, अन्योऽग्नीनां प्रणयनाद् विहरणपक्ष इत्युच्यते उद्धरणपक्ष इति च ॥

[अग्निहोत्रहोमः]

४१३. **अग्निहोत्रारम्भः**—अथ सायमग्निहोत्रहोमारम्भः। तदादौ सूर्यास्तात् पूर्वं स्नानपवनमन्त्राचमनमन्त्रप्रोक्षणानि कृत्वा पुण्याहवाचनं करोति। तत्र प्रजापतिः प्रीयतामित्यस्य स्थाने **अग्निसूर्यप्रजापतयः प्रीयन्तामिति** विशेषः। गार्हपत्यस्य पश्चात् पत्न्या सह दर्भेषूपविश्य **याः पुरस्तादित्यादि** जपित्वा सत्यां शक्तौ यावज्जीवमग्निहोत्रं होष्ये इति संकल्पयति। शक्त्यभावे तु यथेष्टकालमुद्दिश्य संकल्पयति। ततोऽग्नीन् परिसमूह्य पर्युक्ष्य परिस्तीर्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये समिधमाधाय यजमानश्चित्तिरित्यादिदशहोत्रा जुहोति। तत आहवनीय एव **यद्देवा यददीव्यमायुष्टे** इति त्रिभिरनुवाकैः कूष्माण्डसंज्ञकैर्हुत्वा वैश्वानरायेत्युपतिष्ठते। एतावत्कर्म सर्वम् अग्निहोत्रहोमारम्भ इत्युच्यते ॥

४१४. **अविच्छिन्नोदकधाराहरणम्**—यजमानस्तीर्थेन प्रविश्य अग्निहोत्रहवणीं स्रुवं च प्रक्षाल्य आचम्य प्राणानायम्य ममोपात्तदुरितक्षयद्वारा 'श्रीपरमेश्वरप्रीत्यर्थं सायंप्रातरग्निहोत्रहोमौ होष्ये' इति संकल्प्य तत्रेदानीं सायमग्निहोत्रहोमं करिष्ये इति संकल्पयति। प्रातस्तु पूर्वसंकल्पितं प्रातरग्निहोत्रहोमं करिष्ये इति। गार्हपत्याद् दक्षिणाग्नेरादौ तूष्णीं विहरणं कृत्वा गार्हपत्यादाहवनीयं ज्वलन्तमुद्धरति **देवं त्वेति** यजुषा। उद्ध्रियमाण **उद्धरेति** मन्त्रेण प्रणयति **अमृताहुतिमिति, मन्त्रेण** आहवनीयायतने स्थापयति। ततो दक्षिणाग्निं सोदकेन अवाङ्मुखेन पाणिना तूष्णीं त्रिः परिसमूह्य तथैव गार्हपत्यमाहवनीयं च परिसमूह्य दक्षिणाग्नीन् उत्तानेन सोदकेन पाणिना **ऋतसत्याभ्यां त्वेति** त्रिः पर्युक्षति। ततः गार्हपत्यादाहवनीय-

---

१. गतश्रियो धनिकस्य।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पर्यन्तं तन्तुं तन्वन्नित्यृचा अविच्छिन्नामुदकधारां हरति । एतदविच्छिन्नोदकधाराहरणमित्युच्यते ॥

४१५. **पूर्वाहुतिः**—गार्हपत्यस्य पश्चाद् दक्षिणोत्तरिणोपस्थेनोपविश्य गार्हपत्यादुदक् पात्रान्तरे तदीयानङ्गारान् **सुहुतकृतस्थेत्यादियजुषा** अपोहति । **अधिश्रितमित्यादियजुषा इळायास्पदमित्यृचा** च अङ्गारेषु होमद्रव्यं पयोऽधिश्रयति पयसा नित्यहोमे । 'यवागूरोदनो दधिसर्पिर्ग्रामकामान्नाद्यकामतेजस्कामब्रह्मवर्चसकामानाम् इत्याश्वलायनसूत्रात् [२।३।१-२] 'काम्येन नित्यसिद्धिरिति, न्यायात् ग्रामकामादेः यवाग्वा होमकरणे नित्यहोमः सिध्यति । तत्र दध्यधिश्रयणे आश्वलायनेन विकल्प उक्तः । ततो गार्हपत्ये प्रदीप्तेन काष्ठेन **अग्निष्ट** इत्यादियजुषा अधिश्रितमवज्वलयति । **शान्तिरसीत्यादियजुषा** होमद्रव्ये स्रुवेणोदकं सिञ्चति । **अन्तरितं रक्ष** इत्यादि यजुषा तेनैव ज्वलता काष्ठेन त्रिः पर्यग्नि करोति । ततो होमद्रव्यपात्रं कर्षन्निवोदग् उद्वास्य **दिवे त्वा अन्तरिक्षाय त्वेति** मन्त्राभ्याम् आकाशे निधाय **पृथिव्यै त्वेति** मन्त्रेण भूमौ निदधाति । **सुहुतकृतस्थेत्यादियजुषा** पूर्वमपोहितानङ्गारान् गार्हपत्ये निदधाति । **प्रत्युष्टं रक्ष** इत्यादियजुषा अग्निहोत्रहवणीं स्रुवं च गार्हपत्ये निष्टपति । स्थाल्या उत्तरतोऽग्निहोत्रहवणीं निधाय स्रुवहस्त आह—ओमुन्नयानीति । ऋत्विक्कर्तृकहोमे यजमान एतस्मिन् काले आचम्य अपरेण वेदिमतिव्रज्य दक्षिणत उपविश्य ओमुन्नयेति वदति । ततो होमकर्ता होमद्रव्यादुत्तरत आसादितायामग्निहोत्रहवण्यां स्रुवेण चत्वारि अवदानानि चतुर्भिर्मन्त्रैः **भूरिला, भुव इला, स्वरिला, वृध इला**, इति गृह्णाति, पञ्चावत्ती तूष्णीं पञ्चमम् । ततः स्थालीमभिमृश्य अग्निहोत्रहवण्यां प्रादेशमात्रीं समिधमासाद्य अग्निहोत्रहवणीं गृहीत्वा गार्हपत्यस्योपरिष्टात् सामीप्येन नीत्वा नासिकासंमितामग्निहोत्रहवणीं कृत्वा आहवनीयपर्यन्तं गत्वा आहवनीयस्य पश्चात् प्रागग्रेषु कुशेषु अग्निहोत्रहवणीं निधाय दक्षिणं जान्वाच्य **रजतां त्वेत्यादिमन्त्रेण** आहवनीये तां समिधमादधाति । **तेन ऋषिणेत्यादिमन्त्रेण** अनुमन्त्रयते । **विद्युदसीत्यादिमन्त्रेणाप** उपस्पृश्य प्रदीप्तायां समिधि द्व्यङ्गुलमात्रे समिन्मूले **भूर्भुव** इत्यादिमन्त्रेणाभिजुहोति । **ता अस्य सूददोहस** इत्यृचा हुतामाहुतिमनुमन्त्रयते । कुशेषु अग्निहोत्रहवणीं निधाय **पशून्मे यच्छेति** मन्त्रेण गार्हपत्यमवेक्षते । इयं पूर्वाहुतिरित्युच्यते ॥

४१६. **उत्तराहुतिः**—ततः पूर्वाहुतेर्भूयसीं पूर्वाहुत्यसंसृष्टां पूर्वाहुतेरुत्तरत

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऐशान्यां वा प्रजापतिशब्दं चतुर्थ्यन्तम् उक्त्वा स्वाहेति जुहोति । उत्थाय स्रुग्घस्त एवाहुतिम् अनुमन्त्रयते कटाक्षणेक्षमाणः **भूर्भुवः** इत्यादिमन्त्रेण **अग्न आयूंषीति** तिसृभिश्च । तत अग्निहोहवणीम् आहवनीयोपरि त्रिरनुकम्प्य तां कुशेषु निधाय पुष्करलेपम् अग्निहोत्रहवण्या अधोमुखेन दक्षिणेन पाणिना अवमृज्य पाणितललेपं कुशमूलेषु **पशुभ्यस्त्वेति** मन्त्रेण निमार्ष्टि । कुशमूलानां दक्षिणत उत्ताना अङ्गुलीः करोति । इयमुत्तराहुतिरित्युच्यते ॥

४१७. **अग्निहोत्रशेषप्राशनम्**—ततः प्राचीनावीती भूत्वा कुशमूलानां दक्षिणतः अवाचीनेन पाणिना स्वधा पितृभ्य इत्यपो निनयति । यज्ञोपवीतो भूत्वाऽप उपस्पृशति **वृष्टिरसीति** मन्त्रेण । गार्हपत्यस्य पश्चादुपविश्य दक्षिणं जान्वाच्य प्रजापतिं मनसा स्मरन् समिधमाधाय स्रुवेण होमद्रव्यम् **अग्नये गृहपतये स्वाहेति** मन्त्रेण जुहोति । चतुर्थ्यन्त प्रजापतिशब्दं मनसा उच्चार्य स्वाहाकारेण द्वितीयाहुतिं हुत्वा दक्षिणाग्नेर्दक्षिणत उदङ्मुख उपविश्य दक्षिणं जान्वाच्य प्रजापतिं स्मृत्वा समिधमाधाय **अग्नये संवेशपतये स्वाहेति** हुत्वा प्रजापतिशब्दं मनसा चतुर्थ्यन्तं स्मरन् स्वाहेति हुत्वा उदङ्डावृत्य अग्निहोत्रहवण्यां स्थापितं द्रव्यम् **आयुषे त्वेत्यादिमन्त्रेण** प्राश्याचम्य **अन्नाद्याय त्वेत्यादिमन्त्रेण** पुनः प्राश्याचम्य स्वसंमुखम् अग्निहोत्रहवण्या **सर्पदेवेत्यादिमन्त्रावृत्त्या** अपस्त्रिर्निक्षिपति । इदम् अग्निहोत्रशेषप्राशनमित्युच्यते ॥

४१८. **उदकाहुतिहोमः**—ततोऽग्निहोत्रहवणीं कुशैः प्रक्षाल्य विहारस्य ऐशान्यां दिशि अग्निहोत्रहवण्या चतस्र उदकाहुतीः **ऋतुभ्यः स्वाहेति** चतुर्भिर्मन्त्रैः क्षिपति । आहवनीयस्य पश्चात्कुशेषु **पृथिव्याममृतमित्यादि**मन्त्रेण पञ्चमीं, गार्हपत्यस्य पश्चात् **प्राणममृत** इति षष्ठीं, तत अग्निहोत्रहवणीं स्रुवं च आहवनाये प्रतप्य अन्तर्वेदि निदधाति । सोऽयमुदकाहुतिहोम इत्युच्यते ॥

४१९. **उदकहोमानन्तरं समिदाधानम्**—प्रादेशमात्रं समित् त्रयं गहीत्वा आहवनीयपूर्वदेशेन गत्वा दक्षिणत उदङ्मुखस्तिष्ठन् **दीदिहि स्वाहेति** मन्त्रेण एकां समिधमाहवनीये आधाय प्रजापतिमुद्दिश्य द्वे समिधौ आदधाति । ततः यथेतं प्रत्येत्य गार्हपत्यस्य दक्षिणत उदङ्मुखस्तिष्ठन् स्वाहान्तेन **दीदायेति** मन्त्रेण गार्हपत्ये एकां समिधमाधाय समिद्द्वयं पूर्ववदादधाति । ततः प्रदक्षिणमावृत्य दक्षिणाग्नेर्दक्षिणत उदङ्मुखस्तिष्ठन् स्वाहान्तेन **दीदायेति** मन्त्रेण एकां समिधमाधाय पूर्ववत्समिद्द्वयमादधाति । इदम् उदकहोमानन्तरं समिदाधानमित्युच्यते ॥

४२०. **उद्धरणम्**—परिसमूहनपर्युक्षणे पूनः पूर्ववत् कार्ये । द्वादश-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिनानन्तरं सायं प्रातरुद्धरणम्, द्वादशरात्रमध्ये पौर्णमासीप्राप्तौ नाजस्र-धारणम्, आधानदिने च अन्वाधानयोग्यपौर्णमासीप्राप्तौ यागानन्तरं सायं-**प्रातरुद्धरणं देवं त्वा देवेभ्य** इत्यादिमन्त्रेण उद्धरणं गार्हपत्यभस्मापाकरणम् उद्धरणमित्युच्यते ॥

४२१. **उद्धरणविहरणकालः**—दक्षिणाग्नेरादौ तूष्णीं विहरणं कृत्वा पश्चादाहवनीयस्य समन्त्रकं तत्र उद्ध्रियमाण उद्धरेत्यादिर्मन्त्रः । तत्र मन्त्रे दिवा उद्धरणे अह्ना यदेन इत्यस्य स्थाने **रात्र्या** यदेन इति विशेषः । **अमृता-हुतिममृतायां जुहोमी**त्यादिमन्त्रेण आदित्याभिमुख आहवनीयायतने अग्नि स्थापयति[1] । सायं सूर्यास्तमयात्पूर्वः प्रातस्तु सूर्योदयात्पूर्वः संनिहितः कालः उद्धरणविहरणकाल इत्युच्यते ॥

४२२. **अग्निहोत्रहोमः**—अग्निहोत्रहवणीस्रुवप्रक्षालनप्रभृति [पदार्थः ४१४] एतावत्कर्म अग्निहोत्रहोम इत्युच्यते ॥

[अन्वारम्भणीयेष्टिः]

४२३. **सारस्वतहोमः**—'दर्शपूर्णमासावारप्स्यमानो ऽन्वारम्भणीयाम्' इत्याश्वलायनसूत्राद् [२।८।१] दर्शपूर्णमासाभ्यां प्राक् अन्वारम्भणीयेष्टिः क्रियते । तत्र पौर्णमास्याः पुर्वेद्युर्नान्दीमुखं रात्रावुदकशान्तिं प्रतिसरबन्धं च कृत्वा प्रातः स्नानादिपञ्चकं कृत्वा **याः पुरस्ता**दित्यादि जपित्वा सत्यां शक्तौ यावज्जीवं दर्शपूर्णमासाभ्यां यक्ष्ये इति संकल्प्य दर्शपूर्णमासावारप्स्यमानो-ऽन्वारम्भणीयया यक्ष्ये इति संकल्पयति ॥

विहरणपक्षे अग्निद्वयं विहृत्य अन्वारम्भणीयापौर्णमासयोस्तन्त्रेणान्वा-धानव्रते करोति । अन्वारम्भणीयाया अग्नाविष्णू, सरस्वती, सरस्वान्, अग्निर्भगी, इति प्रधानदेवताः । पत्नीसंयाजवद् उपांशु यष्टव्याः । अध्वर्युः अन्वाधानानन्तरं गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये समिधमाधाय पर्युक्ष्य यजमानेनान्वा-रब्ध उपांशु **पृथिवी होतेत्यादि जजनदिन्द्रमिन्द्रियाय स्वाहेत्यन्तेन** मन्त्रेण जुहोति । **यद्देवा यददीव्यमायुष्ट** इति त्रिभिरनुवाकैः प्रत्यृचं स्रुवेणाहवनीये जुहोति । यजमानः स्वायतने तिष्ठन् समित्पाणिर्वैश्वानरायेत्युपस्थानादि-वरदानान्तं करोति । ततोऽध्वर्युश्चतुर्गृहीतं गृहीत्वा **पूर्णापश्चादित्यृग्द्वयान्ते**

---

१. गार्हपत्यादाहवनीयस्योद्धरणमनस्तमितानुदितयोः (कात्या० श्रौत ४।१३।२) इति सूत्रात् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहाकारेणाहवनीये हुत्वा पुनश्चतुर्गृहीतेन **निवेशनीसंगमनीत्यृग्द्वयेन** स्वाहाकारान्तेन जुहोति । सोऽयं सारस्वतहोम इत्युच्यते ॥

४२४. **अन्वारम्भणीयः**—अग्नावैष्णव एकादशकपालः सरस्वत्यै चरुः सारस्वती द्वादशकपालः अग्नये भगिने अष्टाकपालः पौर्णमासतन्त्रम् अग्नाविष्णवोः **अग्नाविष्णू सजोषसेत्यनुवाक्या, अग्नाविष्णू महिधाम प्रियं वामिति** याज्या । सरस्वत्याः **पावका नः सरस्वतीत्यनुवाक्या, पावीरवी कन्या चित्रायुरिति** याज्या । सरस्वतः **पीपिवांसं सरस्वत** इत्यनुवाक्या, **दिव्यं सुपर्णं वायसं बृहन्तमिति** याज्या । अग्नेर्भगिनः **आसवं सवितुर्यथेत्यनुवाक्या, स नो राधांस्याभरेति** याज्या । अन्वाहार्यमासाद्य मिथुनौ गावौ दक्षिणां ददाति । मिथुनयोर्गवोः प्रतिग्रहे **देवस्य त्वेत्यादिमन्त्रे ब्रह्मणे मिथुनौ गावौ ताभ्याममृतत्वमिति** विशेषः । ब्राह्मणतर्पणान्तम् अन्यत्सर्वं समानम् पौर्णमासीयागान्वाधानस्य जातत्वात्पौर्णमासीयागपर्यन्तं त एवाग्नयः स्थाप्याः । व्रतविसर्गोपि तावन्न क्रियते । पौर्णमासीयागः प्रतिपदि कर्तव्यः । यजमानस्यानुकूलं यद् दर्शपूर्णमासयागारम्भणं तदुपकारकत्वात् इत्थंभूताया इष्टेर्नाम अन्वारम्भणीयेति ॥

[पुनराधानम्]

४२५. **पुनराधानसंभाराः**—यस्य यजमानस्य आधानकालादारभ्य संवत्सरसमाप्तेरर्वाक् कस्यचित् पदार्थस्य हानिर्भवति महारोगो वा जायते अन्यानि वा अग्न्यनुगत्यादीनि निमित्तानि भवन्ति स पुनराधानं करोति । तस्य कालः आषाढ्याः पौर्णमास्याः पुरस्तात् अमावास्याप्रतिपद्द्वितीयान्यतमतिथौ आहवनीयाधानकाले अर्धोदिते सूर्ये उदिते वा पुनर्वसुनक्षत्रयोगः, तादृशयोगालाभे उदगयन आपूर्यमाणपक्षे पुनर्वसुयुक्ते कस्मिंश्चिद्दिने करोति । आधानोक्ताः सर्वे संभाराः रथः वासः अनड्वान् तिस्रो दर्भमय्यो रज्जव एते पुनराधानसंभारा इत्युच्यन्ते ॥

४२६. **पुनराधानारम्भकर्म**-पुनर्वसुयुक्तदिनात् पूर्वेद्युः **याः पुरस्तादित्यादि** जपित्वा **'ऋद्धिकामोऽग्नीन् पुनराधास्य'** इति त्रिरुपांशु त्रिरुच्चैरुक्त्वा ऋत्विग्वरणमर्हणं च कृत्वा **अयं ते योनिरिति** मन्त्रेण अरण्योरग्नीनुत्पत्त्यनुक्रमेण समारोप्य स्थानान्तरं प्राप्य विहारं कल्पयित्वा अग्निम् मथित्वा विहृत्य परिसमुह्य पर्युक्ष्य परिस्तीर्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुक्स्रुवौ निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये समिधमाधाय **मनोज्योतिरिति** मन्त्रेण जुहोति । इदं पुनराधानारम्भकर्मेत्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४२७. **उद्वासनेष्टिः**—तत अग्न्युद्वासनेष्टिः क्रियते । आग्नेयोष्टाकपालः अग्नये वैश्वानराय द्वादशकपालः प्रधानहविरुपांशुः । अग्नेः **अग्निर्मूर्धा भुवो यमस्ये**ति याज्यानुवाक्ये, अग्नेर्वैश्व नरस्य **वैश्वानरो अजीजनत् पृष्टो दिवि पृष्टो ऽग्निः पृथिव्याऽग्नि**रिति याज्यानुवाक्ये, अन्वाहार्यमासाद्य हिरण्यं ददाति । अग्नये हिरण्यमिति प्रतिग्रहमन्त्रे विशेषः । पौर्णमासतन्त्रम् । ब्राह्मणतर्पणान्ता इयमग्न्युद्वासननिमित्तकत्वाद् अग्न्युद्वासनेष्टिरिति गीयते ॥

४२८. **गार्हपत्यपुनराधानम्**—तदानीमेवादिभरग्नोन् समुक्ष्य पुनः संस्कृते पूर्वस्मिन्नेवाग्न्यगारे तक्षणसंस्कृतानि पूर्वपात्राणि कृत्वा अध्वर्युर्गार्हपत्यायतनादीन्युद्धन्ति **उद्धन्यमान**मित्यादिमन्त्रेण । संभारसंभरणमग्न्याधानवत् मुञ्जकुलायस्थाने दर्भकुलायं तन्मन्त्रेण संभरति गोपितृयज्ञो विकल्पितः गार्हपत्यस्य पश्चाल्लौकिकाग्नौ ब्रह्मौदनं पचति । श्रपणादिविहृता अग्नयो मा कश्चनान्तरेण संचारीदित्यन्तं समानम् अध्वर्युर्गार्हपत्यस्य पश्चाद् ब्रह्मौदनाग्नि भस्मसहितमुद्वास्य तत्र दर्भकुलायं निधाय तस्मिन् पूर्ववदरणी निधाय मन्थेत् चित्तिः स्रुगित्यादि उद्गाता रथन्तरं ब्रूहीत्यन्तं समानम् । रथन्तरे गीयमाने दर्भमयीं रज्जुं ज्वलयित्वा तथा रज्वा **भूर्भुवो घर्मः शिर** इत्यृचा **भूमिर्भूम्ना द्यौरित्यृ**चा **अयं द्यौरित्यृ**चा **त्रिंशद्धामेत्यृ**चा **अस्य प्राणादित्यृ**चा **भृगूणामित्यादि** पूर्वोक्तयजुषा च गार्हपत्यमादधाति । इदं गार्हपत्यपुनराधानम् इत्युच्यते ॥

४२९. **दक्षिणाग्निपुनराधानम्**—दर्भमयीं रज्जुं ज्वलयित्वा तयान्वाहार्यपचनं पूर्ववदादधाति । इदं दक्षिणाग्निपुनराधानमित्युच्यते ॥

४३०. **आहवनीयाग्निपुनराधानम्**—दर्भमयीं रज्जुं ज्वलयित्वा तया रज्वा उपोपयमनीमित्यादि **अग्निनाग्ने ब्रह्मणेत्युक्त्वा यत्त्वाक्रुद्ध** इत्यृचा **तत्ते मन्युः परोप्तस्येत्यृ**चा **मनोज्योतिरित्यृ**चा **भृगूणामित्यादि**पूर्वोक्तयजुषा च आहवनीयमादधाति । इदमाहवनीयपुनराधानमित्युच्यते ॥

४३१. **बुद्धिमदिन्दुमन्तौ**—पूर्णाहुत्यन्तं समानम् । ततः पुनराधेयेष्टिः आग्नेयः पञ्चकपालः **समिधाग्निं दुवस्यतेह्यूषुब्रवाणित** इत्याग्नेयावाज्यभागौ । इमौ क्रमेण बुद्धिपदेन्दुपदघटितत्वाद् बुद्धिमदिन्दुमन्तौ इत्युच्येते ॥

४३२. **पुनराधानहोमः**—**समिधः समिधोऽग्नेऽग्न आज्यस्य व्यन्त्विति** प्रथमः प्रयाजः,**तनूनपादग्निमग्न आज्यस्य** प्रधानयागानन्तरं स्रुवाज्याहुतिं **सह रय्या निवर्तस्वेत्यृ**चा जुहोति वेत्विति द्वितीयः,**इडो अग्निनाग्न आज्यस्य व्यन्त्विति** तृतीयः, **बर्हिरग्निरग्न आज्यस्य वेत्विति** चतुर्थः,इति चतुर्षु प्रयाजेषु

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विशेषः । आज्यभागोनन्तरम् अध्वर्युः स्रुवेणाज्याहुतिं **पुनरूर्जा निवर्तस्वेत्यृचा** जुहोति । अयं होमः पुनराधानहोम इत्युच्यते ।।

४३३. **पुनराधेयेष्टिः**—प्रधानमुपांशु अग्नेः **अधाह्यग्ने क्रतोर्भद्रस्येत्यनुवाक्या, आभिष्टे अद्य गीर्भिर्गृणन्त** इति याज्या । स्विष्टकृतः **एभिर्नो अर्कैरिति** पुरोनुवाक्या, **अग्ने तमद्याश्वं नस्तौमैरिति** याज्या । **देवं बर्हिरग्नेर्वसुवने वसुधेयस्य वेत्विति** द्वितीयः 'बुद्धिमदिन्दुमन्ता'वित्याचक्षते, तथानुवृत्तिः । इज्या च' इत्याश्वलायनसूत्रात् [२।८।८-१०] अग्निं बुद्धिमन्तमावह अग्निमिन्दुमन्तमावह इत्यादिरीत्या आवाहननिगदादौ बुद्धिमदिन्दुमच्छब्दयोरनुवृत्तिर्भवति । अन्वाहार्यमासाद्य रथं वासः अनड्वाहं दक्षिणां ददाति । रथप्रतिग्रहे **देवस्य त्वेत्यादिगृह्णामीत्यन्ते वैश्वानरः प्रत्नथा नाकमारुहदित्यृचं** पठित्वा **राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथं ते नामृतत्वमिति** विशेषः । वासःप्रतिग्रहे **सोमाय वासः**, अनडुत्प्रतिग्रहे **रुद्राय गामिति** च विशेषः । **देवं बर्हिरग्नेर्वसुवने वसुधेयस्य वेत्विति** प्रथमोऽनुयाजः । **देवो नराशंसोऽग्नौ वसुवने वसुधेयस्य वेत्विति** द्वितीयः । पौर्णमासतन्त्रम् । ब्राह्मणतर्पणान्ता इयं पुनराधेयेष्टिरित्युच्यते ।।

४३४. **अग्निवारुणेष्टिः**—पुनराधेयेष्ट्यनन्तरमेवाग्न्यन्वाधानादि अग्नीवरुणाभ्यामेकादशकपालः । प्रधानमुपांशु । प्रधानस्य **त्वं नो अग्ने वरुणस्य विद्वानिति** पुरोनुवाक्या, **स त्वं नो अग्ने वमो भवोतीति** याज्या । अन्वाहार्यमासाद्य अनड्वाहं दक्षिणां ददाति । प्रतिग्रहमन्त्रे **रुद्राय गामिति** विशेषः । पौर्णमासतन्त्रम् । ब्राह्मणतर्पणान्ता इयमाग्निवारुणीष्टिरिति गीयते ।।

४३५. **द्वितीयं पुनराधानम्**—पुनराधानानन्तरं संवत्सरात् पूर्वम् अर्थनाशादिनिमित्ते पुनरपि पुनराधानं करोति । तस्मिंस्तृतीयाधाने पञ्चकपालस्याग्नेयस्य स्विष्टकृदवदानानन्तरम् अध्वर्युः स्रुवाहुतीर्जुहोति । तत्र **तिलेकः सलेक** इति यजुषा प्रथमाहुतिः । **केतः सकेत** इति द्वितीया । **विवस्वा अदितिरिति** तृतीया । ब्राह्मणतर्पणान्तं पुनराधानेन । इदं द्वितीयपुनराधानमित्युच्यते ।।

४३६. **विच्छिन्नाग्न्याधानम्**—अथ सर्वाग्निनाशे समारूढारणीनाशे च विच्छिन्नसंधानार्थमग्नीनाधास्ये इति संकल्प्य ऋत्विग्वरणादिगोपितृयज्ञवर्जम् अग्न्याधानं करोति । इदं विच्छिन्नाग्न्याधानमित्युच्यते ।।

४३७. **प्रवासोपस्थानम्**—आहिताग्निः प्रवत्स्यन् सर्वानग्नीन् प्रज्वाल्य गार्हपत्यस्य पश्चादुपविश्याचम्य ततोऽतिक्रम्य शंस्य पशूनित्यादिमन्त्रेणा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हवनीयमुपस्थाय **नर्यं प्रजामित्यादिमन्त्रेण** गार्हपत्यमुपस्थाय **अथर्यपितु-मित्यादिमन्त्रेण** दक्षिणाग्निमुपतिष्ठते । ततो गार्हपत्याहवनीयावीक्षते **इमान्मे मित्रावरुणावित्यृचा** । ततो यथागतमागत्य प्रदक्षिणं परितो गच्छन्नाहवनीयमुपतिष्ठते—**मम नाम प्रथमं जातवेद** इत्यृचा । इदं प्रवासोपस्थानमुच्यते ॥

४३८. **आहिताग्निप्रवासविधिः**—ततः अग्नीननवेक्षमाणः **मा प्रगामेति** सूक्तं जपन् वाचंयमः प्रव्रजति । दूरं गत्वा वाचं विसृजते । अग्निप्रज्वलनादिरेतदन्तो विधिराहिताग्निप्रवासविधिरित्युच्यते ॥

४३९. **प्रवासादागमनविधिः**—**सदा सुग** इत्यृचा पन्थानमवरोहति । यद्यनुपस्थिताग्निः प्रवासमापद्यते तर्हि **इहैव सन् तत्र सन्तं त्वेत्**ऋचा प्रतिदिशमग्नीनुपतिष्ठते । **अपि पन्था मगन्महीत्यृचा** प्रवासाद् गृहमागच्छति । आयतनेषु अग्नीन् ज्वलतः श्रुत्वा आहवनीयाभिमुखं गत्वा समित्त्रयमादाय वाचंयमः **विश्वदानीमाभरन्त** इत्यृचा अग्नीनां समीपे समिधो निदधाति । **नमस्ते अस्तु मीढुष** इत्यृचा आहवनीयमुपतिष्ठते, **मम नाम तव च जं तवेद** इत्यृचा च । ततः **अगन्म विश्ववेदसमित्यृचा** समीपे निहितां समिधमाहवनीयेऽभ्याधाय **अयमग्निर्गृहपतिरित्यृचा** गार्हपत्येऽभ्याधाय **अयमग्निः पुरोष्य** इत्यृचा दक्षिणाग्नौ अभ्यादधाति । ततो गार्हपत्याहवनीयौ **इमान्मे मित्रावरुणावित्यृचा** ईक्षते । तस्यामृचि 'अभिरक्षतु' इत्यस्य स्थाने **अभ्यरक्षीदित्यूहो** विशेषः । यथागतमागत्य प्रदक्षिणं परितो गच्छन् **मम नामेत्यृचाहवनीयमुपतिष्ठते** । **दर्शरात्राधिकप्रवासे तु मनोज्योतिरित्यृचा** चतुर्गृहीतमाज्यमाहवनीये जुहोति । ततोऽग्नीन् परिसमूह्य उदग्विहारादुपविश्य समस्तव्याहृतिभिः वाचं विसृज्य **गृहा मा बिभीतेत्यादिमन्त्रेण** गृहानीक्षते । इदं समन्त्रकं गृहेक्षणमनाहिताग्नेरपि भवति । **गृहानहं सुमनसः प्रपद्य** इत्यृचा गृहं प्रविशति । अग्नीननुवीक्षमाणः त्रिवारं **शिवं शग्मं शंयोरिति** पठति । गृहप्रवेशानन्तरं कृतगृहप्रवेशं जना विदितामपि दुर्वार्तां न ज्ञापयन्ति । अहरहः प्रवासे तु गमने आगमने च **अभयं वो भयं मेऽस्तु** इत्येवोपस्थानं भवति । **पथ्यवरोहणाद्येतदन्तो विधिः प्रवासादागमनविधिरित्युच्यते**॥

[पिण्डपितृयज्ञः]

४४०. **स्थालीपाकः**—आमावास्यायामपराह्णे दक्षिणाग्निसंबन्ध्येकमुल्मुकं **ये रूपाणि प्रतिमुञ्चमाना** इत्यृचा आग्नेय्यां दिशि बहिः प्रणयति । **अस्मिन् कर्मणि आग्नेय्येव प्राची भवति** । दक्षिणाग्निं प्रणीतमग्निं च प्रज्वाल्य **दर्भैः** परिस्तृणाति । दक्षिणाग्नेः प्रागुदक् प्रत्यगुदग्वा आग्नेयीसंस्थानि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

एकैकशः पात्राणि सादयति—चरुस्थालीं शूर्पमुलूखलं मुसलं स्रुवं ध्रुवां कृष्णाजिनं सकृदाच्छिन्नेध्मं मेक्षणं कमण्डलुं च। शकटपक्षे शकटस्य दक्षिणं भागमारुह्य व्रीहिभिः पूर्णां चरुस्थालीं निमृज्य बहिः पतितान् व्रीहीन् अन्यत्र निधाय कृष्णाजिने उलूखलं निधाय स्थालीस्थान् व्रीहीन् उलूखले ओप्य पत्नी अविवेचमवहन्ति। ततः संपन्नान् तन्दुलान् सकृत् प्रक्षाल्य दक्षिणाग्नौ श्रपयति। अतिप्रणीताग्नेः पश्चाद् **अपहता असुरा** इत्यादिमन्त्रेण स्फ्येन लेखां लिखति। ततस्तां लेखां ज़लेनाभ्युक्ष्य सकृदाच्छिन्नैर्दर्भैरवस्तीर्य स्थालीपाकमभिघार्य तेषु दर्भेषु सादयति। अनुत्पूतमाज्यमुत्पूतं नवनीतं वा ध्रुवायां कृत्वा ध्रुवामपि तत्र सादयति। दर्भेषु दक्षिणतः आञ्जनाभ्यजनकशिपूपवर्हणानि[1] सादयति। स्थाल्यां परिपक्व ओदनः स्थालीपाक इत्युच्यते॥

४४१. **आञ्जनम्**—आ ईषद् अज्यतेऽनेनेति व्युत्पत्त्या कज्जलादि आञ्जनपदवाच्यम्॥

४४२. **अभ्यञ्जनम्**—अभितः अङ्गं सर्वमज्यतेऽनेनेति व्युत्पत्त्या अभ्यङ्गसाधनमाज्यादि अभ्यञ्जनपदेनोच्यते॥

४४३. **कशिपुः**—कार्पासपूर्णमासनं मृदुतरं कशिपुपदवाच्यम्॥

४४४. **उपबर्हणम्**—तथैव कार्पासपूर्णं शिरसोऽधस्तात् शयनकाले ध्रियते यत्तदुपवर्हणपदवाच्यम्॥

४४५. **विधुरः**—ततः प्राचीनावीती भूत्वा सकृदाच्छिन्नेध्मं प्रणीतेऽग्नौ अभ्यादधाति। ततश्चरुं मेक्षणेनादाय अवदानधर्मेण जुहोति। **सोमाय पितृमते** इत्यादिमन्त्रेण। **अग्नये कव्यवाहनाये**त्यादिमन्त्रण द्वितीयामाहुतिं जुहोति। विधुरश्चेद्यजमानः होममन्त्रयोः स्वधापदस्थाने स्वाहापदं भवति। मन्त्रयोर्व्यत्यासेन पूर्वोक्त रभावभावश्च भवति। पत्नीरहितो यजमानो विधुर इत्युच्यते॥

४४६. **अनुप्रहरणम्**—ततो यज्ञोपवीती मेक्षणमनुप्रहरति। होमसाधनत्वेन गृहीतस्य पदार्थस्य होमानन्तरं कृतकार्यस्य तस्य वह्नौ प्रक्षेपणम् अनुप्रहरणमित्युच्यते॥

४४७. **पिण्डदानम्, पिण्डनिपरणं वा**—ततः प्राचीनावीती पूर्वं कृताया रेखाया उपरि आस्तीर्णेषु दर्भेषु प्रथमऽपिण्डनिपातनस्थाने **शुन्धन्तां पितर** इति मन्त्रेण जलं सिञ्चति, **शुन्धन्तां पितामहा** इति मन्त्रेण द्वितीयऽपिण्ड-

---

१. पदार्थाः क्रमशः—४४१, ४४२, ४४३, ४४४।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थाने, शुन्धन्तां प्रपितामहा इति मन्त्रेण तृतीयपिण्डस्थाने। ततस्तस्यां रेखायाम् एतत्ते पितर्यं च त्वा मत्रान्विति मन्त्रेण पित्रे प्रथमपिण्डं ददाति। पितृपदस्थाने पितामहेति पदमुक्त्वा प्रथमपिण्डस्याग्नेय्यां दिशि द्वितीयं, प्रपितामहपदमुक्त्वा द्वितीयस्याग्नेय्यां तृतीयम्। इदं कर्म पिण्डदानमिति पिण्डनिपरणमिति चोच्यते॥

४४८. **प्राणभक्षः**—अत्र **पितरो मादयध्वमित्यादिमन्त्रेण** पिण्डान् अनुमन्त्रयते। ततः सव्येनाङ्गेन उदङ्ङावृत्य शक्तचनुसारेण उच्छ्वासप्रतिबन्धं कृत्वोच्छ्वस्य पिण्डाभिमुखो भूत्वा **अमीमदन्त पितर** इत्यादिमन्त्रेण पुनरनुमन्त्रयते। ततः पिण्डचरुशेषं तूष्णीं प्राणभक्षं भक्षयति। नासिकया अवघ्राणमात्रं प्राणभक्ष इत्युच्यते॥

४४९. **पिण्डपितृयज्ञः** ततो यथा पिण्डदानस्थाने पूर्वं जलसेचनं कृतं तथा पिण्डोपरि पुनः क्रियते। पितः, **अभ्यङ्क्ष्वेति** मन्त्रेण पितृपिण्डोपरि अभ्यञ्जनं समन्तात् प्रक्षिपति। एवमूहेन इतरयोः पिण्डयोः। ततः **पितः अङ्क्ष्वेति** मन्त्रेण अञ्जनं ददाति। इतरयोः पिण्डयोः पितामहप्रपितामहेति पदयोरूहेन। **एतद्वः पितरो वास** इत्यादिमन्त्रेण वस्त्रं ददाति। तच्च वस्त्रं दशारूपम् उर्णारूपं वा पञ्चाशद्वर्षताया ऊर्ध्वं हृदयसंबन्धि लोम वा। **नमो व पितर इष** इत्यादियजुषा **मनोन्वाहुवामह** इति चतसृभिर्ऋग्भिः **परेतन पितर** इत्यृचा पिण्डान् प्रवाहयति। **अग्ने तमद्याश्वं नस्तोमैरित्यृचा** गार्हपत्यमेति। **यदन्तरिक्षं पृथिवीमुत द्यामित्यृचा** गार्हपत्यमुपतिष्ठते। **वीरं मे दत्त पितर** इति मन्त्रेण मध्यमं पिण्डं गृहीत्वा **आधत्त पितरो गर्भमित्यृचा** पत्नीं प्राशयति। इतरौ पिण्डौ अप्सु अतिप्रणीतेऽग्नौ वा प्रक्षिपति। पैतृककर्मत्वाद् एकश आसादितानि पात्राणि कर्मसमाप्तौ मङ्गलार्थं [1]द्विवत्पात्राण्युत्सृजति। अन्त्यस्य पात्रस्य एकत्वे सहायत्वाय द्वितीयं तृणं गृह्यते। दक्षिणाग्न्यतिप्रणयनादिरेतदन्तो [पदार्थ ४४०-४४९] पिण्डपितृयज्ञ इत्युच्यते॥

[आग्रयणेष्टिः]

४५०. **आग्रयिणमुच्यते**[2]—तत्र व्रीहिश्यामाकयवानां नवोत्पन्नानां भक्षणं

---

१. द्वे द्वे कृत्वा इत्यर्थः।

२. नानिष्ट्वाग्रयणेनाहिताग्निर्नवस्याश्नीयात्। व्रीहीणां यवानां श्यामाकानामित्यग्रपाकस्य यजेत। अमावास्यायां पौर्णमास्यां वा। सप्तदश सामिधेन्यः। २. ९. २—६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेन तेन द्रव्येण अग्निहोत्रहोमान्तरं समन्त्रकं भवति। अथवा तद् व्रीह्यादि द्रव्यम् अग्निहोत्रहोमपयःप्रदां गां भक्षयित्वा तद्विकृतिभूतेन पयसा अग्निहोत्रहोमं नित्यं कृत्वा समन्त्रकभक्षणं भवति। तत्र व्रीह्याग्रयणकालः शरत्[1] श्यामाकाग्रयणकालो वर्षाः, यवाग्रयणकालो वसन्तः। अपि वा क्रिया यवेष्विति सूत्रेण यवाग्रयणविकल्प आश्वलायनेनोक्तः (२।९।५)। राज्ञस्तु आग्रयणीष्टिरेव भवति। इतरेषामिष्टिविकल्पस्तेनैवोक्तः (२।९)। इदं कर्म अग्रे नवान्नोत्पत्त्यनन्तरमादौ अयनमाचरणं यस्येति व्युत्पत्त्या आग्रयणमित्युच्यते॥

४५१. **उपहोमः**—वर्षऋतौ क्रियमाणश्यामाकेष्टयां श्यामाकमयः पयसि[2] चरुः सोमो देवता प्रधानस्योपांशुत्वम्। **सोमस्य सोम यास्ते मयो भुव** इति पुरोनुवाक्या, **या ते धामानि दिवि या पृथिव्यामिति** याज्या। होता **इडे भागं जुषस्व न** इत्यादिकमवान्तरेडाया नित्यं जपमुक्त्वा तां सव्ये पाणौ निधाय दक्षिणेन पाणिना **प्रजापतये त्वा ग्रहं गृह्णामीत्यादिमन्त्रेण** अभिमृशति। **भद्रान्नः श्रेयः समनैष्ट देवा** इत्यृचा प्राश्नाति। तत आचम्य **अमोऽसि प्राण तदृतं ब्रवीमीत्यृचा** नाभिमालभेत। अनेनैव प्रकारेण अन्येऽपि ऋत्विज भक्षयन्ति। **मधुश्च स्वाहा, माधवश्चच स्वाहा, नभश्च स्वाहा, नभस्यश्च स्वाहा,** इति चतस्र आहुतिराज्यस्थाल्याज्येन स्रुवेण प्रधानयागानन्तरं स्विष्टकृतः प्राक् हुत्वा **शतायुधायेत्यादिभिः** पञ्चभिः स्वाहाकारान्ताभिश्चतुर्गृहीतेन जुह्वा जुहोति। एतादृशो होम उपहोम इत्युच्यते॥

४५२. **श्यामाकाग्रयणेष्टिः**—अस्यामिष्टौ पुरोडाशाभावात् कपालानि न सन्तीति। पात्रासादने कपालस्थाने समेक्षणां स्थालीमासादयति। तन्मेक्षणं स्विष्टकृद्धोमार्थं प्रत्याक्रणकाले गृहीतं भवति। होमानन्तरं मेक्षणमनुप्रहरति। अन्वाहार्यसासाद्य प्रथमजं वत्सं वासश्च दक्षिणां ददाति। भो ऋत्विजः अयं व ओदनः, अयं वः प्रथमजो वत्सः, एतद्वो वासः अहिंसन्तो यथाभागं प्रतिगृह्णीध्वम्। ऋत्विजः प्रतिग्रहमन्त्रे ब्रह्मण अदोनं रुद्राय गां सोमाय वासस्तैरमृतत्वमश्यामिति विशेषं कुर्वन्ति। **प्रजापतेर्भागोऽसीति** मन्त्र असीत्याद्येकवचनान्तानां स्थाने **'स्थ'** इत्यादिबहुवचनान्तेनोहः क्रियते।

---

१. वर्षासु श्यामाकैर्यजेत, शरदि व्रीहिभिर्वसन्ते यवैर्यथर्तुं वेणुयवैरिति। आप० श्रौत ६।३१। १४॥

२. नवानामितराण्यैन्द्राग्नं द्वादशकपालमैद्राग्नं वा वैश्वदेवं पयसि चरुं सोम्यं श्यामाकं चरुं द्यावापृथिव्यमेककपालम्। आप० श्रौत ६।२९।९।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रथमजवत्सवासोनिष्क्रयपक्षे 'एतद्वः [1]प्रथमजवत्सनिष्क्रयद्रव्यमेतद्वो वासो निष्क्रयद्रव्यं च' इति विशेषः। तथा असीत्यादिपदस्थाने 'स्थः' इत्यादिनां द्विवचनान्तानामूहः। यजमानभागप्राशने प्राकृतमन्त्रस्थाने **भद्रान्नः श्रेयः समनैष्टेत्यृङ्मन्त्रः** पठ्यते। पयसि श्यामाकचरोः श्रपणादत्र पयःप्रणीतापि भवति। तथाचात्र प्रणीताप्रणयनकाले पयःप्रणीतापि प्रणीयते। **ब्रह्मन्नपः पयश्चप्रणेष्यामीति** प्रैषे विशेषः। अप्प्रणीतानिनयनानन्तरं पयःप्रणीतानिनयनम्। तन्मन्त्रे[2] **समुद्र व** इत्यादिबहुवचनान्तपदस्थाने **'त्वा'** इत्याद्येकवचनान्तपदप्रयोगः। पौर्णमासवत्तन्त्रं ब्राह्मणतर्पणान्तम्। इयं श्यामाकाग्रयणेष्टिरित्युच्यते॥

४५३. **व्रीह्याग्रयणेष्टिः**—व्रीह्याग्रयणे तु इन्द्राग्नी देवता। तस्या द्वादशकपालः पुरोडाशो द्रव्यम्, वैश्वदेवः पयसि चरुः, द्यावापृथिवीय एककपालः पुरोडाशो भवति। धाय्वायुक्तः सप्तदश सामिधेन्यः। **प्रेद्धो अग्न** इति स्विष्टकृतः पुरोनुवाक्या, **इमो अग्न** इति याज्या।

एते च याज्यानुवाक्ये विराट्छन्दस्कत्वाद् विराजौ इत्युच्यते॥

४५४. अन्यत् सर्वं श्यामाकाग्रयणेष्टिवत्। इयं व्रीह्याग्रययणेष्टिरित्युच्यते॥

४५५. **यवाग्रयणेष्टिः**—यवाग्रयणं सर्वं व्रीह्याग्रयणवद् भवति। इयं यवाग्रयणेष्टिरित्युच्यते॥

४५६. **व्रीहिश्यामाकाग्रयणेष्टी तन्त्रेण**—व्रीहिश्यामाकाग्रयणकाले एव वा तन्त्रेण कार्ये। अथवा व्रीह्याग्रयणकाले एव श्यामाकविकारः प्रस्तरः कार्यः। तत्र तन्त्रेण प्रयोगपक्षे 'व्रीहिश्यामाकाग्रयणाभ्यां तन्त्रेण यक्ष्ये' इति संकल्पः। व्रीहिश्यामाकाग्रयणेष्टिसंबन्धिहविः—व्रीहिमयः पुरोडाशः, व्रीहिमयः पयसि चरुः, श्यामाकः पयसि चरुः। पञ्च प्रयाजाः अग्नीषोमावाज्यभागौ इन्द्राग्नी विश्वेदेवाः सोमो द्यावापृथिवी इति प्रधानदेवताः, **देवा आज्यपा** इत्यादि। इध्मसंभरणमन्त्रे 'ततस्त्वां त्रयोविंशतिधा' इत्यूहः। पात्रासादने त्रयोदशकपालानि। समेक्षणे द्वे, चरुस्थाल्यौ द्वे, शूर्पे द्वे, प्रणीते द्वे, आज्यस्थाल्यौ दारुपात्र्या सहाशयपात्रं च। **ब्रह्मन्नपः पयश्च प्रणेष्यामीति** प्रणीतासादने विशेषः। **वेषाय त्वेत्यत्र** त्वेत्यस्य स्थाने **'वाम्'** इति द्विवचनान्त-

---

१. ये प्राचीनमेकाष्टकाया वत्सा जायन्ते तेषां प्रथमजं ददाति। वासः श्यामाके। आप० श्रौत ६।३०।७॥ २. अर्थात् पयःप्रणीतानिनयनमन्त्रे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्योहः। तेन च मन्त्रेण अग्निहोत्रहवणीं शूर्पद्वयं चादत्ते। पात्र्यां भेदेन व्रीहीन् श्यामाकांश्च निधाय **धूरसी**त्यादिमन्त्रेण अभिमर्शनं पुरोडाशीयप्रेक्षणं शूकनिरसनं च तन्त्रेण करोति। प्रक्षणमन्त्रे त्वेत्यस्य स्थाने **'वाम्'** इति पदं, भेरित्यस्य **'भैष्टम्'** इति पदं, संविक्या इत्यस्य **'संविजाथाम्'** इति पदम्। निरसनमन्त्रे उर्वित्यस्य स्थाने **'उरुणी'** इति भवति। ऐन्द्राग्नपुरोडाशार्थं व्रीहिनिर्वापः, वैश्वदेवचर्वर्थं च। ततः शूर्पान्तरे सौम्यचर्वर्थं श्यामाकनिर्वापः। पुनः प्रथमशूर्पे द्यावापृथिवीयपुरोडार्थं व्रीहिनिर्वापः। निरुप्ताभिमर्शनमन्त्रे इदमित्यस्य स्थाने **'इमे'** इत्यूहः। अतिशिष्टाभिप्राशनमन्त्रेऽपि तथैव। एकीकरणमन्त्रे त्वेत्यस्य स्थाने **'वाम्'** इत्यूहः। शूर्पद्वयादानपूर्वकोच्छ्यानमन्त्रे इहीत्यस्य स्थाने **'इतम्'** इति पदम्। शूर्पद्वयासादनमन्त्रे त्वेत्यत्र **वामिति** पदम्। अत्र धान्यभेदात् शूकरहितायां स्रुचि तिरःपवित्रमप आग्नीयेत्यादि। तथा एकधान्यनिर्वापानन्तरम् अपरधान्यनिर्वापे स्रुचः प्रोञ्छनं च। व्रीहिश्यामाकयोर्भेदेन प्रोक्षणम्। कृष्णाजिनावधूननादिफलीकरणान्तं व्रीहीणां कृत्वा श्यामाकानां कुर्वन्ति। तत्र न हविष्कृदाह्वानम्—**नोच्चैः समाहन्तवै** इति। ततः क्रमेण प्रक्षाल्य उत्करे तन्त्रेण क्षालनं निनयति। मनसा चरुपुरोडाशसंबन्धितन्दुलानां विभागः कार्यः। अभिमर्शनं तु न कार्यमिति **केशवः**।

"विभागः पेषणात् पूर्वः पौरोडाशचरव्ययोः।
तत्र देवांश्चतुर्थ्यन्तानुक्त्वान्ते व इतीरयेद्" इति **कल्पः**।
चतुर्थ्या देवतामुक्त्वाभिमृशेद् द्वयमिति **गोपालः**।

द्वादशकपालान्युपधाय चरुस्थाल्यौ अधिश्रयति। तत एकं कपलमुपदधाति। दशमस्योभयतो द्वयमिति द्वादशकपालासादनक्रमः। **आ देवयजं वहेत्यङ्गारमानीय चरुस्थाल्यां तिरःपवित्रं प्रणीताभ्यो जलमानीय ध्रुवमसीत्यादिमन्त्रेण तामधिश्रयति, निर्दग्धमित्यादिमन्त्रेण प्रदक्षिणमङ्गारैः परिचिनोति।** सोम्यचरुस्थानां तथैव प्रणीतादुग्धमानीयाधिश्रयति। वैश्वदेवस्य चरोरपि पयसि करणपक्षे उभयत्र दुग्धमेव। पुरोडाशमेककपालमधिश्रित्य आज्यं निरूप्य तूष्णीमपूर्वाज्यं निर्वापयति। स्थाल्यां तिरःपवित्रं तण्डुलानावपति—**धर्माः स्थ विश्वायुष** इति मन्त्रेण, तथोत्तरस्थाल्यां श्यामाकान्। तत एककपालमधिश्रयति। दारुपात्र्यां **स्योनं त** इति प्रथमपुरोडाशार्थमुपस्तीर्य **आशयपात्रे**[1] चोपस्तीर्य **प्रथमपुरोडाशनिधानान्तं कृत्वा आप्यायतामित्या-**

१. आशयशब्द आधारवचनः। तेनाशयपात्रे पुरोडाशस्थापिन्यां पात्र्यामित्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिमन्त्रेण चरुमभिमृशति । शृत उत्स्नातीत्यादिमन्त्रेण उद्वासयति । **आद्यौ भुवनस्य गोपा** इति मन्त्रेण उपर्यभ्यङ्क्ते, चरौ नोपाञ्जनम् । श्यामाकचरौ व्रीहिमयचरुवदभिघारणादि ॥

एककपालहोमः—**द्यावापृथिवीभ्यामनुब्रूहीति संप्रैष्य** जुह्वामुपस्तीर्य सर्वं पुरोडाशं स्थापयित्वा आशयात्[1] स्रुवेण द्वितीयमवदाय अभिघार्य तूष्णीं प्रत्यभिघारयति । वषट्कृते पुरोडाशमपर्यावर्तयन्नग्नौ प्रतिष्ठितं हुत्वा संस्रावेणाभिजुहोति । अयम् एकपालहोम इत्युच्यते ॥

४५७. **मासाहुतयः**—तत आज्यस्थाल्याः स्रुवेण जुहोति । **मधुश्च स्वाहेत्यादिभिरूर्जश्च स्वाहेत्यन्ताभिः** । इमा मासाहुतय इत्युच्यन्ते ॥

४५८. **अज्यानिहोमः, अज्यानिसंज्ञा ऋचश्च**—ततश्चतुर्गृहीतेन जुह्वा **शतायुधायेत्यादिपञ्चभिर्ऋग्भिर्जुहोति** ॥ अयमज्यानिहोमो यज्ञयोगानन्तरं कैश्चित् क्रियते । एता ऋच अज्यानिसंज्ञाः ॥

४५९. **तन्त्रेण व्रीहिश्यामाकाग्रयणम्**—अत्र स्विष्टकृदवदाने सर्वेषामुत्तरार्धात् सकृत्सकृदवदाय आशयाच्चावदाय द्विरभिघार्य मेक्षणाभ्यां सहात्याक्रम्य आहुतिं हुत्वा मेक्षणे प्रक्षिपति । इडावदाने सर्वाणि हवींष्यवदात आशयाच्च द्विरवद्यति । ऐन्द्राग्नपुरोडाशस्य प्रकृतीष्टिगताग्नेयविकारत्वात् चतुर्धाकरणादि तस्यैव भवति । अन्यो विशेषः श्यामाकेष्टौ उक्तौ द्रष्टव्यः ॥ इदं तन्त्रेण व्रीहिश्यामाकाग्रयणम् ॥

[चातुर्मास्यानि]

४६०. **वैश्वानरपार्जन्येष्टिः**—चातुर्मास्यानि प्रयोक्ष्यमाणः [2]**पूर्वेद्युर्वैश्वानरपार्जन्यामित्याश्वलायनसूत्रोक्तत्वात्** [२।१५] प्रथमप्रयोगात् पूर्वेद्युरियमिष्टिः क्रियते । तस्यां वैश्वानरो द्वादशकपालः पुरोडाशः, पार्जन्यश्चरुः । प्रधानमुपांशु । अन्वाहार्यमासाद्य वैश्वानराय हिरण्यं, पर्जन्याय धेनुं दक्षिणां ददाति । यजमान आह—भो ऋत्विजः अयं व ओदनः, इदं वो हिरण्यमियं वो धेनुरहिंसन्तो यथाभागं प्रतिगृह्णीध्वमिति । प्रतिग्रहमन्त्रे ब्रह्मण ओदनम्

१, इह आशयशब्देन ध्रुवास्रुग् विज्ञेया । तस्यामेव सर्वकार्यार्थमाज्यस्य श्रुतत्वात् ।

२. वैश्वानरपार्जन्यौ निरुप्येच्छन्निति कातीयसूत्रेऽन्वारम्भणीययाऽग्रे विकल्प उक्त । का० श्रौत ५।१।२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नये हिरण्यं, रुद्राय गामिति विशेषः। अत्यत्सर्वं पौर्णमासतन्त्रम्। ब्राह्मण-तर्पणान्तेयमिष्टिर्वैश्वानरपार्जन्या इत्युच्यते ॥

[१—वैश्वदेवपर्व]

४६१. **वैश्वदेवपर्व**—परेऽह्नि चातुर्मास्यारम्भः। तत्र प्रथमं [1]वैश्वदेव-संज्ञकं पर्व। वैश्वदेवहविर्भिर्यक्ष्ये इति संकल्पः। आग्नेनोऽष्टाकपाल पुरो-डाशः, सौम्यश्चरुः, सावित्रो द्वादशकपालः पुरोडाशः, सारस्वतश्चरुः, पौष्णश्चरुः, मारुतः सप्तकपालः पुरोडाशः, वैश्वदेव्यामिक्षा, द्यावापृथिवीय एककपालः। नव प्रयाजाः, नवानुयाजाः। अग्न्यादयः सर्वा उच्चैः, सवितृ-द्यावापृथिव्यौ उपांशु। एककपालस्य वातुर्मास्यान्तर्गतसावित्रस्य चाश्व-लायनसूत्रे [२।१५।५,७] उपांशुत्वविधानात्। अत्रामिक्षार्थं शाखाहरणं पुर्वेद्यु-रन्वाधानम्। बर्हि संभरणे नवप्ररूढदर्भमयं प्रस्तरं बध्नाति। [2]त्रींस्त्रीन्मुष्टी-नेकीकृत्य तूष्णीं बद्धेन मुष्टित्रयेण सह मन्त्रवता शुल्बेन संनह्यति। इध्म-संभरणे काष्मर्यमयाः परिधयः। सप्तदश सामिधेन्यः। ततस्त्वां त्रयोवि-शतिधेत्यूहः। सायंदोहे[3] महेन्द्रपदस्थाने विश्वविशेषणकस्य देवपदस्य अस-मासेनोहः। प्रातर्हुतेऽग्निहोत्रे गार्हपत्यस्योत्तरतस्तृणान्यासाद्य तेषु आज्य-स्थालीं स्रुवं स्रुचं समिधं प्रोक्षणीमभिद्योतनकुशांश्च सादयति। तूष्णीं पवित्रे कृत्वा तथा प्रोक्षणीः संस्कृत्य पात्राण्युत्तानानि कृत्या प्रोक्ष्य आज्यं निरुप्य गार्हपत्यस्योत्तरतो भस्ममिश्रानङ्गारान्निरूह्य तेष्वाज्यमधिश्रित्य दर्भोल्मुके-नाभिद्योत्य अङ्गुष्ठपर्वमात्रं प्रक्षालितदर्भाग्रद्वयमाज्ये प्रक्षिप्य पुनरभिद्योत्य त्रिःपर्यग्नि कृत्वा उदगुद्वास्य अङ्गारानग्नौ प्रत्यस्य पुनराहारमाज्यं त्रिरुत्पूय पवित्रे अग्नौ प्रक्षिप्य स्रुक्स्रुवौ निष्टप्य संमृज्य संमार्गदर्भानग्नौ प्रत्यस्यति। अयं स्मार्तवदाज्यसंस्कार इत्युच्यते ॥

४६२. [4]**पञ्चहोतृ-वाक्यानि**—**अग्निर्होतेत्यादि वाताय हवनश्रुत** इत्य-न्तानि षड् वाक्यानि पञ्चहोतृपदवाच्यानि ॥

---

१. प्राचीनप्रवणे वैश्वदेवेन यजते। आप० श्रौत ८।१।५ ॥

२. प्रसूमयं बर्हिः प्रस्तरश्च, त्रेधासन्नद्धं पुनरेकधा, तस्मिन् मन्त्रः। आप० श्रौत ८।१।१० — १२ ॥

३. पूर्ववद् वैश्वदेव्याः सायंदोहं दोहयति। आप० श्रौत ८।१।१६॥

४ पञ्चहोत्रा यमजानः सर्वाणि हवींष्यासन्नान्यभिमृशति। आप० श्रौत ८।२।१२ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४६३. इदं संस्कृतमाज्यं स्रुचि चतुर्गृहीतं गृहीत्वा अनेन पञ्चहोत्रा अन्वारब्धे यजमाने आहवनीये जुहोति। ततः कूष्माण्डहोम उपस्थानवरदानान्तः सारस्वतहोमश्च। पात्रासादने अष्टाविंशतिकपालानि, तैः सह समेक्षणाश्चतस्रश्चरुस्थाल्यः। उपभृता सह पृषदाज्यग्रहणीं, आज्यस्थाल्या सह दधिस्थालीमपूर्वाज्यस्थालीं च, दारुपात्र्या सहाशयपात्रं आमिक्षाव्युद्धरणपात्रीं च, घृष्टचा सहोपवेषमिति विशेषः। पूर्वेद्युः सायं होमानन्तरं आमिक्षादध्यर्थं सायं दोहः। अग्निहोत्रहोमशेषं पयो रक्षेत्। प्रातर्यज्ञयोगानन्तरं प्रातर्दोहः। मरुद्भ्यः सप्तकपालान्युपधाय तदुत्तरतः तूष्णीमुमत्रेषणाङ्गारान्निरुह्य स्थाल्यामुदगग्रं शाखापवित्रं निधाय प्रातर्दोहमानीय अधिश्रित्य मेक्षणेनालोड्य श्रपयेत्। तदुत्तरतो द्यावापृथिव्यर्थमेकं कपालमुपदधाति। अधिवपनसंवपनयोः पुरोडाशदेवतानामेवोहः। मारुतं पुरोडाशमधिश्रित्य प्रातर्दुग्धे तप्ते पयसि उदगग्रं शाखापवित्रं निधाय सायं दोहं दध्यानयति॥[1]

४६४. **आमिक्षा वाजिनश्च**—तथा कृते (तप्ते पयसि दधिप्रक्षेपे कृते) सति तस्य द्रव्यस्य द्वौ भागौ भवतः। यो घनीभूतो भागः सा आमिक्षा इत्युच्यते। यस्तु जलरूपो भागः स वाजिन इत्युच्यते॥

४६५. **पृषदाज्यम्**—आमिक्षावाजिने शीतले कृत्वा निदधाति। तत द्यावापृथिवीयं पुरोडाशमधिश्रित्य तिरःपवित्रमाज्यस्थाल्यामाज्यं निरूप्य तूष्णीमपूर्वाज्यं निरुप्य तथैव दधिस्थाल्यां तूष्णीं तिरः पवित्रं दध्यानयति। संप्रैषे स्रुवं च स्रुचश्च संमृड्ढ्वीत्यस्यानन्तरं तूष्णीं पृषदाज्यग्रहणीमिति विशेषः। तथा तस्मिन्नेव संप्रैषे आज्येनोदेहीत्यस्य स्थाने **आज्येन दध्ना चोदेहीति** विशेषः। स्रुक्संमार्जने उपभृत्संमार्जनानन्तरम् उपभृत्संमार्जनमन्त्रेण पृषदाज्यग्रहण्याः संमार्जनम्। आज्यग्रहणकाले प्रकृतिवदुपभृति चतुर्गृहीतं गहीत्वा पृथदाज्यग्रहण्यां आज्यस्थाल्याज्येन स्रुवेणोपस्तृणीते **महीनां पयोऽसीति** मन्त्रेण। ततो द्वितीयं **विश्वेषां देवानां तनूरिति** मन्त्रेण उपस्तृणीते। ततो द्वौ दर्भा अन्तर्धाय **ऋध्यासमद्येत्यादिमन्त्रेण** दध्यानयति। ततो दर्भौ दूरीकृत्य द्विरभिधारयति। **विष्णोर्हृदयमसीति** मन्त्रेण एकम्। **एकमिषे विष्णुस्त्वानुविचक्रम इति** मन्त्रेण द्वितीयम्। यजमानः **चरोस्त्वेत्यादिभिश्चतुर्भिर्मन्त्रैरुपभृति** आज्यग्रहणान्यनुमन्त्र्य **सुवीर्याय त्वेत्यादिभिश्चतुर्भिर्मन्त्रैः पृषदाज्यग्रहण्युपस्तरणाभिधारणान्यनुमन्त्रयते**। वेद्यास्तरणे अध्वर्युर्मुष्टि-

---

१. तप्ते प्रातर्दोहे सायं दोहयानयति यत्संवत्तंते सामिक्षा। यदन्यत् तद्वाजिनम्। आप० श्रौत ८।२।५।६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्रयनिर्मितमेकैकं दर्भमुष्टिमेकीकृत्य प्रकृतिवद् बर्हिरुपस्तृणाति । स्रुगासादने उपभृदासादनानन्तरं उपभृमन्त्रेण पृषदाज्यग्रहण्यासादनम् । उद्वासने मारुत-पुरोडाशोद्वासनानन्तरं चमसे तूष्णीमुपस्तीर्य आमिक्षां गार्हपत्ये ऽधिश्रित्य अभिघार्य उद्वास्य उपस्तरणयुक्ते चमसे आमिक्षां व्युदधृत्य तदुपरि किं-चिद्वाजिनमानीय अभिघार्य **यस्त आत्मेत्या**द्यृचा आज्यस्थाल्याज्येन स्रुवेण द्वितीयाभिघारणेनालं करोति । पात्रान्तरे पूर्ववदेककपालमुद्वास्य तस्मिन् बह्वाज्यमानीय आविःपृष्ठं कृत्वा सर्वाणि हवींष्यन्तर्वेदि आसादयति । प्रकृतिवत् स्रुवाज्यं ध्रुवायामानीय तूष्णीं गार्हपत्यस्य पुरस्ताद्वाजिनमासाद-यति । **पृषदाज्यं सदध्याज्ये** इति कोशाद् (अमर २।७।२३) दधियुक्तं पूर्वोक्तसंस्कारयुक्तमाज्यं पृषदाज्यमित्युच्यते ॥

४६६. **पृषदाज्यग्रहणी**—पृषदाज्यं गृह्यते यस्यां सेति व्युत्पत्त्या अधि-करणे ल्युटा उपभृत्सदृशी स्रुक् पृषदाज्यग्रहणीत्युच्यते ॥

४६७. अथाहवनीयसमीपे एकमधिमन्थनशकलं लौकिकं प्रागायतं निदधात्यग्नेर्जनित्रमसीति मन्त्रेण । वृषणसंज्ञकौ द्वौ शकलौ लौकिकौ अधिमन्थनस्य पार्श्वयोः प्रागायतौ हस्ताभ्यां युगपन्निदधाति **वृषणौ स्थ** इति मन्त्रेण । दक्षिणेनोत्तरारणिं सव्येनाधरारणिमादत्ते **उर्वश्यस्यायुरसी**त्यादि-मन्त्रेण । **घृतेनाक्ते** इत्यादिमन्त्रेण अरणी अपूर्वाज्यस्थाल्या समनक्ति । अभिमन्थनशकले अरणी निधाय **गायत्रं छन्दो ऽनुप्रजायस्वे**त्यादिमन्त्रं वाच-यति । मन्थनं कुर्वन् होतारं प्रेष्यति—'अग्नये मथ्यमानायानुब्रूहि' इति । उत्पन्नेऽग्नौ '**जातायानुब्रूहि**' इति प्रेष्यति । जातमग्निमाहवनीये प्रहरन् प्रेष्यति—'प्रह्रियमाणायानुब्रूहि' इति । यजमानेनान्वारब्धः **भवतं न** इत्याद्यृचा प्रहरति । **अग्नावग्निश्चरति प्रविष्ट** इत्याद्यृचा अपूर्वाज्यं स्रुवेण जुहोति । ततः [1]सामिधेन्यः सप्तदश । अथेध्मात् समिधमाददान इत्यादि प्रकृतिवत् चतुरः प्रयाजानिष्ट्वा पञ्चमादीन्मध्ये जुहोति । अष्टमे प्रयाजे सर्वमौपभृतमाज्यं जुह्वामानयति । यजमानः पञ्चमप्रयाजानुमन्त्रणेन पञ्च-मादीन् प्रयाजानुमन्त्रयते । उदङ्ङत्याक्रम्य सर्वाणि हवींष्यभिघारयति, नोपभृदाज्यं, पृषदाज्यग्रहण्यैव अनुवाजानां प्रचारात् । अभिधारणस्य तदर्थ-त्वात् । आज्यभागानन्तरं आग्नेयपुरोडाशैकदेशं प्राकृताग्नेयवदवदाय जुहोति । सौम्यचर्वादीनां तु अपरार्धादवदाय पूर्वार्धादवदानम् । आमिक्षैक-कपालयोरुपस्थानाभिमर्शने न भवतः । यजमानस्य सौम्यानुमन्त्रणं **सोम-**

१. पशुवन्निर्मन्थ्यः सामिधेन्यश्च । आप० श्रौत ८।२।१३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्याहं देवयज्यया प्रजया च पशुभिश्च जनिषीयेति। सवितुस्तु **देवयज्ययेत्यस्यानन्तरं स्वस्तिमान् पशुमान् भूयासमिति**। तथा सरस्वत्याः **वाचमन्तर्दापुषेयम्** इति। तथा पूष्णः **पुष्टिमान् पशुमान् भूयासमिति**। मरुतां तथैव **प्राणैर्ऋध्यासमिति**। विश्वेषां देवानां तु **प्राणैः सायुज्यं गमेयमिति**। तथा द्यावापृथिव्योस्तु **उभयोर्लोकयोर्ऋध्यासमिति, भूमान प्रतिष्ठां गमेयमिति** वा। प्रधानहोमानन्तरं **मधुश्च स्वाहेत्यादिभिश्चतुर्भिर्मासनामभिराज्यस्थाल्याज्येन स्रुवेणैककपालस्याभितो जुहोति**। स्विष्टकृदर्थं उपस्तीर्य वैश्वदेवान्तानां हविषामुत्तरार्धात् सकृत्सकृदवदाय एककपालसंबन्ध्याशयाज्यात् सकृदवदाय द्विरभिघार्य चर्वामिक्षामेक्षणान्यादाय अत्याक्रम्य हुत्वा मेक्षणान्यनुप्रहृत्य संस्रावेणाभिजुहोति। अन्वाहार्यमासाद्य प्रथमजं वत्सं दक्षिणां ददाति। प्रतिग्रहमन्त्रे 'ब्रह्मण ओदनं रुद्राय गां ताभ्याम्' इति विशेषः॥

४६८. **वाजिनयागः**——हविरुच्छिष्टोद्वासनानन्तरं गार्हपत्यस्याग्रे वेद्यां दर्भेषु आज्येनानालिप्तं चमसम् अग्निहोत्रहवणीं स्फ्यं परिभोजनीयदर्भांश्च द्वन्द्वमासाद्य मन्त्रेण पवित्रे कृत्वा **यजमानं वाचं यच्छेति** यजमानं संप्रेष्य **वेषाय त्वेति** मन्त्रेणाग्निहोत्रहवणीमादाय **प्रत्युष्टमित्यादिमन्त्रेण** गार्हपत्ये प्रतितप्य **मन्त्रेण** प्रोक्षणीः संस्कृत्य **शुन्धध्वमित्यादिमन्त्रेण** चमसादिप्रोक्ष्य पवित्रे प्रस्तरे तूष्णीं विसृज्य मन्त्रेण **देवस्यत्वेत्यादिना** स्फ्यमादाय वेदितृतीयदेशे स्तब्धं कृत्वा संप्रेष्यति—'प्रोक्षणीरासादय चमसꣳसंमृडृढि'इति। ततः मन्त्रेण स्फ्योद्वासनादि। आग्नीध्रः चमसं परिभोजनीयदर्भांश्चादाय युगपत् गार्हपत्ये निष्टपति प्राकृतस्रुङ्निष्टपनमन्त्रेण। **वाचं प्राणं मानिर्मृक्षं वाजिनं त्वा सपत्नसाहꣳसमार्ज्मि** इति मन्त्रेण जुह्वादिवत्। **दिवः शिल्पमित्यादिद्यृचा** संमार्गदर्भान् गार्हपत्येऽनुप्रहरति। अध्वर्युः वाजिनं गार्हपत्येऽधिश्रित्य अभिघार्य उदगुद्वास्य पुनरभिघार्य **यस्त आत्मेत्याद्यृचा** तृतीयाभिघारणेनाक्तं कृत्वा यजमानेन सह व्याहृतिमन्त्रं पठन् वेद्यामासादयति। **यत्ते अग्ने** इत्याद्यृचा यजमानोऽनुमन्त्रयते। अथाध्वर्युः संप्रेषमाह—'ब्रह्मन् प्रस्थास्यामः' इत्यादि। इध्मसन्न(हन)हरणान्तं प्रकृतिवत्। पृषदाज्यं जुह्वामानीय [1]'अनुयाजार्थमत्याक्रामति। प्रथमानुयाजयाज्यापठनार्थं 'होतारं देवान्यज' इति संप्रेष्य द्वितीयतृतीयोः प्रकृतिप्राप्तं यजेति न संप्रेष्यति। चतुर्थादिषु तु [2]'यजेति संप्रेष्यति। प्रथमं

१. पृषदाज्यं जुह्वामानीय पृषदाज्यधानीमुपभृतं कृत्वा तेन नवानुयाजान् यजति। आप० श्रौत ८।२।२०॥

२. देवान्यजेति प्रथमं संप्रेष्यति। यज यजेतीतरान्। आप० श्रौत ८।३।३॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षिप्तसमिधः पूर्वभागे हुत्वा द्वितीयादीननुमन्त्रयते । अध्वर्युः अनुवषट्कृते ऽवशिष्टं वाजिनं[1] जुहोति । यजमानः 'अग्नय इदं न मम, अग्नेरहं देवयज्यायुष्मान् यज्ञेन प्रतिष्ठां गमेयम्' इत्यनुमन्त्रयते । अथाध्वर्युरुदङ्ङत्याक्रम्य चमसं वाजिनशेषसहितं होतुर्हस्ते ददाति । यजमानोऽध्वर्युराग्नीध्रौ ब्रह्मा च चमसमन्वारभ्य [2]उपहवं कुर्युः । तत्र प्रथमं होता अध्वर्य उपह्वयस्व, ब्रह्मन्नुपह्वयस्व, अग्नीदुपह्वयस्व, यजमानोपह्वयस्व इति उपह्वयते । यं संबोध्य उपह्वयते तस्य तस्य 'उपहूत' इति प्रतिवचनम् । ततोऽध्वर्युः ब्रह्महोत्राग्नीध्रयजमानान् क्रमेण होतृवदुपह्वयते, ततो ब्रह्मा अध्वर्युहोत्राग्नीध्रयजमानान्, तत आग्नीध्रोऽध्वर्युब्रह्महोतृयजमानन् ततो यजमानोऽध्वर्युब्रह्महोत्राग्नीध्रान् । ततो होत्रध्वर्युब्रह्माग्नीध्राः क्रमेण नासिक्यावघ्राय आसते न प्रत्यक्षं भक्षयन्ति । यजमानस्तु **यन्मे रेत** इत्यादिमन्त्रेण प्रत्यक्षं भक्षयति । पात्रं प्रक्षाल्य निदध्युः । एतत्कर्म वाजिनयाग इत्युच्यते ॥

४६९, **वैश्वदेवपर्व**—ततोऽध्वर्युर्होत्रे वेदं प्रदायेत्यादिप्राङेत्य ध्रुवामाप्याज्य प्रकृतिवत्प्रायश्चित्तानि हुत्वा वेद्यास्तृतबर्हिर्भ्यः प्रत्येकं किंचित् गृहीत्वा ध्रुवां समज्य प्रहृत्य दक्षिणेन पदा वेदिमाक्रम्य तिष्ठन् ध्रुवाज्यात् स्रुवेण गृहीत्वा प्रथमं [3]समिष्टयजुर्जुहोति—**यज्ञ यज्ञं गच्छेति** मन्त्रेण । पुनरादाय द्वितीयं जुहोति—**एष ते यज्ञो यज्ञपत** इत्यादिमन्त्रेण । स्रुवं निधाय ध्रुवामादाय सर्वं जुहोति—**देवा गातुविद** इत्यादिप्राकृतमन्त्रेण । यज्ञविमोकान्ते यजमान उत्करे उपवेषस्य स्थूलप्रदेशमुपगूहति—**यं देवा मनुष्येष्विति** द्वाभ्यामृग्भ्याम् । पौर्णमासतन्त्रं ब्राह्मणतर्पणान्तं प्रकृतिवत् । अथाध्वर्युः प्रत्यङ्मुखः स्वायतने प्राङ्मुखस्योपविष्टस्य यजमानस्य शिरसि केशान् प्रागादिदिक्चतुष्टये मध्ये चेति त्र्येण्या शलल्या पञ्चधा विभजति—**ऋतमेव परमेष्ठि** इत्यादिबहुभिर्वाक्यमन्त्रैः । प्रतिविभागं तेषां वाक्यानामा-

---

१. परिधीन् प्रहृत्य संस्रवान्तं कृत्वा वाजिनपात्र उपस्तीर्यान्तर्वेदि बर्हिरनुविषिञ्चन् वाजिनं गृह्णाति । नाभिघारयति । वाजिभ्योऽनुब्रूहि वाजिनो यजेति संप्रैषौ । वषट्कृते चमसेन जुहोति । स्रुचा वानुविषिच्यमानयाऽनुवषट्कृते च । आप० श्रौत ८।३।६–८ ॥

२. असावुपह्वयस्वेति कर्मनामधेयेनापक्रामयते उपहूत इति प्रतिवचनः । होता प्रथमो भक्षयति यजमान उत्तमः । यजमानः प्रथमश्चोत्तमश्चेत्येके । आप० श्रौत ८।३।१३–१५ ॥

३. पशुवत्समिष्टयजूंषि । आप० श्रौत ८।३।१७ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वृत्तिः । विभागक्रमेण लोहितायसक्षुरेण तैरेव मन्त्रैर्वपनम् । प्रतिवपनं मन्त्रावृत्तिः । यजमानः स्नात्वा स्वायतने उपविशति । ततः 'संवत्सरीणा॰ स्वस्तिमाशासे' इति पठति । इदमेतावत्सर्वं कर्म वैश्वदेवपर्वेत्युच्यते ॥

[२-वरुणप्रघासपर्व]

४७०. **वरुणप्रघाससंभाराः**—अथ वरुणप्रघासनामकं द्वितीयं पर्व । तत्रैते संभाराः—त्रिश्वेतशलली, लोहितक्षुरः, द्वात्रिंशत्कपालानि, आमिक्षास्थाल्यौ, तिस्रश्चरुस्थाल्यः, पञ्च मेक्षणानि, द्विशताधिकानि शमीपर्णानि, करीरसक्तवः, ऐषीकं शूर्पं कुशमयं वा, गार्हपत्ये ईषद्भ्रष्टानां यवानां सूक्ष्मवितुषीकृतानां तप्ताभिरद्भिर्घृतेन च संयुक्तानां यजमानस्य पुत्रपौत्रप्रत्तदुहितृभार्यासमसंख्याकानि एकातिरिक्तानि दीपकाकाराणि करम्भपात्राणि, सशृङ्गो मेषः अशृङ्गा मेषी, द्वावपि शुक्लोर्णप्रच्छन्नौ, यवतुषं च, दार्शपौर्णमासिकी वेदिः, पाशुबन्धिकी च, द्विगुणितानि यज्ञपात्राणि, द्विगुणिते इध्मबर्हिषी । प्रस्तरं प्रसूमयं केचिदिच्छन्ति । एते वरुणप्रघाससंभारा इत्युच्यन्ते ॥

४७१. एतान् संभारान् संभृत्य यजमानो ऽरण्योरग्नीन् समारोप्य उदवसाय मथित्वा विहृत्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये **मनस्वत्या** जुहोति । 'वरुणप्रघासहविर्भिर्यक्ष्य' इति संकल्पः । अग्नीषोमावाज्यभागौ, अग्नेयोऽष्टाकपालः पुरोडाशः, सौम्यश्चरुः, सावित्रो द्वापशकपालः पुरोडाशः, सारस्वतश्चरुः, पौष्णश्चरुः, ऐन्द्राग्न एकादशकपालः पुरोडाशः, मारुत्यामिक्षा, वारुण्यामिक्षा, काय एककपालः पुरोडाशः, **देचा आज्यपा** इत्यादि वैश्वदेववत् । सविता क इत्युपांशु, अन्या उच्चैः । अध्वर्युः **इडादेवहूरित्यादिना** अग्नीन् विहृत्यान्वाधाति, तथैव प्रतिप्रस्थाता शाखाहरणादि करोति, बर्हिःसंभरणे अध्वर्युः प्रथमं प्रस्तरपूर्वं पञ्चमुष्टीन् संभरति । ततः प्रतिप्रस्थाता प्रस्तरपूर्वं मुष्टित्रयम् ॥

प्रतिप्रस्थाता—अत्र वरुणप्रघासाख्ये पर्वणि वारुण्यां वेद्यां व्यापारकर्ता अध्वर्युसदृश ऋत्विक् पञ्चमः प्रतिप्रस्थातेत्युच्यते ॥

४७२. **पाशुबन्धिकी वेदिः**—संभरणक्रमेण सादयतः । परिभोजनीयान् कृत्वा इध्मसंनहनायापि द्वयोर्वैश्वदेववत् । अध्वर्युः आहवनीयस्य पुरस्तात् पदद्वयं संचरमवशेष्य शङ्कुं निहन्ति ।[1] तत्पुरस्नाद् द्वादशपदे

---

१. वेदौ कृत्वाऽग्रेण गार्हपत्यं समे प्राची वेदी भवतः । उत्तरामध्वर्यु करोति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयं शङ्कुं निहन्ति। अष्टादशपदप्रमाणां रज्जुमुभयतः पाशां कृत्वा त्रयोदशपदे चतुर्दशपदे च न्यञ्छनं कृत्वा त्रयोदशपदप्रमाणा यथा पुरस्ताद् भवति तया शङ्क्वोः पाशौ प्रतिमुच्य त्रयोदशपदन्यञ्छनेन दक्षिणत आकृष्य पदे शङ्कुं निहन्ति। एवमुत्तरतोऽप्याकृष्य शङ्कुं निहन्ति ते श्रोणी। रज्जुं विपर्यस्य दक्षिणतः पूर्ववदाकृष्य चतुर्दशपदे शङ्कुं निहन्ति। एवमुत्तरतोऽप्याकृष्य शङ्कुं निहन्ति तावंसौ। द्वादशपदशङ्कोः प्रत्यक् पदाधमवशेष्य अनुपृष्ठ्यशङ्कुं निहन्ति। ततः पश्चादनुपृष्ठ्यं षट्त्रिंशदङ्गुले शङ्कुं निहन्ति। तत्राहवनीयवच्छम्याजानुप्रादेशानामन्यतममात्रोच्छ्रायां समचतुरस्रामुत्तरवेदिं करोति। इयं पाशुबन्धिकी वेदिरित्युच्यते॥

४७३. **उत्तरवेदिनाभिः**—तस्या मध्ये चतुरङ्गुलोच्छ्रयामभितः प्रादेशमात्रीं समचतुरस्रामुत्तरनाभिं करोति। प्रादेशोच्छ्रायोत्तरवेदिपक्षे गोपदप्रमाणोत्तरनाभिः। इयमुत्तरवेदिनाभिरित्युच्यते॥

४७४. **चात्वालः**—वेद्यूत्तरांसशङ्कुमारभ्य प्रत्यक् पदद्वयं मीत्वा तस्योत्तरतोऽपि तावदेव मीत्वा तत्राभितः शम्यामात्रश्चात्वालः। अयं चात्वाल इत्युच्यते॥

४७५. **उत्करः**—वेद्युत्तरांसशङ्कुमारभ्य प्रत्यक् पदचतुष्टयं मीत्वा उदगेकं पदं मीत्वा शङ्कुं निहन्ति स उत्करः॥

४७६. **मारुती वेदिः, प्रतिप्रस्थातृवेदिर्वा**—एवं पाशुबन्धिकीं वेदिमुत्तरवेदिं च करोति। तस्या वेदेस्त्रयोदशाङ्गुलं दक्षिणतो मुक्त्वा प्रतिप्रस्थाता दार्शपौर्णमासिकीं वेदिं करोति। उभे पश्चिमपार्श्वे समे भवतः। पूर्वपार्श्व विषमे। उत्तरा दीर्घा दाक्षिणा ऊना। प्रतिप्रस्थातृवेदेरुत्तरश्रोण्यंसवदध्वर्युवेदेर्दक्षिणतस्त्रयोदशाङ्गुलमात्रात्परौ भवतः। उभयोर्वेद्योरुत्तर एवात्करः। इयं दार्शपौर्णमासिक्या वेद्या तुल्या मारुती वेदिरिति प्रतिप्रस्थातृवेदिरिति च गीयते॥

४७७. एवं वेदीं विमाय परिस्तीर्य अध्वर्युप्रतिप्रस्थातारौ शाखाहरणक्रमेण शाखापवित्रादिसायंदोहान्तं कुर्याताम्। [1]वारुणदोहमध्वर्युः, मारुत-

---

दक्षिणतः प्रतिप्रस्थाता। उत्तरे विहारेऽध्वर्युश्चरति दक्षिणे प्रतिप्रस्थाता। उभयत्र कृत्स्नं तन्त्रम्। अपि पत्नीसंयाजाः। एकवत्संप्रैषः। द्विर्विद् ब्रह्मानुजानाति। आप० श्रौत ८।५।४—९॥

१. मारुत्याः प्रतिप्रस्थाता वत्सानपाकरोति वारुण्या अध्वर्युः। आप० श्रौत ८।५।२८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दोहं प्रतिप्रस्थाता। द्वितीयदिने अग्निहोत्रहोमानन्तरमुभौ पाणिसंमर्शनादि कुरुतः। अग्निपरिस्तरणमध्वर्युरेव करोति। उत्तरस्यां वेद्यां वैश्वदेववत् पात्राणि सादयति। प्रतिप्रस्थाता दक्षिणस्यां वेद्यां स्फ्यमग्निहोत्रहवणीं, जुह्वादिचतुष्टयमाज्यस्थालीं, वेदम्, आमिक्षाश्रपणार्थं स्थालीं, मेक्षणम्, आमिक्षामुद्धरणपात्रीं, वेदपरिवासनम्, उपवेषं चैतानि पात्राणि शमीमयानि प्रकृत्युक्तानि चासादयति। ब्रह्माणं तूष्णीं दक्षिणत उपवेश्य अध्वर्युरेव प्राकृतवेद्यां पृष्ठ्यां स्तृणाति। उभौ मन्त्रेण पवित्रे कुरुतः। अध्वर्युरेव प्रणीताप्रणयनमुत्तरवेदेरुत्तरतः करोति। दक्षिणेनाग्निहोत्रहवणीं सव्येन शूर्पं चादत्ते। प्रतिप्रस्थाता मन्त्रेण अग्निहोत्रहवणीमेव। एवं मन्त्रेण प्रतितपनम। अध्वर्यु र्वैश्वदेववदाग्नेयादिपञ्चहवींषि निरूप्य ऐन्द्राग्नं निर्वपति। उभौ प्रोक्षणीः संस्कुरुतः। अध्वर्युः करम्भपात्राणि, मेषं मेषी[1], द्विंशताधिकानि शमीपर्णानि, करीरसक्तून्, ऐषीकं शूर्पं च हविर्भिः सह प्रोक्षति। उभौ स्वस्वपात्राणि प्रोक्ष्य प्रोक्षणीर्निधत्तः।

अध्वर्युः कृष्णाजिनावधूननादितन्दुलप्रक्षालननियननान्तं करोति। तुषनिरसनकाले कांश्चित्तुषान् [2]अवभृथार्थमवशेष्य इतरान्निरस्यति। उभयोः प्रातर्दोहः सायंदोहवत्। अध्वर्युः कृष्णाजिनावधूननादि अधिवपनान्तं करोति। कपालोपधाने अग्नये अष्टौ कपालान्युपधाय, सोम्यचरुस्थालीमधिश्रित्य, सवित्रे द्वादश कपालान्युपधाय, सारस्वतचरुस्थालीमधिश्रित्य, पौष्णचरुस्थालीमधिश्रित्य, इन्द्राग्निभ्यामेकादशकपालान्युपधाति। प्रतिप्रस्थाता तदुत्तरत उपवेषेणाङ्गारान्निरूह्य मारुतस्थाल्यां तिरःपवित्रं प्रातर्दोहमानीय मेक्षणेनालोड्य श्रपयति। अध्वर्युस्तदुत्तरतो वारुणस्थालीमधिश्रित्य तदुत्तरतः कायम् एकं कपालमुपदधाति। संवपने अध्वर्युः इन्द्राग्निभ्यां कायेति वदति। अध्वर्युणा ऐन्द्राग्नपुरोडाशाधिश्रयणे कृते प्रतिप्रस्थाता मारुतीप्रातर्दोहे सायंदोहं दध्यानीय आमिक्षावाजिने पृथक् कृत्य शीतले देशे निदधाति। सद्यस्कालत्वपक्षे आमिक्षार्थं पय आतञ्चनं लौकिकदध्ना वा करोति। ततोऽध्वर्युर्वारुण्यामिक्षां वाजिनं च पृथक्कृत्य निदधाति। तत एककपालमधिश्रयति। आज्यदधिनी निर्वपति, अपूर्वाज्यं च। प्रतिप्रस्थाता प्रकृतिवत्। अध्वर्युः पुरोडाशानां त्वचं ग्राहयित्वा करम्भपात्राणि मेषं शताधिकानि शमीपर्णानि करीरसक्तूंश्च हविर्भिः सह पर्यग्नि करोति।

---

१. अयं मेषः मेषी च निस्तुषयवपिष्टकान्निर्भीयेते। कात्या० श्रौत ५।३।६ तदीया टीका च। २. प्रयोजनं ४९० पदार्थान्ते द्रष्टव्यम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ततः प्रतिप्रस्थाता मारुत्यामिक्षया सह मेषीं शताधिकानि शमीपर्णानि करीरसक्तूनषीकं शूर्पं स्वाज्यानि च पर्यग्नि करोति ।

अध्वर्युः पाशुबन्धिक्यां वेद्यां पात्रीसंक्षालननिनयनान्तं करोति । उभौ वेदावादाय त्रिः संमृष्टः । अध्वर्युः पाशुबन्धिक्यां वेद्यां स्तम्बयजुर्हरति, प्रतिप्रस्थाता दक्षिणस्याम् । अध्वर्युः पूर्वं मृदमादाय उत्करे न्युप्य तिष्ठति । प्रतिप्रस्थाता पाशुबन्धिक्या वेदेः पश्चान्मार्गेण मृदमाहृत्य उत्करे न्युप्य पूर्वं यथेतं प्रत्यागच्छति । ततोऽध्वर्युः प्रत्यागच्छति । एवं त्रिर्यजुषा तूष्णीं चतुर्थं सह वर्हिषा । पूर्वौ परिग्रहौ परिगृह्णीतः । अध्वर्युरेव करणं जपति । तस्मिन् करणमन्त्र वेदिद्वित्वाद् **इमां वेदिं वसुमतीं रुद्रवतीमादित्यवतीमिति** पदानां स्थाने **इमे वेदी वसुमत्यौ रुद्रवत्यौ आदित्यवत्यौ** इत्यूहः । उभौ स्व-स्ववेदिं स्फ्येनोद्धतः । अध्वर्युरेवाग्नीध्रमाह—अग्नीदितश्चामुतश्च त्रिस्त्रिर्हरेति । अथाध्वर्युः स्फ्यमुदपात्रं बर्हिः शम्यां चादाय 'एहि' यजमानमामन्त्र्य यजमानपत्नीभ्यां सह चात्वालदेशं गत्वा स्फ्येनोद्धत्यावोक्ष्य चात्वालपूर्वदेशे उदीचीनकुम्बां शम्यां निधायान्तरतः स्फ्येनालिखत्युदगपवर्गं **वित्तायनी मेऽसीति** मन्त्रेण । दक्षिणतः प्राचीनकुम्बां शम्यां निधाय पूर्ववत् स्फ्येनालिखति प्रागपवर्गं **तिक्तायनी मेऽसीति** मन्त्रेण । पश्चादुदीचीनकुम्बां शम्यां निधाय अन्तरतः स्फ्येनालिखत्युदगपवर्गं **अवतान्मा नाथितमिति** मन्त्रेण । उत्तरतः प्राचीनकुम्बां शम्यां निधाय अन्तरतः स्फ्येनालिखति प्रागपवर्गम् **अवतान्मा व्यथितमिति** मन्त्रेण ।

चात्वालसंस्कारः—चात्वाले उदगग्रं बर्हिर्निधाय यजमानपत्नीभ्यामन्त्रारब्धः तस्य मूले स्फ्येन प्रहरति—**विदेरग्निर्नभ** इत्यादिमन्त्रेण । अप उपस्पृश्य, छिन्नं बर्हिर्मूलं मृदं चादत्ते—**आयुषा नाम्नेहीति** मन्त्रेण । हृत्वोत्तरवेद्यां निर्वपति--**यत्ते नाधृष्टं नामेत्यादिमन्त्रेण** । स्फ्येन बर्हिर्मूलप्रहरणादि पुनर्द्वितीयम् । तत्र मन्त्रे **योऽस्यां पृथिव्यामित्यत्र** 'अस्याम्' इत्यस्य स्थाने **'द्वितीयस्याम्'** इति पदस्य प्रयोगः । ततस्तृतीयं तत्र प्रहरणमन्त्रे **अस्यामित्यस्य** स्थाने **'तृतीयस्याम्'** इत्यस्य प्रयोगः । तूष्णीं चतुर्थमवशिष्टं बर्हिषा सह प्रहरति । पूर्वेषु त्रिषु पर्यायेषु केवलं मृदाहरणं वा । ततः स्फ्येन चात्वाले पुरीषमुद्धत्याह—अग्नीदितस्त्रिर्हरेति । आग्नीध्रश्चत्वालात् पुरीषमादाय उत्तरवेद्यां त्रिनिवपति ।। अयं चात्वालसंस्कार इत्युच्यते ।।

४७८. **उत्तरवेदिसंस्कारः**-अध्वर्युत्तरवेद्यां न्युप्तं पुरीषं संप्रयौति-**सिंहिरसीत्यादि** मन्त्रेण । पुरीषं प्रथयति—**उरु प्रथस्वेत्यादिमन्त्रेण** । **ध्रुवासीति-**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रेण स्फ्येन संहन्ति । **देवेभ्यः शुन्धस्वेति** मन्त्रेण उत्तरवेदिमद्भिरवोक्षति । **देवेभ्यः शुम्भस्वेति** मन्त्रेण सिकताभिः समुपकिरति । उत्तरवेदिं शम्यया मीत्वा मध्ये प्रादेशमात्रीं चतुरस्रां चतुरङ्गुलोच्छ्रयामुत्तरनाभिं कृत्वा दर्भैः प्रच्छादयति । उत्तवेद्यां पुरीषसंपवादि एतदन्तं कर्म उत्तरवेदिसंस्कार इत्युच्यते ।।

४७९. उभौ प्रत्येकं प्रणयनीयमिध्ममाहवनीये आधत्तः । अध्वर्युः स्मार्तवदाज्यं संस्कृत्य पञ्चगृहीतं गृहीत्वा तूष्णीमुत्पूताः प्रोक्षणीश्च परिकर्मिहस्ते दत्वा ब्रह्मणो हस्ते दैवदारवान् प्रधीन् प्रादेशमात्रांस्त्रीन् गुग्गुलुसुगन्धि तेजनं मेषशृङ्गमध्ये उत्तरप्रदेशाद् गृहीतां शुक्लामूर्णास्तुकां च दत्वा संप्रैषमाह—**अग्नये प्रणीयमानायानुब्रू३ह्यग्नीदेकस्फ्ययानुसधे३** इति । होत्रा अयमुष्येत्यारब्धे चात्वालमृदा पूरितां पात्रीमग्न्युद्धरणपात्र्या अधस्तादुपयम्य यजमानपत्नीभ्यामन्वारब्धः स्वमिध्ममादायोत्तरतस्तिष्ठति । प्रतिप्रस्थाता स्मार्तवदाज्यं संस्कृत्य सकृद् गृहीत्वा अध्वर्युगृहीतस्येध्मस्य [1]शालामुखीयस्य च मध्येन गत्वा प्रदक्षिणमावृत्य प्रत्यङ्मुखः तथैव कल्पितोपयमन्यां (४८०) प्रणयनपात्रे स्वमिध्ममादाय अपसलैः पर्यावृत्य तिष्ठति ।

अपलसैः पर्यावर्तनम्—'वामाङ्गेन परिवर्तनम् अपसलैः पर्यावर्तनम्' इत्युच्यते ।।

४८०. **उपयमनी**—मृदादिनिर्मिता पक्त्वा अग्न्युद्धरणपात्र्या अधस्ताद् ध्रियमाणा उप समीपे यम्यते ध्रियते इति कर्मल्युटा उपयमनीत्युच्यते ।।

४८१. **अग्न्युद्धरणपात्री**—[1]शालामुखीयसकाशादुत्तरवेद्यां प्रणयनार्थं अग्निः उद्ध्रियते अस्यामित्यधिकरणे ल्युटा पात्रीशब्देन समासे अग्न्युद्धरणपात्रीत्युच्यते ।।

४८२. **उत्तरवेदिप्रोक्षणम्**—अध्वर्युप्रमुखाः पाशुबन्धिकीं वेदिमनतिक्रामन्त उत्तरेण शनैर्गच्छेयुः । आग्नीध्रः स्फ्येन लिखितया लेखया होतुः पदं प्रच्छादयन्नेति । सर्वे गत्वोत्तरवेदेः पश्चात् पदमात्रे तिष्ठेयुः । प्रतिप्रस्थाता अध्वर्युगमनकाले पाशुबन्धिक्या वेदेः पश्चान्मार्गेण दक्षिणतो गत्वा द्वयोर्वेद्योर्मध्येन प्राग्गत्वा प्रदक्षिणमावृत्य प्रत्यङ्मुखस्तिष्ठति । अध्वर्युरन्यहस्तेऽग्निं दत्वा परिकर्मिहस्तादिन्द्रघोषवतीः प्रोक्षणीर्गृहीत्वा उत्तरवेदिं प्रथमं पुरस्तादारभ्य मध्ये समापयन् **इन्द्रघोषस्त्वेत्यादिमन्त्रेण** प्रोक्षति । एवं

---

१. प्राकृत आहवनीयः शालामुखीय इत्युच्यते । द्र० पाशुकपदार्थेषु संख्या ८६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणत आरभ्य **मनोजवास्त्वेत्यादिमन्त्रेण**। पश्चादारभ्य **प्रचेतास्त्वेत्यादिमन्त्रेण**। उत्तरत आरभ्य **विश्वकर्मा त्वेत्यादिमन्त्रेण**। अथवा मध्यादारभ्य प्रागादिदिक्षु समापयन् प्रोक्षति। प्रोक्षणीशेषमुत्तरवेद्या दक्षिणांसस्य दक्षिणतो निनयति। अथवा पाशुबन्धिक्या वेदेर्दक्षिणांसस्य दक्षिणतः। एतदुत्तरवेदिप्रोक्षणमित्युच्यते ॥

४८३. **उत्तरवेदिव्याघारणम्**—परिकर्मिहस्तात् पञ्चगृहीतमाज्यमादाय हिरण्यं स्रुङ्मुखे लम्बयित्वा उत्तरवेदिमक्ष्णया[1] व्याघारयति[2]—प्रथमं दक्षिणांसादारभ्य मध्ये समापयन् **सिꣳहीरसीत्यादिस्वाहाकारान्तेन** मन्त्रेण। **सिꣳहीरसि सुप्रजावनिः स्वाहेति** मन्त्रेण उत्तरश्रोणिमारभ्य मध्ये समापयन् व्याघारयति। **सिꣳहीरसि रायस्योपवनिः स्वाहेति** मन्त्रेण दक्षिणश्रोणिमारभ्य मध्ये समापयन्। तथैवोत्तरांसमारभ्य **सिꣳहीरस्यादित्यवनिः स्वाहेति** मन्त्रेण। **सिꣳहीरस्यावह देवान् देवयते यजमानाय स्वाहेति** मन्त्रेण मध्ये-व्याघारयति। सर्वत्र 'उत्तरवेद्या इदं न मम' इति यजमानस्य त्यागः। **भूतेभ्यस्त्वेति**[3] मन्त्रेण स्रुचमुद्गृह्णाति। एतदुत्तरवेदिव्याघारणमित्युच्यते ॥

४८४. **उत्तरवेदिपरिधानम्**-ब्रह्मणो हस्ताद् दैवदारवान् परिधीन् गृहीत्वा उत्तरनाभिं[4] परिदधाति—**विश्वायुरसीत्यादिमन्त्रेण** मध्यमम्। **ध्रुवक्षिदसीत्यादिमन्त्रेण** दक्षिणम्। **अच्युतक्षिदसीत्यादिमन्त्रेण** उत्तरम्। इदमुत्तरवेदिपरिधानमित्युच्यते ॥

४८५. **अग्निप्रणयनम्** **अग्नेर्भस्मासीत्यादिमन्त्रेण** गुग्गुलुसुगन्धि तेजनं शुक्लामूर्णास्तुकां चोत्तरनाभ्यां निवपति। निहतानां संभाराणामाघारशेषेणाघारणं कृत्वा प्रदक्षिणमावृत्य अग्निं गृहीत्वा उत्तरवेदेः पुरस्तात् प्रत्यङ्मुखः संभारेषु प्रज्वलितमिध्मं **यज्ञ प्रतितिष्ठेत्यृचा** प्रतिष्ठापयति। अस्मिन् काले प्रतिप्रस्थाता दक्षिणवेदेः पूर्वार्धे शालामुखीयादाहृतमग्निं तूष्णीं प्रतिष्ठापयति। अध्वर्युः प्रणयनीयमिध्मं विस्रस्य परिसमूह्य पर्युक्ष्य **परिस्तीर्य** ज्वलयति। एवं प्रतिप्रस्थाता। आहवनीये प्रणयनीयेध्माधानप्रभृति एतदन्तं कर्म अग्निप्रणयनमित्युच्यते ॥

---

१. अक्ष्णया—अनृजुः, कुटिलं, तिरश्चीनम्।

२. नाभ्याः श्रोण्यंसेषु पञ्चगृहीतं जुहोत्यक्ष्णया दक्षिणेंऽसे श्रोण्यां श्रोण्यामंसे मध्ये च हिरण्यं पश्यन् सिꣳह्यसीति प्रतिमन्त्रम्। कात्या० श्रौत ५।४।११

३. भूतेभ्यस्त्वेति स्रुचमुद्यच्छति। कात्या० श्रौत ५।४।१३ ॥

४. नाभिं पैतुदारवैः परिदधाति पूर्ववत् ॥ कात्या० श्रौत ५।४।१४।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४८६. **प्रणीताग्न्यभिहोमः**—अध्वर्यु राहवनीये कांचित्समिधमाधाय यजमानान्वारब्धः स्मार्तवत्संस्कृताज्येन **अग्निर्यज्ञं नयतु प्रजानन्नित्यादितिसृभिर्ऋग्भिः स्वाहाकारान्ताभिः स्रुवेण तिस्र आहुतीर्जुहोति** । यथालिङ्गं यजमानस्य त्यागः । यजमानस्तेनैवाज्येन **अग्निरन्नादो ऽन्नपतिरित्यादिभिस्त्रिभिर्यजुर्मन्त्रैः स्वाहान्तैस्तथैव जुहोति** । **अग्नये ऽन्नादायेदं० वायवे प्राणद इदं० आदित्याय भूरिद इदं०** इति क्रमेण यजमानस्य त्यागाः । एवं प्रतिप्रस्थाता समिधमाधाय सकृद् गृहीतेनाज्येन तूष्णीमेकामाहुतिमभिजुहोति । अयं प्रणीताग्न्यभिहोम इत्युच्यते ॥

४८७. एतस्मिन् काले ब्रह्मा दक्षिणस्या वेदेर्दक्षिणतो मन्त्रेणोपविशति । तस्य पश्चाद् यजमानः । ततोऽध्वर्यु रेव संप्रैषप्राह-**ब्रह्मन्नुत्तरौ परिग्राहौ परिग्रहीष्याव** इति । उभौ **ऋतमसीत्यादि यजन्ते** इत्यन्तं कृत्वा स्फ्यौ तिर्यञ्चौ, स्तब्ध्वा तिष्ठतः । ततोऽध्वर्यु रेव संप्रैषमाह—**प्रोक्षणीरासादयतमिध्मबर्हिषी उपसादयत स्रुवौ च स्रुचश्च संमृष्टं पत्नीं सन्नह्याज्याभ्यां दध्ना चोदेतमिति** । आग्नीध्रः प्रोक्षणीः प्रतिप्रस्थातुर्दक्षिणेन हृत्वा उत्तरस्यां वेद्यां स्फ्यस्य वर्त्मनि सादयति । तथा प्रतिप्रस्थाता स्वप्रोक्षणीः सादयति । उभौ स्फ्योपरि किंचित् प्रोक्षणीजलं निनीय **यो मा हृदेत्यादि** स्फ्यप्रक्षालनान्तं कुरुतः । प्रतिप्रस्थातुरुत्तरवेदिमग्रेण पाशुबन्धिकीं वेदिमपरेण वा । आग्नीध्रो वैश्वदेववदाज्यदध्नोरासादनं करोति । **गमनमार्गः संचर** इत्युच्यते ॥

४८८. प्रतिप्रस्थाता दक्षिणवेदिपात्राणि संमृज्य पत्न्यवेक्षणादिभेदेन कृत्वा स्ववेद्यामाज्यमासादयति । यजमानो दक्षिणस्य वेदेर्दक्षिणतः स्वायतन उपविश्य दक्षिणं प्रतिप्रस्थातुराज्यमवेक्ष्य पाशुबन्धिक्या वेदेर्दक्षिणत उपविश्य उत्तरमध्वर्योराज्यमवेक्षते । अथवा वेदिसन्धावुपविश्य दक्षिणमवेक्ष्योत्तरमवेक्षते । अध्वर्यु र्वैश्वदेववदाज्यानि गृह्णाति । प्रतिप्रस्थाता दक्षिणस्यां वेद्यां प्रकृतिदवध्वर्योर्ग्रहणकाले आज्यानि गृह्णाति । अध्वर्योः पृषदाज्यग्रहण्युपस्तरणाभिधारणकाले चतुरुपभृति गृह्णाति । यजमानः उभयं सहानुमन्त्रयते । अनुमन्त्रणमन्त्रेषु **त्वा** इत्यस्य स्थाने **वामित्यस्योहः** । **हविर्देवानामित्यस्य** स्थाने **हविषी देवानामिति** । अध्वर्योः **आपो देवीरित्यादिपरिधिपरिधानान्तं वैश्वदेववत्** । प्रतिप्रस्थातुः प्रकृतिवत् । उभौ प्रस्तरपाणी प्राञ्चावभिसृप्य कार्ष्मर्यमयान् परिधीन् परिधत्तः । यजमानस्य एतदनुमन्त्रणमन्त्रेषु **असीत्यस्य** स्थाने **'स्थ'** इति पदं, प्रथमध्रुवपदस्य ध्रुवाविति । तथा **उग्र इत्यस्य उग्राविति । अभिभूरित्यस्य अभिभुवाविति । त्वेत्यस्य वामिति**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जातवेदा इत्यस्य **जातवेदसाविति**। **ते** इत्यस्य **वामिति**। अध्वर्यु प्रतिप्रस्थात्रोर्**विशो यन्त्रे स्थ** इत्यादिहविरुद्वासनपर्यन्तं समानम्।

हविरुद्वासने उभावाज्यस्थाल्यादीन्यादाय गार्हपत्यस्य पश्चात् प्राङ्मुखावुपविशतः। दक्षिणतः प्रतिप्रस्थाता उत्तरतोऽध्वर्युः। अध्वर्युराग्नेयप्रभृतीनि ऐन्द्राग्नान्तानि हवींषि उद्वासयति। प्रतिप्रस्थाता व्युद्धरणपात्र्यां तूष्णीमुपस्तीर्य मारुतीं गार्हपत्ये पुनरधिश्रित्य अभिघार्य उद्वास्य आमिक्षाशेषं स्थाल्यां परिशेषयन् व्युद्धरणपात्र्यां प्रतिक्षिप्य तदुपरि मेषीमवधाय तस्या मुखे शमीपर्णानि करीरसक्तून् अतिशिष्टामिक्षास्तोकं चावधाय तदुपरि वाजिनशेषमानीय अभिघार्य **यस्त आत्मे**त्यादिमन्त्रेणालं करोति। अध्वर्युरपि मारुतीवद्वारुणीमुद्वासयति। तस्यां मेषमवदधातीति विशेषः। वारुण्याः क्षामकाषमवभृथार्थं स्थापयति। आग्नेयादीन्यैन्द्राग्नान्तानि हवींष्यन्तर्वेद्यासादयति। प्रतिप्रस्थाता मारुतीं मेषीमादाय दक्षिणवेद्यामासादयति। अध्वर्युर्वारुणीमेककपालं च स्व-वेद्यामासादयति। व्याहृतिमन्त्रः प्रत्यासादनमावर्तते। उभौ स्रुवौ ध्रुवयोरवधत्तः। अध्वर्युः प्रतिप्रस्थाता च [1]शालामुखीयस्य पुरस्ताद्वाजिनं तूष्णीमासादयतः। यजमानो दक्षिणस्यां वेद्यामासन्नाभिमन्त्रणं कृत्वा उत्तरस्यामासन्नाभिमन्त्रणं करोति। अध्वर्युरेव वैश्वदेववदग्निमन्थनं करोति। अध्वर्यु प्रतिप्रस्थातारौ स्व-स्वेध्मात् समिधमाधत्तः। अध्वर्युरेव **अग्नये समिध्यमानायानुब्रूहि** इति संप्रेष्यति। उभौ प्रणवे-प्रणवे स्व-स्वाग्नौ समिधमाधत्तः। [2]यजमानः 'अग्निभ्यामिदं०', [3]उच्छुष्मावग्नी यजमा**नाय** स्तं निशुष्मावभिदासते। अग्नी देवेद्धौ मन्विद्धौ मन्द्रजिह्वौ' इत्यनुमन्त्रयते। उभयोरपि स्रौवाधारान्तं समानम्। यजमानः **मनसी स्थः प्राजापत्ये मनसा भूतेनाविशत**मिति स्रौवाधारमनुमन्त्रयते। अध्वर्युराह—**अग्नीदग्नीँस्त्रिस्त्रिः संमृढ्ढि** इति। आग्नीध्रः उत्तरवेदिगतमाहवनीयं संमार्ष्टि। प्रतिप्रस्थाता स्वाग्निपरिधीन् संमृज्य स्वाग्निसंमार्जनमकृत्वा [4]पत्नीं पृच्छति। 'पत्नि कस्ते जार इति। पत्नी 'जारं दर्श-

---

१. द्र० पूर्व पृष्ठ ८६ टि० १।

२. प्रधानँ स्वामी, फलयोगात्। कात्या० श्रौत १।७।१६॥

३. तै० सं० १।६।२।२ पठितस्योहितः पाठः।

४. प्रधास्यान् हवामह इति प्रतिप्रस्थाता पत्नीमुदानयत्येतच्च वाचयति। तां पृच्छति पत्नि कति ते जारा इति। यानाचष्टे तान् वरुणो गृह्णात्विति निर्दिशति। आप० श्रौत ८।६।१६–२१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यति। जाराभावे 'पाप्मा मे जार' इति वदति। प्रतिप्रस्थाता आह—तं वरुणो गृह्णातु ॥

[1]अथैषीके शूर्पे करम्भपात्राणि समोप्य पत्न्यै प्रयच्छति। पत्नी शिरसि एड्वं निधाय तस्योपरि शूर्पं निदधाति। प्रतिप्रस्थाता पत्नीं दक्षिणया द्वारोपनिष्क्रम्य दक्षिणेनान्वाहार्यपचनं दक्षिणेन द्वे वेदी परीत्य प्राचीमुदानयन्वाचयति—**प्रघास्यान् हवामह** इति गायत्रीमृचम्। अध्वर्युरुत्तरमार्गेणागत्य दक्षिणस्या वेदेः पुरस्तात् प्रत्यङ्मुखस्तिष्ठति। तस्य दक्षिणतो यजमानस्तस्य दक्षिणतः पत्नी। यजमानः पत्नीहस्तात् करम्भपात्रसहितं शूर्पं गृहीत्वा शिरसि किंचिन्निधाय तस्योपरि शूर्पं निधाय अप्रणवां [2]**मो षू ण इन्द्र पृत्सु देवे**त्यृचं पुरोनुवाक्यां वदति। पत्न्या सह यजमानो **यद्ग्रामे यदरण्ये** इत्यृचा स्वाहाकारान्तया याज्यया जुहोति। वरुणायेदं न ममेति त्यागो यजमानस्य। शूर्पमग्नावनुप्रहरति। अथ वा अद्भिरभ्युक्ष्य तेन लौकिकानि कार्याणि कुर्यात्। अध्वर्युः यजमानपत्नीप्रतिप्रस्थातॄन् पृथग्गच्छतोऽनुमन्त्रयते [3]**अक्रन् कर्म कर्मकृत** इत्यृचा। ततः प्रतिप्रस्थाता दक्षिणमग्निं संमार्ष्टि **अग्ने वाजजिदित्यादिमन्त्रेण**, आग्नीध्रो वा। उभयोरपि अध्वर्युप्रतिप्रस्थात्रोः **भुवनमसी**त्यादि **ज्योतिरङ्वतामि**त्यन्तं समानम्। यजमानः जौहवाधारयोः दक्षिणहस्तेन प्रतिप्रस्थातारं दर्भेणाध्वर्युं चान्वारभते। जौहवाधारावनुमन्त्रयते—'इन्द्रायेदं वाचौ स्थ ऐन्द्र्य सपत्नक्षपण्यौ वाचा मेन्द्रियेणाविशतम्'।

स्फ्यद्वयं गृहीत्वा अध्वर्युरेव प्रवरं प्रवृणीते। घृतवतीशब्दश्रवणानन्तरमध्वर्युप्रतिप्रस्थातारौ स्व-स्वस्रुवावादाय अत्याक्रम्य तिष्ठतः। अध्वर्युराश्रावयति आग्नीध्रः प्रत्याश्रावयति। अध्वर्युः—प्रेष्यति समिधो यजेति। वषट्कृते उभौ सह स्वाग्नौ जुहुतः। उभयोरपि चतुर्थाष्टमयोः समानयनम्। **उपभृदाज्यस्य जुह्वां ग्रहण समानयन**मित्युच्यते ॥

---

१. संमृज उत्तरोऽग्निर्भवत्यसंमृजो दक्षिणः। अथान्तरावेदीगत्वायजमानः पत्नी चोत्तरेण वोत्तरां वेदिमैषीके शूर्पे करम्भपात्राण्योप्य शीर्षन्नधिनिधाय पुरस्तात् प्रत्यग् भवोतिष्ठन्ती दक्षिणेऽग्नौ शूर्पेण जुहुतः। आप० श्रौत ८।६।२३ ॥

२. मोषूण इन्द्रेति यजमानः पुरोऽनुवाक्यामाह। यद्ग्राम इत्युभोयाज्याम्। आप० श्रौत ८।६।२४।

३. अक्रन्कर्मकर्मकृत इति विपरायन्तौ जपतः। आप० श्रौत ८।६।२५ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४८९. **मारुतीप्रचारो मारुतीयागो वा**-अध्वर्युरष्टमे सर्वं समानयते। प्रतिप्रस्थाता उपभृति अनुयाजार्थमाज्यं परिशेषयति। याजमानं वैश्वदेववत्। अध्वर्युः प्रयाजशेषेण ध्रुवामभिघार्य आग्नेयादिषड्ढवींष्यभिघारयति। ततः प्रतिप्रस्थाता ध्रुवामभिघार्य मारुतीमभिघार्योपभृतमभिघारयति। ततो ऽध्वर्युर्वारुणीमेककपालं पृषदाज्यं चाभिघारयति। उभावाज्यभागान्तं प्रचरतः। ततः प्रतिप्रस्थातोपरमति। अध्वर्युराग्नेयादिषड्ढविर्भिर्यजति। तत उपरमति। प्रतिप्रस्थाता आमिक्षायाः प्रथमावदानेन सह शमीपर्णकरीरसक्त्वामिक्षास्तोकानामर्धमवद्यति। द्वितीयावदानेन सह शमीपर्णाद्यर्धं मेषीं चावद्यति। **प्राणैर्ऋध्यासमिति** यजमानानुमन्त्रणम्। ततः प्रतिस्थातोपरमति। अयं मारुतीप्रचारो मारुतीयाग इति चोच्यते॥

४९०. **वारुणीप्रचारो वारुणीयागो वा**—अध्वर्युः प्रतिप्रस्थातृवद्वारुणीमवद्यति। मेषीस्थाने मेष इति विशेषः। **धर्मभाग्भूयासमिति** यजमानस्यानुमन्त्रणम्। अयं वारुणीप्रचारो वारुणीयाग इति चोच्यते॥

४९१. **एककपालयागः**—अध्वर्युर्द्यावापृथिव्यवत् कायेन प्रचरति। प्रकारविशेषविशिष्टोऽयमेककपालयाग इत्युच्यते॥

४९२. **शविष्ठो भूयासमिति** यजमानस्यानुमन्त्रणम्। अध्वर्युः **नभश्च स्वाहेत्यादिभिर्मन्त्रैश्चतसृभिः** स्रुवाहुतिभिरेककपालमभिजुहोति। यजमानस्य यथालिङ्गं त्यागः। स्विष्टकृदवदाने अध्वर्युरैन्द्राग्नान्तानामुत्तरार्धादवदाय विरमति। प्रतिप्रस्थाता मरुत्या अवदाय विरमति। अध्वर्युर्वारुण्या एककपालस्याशयाज्याच्चावदाय द्विरभिघारयति। उभौ स्व-स्वमेक्षणान्यादाय अत्याक्रम्य स्विष्टकृद्धोमानन्तरं स्व-स्वाग्नौ अनुप्रहरतः। प्रतिप्रस्थाता औपभृतमाज्यं जुह्वामानीय यथायतनं स्रुचौ सादयति। अध्वर्युस्तु पृषदाज्यग्रहणीसत्वाद् आज्यमनानीयैव सादयति। अध्वर्युरेव प्राशित्रमवद्यति इडापात्र्यामैन्द्राग्नान्तान्यवदाय इडापात्रं प्रतिप्रस्थात्र प्रयच्छति। प्रतिप्रस्थाता मारुत्या इडामवदाय इडापात्रमध्वर्यवे प्रयच्छति। अध्वर्युर्वारुण्या अवदाय आशयाज्यादवदाय अभिघार्य इडापात्रं होत्रे प्रयच्छति। प्रतिप्रस्थातुरिडान्वारम्भो भक्षणं च। अन्वाहार्यमासाद्य द्वादश गाः द्वादश वासांसि वा दक्षिणां ददाति। अध्वर्युः प्रतिप्रस्थात्राग्नीधां प्रतिग्रहमन्त्रे यथाद्रव्यं **रुद्राय गां सोमाय वास** इत्यूहः।

वैश्वदेववद्वाजिनयोरासादनम्। तत्र पवित्रकरणान्तमुभयोः। **यजमान वाचं यच्छेत्यध्वर्योरेव। वेषाय त्वेत्यादि** उभौ कुरुतः। अध्वर्युरेव संप्रेषमाह—**प्रोक्षणीरासादयतं चमसौ संमृष्टमिति**। अग्नीत्प्रतिप्रस्थातारौ प्रोक्ष-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ण्यासादनं कुरुतः। अध्वर्युप्रतिप्रस्थातारौ स्फ्योद्यमनादि कुरुतः। अग्नीत्प्रतिप्रस्थातारौ स्व-स्ववेद्यायासादनान्तं कुरुतः। यजमानः दक्षिणस्यासन्नाभिमन्त्रणं कृत्वोत्तरस्य करोति। **अध्वर्युरेव ब्रह्मन् प्रस्थास्याम** इति ब्रवीति। अध्वर्युप्रतिप्रस्थातारौ परिशेषितां स्व-स्वसमिधमाहवनीये आधत्तः। अग्नीत्प्रतिप्रस्थातारौ परिधिसंमार्गादि इध्मसन्नहनप्रहरणान्तं कुरुतः। इदानीमध्वर्युः पृषदाज्यं जुह्वां समानयति। उभौ स्व-स्वस्रुचावादाय अत्याक्रम्य नवानुयाज्यान् यजतः। अध्वर्युरेव प्रथमे ऽनुयाजे **देवान् यजेति** प्रेष्यति। द्वितीयतृतीयौ असंप्रेष्य चतुर्थादिषु **यजेति** प्रेष्यति। स्रुग्व्यूहने यजमानसाहित्यविधानात् प्रतिप्रस्थाता दक्षिणवेद्यां प्रथमं स्रुचौ व्यूहति, ततोऽध्वर्युः। उभौ स्वप्रस्तरसमञ्जनं कुरुतः। अध्वर्युरेवाश्राव्य **इषिता दैव्या होतार** इति प्रैषमाह। **उज्जिति**–वाचने ऐन्द्राग्नान्तानामध्वर्युर्वाचयति, मरुतां प्रतिप्रस्थाता। तदनन्तरमध्वर्युरेव। उभौ सह प्रस्तरं प्रहरतः। यजमानस्यानुमन्त्रणमन्त्रे **त्वेत्यस्य** स्थाने **'वाम्'** इत्यस्योहः। अध्वर्युणा अग्नीदित्युक्ते आग्नीध्रः **संवदेथामित्याह**। अध्वर्युणा **'अगच्छावाग्नीद्'** इत्युक्ते आग्नीध्रः **अगच्छत**मित्याह। अध्वर्युणा **इमे ब्रूहीत्युक्त** आग्नीध्रः **अनुप्रहरत**मित्याह। उभौ स्व-स्वतृणे प्रहरतः। अध्वर्युरेव शंयुवाकप्रैषमाह। आहवनीयोपस्थानादिसंस्रावहोमान्तमुभौ कुरुतः। यजमानस्य परिधिविमोकानुमन्त्रणमन्त्रे **ते** इत्यस्य स्थाने **'वाम्'** इत्यूहः तथा **धत्तात् ब्रूतादित्यनयोर्धत्तं ब्रूत**मिति क्रमेणोहः। अध्वर्योः स्रुग्विमोको वैश्वदेववत्। प्रतिप्रस्थातुः प्रकृतिवत्।

अथ संमृष्टौ चमसौ स्व-स्ववेद्यां निधाय पूर्ववद्वाजिनमानयतः। **वाजिभ्यो ऽनुब्रूहीति** प्रैषादि **वाजिनो यजेत्यन्तमध्वर्योरेव**। प्रतिप्रस्थातुस्तु तूष्णीं चमसं गृहीत्वा अत्याक्रमणमात्रम्। वषट्कृते उभौ जुहुतः। अनुवषट्कारे संस्रावहोमानन्तरं प्रतिप्रस्थाता अध्वर्युणा सह प्रत्याक्रम्य वाजिनशेषम् अध्वर्योर्वाजिनपात्रे निनयति। उपहवप्रकरणे **प्रतिप्रस्थाता वाजिने तृतीय** इत्याश्वलायनसूत्रात् (२।१७।१७) उपहवे प्रतिप्रस्थाता तृतीयः, भक्षणे तु चतुर्थः[1]। मन्त्रस्तु अध्वर्योर्यः स एव। पत्नीसंयाजा अध्वर्योरेव। अध्वर्युप्रतिप्रस्थातारौ यजमानाय वेदं दत्वा वाचयतः। तत्रेत्थमूहः—**वेदो स्थो वित्ती स्थो विदेयकर्मणी स्थः करणे स्थः क्रियास॑सनी स्थः सनितारौ स्थः सनेयं घृतवन्तं कुलायिन॑ रायस्पोष॑ सहस्रिणं वेदौ दत्तां वाजिनमिति**।

---

१. आश्व० श्रौत नारायणवृत्ति २।१७।१७॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ध्रुवाप्यायनादि प्रायश्चित्तहोमान्तमुभौ पृथक् कुरुतः। यजमानध्रवाप्यायनानुमन्त्रणमन्त्रे ध्रुवेत्येकवचनस्य स्थाने **'ध्रुवे'** इति द्विवचनान्तस्योहः। वैश्वदेववत् त्रीणि समिष्टयजूंषि जुहोत्यध्वर्युः। प्रतिप्रस्थाता प्राकृतमेकम्। ब्रह्मोपस्थानप्रणीतानिनयनविष्णुक्रमान्तमुत्तरवेद्यां भवति। नेदानीं व्रतविसर्गः। यजमानः उत्करे उपवेषौ निगूहति—**यौ देवा मनुष्येषूपवेषावधारयन्। ये अस्मदचेतसस्तानस्मभ्यमिहाकुरुतमित्यूहेन।**

अवभृथेष्टिः—ततो वरुणप्रघासाङ्गभूतोऽवभृथः। अध्वर्युः दर्भमुष्टिं वेदं च कृत्वा पाणी संमृश्य अग्नीन् परिस्तीर्य स्पयमग्निहोत्रहवणीं जुहूं स्रुवमाज्यस्थालीं वेदं योक्त्रं वेदपरिवासनं व्युद्धरणार्थस्थालीं च शालामुखीयस्य पुरस्तादुत्तरतो वा सादयित्वा उत्तरवेदिसमीपे ब्रह्माणं तूष्णीमुपवेश्य पृष्ठ्या स्तीर्त्वा पवित्रं कृत्वा **यजमान वाचं यच्छेत्युक्त्वा वेषाय त्वेति** मन्त्रेणाग्निहोत्रहवणीमादाय निष्टप्य प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्य आज्यं निरूप्य अधिश्रित्य वारुणीनिष्कासेन[1] सह पर्यग्नि कृत्वा स्पयमादाय वेद्यां रतब्ध्वा संप्रैषमाह—**प्रोक्षणीरासादय स्रुवं च स्रुचं च संमृढ्धि पत्नीꣳ सन्नह्याज्येनोदे ३ हि** इति। स्पयमुदस्य **प्रत्युष्टꣳ रक्षः प्रत्युष्टा अरातयो ऽग्नेर्वा तेजिष्ठेन तेजसा निष्टपामी**ति मन्त्रेण निष्टप्य संमृज्य अग्रेणोत्करं सादयित्वा पत्नीꣳ सन्नह्य गार्हपत्यमाज्यं चावेक्षयित्वा आज्यं गार्हपत्ये ऽधिश्रित्यादाय गत्वोत्तरवेद्यामधिश्रित्य यजमानमीक्षयित्वा स्वयमवेक्ष्योत्पूय **वैष्णवसि वैष्णवं धामसि प्राजापत्यमित्यभिमन्त्र्य निष्कासं**[1] गार्हपत्ये ऽधिश्रित्य व्युद्धरणपाद्यामुपस्तीर्य वारुणीनिष्कासं तस्मिन्नुद्धृत्य अभिघार्यालंकृत्य वेद्यामासाद्य यजमानेनासन्नाभिमन्त्रणे कृते सस्रुवाज्यस्थालीं वेदं जुहूं बर्हिः प्रतिवसनीये वाससी स्पयं समिधं वारुणीनिष्कासं तुषांश्चादायान्तरेण चात्वालोत्करावुदङ् निष्क्रमत्युरुं **हि राजा वरुणश्चकारेत्यृचा** ॥

यत्रापस्तत्र गत्वापो दृष्ट्वा **शतं ते राजन् भिषज** इत्यृचं यजमानं वाचयति। सर्वे अपां समीपमभितिष्ठन्ति **अभिष्ठितो वरुणस्य पाश**[2] इति मन्त्रेण। यां दिशमवभृथार्थं व्रजन्ति सा दिगेव प्राची[3]। **अग्नेरनीकमप आविवेशेत्यादिमन्त्रेण** अप्सु बर्हिः प्रास्यति। **प्रति ते जिह्व**ेतिमन्त्रेण बर्हिष उपरि

---

१. कुम्भीस्थो वारुण्याश्शेषो निष्कासः। धूर्तस्वामी आप० श्रौत ८।८।८ ॥

२. अभिष्ठितो वरुणस्य पाश इत्युदकान्तमभितिष्ठते। आप० श्रौत ८।७।२६॥

३. सर्वादिशोऽवभृथगमनमाम्नातम्। नोदीचीरभ्यवेत्या इत्येके यां दिशं गच्छेयुस्तथामुखाः प्रचरेयुरित्येके। आप० श्रौत ८।७।१८–२० ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्रुवाहुतिं जुहोति। 'अग्नय इदम्' इति यजमानस्य त्यागः। अध्वर्युः आग्नीध्रं प्रेष्यति—**अग्नीदापस्त्रिः संमृढि**[1] इति। आग्नीध्रः परिभोजनीयदर्भान् स्फ्येनोपसंगृह्यापः संमार्ष्टि—**आपो वाजजितो वाजं व आपः सरिष्यन्तीर्वाजं जेष्यन्तीर्वाजिनीर्वाजजितो वाजजित्यायै संमार्ज्म्यपो अन्नादा अन्नाद्यायेति** मन्त्रेण। अध्वर्युः वेदमुपभृत्स्थाने धृत्वा प्राकृतमन्त्रेण जुह्वां चतुर्गृहीतं गृहीत्वा तेन प्रकृतिवत् त्रीन् प्रयाजान् यजति। उपभृदाज्यग्रहणनियुक्तप्राकृतमन्त्रेण जुह्वां चतुर्गृहीतेन पञ्चमं प्रयाजम्। 'न बर्हिष्मन्तौ प्रयाजानुयाजौ इत्याश्वलायनसूत्रात् (२।१९।१२)। चतुर्थप्रयाजप्रथमानुयाजौ न भवतः। प्रयाजशेषेणाज्यस्थालीमभिघार्य निष्कासमभिघार्याज्यस्थालीं पुनरभिघारयति। प्राकृतेन ध्रुवाज्यग्रहणमन्त्रेण जुह्वां चतुर्गृहीतेन प्रथमाज्यभागम्, पुनस्तथैव गृहीतेन द्वितीयमाज्यभागम्। प्रयाजाज्यभागसंबन्ध्याज्यग्रहणे यजमानस्यानुमन्त्रणं प्रकृतिवत्। **अर्चिस्त्वेत्यादिना** जुह्वामुपस्तीर्य निष्कासादेवावद्यन्नाह—**वरुणायानुब्रूहीति** तूष्णीं द्विरवदाय **अर्चिस्त्वेत्यादिना** ऽभिघार्य आश्राव्य आग्नीध्रेण प्रत्याश्राविते आह **वरुणं यजेति**। वषट्कृते अप्सु जुहोति। यजमानः वरुणायेदं०। अनुमन्त्रणे धर्मभागिति विशेषः। अध्वर्युः पुनर्**चिस्त्वेत्यादिनोपस्तीर्य** सर्वमेव निष्कासं गृहीत्वा स्रुचि स्थापयन्नाह—**अग्नीवरुणाभ्यां स्विष्टकृद्भ्यामनुब्रूहि** होति। **अर्चिस्त्वेत्यादिनाभिघार्याश्राव्य** अग्नीध्रेण प्रत्याश्राविते आह—**अग्नीवरुणौ स्विष्टकृतौ यजेति**। यजमानः **अग्नीवरुणाभ्यामिदं० अग्नीवरुणयोः स्विष्टकृतोरहं देवयज्यायुष्मान् यज्ञेन प्रतिष्ठां गमेयम्** इत्यनुमन्त्रयते। अध्वर्युः परिधिस्थानमुद्दिश्य मन्त्राभ्यां अन्तःपरिधि बहिःपरिधि च संक्षालननिनयने करोति। अथ संप्रैषमाह—**अग्नीदपः सकृत्संमृढि** इति। आग्नीध्रः स्फ्यरहितैर्दर्भैरपः संमार्ष्टि—**आपो वाजजितो वाजं व आपः सस्रुषीर्वाजं वा जिग्युषीर्वाजिनीर्वाज जितो वाजजित्यायै संमार्ज्म्यपो अन्नादा अन्नाद्याय** इति मन्त्रेण। अध्वर्युः **ज्योतिस्त्वेत्यादिना** जुह्वां चतुर्गृहीत्वाप्राकृतौ द्वितीयातृतीयानुयाजौ यजति। **देवौ यज यजेतिप्रैषो** याज्यायाः। अप्सु स्रुचं प्रतिष्ठापयति—**समुद्रे ते हृदयमप्स्वन्तरिति**[2] मन्त्रेण। स्रुचमद्भिः पूरयति **—सं त्वाविशं त्वोषधीरुताप** इति मन्त्रेण। **यज्ञस्य त्वा यज्ञपत** इत्यादिमन्त्रेण

---

१. अग्नीदपस्त्रिः संमृढ्ढीति संप्रेष्यति। आप० श्रौत ८।८।१॥

२. तुषाणां स्थालीं पूरयित्वाप्सूपमारयति समुद्रे ते हृदयमप्स्वन्तरिति। आप० श्रौत ८।८।१२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अप्स्वेवापो जुहोति। यजमानः यज्ञपतय इदं०। अध्वर्युर्निष्कासस्थालीमप्सु निक्षिपति—**सुमित्रा न आप ओषधयः सन्त्विति** मन्त्रेण। यजमानोऽञ्जलिनापो गृह्णाति—**दुर्मित्रास्तस्मै सन्त्वित्यादिमन्त्रेण** नैर्ऋत्यां दिशि निक्षिपति। अध्वर्युस्तूष्णीमप्सु तुषान् विकिरति। यजमानो बुद्बुदान् तुषनिक्षेपोत्पन्नान् स्पृशति। अध्वर्युः वरुणप्रघासानुष्ठानकाले निबद्धं पत्नीयोक्त्रं[1] बौधायनोक्तमन्त्रेण विमुञ्चति। पत्नीयजमानावनूपमृज्जन्तावन्योन्यस्य[2] पृष्ठे धावतः। स्नात्वा प्रतिवसनीये वाससी परिधाय यजमानः पत्नी च प्रतिप्रस्थातारमाहतुः—**प्रतिप्रस्थातरुन्नोनयेति**। प्रतिप्रस्थाता तयोर्हस्तौ गृहीत्वा तिसृभिरुद्वतीभिर्ऋग्भिः यजमानं पत्नीं चोदानयति। **उद्वयं तमसस्परीति उदुत्यं जातवेदसमिति चित्रं देवानामुदगादनीकमिति** च तिस्र ऋच उत्पदघटित्वाद् **उद्वत्य** इत्युच्यन्ते॥

४९३. अन्ये स्वयमेवोत्तरन्ति। यजमान उत्तरन् दक्षिणपादेन तीरदेशं नोदयति—**प्रतियुतो वरुणस्य पाशः प्रत्यस्तो वरुणस्य पाश** इति मन्त्रेण। सर्वे तीर्थमनवेक्षमाणा देवयजनदेशं गच्छन्ति। सर्वे अर्धमार्गे तिस्रस्तिस्रः समिधो गृह्णन्ति। एकैकसमिद्ग्रहणे **एधोऽस्येधिषीमहीति** मन्त्रः। सर्व आगत्य क्रमेण आहवनीये समिधः प्रक्षिपन्ति। तत्र समिधत्रयप्रक्षेपणे त्रयो मन्त्राः **समिदसि स्वाहा, तेजोऽसि स्वाहा, मयि धेहि तेजो स्वाहा** इति। अग्नय इदमिति यजमानस्य सर्वत्र त्यागः। **अपो अन्वचारिषमित्यृचा** सर्वे आहवनीयमुपतिष्ठन्ते। अथावभृथ इत्यत आरभ्य एतदन्तं कर्म अवभृथेष्टिरवभृथ इति चोच्यते॥

४९४. **अग्निसमारोपणम्**—इदानीं यजमानो व्रतं विसृजति। उत्तरवेद्यग्निसमारोपणं वैकल्पिकम्। तस्य करणपक्षे पत्नीयजमानाभ्यामन्वारब्धोऽध्वर्युः समिधि उत्तरवेद्यग्निं समारोपयति—**अयं ते योनिर्ऋत्विय इति** मन्त्रेण। अत्रत्यो ऽग्निरस्यां समिधि प्रविशतु इति भावनया वह्नौ समिधः प्रतापनं समारोपणमित्युच्यते॥

४९५. तां समिधं शालामुखीयेऽभ्यादधाति—**आजुह्वानः सुप्रतीकः पुरस्तादित्यृचा। उदबुध्यस्वाग्न** इत्यृचा आहवनीयं ज्वलयित्वा अपूर्वाज्येन

---

१. इमं विष्यामिति पत्नीयोक्त्रपाशं विमुञ्चते। आप० श्रौत ८।८।१४॥

२. जायापतीस्नातोऽमञ्जन्तावन्योऽन्यस्य पृष्ठेधावतः। द्र० आप० श्रौत ८।१५।१६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्गृहीतेन **सप्त ते अग्न** इत्यृचा पूर्णाहुतिं जुहोति। यजमानस्ततोऽध्वर्यवे वरं ददाति। निर्वपनादि वैश्वदेववत्। तत्र यद्धर्मः पर्यवर्तयदित्यादि पञ्च वाक्यानि पूर्वोक्तान्येव परमेष्ठीत्यादिवाक्यचतुष्टयस्थाने योज्यानि इति विशेषः। यजमानमन्त्रे संवत्सरीणामिति पदस्थाने **परिवत्सरीणा**मिति पदं भवति। इदं द्वितीयं पर्व बहुदेवताकत्वेऽपि वरुणाय घासप्रदानेन वरुणस्य मुख्यत्वाद् **वरुणप्रघास**पदवाच्यम्॥

[३— साकमेधपर्व]

४९६. **अनीकवतीष्टिः**-अथ साकमेधनामकं तृतीयं पर्व। तत्र पूर्वेद्यू रात्रेः पश्चिमयामे अपकृष्य प्रातरग्निहोत्रहोमं कृत्वा 'साकमेधहविर्भिर्यक्ष्ये' इति संकल्प्य तत्रेदानीमग्निमनीकवन्तमष्टाकपालेन पुरोडाशेन यक्ष्य इति संकल्पयति। अस्यामिष्टौ सूर्योदयकाले निर्वापः प्रधानयागो वा भवेत् तथा संपादनीयम्। यजमानस्यान्नाद इत्यनुमन्त्रणम्। अन्वाहार्यमासाद्य तिस्रो गा दक्षिणां ददाति। ब्राह्मणतर्पणान्तमन्यत् सर्वं प्रकृतिवत्। इयमिष्टिरनीकवतीत्युच्यते॥

४९७. **सान्तपनेष्टिः**—ततो मरुतः शिवसांतपनांश्चरुणा यक्ष्य इति संकल्पयति यजमानः। अध्वर्युर्मध्याह्नकाले [यथा] निर्वापः प्रधानयागो वा भवति तथान्त्राधानादौ प्रवर्तते। **प्राणं ऋध्यास**मिति यजमानोऽनुमन्त्रयते। अन्वाहार्यमासाद्य तिस्रो गा दक्षिणां ददाति। ब्राह्मणतर्पणान्ता प्रकृतिवत्। इयं सान्तपनेष्टिरित्युच्यते॥

४९८. **गृहमेधीयेष्टिः**—ततो गृहमेधहविषा यक्ष्य इति संकल्पयति यजमानः। मरुद्भ्यो गृहमेधिभ्यः पयसि चरुः। सायमग्निहोत्रं हुत्वा अन्वाधानादि करोति। व्रतं वैकल्पिकम्। इध्मबर्हिः संभरणं नास्ति। परिभोजनीयान् वेदं च कृत्वा पाणी संमृश्य परिस्तीर्य स्फ्यं स्थालीम् अग्निहोत्रहवणीं शूर्पं कृष्णाजिनमुलूखलं मुसलं जुहूमुपभृतं स्रुवं ध्रुवामिडापात्रं चरुमेक्षणं प्रणीताप्रणयनम् आज्यस्थालीं वेदं दारुपात्रीं योक्त्रं वेदपरिवासनं घृष्टिं चासादयति॥

अत्र प्रणयनं पयसो न त्वपाम्। अतो **ब्रह्मन् पयः प्रणेष्यामी**ति प्रैषादि भवति। प्रोक्षणीरासादय स्रुवं च स्रुचश्च संमृढ्ढि पत्नीं संनह्याज्येनोदेहीति प्रैषः। ध्रुवामन्त्रेण ध्रुवायामेवाज्यं गृह्णाति। **यजमानो भूरस्माकमि**त्यादिनानुमन्त्रयते। प्रोक्षणीशेषनिनयनान्ते वेदिं परिभोजनीयदर्भैस्तूष्णीं स्तृणाति। परिभोजनीयाद् विवृती गृहीत्वा प्रकृतिवत् सादयति। तदुपरि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहूपभृतौ तूष्णीं सादयित्वा ध्रुवां मन्त्रेण सादयति । **एषा सदत्सुकृतस्य लोके तां विष्णो पाहीत्यादिमन्त्रेण** ध्रुवामभिमृशति । ततः सस्रुवाज्यस्थालीं चासाद्य ध्रुवाज्याज्यस्थाल्याज्ये **विष्णुतीस्थे वैष्णवे धामनी स्थः प्रजापत्ये** इति मन्त्रेणाभिमन्त्रयते । आज्यस्थालीं स्रुवं चादाय चरुमभिघार्योदञ्चमुद्वास्य व्युद्धरणपात्रीं निर्णिज्योपरि आज्येन परिस्तीर्य स्थाल्यां किंचित् परिशेषयन्नचालयन्नुद्धृत्याभिघार्य मध्ये गर्तं कृत्वा प्रभूतमाज्यमानीयान्तर्वेद्यासाद्य स्रुवं ध्रुवायामवधाय होतारमामन्त्र्य आग्नीध्रं संप्रेष्यति । अग्नीदग्नींस्त्रिस्त्रिः संमृढ्ढीति । तेन संमार्गे कृते आज्यभागमिष्ट्वा जुह्वामुपस्तीर्य मेक्षणेन चरुमवदाय मरुतो गृहमेधिनो यजति । **प्राणर्क्ऋध्यासमिति** यजमानानुमन्त्रणम् स्विष्टकृद्धोमानन्तरं प्रकृते परिध्यभावात् परिधिस्थानमुद्दिश्य संक्षालनं निनयति । प्राशित्रहरणब्रह्मभागयजमानभागचतुर्धाकरणान्यत्र न भवन्ति । इडामार्जनान्ता प्रकृतिवदन्यत् सर्वम् ॥

अन्वाहार्यमासाद्य यजमानश्चतस्रो गा दक्षिणां ददाति । यथार्थमूहेन ऋत्विजां प्रतिग्रहो भवति । ततोऽध्वर्यु **रिमं विष्यामि**तिमन्त्रेण पत्नीयोक्त्रं विमुञ्चति । यजमानः पौर्णदर्वार्थं [1]क्षामकाषशेषमवशेष्य गृहमेधीयशेषं स्थाल्यां पूर्वशेषितमश्नाति । ततो दक्षिणाग्नौ लौकिकाग्नौ वा प्रतिवेशपत्नीपुत्रादिभोजनपर्याप्तमन्नं पक्त्वा यजमानपत्नीपुत्रादयोऽश्नीयुः । सर्वे आञ्जते ऽभ्यञ्जते[2] च । ततो वत्सान्मातृभिः संवासयन्ति । सवात्ययोस्त्वेतस्यां रात्रौ वत्सं बध्नन्ति ॥

स्थाल्यां दृढसंयुक्तश्चरुशेषः **क्षामकाष** इत्युच्यते ॥

४९९. **सवात्येग वौ**—जीववत्सा मृतवत्सा च ये द्वे गावावेकेन वत्सेन दुह्येते । ते सवात्ये इत्युच्येते ॥

५००. **अग्निहोत्रमपकृष्य पौर्णदर्वहोमः**—अथाध्वर्युरपररात्रे उत्थाय नित्यवत्सायाः पयसाग्निहोत्रमपकृष्य जुहोति । जीववत्सा गौर्नित्यवत्सेत्युच्यते ॥

५०१. **अथ पौर्णदर्वहोमः** अध्वर्युर्गार्हपत्यं परिस्तीर्य उत्तरतो दर्भेषु स्रुक्सदृशीं वैकङ्कतीं दर्वीं स्रुवमाज्यस्थालीं दर्भांश्चासाद्य प्रोक्ष्याज्यं संस्कृत्य

---

१. क्षामकाषशब्दार्थोऽत्रैवान्त उक्तः ।

२. अञ्जनमक्ष्णोः, अभ्यञ्जन पादयोः । इति धूर्तस्वामी, आप० श्रौत ८।११।१३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्वीं स्रुवं च निष्टप्य संमृज्य दर्व्यामुपस्तीर्य सर्वं क्षामकाषमवधाय द्विरभिघार्य पुरोनुवाक्यासंज्ञां **पूर्णा दर्वि परापते**त्यृचं सस्वरां प्रणवान्तां संधाय **देहि मे ददामि ते** इत्यृचा सस्वरया यज्यासंज्ञया सस्वाहाकारान्तया यजमाने ऽन्वारब्धे ब्रह्मणो हिंकारे तिष्ठन्नासीनो वा गार्हपत्ये जुहोति। यजमान **इन्द्रायेदमि**ति त्यागमुक्त्वा—अध्वर्यव ऋषभं ददाति। ततो गार्हपत्यं परिषिञ्चति। अयं पौर्णदर्वहोम इत्युच्यते ॥

५०२. **क्रीडीयेष्टिः**—तदनन्तरमेव मरुतः क्रीडिनो यक्ष्य इति संकल्पयति। मरुद्भ्यः क्रीडिभ्यः सप्तकपालः पुरोडाशः। सूर्योदयकाले यथा निर्वपिः प्रधानयागो वा भवति तथा करोति। **वृत्रहे**ति यजमानस्यानुमन्त्रणे विशेषः। अन्वाहार्यमासाद्य तिस्रो गा दक्षिणां ददाति। ब्राह्मणतर्पणान्ता प्रकृतिवत्। इयं क्रीडीयेष्टिरित्युच्यते ॥

५०३. **महाहविरिष्टिः**—तदनन्तरमेव महाहविर्भिर्यक्ष्य इति संकल्पयति। आग्नेयो ऽष्टाकपालः पुरोडाशः, सौम्यश्चरुः, सावित्रो द्वादशकपालः, सारस्वतश्चरुः, ऐन्द्राग्न एकादशकपालः। ऐन्द्रश्चरुः, वैश्वकर्मण एककपालः। उपांशुप्रकरणे **सावित्रश्चातुर्मास्ये**ष्वित्याश्वलायनसूत्राद् (२।१६।७) एककपालानां सर्वेषामपि तत्प्रकरणे उपांशुत्वस्योक्तत्वाच्च सावित्रवैश्वकर्माणावुपांशू भवतः। प्रसूमयं बर्हिर्विहाय अन्यः सर्वो वैश्वदेववद्विकारो ऽत्रापि भवति। बर्हिःसंभरणे पञ्च मुष्टयः। वेदकरणानन्तरं पाशुकवेदिमानं वरुणप्रघासवत्। उत्तरपरिग्राहात् पूर्वं वैश्वदेववत् कृत्वा वरुणप्रघासवत् सपरिकराग्निप्रणयनान्ते ब्रह्मणि दक्षिणत उपविष्टे उत्तरपरिग्राहपरिग्रहणादि तिर्यञ्चं स्फ्यं स्तब्ध्वा संप्रैषो वैश्वदेववत्। वरुणप्रघासवदादिमानां पञ्चानां यजमानस्यानुमन्त्रणम्। **इन्द्रस्येन्द्रियावी**ति। **विश्वकर्मणे विश्वानि कर्माण्यवरुन्धीये**ति। अत्र सहश्च स्वाहा सहस्यश्च स्वाहा तपश्च स्वाहा तपस्यश्च स्वाहेति मासाहुतयः। सहस इदं सहस्यायेदं तपस इदं तपस्यायेदमिति याजमानम्। आमिक्षाया अभावादत्र न वाजिनयागः। अन्वाहार्यमासाद्य द्वादश गा दक्षिणां ददाति। ब्राह्मणतर्पणान्ता प्रकृतिवत्। इदानीं न व्रतविसर्गः। अध्वर्युर्वरुणप्रघासवदुत्तरवेद्यग्निसमारोपणादि पूर्णाहुत्यन्तं करोति। यजमानः पूर्ववत्तस्मै वरं ददाति ॥

अथ पितृयज्ञः—पूर्वगृहीतव्रतस्याविसृष्टत्वात् प्रक्रान्ता एवाग्नय उपयुज्यन्ते न तु पुनर्विहरणम्। अन्वाहार्यपचनस्य मध्यशङ्कोरञ्जसा दक्षिणतः पुरस्ताद्वा संचरमवशेष्य शङ्कुं निहत्य तस्य दक्षिणतः पुरस्ताद्वा ऽष्टषष्टय-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ङ्गुलमिते देशे शङ्कुः खेयः। स पैतृक्या वेदेर्मध्यं भवति। तस्यानुदिशं वृत्तद्वयं संसर्गेणोत्पाद्याष्टषष्टचङ्गुलमिते देशे शङ्कुं निहन्ति, ताः स्रक्तयो भवन्ति। महापितृयज्ञवेदिकोणाः **स्रक्तय** उच्यन्ते॥

५०४. **पैतृकवेदिः**—अत्र पुरस्तात् पक्षस्तु गार्हपत्यमध्यादष्ट प्रक्रमे द्वादशप्रक्रमे वाहवनीयमध्य इत्यस्मिन् पक्षे युज्यते। एवं पुरुषमात्रां सर्वतश्चतुरस्रां महादिक्षु स्रक्तियुक्तां वेदिं करोति। इयं पैतृकवेदिरित्युच्यते॥

५०५. अङ्गमन्त्रेषु प्रधानमन्त्रेषु च देवशब्दो यत्र-यत्र वर्तते तत्र-तत्र तदनन्तरं पितृशब्दः पठनीयः। केवलाङ्गार्थेषु तु देवशब्द एव। केवलप्रधानार्थेषु देवशब्दस्थाने **पितृ**शब्द एव। यजमानस्य ऋत्विजां च दैवं मानुषं च नाम न ग्राह्यम्। यजमानो महापितृयज्ञहविर्भिर्यक्ष्य इति संकल्पयति। सोमाय पितृमते षट्कपालो व्रीहिमयः पुरोडाशः, पितृभ्यो बर्हिषद्भ्यो यवमय्यो धानाः, पितृभ्यो ऽग्निष्वात्तेभ्यो मन्थः, अग्निः कव्यवाहनः स्विष्टकृत्। अपबर्हिषश्चत्वारः प्रयाजाः। अपबर्हिषौ द्वावनुयाजौ। अत्रापशब्दो वर्जने। तथा च बर्हिः पदरहितप्रयाजानुयाजा **अपबर्हिष** इत्युच्यन्ते॥

५०६. अत्र सर्वमुपांशु। अध्वर्युः प्राचीनावीतं कृत्वा गार्हपत्यदक्षिणाग्न्योरन्वाधानं कृत्वाहवनीयान्वाधानमपि दक्षिणाग्नावेव करोति। तत्रान्वाधानमन्त्राणामङ्गप्रधानोभयार्थत्वाद् देवशब्दानन्तरं पितृशब्दो योजनीयः। यत्र देवशब्दो व्यस्तस्तत्र पितृशब्दोऽपि देवशब्दोत्तरं विभक्तिसजातीयविभक्त्यन्तः। यत्रान्येन पदेन समस्तस्तत्र तत्समासघटकत्वं पितृशब्दस्यापि। **मम देवा विहवे सन्तु सर्व** इत्यादिषु **मम देवाः पितरो विहवे सन्तु सर्व** इत्यादि पठ्यते, इति प्रथमोदाहरणम्। समस्तोदाहरणं वक्ष्यते—**दैव्या होतारे**ति मन्त्रे देवशब्दस्य तद्धितान्तत्वात् पितृशब्दो ऽपि तथा भवति। तथा **दैव्या पित्र्या होतारे**ति। सर्वं बर्हिरमूलमिति[1] पक्षेऽसिदादानादि[2] भवति। समूलपक्षे त्वभ्रिमादाय खनति। बर्हिश्छेदनस्थाने प्रकृतौ असिदनिधाने मन्त्रः पठ्यते—**देवबर्हिर्मा त्वे**त्यादिः। तत्र **देवपितृबर्हिर्मा त्वे**त्यादि पठनीयम्। इदं समस्तोदाहरणम्॥

इध्म संभरणे द्वौ परिधी षट् समिधश्च प्राकृतादिध्मादधिकस्थूला

---

१. अमूलसमूलबर्हिषि विषये आप० श्रौत ८।१७।११–१२ द्र०, तद् व्याख्या च।

२. असिदपदार्थः पृष्ठ १२, संख्याः ८२।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दीर्घाश्च भवन्ति । संभरणमन्त्रे **ततस्त्वामष्टधे**त्यूहः । दक्षिणाग्नेरुत्तरतः स्थित्वा पाणिसंमर्शनं करोति, गार्हपत्यदक्षिणाग्न्योरेव परिस्तरणम् । आहवनीय एवाहवनीयान्वाधानमिति केशवमते तु आहवनीयस्यापि परिस्तरणम् । गार्हपत्यस्योत्तरतस्तृणानि संस्तीर्य तेष्वेकैकशः पात्राणि सादयति । कशिपूपबर्हणे[1] आञ्जनाभ्यञ्जने दशां अप्राकृतं स्फ्यमुदकुम्भौ द्वौ त्रीणि पर्णवृन्तानि परिश्रयणमिति । तदनन्तरमैष्टिकानि सादयति । तत्र स्फ्येन सह षट्कपालानि भर्जनकपालं च मेक्षणेन सहेक्षुशलाकाम् । भर्जनमेक्षणं च दारुपात्र्या सह द्वे नवे पात्रे योक्त्ररहितान्यन्यान्यपि सादयतीति विशेषः ।

दक्षिणाग्नेर्दक्षिणतो ब्रह्मयजमानावुपविशतः । ब्रह्मवरणमन्त्रो 'ब्रह्माणम्' इति पदं विहाय पठनीयः । 'ब्रह्मन्नपः प्रणेष्यामि' 'यजमान वाचं यच्छ' इति मन्त्रस्थाने **अप प्रणेष्यामि वाच यच्छे**ति पठनीयम्, ऋत्विग्यजमानशब्दनिषेधात् । एवमग्रेऽपि सर्वत्र बोध्यम । दक्षिणाग्नेरुत्तरतः प्रणीतासादनम् । गार्हपत्यमध्यादारभ्य दक्षिणाग्निमध्यपर्यन्तं पृष्ठ्यास्तरणम् । निर्वापे विशेषः— स्फ्योपरि पात्र्यौ व्रीहीन् यवांश्च भेदेन निक्षिप्य पूर्वार्धमभिमृशति । अभिमर्शनमन्त्रे त्वं देवानामसीत्यत्र **त्वं पितॄणामसी**ति बर्हिषदं देवहूतममित्यत्र **बर्हिषदं पितृहूतम**मिति च देवशब्दस्थाने पितृशब्दः प्रयुज्यते । अस्य मन्त्रस्य केवलप्रधानार्थत्वात् पुरोडाशीयवीक्षणं शूकनिरसनं च प्रतिधान्यमावर्तते, तन्त्रेणेत्यन्ये । मन्त्रयोस्तु तन्त्रपक्षे हविरर्थकपदानां द्विवचनान्तत्वेनोहः ॥

यज्ञोपवीतं कृत्वा सोमाय पितृमते प्रकृतिवन्निर्वपति । प्रोञ्छनवस्त्रेणाग्निहोत्रहवणीं प्रोञ्छति । पितृभ्यो बर्हिषद्भ्यो यवान्निर्वपति । पितृभ्यो ऽग्निष्वात्तेभ्योऽपि यवानेव । निरुप्ताभिमर्शनातिशिष्टाभिमर्शनैकीकरणमन्त्राणां प्रतिधान्यमावृत्तिः, तन्त्रेणेत्यन्ये । तन्मते मन्त्रत्रयेऽपि हविर्वाचकपदानां द्विवचनान्तता । व्रीहियवयोर्भेदेन प्रोक्षणम् । व्रीह्यवघातकाले यवानुपोद्यच्छन्ते । तन्दुलप्रक्षालननिनयनान्ते यवान्मन्त्रेणोलूखले निधायावहन्ति । षट्कपालान्युपदधाति गार्हपत्यस्य दक्षिणार्धे । तदुत्तरत **आपितृयजं वहे**तिमन्त्रेणाङ्गारमानीय तदुपरि **ध्रुवमसी**तिमन्त्रेण भर्जनकपालमुपधायाधस्तादङ्गारैः परिचिनोति । अस्मिन् काले यवान् उलूखले तूष्णीं परिक्षुद्य भर्जनकपाले **घर्मा स्थे**त्यादि मन्त्रेण प्रक्षिपति । शुक्लकृष्णादिभेदेन बहुरूपा

---

१. कशिपु-उपबर्हणयोः पदार्थः, पृष्ठ ७०, संख्या ४४३, ४४४ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धाना भर्जनकौशलेन कृत्वा ऽवतार्य वितुषीकृत्य द्विधा विभज्य **पितृभ्यो बर्हिषद्भ्यो वः, पितृभ्योऽग्निष्वात्तेभ्यो व** इति क्रमेण भागद्वयमभिमृशति । ततः कृष्णाजिनावधूननादि कृत्वा धानानां द्वितीयं भागमधिवपति । असंवपन्तीतिप्रैषान्तं प्रकृतिवत् करोति । ततः पुरोडाशीयसंवपनादि प्रथनान्तं प्रकृतिवत् कृत्वा पुरोडाशस्योत्तरतो भस्ममिश्रेष्वङ्गारेषु नवं पात्रमधिश्रित्य तस्मिऽस्तिरऽपवित्रं लौकिकमाज्यमानीय तस्मिंस्तिरःपवित्रं धानानामर्द्धं प्रथमाभिमृष्टमावपति । द्वितीये नवे पात्रे तिरःपवित्रमभिवान्यवत्साया दुग्धमानीय तस्मिऽस्तिरःपवित्रं सक्तूनोप्यैकयेक्षुशलाकया दक्षिणाभिमुखो रज्वादिना व्यतिषज्य मन्थति । स्थालीमुखलग्ना विप्रुषोऽन्तः ऽप्रक्षिप्य धानानामुत्तरतो भस्ममिश्रेष्वङ्गारेष्वधिश्रित्याज्यं प्राकृतं तदुत्तरतो निरुप्य हवींषि पर्यग्नि कृत्वा पुरोडाशस्य त्वचं ग्राहयति । अन्ये तु धानानां भागद्वयाभिमर्शनान्ते पुरोडाशीयसंवपनादिधानाप्रथमार्धाधिश्रयणान्तं विधाय द्वितीयधानार्धाधिवपनार्थं कृष्णाजिनावधूननादिमन्थाधिश्रयणान्तमिच्छन्ति । गार्हपत्यस्य पश्चादोप्य निनयनम् ॥

अथ पैतृक्या वेदेर्मध्ये दक्षिणाग्नेरिध्मं प्रणीय दक्षिणतो ब्रह्मयजमानौ उपवेश्य मन्त्रेण वेदमादत्ते । अग्नेः पूर्वार्धात् स्तम्बयजुर्हरति अन्तर्वदि बर्हिर्निधानम् । **देवस्य सवितुः सव** इत्यादिमन्त्रेण यत्प्रकृतौ उद्धननं तत् खननरूपम् तु आलेखनरूपम् । खननाभावादितस्त्रिर्हरेति प्रैषो न । उत्तरपरिग्रहो ऽपि न । पत्नी सन्नहनाभावात् 'प्रोक्षणीरासादय' इत्यादिप्रैषे पत्नीसन्नहनोद्देशो न । आज्यग्रहणे विशेषः—जुह्वां प्राकृतमन्त्रेण पञ्चकृत्वः षट्कृत्वो वा गृह्णाति । उपभृति प्राकृतमयन्त्रेणैव दशकृत्वो द्वादशकृत्वो वा गृह्णाति । ध्रुवायां तु गृह्यमाणस्याज्यस्य उभयार्थत्वाद् देवपदानन्तरं पितृपदस्यापि प्रयोगः । तथा च तादृशप्राकृतमन्त्रेणैव षट्कृत्वः पञ्चकृत्वो वा गृह्णाति । अनुमन्त्रणे यजमानस्यान्तिममन्त्रावृत्तिः । तूष्णीं प्रस्तरग्रहणम् । बर्हिःसन्नहनास्तरणं दक्षिणेवेद्यंसे प्राचीनावीतं कृत्वा दक्षिणासादारभ्य प्रदक्षिणमग्न्यभिमुखैः सन्निकृष्टः प्रथममुष्टिदर्भैरग्निमभितः परिस्तृणाति । प्रथममुष्टिदर्भमूलानि द्वितीयमुष्टिदर्भाग्रैः प्रच्छादयंस्तथैव परिस्तृणाति । यज्ञोपवीती त्रिः प्रदक्षिणं परीत्य प्रस्तरपाणिर्द्वौ परिधी परिदधाति । नोत्तरम् । **युनज्मि त्वा ब्रह्मणा दैव्येन पित्र्येण हव्यायास्मै** इत्यादि प्राकृतमन्त्रेण यजमानो ऽग्निं योगेन युनक्ति । ऊर्ध्वे समिधावग्नावाधायाग्नेः पश्चाद् विधृती सादयित्वा तयोरुपरि तूष्णीं प्रस्तरं न्यस्यति । जुह्वादीन्मन्त्रेण प्रकृतिवत् सादयति । हविरुद्वासने विशेषः—**स्योनन्त** इति मन्त्रेण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पात्र्यां सकृदुपस्तीर्य पात्रान्तरे धानार्थमुपस्तृणाति । तन्मन्त्रे धानापरपदानां बहुवचनान्तत्वम् । व्रीहिपदस्थाने यवपदं च । पात्रान्तरे करम्भार्थमुपस्तृणाति । मन्त्रे तु यथार्थमूहो बोध्यः । धानानामभिघारणे उद्वासने आज्यसंतरणे मन्त्रस्य यथार्थमूहः । एवं करम्भस्यापि ॥

अध्वर्युः सपुरोडाशां दारुपात्रीमाज्यस्थालीं चादायाग्रतो गच्छति । तस्याः पश्चादन्यः कश्चिद् धाना गृहीत्वा गच्छति । करम्भमादाय तथैवान्यः । अध्वर्युर्गार्हपत्यान्वाहार्यपचनयोर्मध्येन गत्वा ऽग्नेः पश्चाद् दक्षिणतः पुरोडाशमासादयति । तस्योत्तरतो धानास्तस्योत्तरतः करम्भम् । वेद्या दक्षिणतः परिश्रयणं निदधाति । वेद्या दक्षिणेऽग्ने स्तीर्णे बर्हिषि कशिपूपबर्हणे आञ्जनाभ्यञ्जने दशामप्राकृतं स्फ्यं च निदधाति । वेद्या उत्तरत उदकुम्भौ । वेद्या दक्षिणतो ब्रह्मयजमानावुपविशतः । उत्तरतो ऽध्वर्युराग्नीध्रश्च । ततो यजमान आसन्नान्यभिमन्त्रयते । एतस्मिन् काले प्रतिप्रस्थाता पाणी संमृश्य प्राकृतवेद्यां पुरोडाशीयपात्राण्यासाद्य प्रतिपुरुषमेकातिरिक्तानेककपालान् त्रैयम्बकान् पुरोडाशांस्तूष्णीं निरुप्योप्य निनयानन्तं करोति । अध्वर्युर्होतारमामन्त्र्य **अग्नये देवेभ्यः पितृभ्यः समिध्यमानायानुब्रूहीति** प्रेष्यति । प्रणवे-प्रणवे एकैकां समिधमाधायैकां समिधमवशेषयति । 'अग्निर्देवो देवान्पितन्यक्षत्सीद' इत्येतावानेव प्रवरः ॥

ऋत्विजां व्यपक्रमणम्—आज्यभागानन्तरं प्राचीनावीतिन ऋत्विजो व्यपक्रामन्ति । यजमानो ऽग्रेणाग्निं परीत्योत्तरत उपविशति । अध्वर्युस्तस्य बाह्यतो ऽग्रेणाग्निं परीत्य दक्षिणतस्तिष्ठति । तस्य बाह्यतो ऽग्रेणाग्निं परीत्य गत्वा ब्रह्मोपविशति । आग्नीध्रस्तस्य बाह्यतो ऽग्रेणाग्निं परीत्य दक्षिणतो गत्वा तिष्ठति । इदमुक्तमृत्विजामितस्ततो गमनं व्यपक्रमणमित्युच्यते ॥

५०७. **हविषां स्रुचां च विपरिहरणम्**—विपरिहरन्ति हवींषि स्रुचश्च । पुरोडाशं धानामग्रेण नीत्वोत्तरतः सादयति । करम्भं धानानां पश्चान्नीत्वा दक्षिणतः सादयति । धाना यथास्थिता भवन्ति । जुहूमुपभृतोऽग्रेण नीत्वोत्तरतः सादयति । ध्रुवामुपभृतः पश्चान्नीत्वा दक्षिणतः सादयति । उपभृत्त्रैव तिष्ठति ॥

वेदिं परिश्रित्योत्तरतो द्वारं कृत्वा परिकर्मिणमाह—**अनेनोदकुम्भेन सन्ततया धारया त्रिरपसलैः[1] परिषिञ्चन परो३हीति** । आग्नीध्रः प्राची-

---

१. द्र० अपसलपदार्थः पृष्ठ ८६ संख्या ४७६ अन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नावीतं कृत्वा कुम्भयोरेकमादायापसलैर्वेदिं त्रिः परिषिञ्चन्पर्येति । कुम्भं यथास्थानं निधाय यज्ञोपवीतं कृत्वा पुनर्वेदिं त्रिः प्रदिक्षणं पर्येति । पुनः प्राचीनावीत्यध्वर्युर्जुह्वामुपस्तीर्य **सोमाय पितृमते ऽनुस्वा३धेत्युपोत्तमं** प्लुतं कृत्वा प्रेष्यति । पूर्वार्धात् पुरोडाशस्यावद्यति । तथा धानानामवद्यति । धानोपस्थानमन्त्रे धानापरपदानां बहुवचनान्तता । अभिमर्शनमन्त्रे ऽपि तथैव । पूर्वार्धात् करम्भस्यावद्यति । अत्रैतेषां त्रयाणां सकृदवदानमभिघार्य क्रमेण प्रत्यनक्ति । तत्र मन्त्रे धानापरपदानां बहुवचनान्तता । अत्याक्रम्योत्तरतो दक्षिणमुखस्तिष्ठन **ओं३ स्वा३धेत्याश्रावयति** । आग्नीध्रो दक्षिणतस्तिष्ठन् **अस्तु स्वा३धेति** प्रत्याश्रावयति । याज्याप्रैषः—**सोमं पितृमन्तं स्वधा कुर्विति** । **स्वा३धा नम** इति होत्रा वषट्कृते जुहोति । **सोमस्य पितृमतो ऽहं देवयज्यान्नादो भूयासमिति** यजमानो ऽनुमन्त्रयते । अध्वर्युः पितृभ्यो बर्हिषद्भ्यो धानानां मध्यार्धादवद्यति, तथा करम्भस्य, ततस्तथैव पुरोडाशस्य । **वृत्रहेति** यजमानस्यानुमन्त्रणे विशेषः । पितृभ्यो ऽग्निष्वात्तेभ्यो ऽपरार्धात् करम्भस्यावद्यति, ततस्तथैव पुरोडाशस्य, तथैव धानानाम् । **वृत्रहेत्यनुमन्त्रणं** यजमानस्य । सर्वत्रान्नाद इत्यनुमन्त्रणमित्यन्ये ॥

स्विष्टकृदर्थं पुरोडाशस्य दक्षिणार्धादवद्यति, तथा धानानां करम्भस्य च । द्विरभिघारयति न प्रत्यनक्ति । भर्जनमेक्षणमिक्षुशलाकां चादायोदङ्ङत्याक्रामति । **अग्निं कव्यवाहनं स्विष्टकृतं स्वधा कुरु** इति स्विष्टकृद्याज्याप्रैषः । पूर्वा आहुतीरतिहाय दक्षिणार्धपूर्वार्धे जुहोति । **यजमानो ऽग्नये कव्यवाहनाय स्विष्टकृत इदं न मम । अग्नेः कव्यवाहनस्य स्विष्टकृतो ऽहं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्याह** । अध्वर्युर्भर्जनमेक्षणमिक्षुशलाकां चानुप्रहृत्य संस्रावेणाभिजुहोति । संक्षालननिनयनान्ते सर्वे यज्ञोपवीतिनो भवन्ति ॥

पूर्ववद्विषरिक्रामन्ति । पुरोडाशमाहृत्य दक्षिणतः सादयति, उत्तरतः करम्भम् । दक्षिणतो जुहूम्, उत्तरतो ध्रुवाम् । ब्रह्मयजमानौ दक्षिणत उपविशतः, उत्तरतो ऽध्वर्युराग्नीध्रश्च । चतुर्धाकरणं नास्ति । इडां यजमानपञ्चमा जिघ्रेण भक्षयित्वा बर्हिषि प्रक्षिपन्ति । हविरुच्छिष्टमुद्वास्य प्राचीनावीतानि कुर्वते । यजमानः पुरोडाशं धानाः करम्भं च पात्र्यां निधाय मिश्रयित्वा त्रीन् पिण्डान् कृत्वा दक्षिणश्रोणिदक्षिणांसोत्तरांसेषु अपसव्यमुद्धत्यावीक्ष्य तेषु पर्णसमान्निधायादिभर्मार्जयति—**मार्जयन्तां पितरः, मार्जयन्तां पितामहाः, मार्जयन्तां प्रपितामहा** इति मन्त्रैः क्रमेण । तेषु क्रमेणैकैकं पिण्डं ददाति । एतत्ते ततामुकशर्मन्ये च त्वामन्विति प्रथमम्, ततपदस्थाने

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पितामह पदघटितेन द्वितीयम्, प्रपितामहपदघटितेन तृतीयम्। **एषा युष्माकमियमस्माकमिमां वयं जीवा जीवन्तो ऽनुसंचरन्तो भूयास्मेति** मन्त्रेणोत्तरस्यां श्रोण्यां लेपं निमार्ष्टि। इदं प्रतिपिण्डं सर्वान्ते वा। **अत्र पितरो यथाभागं मन्दध्वमिति** वदति॥

सर्वे गार्हपत्याहवनीययोरन्तरेणोदञ्चौ निष्क्रम्य यज्ञोपवीतानि कृत्वाहवनीयमुपतिष्ठन्ते – **सुसंदृशमित्यृचा** प्रणवान्तया, स च प्रणवो यावदुच्छ्वासप्रतिबन्धसामर्थ्यं स्यात् तावत् प्रयोक्तव्यः। **अक्षन्नमीमदन्तेत्यृचा** तथैव गार्हपत्यमुपतिष्ठन्ते। प्राचीनावीतानि कृत्वा दक्षिणाग्निमभिप्रपद्यन्ते **अक्षन्पितरो ऽमीमदन्तेत्यादिमन्त्रेण**। तं प्राप्योपतिष्ठन्ते – **परेतन पितर** इत्यृचा प्रणवान्तया पूर्ववत्। अथाध्वर्युः पूर्ववदनेनोदकरम्भेणेत्यादिप्रैषमाह। तत आग्नीध्रः परिषेचनादि पुनः पर्येतीत्यन्तं पूर्ववत् करोति। यजमानो **मार्जयन्तां पितर** इत्यादिमन्त्रैः पूर्ववन्मार्जयति। **पितरस्तृप्यन्त्विति** मन्त्रेण पिण्डसमीपे कशिपूपबर्हणे निदधाति। **आञ्जतां पितर** इत्यादिमन्त्रैः प्र येकं पिण्डदानक्रमेण पिण्डानाञ्जनेनाङ्क्ते। **अभ्यञ्जतां पितर** इत्यादिमन्त्रैः पिण्डांस्तथैवाभ्यङ्क्ते। **एतानि वः पितरो वासांसीत्यादिभिस्त्रिभिर्मन्त्रैः** प्रत्येकं पिण्डदानक्रमेण विभज्य त्रेधा कृतां दशां वस्त्रस्थाने ददाति। आञ्जनादिषु द्वितीयतृतीयमन्त्रयोः पितृपदस्थाने पितामहप्रपितामहपदे भवतः। ततः षड्भिर्नमस्कारैरुपतिष्ठते—**नमो वः पितरो रसाय पितरो नमो वो य उतस्मिन् लोके स्थेत्यादयः** षण्मन्त्राः **षण्नमस्कारा** इत्युच्यन्ते॥

५०८. **वीरं मे दत्तेत्यादिर्मन्त्रस्तस्य** द्वितीयतृतीयपदयोर्मध्ये **पितर** इत्यस्य **पितामहा** इत्यस्य **प्रपितामहा** इत्यृक्पदस्य क्रमेण प्रवेशे मन्त्रत्रयं संपद्यते।[1] तेन मन्त्रत्रयेण वीरं याचते। **उत्तिष्ठत पितरः प्रेतेत्यृचा** पितॄनुत्थापयति। **यन्तु पितरो यथालोकमित्यृचा** पितॄन्मनसा स्वस्थाने निवेशयति। **मनो ऽन्वाहुवामह** इत्यृक्त्रयेण पितॄननुगतं मन आहूयते। ततः पिण्डान् पर्णवृन्तैः सहाग्नावनुप्रहरति। परिश्रयणमपनीय यज्ञोपवीतिनः सर्वे भवन्ति। **देवौ यजं यजेत्यनुयाजप्रैषे** विशेषः। **इषिता देव्याः पित्र्या होतार** इति सूक्तवाकप्रैषे विशेषः। प्रस्तरप्रहरणानुमन्त्रणे **देवतामित्यस्यानन्तरं पितृनित्यस्य** प्रक्षेपः। अत्र ऋत्विङ्नामग्रहणनिषेधात् प्रकृतिप्राप्तस्याग्नीदिति संबोधनस्याभावात् केवलं तृणं प्रदर्शयन्नाग्नीध्रमीक्षते। परि-

---

१. **वीरं मे पितरो दत्त, वीरं मे पितामहा दत्त, वीरं मे प्रपितामहा दत्त, इत्येवं पदप्रवेशः कार्यः।**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

धेरेकत्वात् प्राकृतपरिधिद्वयप्रहरणमन्त्रे **इत**मित्यस्य स्थाने **इहीत्येकवचनम्**। प्रहरणानुमन्त्रणे **देवतास्वित्यस्यानन्तरं पितृष्वि**ति प्रयोक्तव्यम्। पत्नी-संयाजानां निषेधः। दक्षिणाग्नौ प्रायश्चित्तफलीकरणहोमौ हुत्वा ध्रुवामाप्याययति। यजमानः स्वभागं जिघ्रेण भक्षयति। अध्वर्युः प्रायश्चित्तानि हुत्वा समिष्टयजुर्जुहोति। प्रणीतानिनयनान्ते सर्वं ब्राह्मणतर्पणान्तं यजमानं कर्म। तत्राशीर्मन्त्रेषु नामग्रहणनिषेधा**दाशिषमाशासे तन्तवे** इत्येव ब्रूयात्। नात्र व्रतविसर्गः। प्राचीनावीतानि कृत्वा कशिपूपवर्हणादीनि द्वे द्वे उद्वासयन्ति। यज्ञोपवीतिनः **प्रजापते न त्वादि**त्यृचा गार्हपत्यमुपतिष्ठन्ते। **यदन्तरिक्षं पृथिवी**मित्यृचं जपन्ति। सर्वाग्निप्रणयने तु यथास्थानमग्निमानयन्ति। एतावत् सपरिकरं कर्म साकमेधपर्वान्तर्गतं पितृदेवताकत्वान्**महापितृयज्ञः पित्र्येष्टि**रिति चोच्यते॥

५०९. **त्रैयम्बिकेष्टि**—एतदनन्तरं प्रतिप्रस्थाता त्रैयम्बकाननभिघारितान् पुरोडाशानुद्वास्य शरावे प्रक्षिप्य कपालान्युद्वासयति। अध्वर्युर्नीललोहिते सूत्रे तथा त्रयाणां पलाशपर्णानामन्तिमं पर्णं तथा ग्रामसमीपस्थद्विजगृहाद् दक्षिणाग्नेर्वा एकमुल्मुकं दर्भानुदपात्रं चादत्ते। **यावन्तो गृह्याः स्मे**त्यादिमन्त्रेण सर्वे गार्हपत्यमुपतिष्ठन्ते। उदङ्मुखाः किं चित्स्वगृहाद् बहिर्गत्वा चतुष्पथं प्राप्य तत्रोपलिप्योल्मुकं समाधाय ज्वलयित्वा परिस्तीर्यान्तिमे पलाशपर्णे सर्वेषां त्रैयम्बकाणामुत्तरार्धात् सकृत्सकृदवदायोपस्तरणाभिधारणवर्जम् **एक एव रुद्रो न द्वितीयाये**त्यादिमन्त्रेण तिष्ठन् जुहोति। रुद्रायाम्बिकाय इदं न ममेति यजमानस्य त्यागः। अन्तिमपर्णं द्वेष्यगोष्ठेऽ आखुवटे[1] वा न्यस्यति। त्रैयम्बकाणामेकैकं प्रतिपुरुषं प्रयच्छति। द्वौ यजमानाय। सर्वे दक्षिणानूरूपघ्नास्त्र्यम्बकं **यजामह** इत्यृचाग्निं प्रदक्षिणं परियन्ति। उत्तरतः स्थित्वा **भगाय त्वे**ति मन्त्रेण पुरोडाशान् हस्ताभ्यामूर्ध्वं गृह्णन्ति। एवं प्रदक्षिणगमनादि त्रिः कुर्वन्ति। पतिकामा कन्या तु सव्यमूरुमपघ्नानाऽपसव्यं पर्येति। **पुष्टिवर्धन**पदस्थाने **पतिवेदन**पदं तथा चतुर्थपादस्थाने **इतो मुक्षीय मा पते**रिति च विशेषः। ततोऽध्वर्युः सर्वान्पुरोडाशान् **प्रजया त्वा पशुभिरि**त्यादिमन्त्रेण यजमानस्याञ्जलावावपति। अनेनैव मन्त्रेण यजमानः पत्न्यञ्जलावावपति। पत्नी भगकामाय दुहितुरञ्जलौ **भगेन त्वा संसृजामी**त्यादिमन्त्रेणावपति। अध्वर्युः सर्वान् पुरोडाशान् गृहीत्वा तृणनिर्मिते मूते प्रक्षिप्य नीललोहिताभ्यां सूत्राभ्यां विविधं बध्वा

---

१ आखुवटो मूषकबिलम्॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तत् प्रदेश एव शुष्के स्थाणावर्धच्छिन्ने वृक्षस्य शुष्कशाखायां वा मूतं तूष्णीं वध्नाति। सर्वं मूतं प्रेक्षमाणा देवमुपतिष्ठन्ते—**एष ते रुद्रभाग** इत्यादिमन्त्रेण प्रणवान्तेन। यावदुच्छ्वासं प्रणवोच्चारणम्। आत्मनो मूतस्य च मध्ये दीर्घधारारूपेणोदकं निनीयोदपात्रं तत्रैव परास्यानवेक्षमाणा आयान्ति। हस्तपादान् प्रक्षाल्य यथागतमागत्य महाहविः प्रणीतेष्वेवाग्निषु अन्वाधानादिकं कृत्वा **आदित्येष्टिः**—आदित्यं चरुं निर्वपति। सप्तदश सामिधेन्यः। **अꣳहसो मुच्येय**मिति यजमानस्यानुमन्त्रणम्। अन्वाहार्यमासाद्य तिस्रो गा दक्षिणां ददाति। इदानीं व्रतविसर्ग इयं प्रसिद्धेष्टिरादित्येष्टिरिति चोच्यते॥

५१०. निवर्तनादि वैश्वदेववत्। मन्त्रेविशेषः। **य इमां महीं पृथिवी**मित्यादीनि षड्वावयानि पठित्वाऽग्निस्तिग्मेनेत्यादिवाक्यानि पूर्ववत्। इदं सर्वं तृतीयं **साकमेधपर्वे**त्युच्यते॥

[४—शुनासीरीयपर्व]

५११. **अथ शुनासीरीयना**मकं चतुर्थं पर्व—यजमानः शुनासीरीयहविर्भिर्यक्ष्य इति संकल्पयति। आग्नेयोऽष्टाकपालः पुरोडाशः, सौम्यश्चरुः, सावित्रो द्वादशकपालः पुरोडाशः, सारस्वतश्चरुः, पौष्णश्चरुः, ऐन्द्राग्नो द्वादशकपालः पुरोडाशः, वैश्वदेवश्चरुः, इन्द्राय शुनासीराय द्वादशकपालः पुरोडाशः, वायव्यं पयः, सौर्य एककपालः पुरोडाशः। सविता सूर्यश्चोपांशु। शाखाहरणं कृत्वा वैश्वदेववदिध्मावर्हिः सन्नहनादिकरोति। न सायंदोहः। पूर्वेद्युरन्वाधानम्। पात्रासादने विशेषः। पञ्चचत्वारिंशत्कपालानि पञ्च चरुस्थाल्यस्तावन्ति मेक्षणानि च। तन्दुलप्रक्षाल्ननिनयनान्ते प्रातर्दोहः। तत्र प्राकृतमन्त्रेषु प्राकृतदेवतास्थाने **वायु**पदं बोध्यम्। इन्द्राय शुनासीराय कपालोपधानानन्तरं पयः स्थालीमुपधाय तस्यां प्रातर्दोहमानीय मेक्षणेनालोड्य श्रपयति। तदुत्तरतः सूर्यायैकं कपालमुपदधाति। अग्नीदितस्त्रिर्हरेत्यन्तं वैश्वदेववत्।

उत्तरवेदेर्विकल्पः। तत् पक्षेऽथ याचति स्फ्यमुदपात्रमित्यादि महाहिर्वत्। पञ्चविधं बर्हिः तदभावपक्षे ब्रह्मन्नुत्तरमित्यादि वैश्वदेववद्वाजिनवर्जम्। **इन्द्रियाव्यन्नाद** इति शुनासीरीययागानुमन्त्रणम् **रलभा**गिति वायोः। **सुदशीक** इति सूर्यस्य। अध्वर्युरेककपालं सकृद्गृहीतेनाभिजुहोति **सꣳसर्पो ऽसी**त्यादिमन्त्रेण। यजमानः 'सꣳसर्पायाꣳहसस्पत्यायेदं न मम' इति त्यक्त्वान्वाहार्यमासाद्य द्वादशगवं सीरं प्रथमजं वत्सं वा दक्षिणां ददाति। प्रतिगृहमन्त्रे ऋत्विजां ब्रह्मणे द्वादशगवं सीरमिति विशेषः। निवर्तनादि वैश्व-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देववत्। मन्त्रे विशेषः। **एकं मासमुदसृंजदित्यादीनि** द्वादशवाक्यानि पठित्वा **ऽग्निस्तिग्मेत्यादि** वैश्वदेववत्। 'अनुवत्सरीणाँस्वस्तिमाशास्ते' इति विशेषः। इदं चतुर्थं शुनासीरीयपर्वेत्युच्यते॥

[सवनेष्टिः]

५१२. **अथ सवनेष्टिः**—आग्नेयोऽष्टाकपालः पुरोडाशः। ऐन्द्राग्न एकादशकपालः। वैश्वदेवो द्वादशकपालः। सर्वं प्रकृतिवत्॥ इयं सवनेष्टिरित्युच्यते॥

[काम्येष्टयः]

५१३. **काम्येष्टिप्राङ्निगमाः**—काम्या इष्टेः करिष्यमाणो यजमानः पूर्वं संवत्सरं द्वादशाहं वा जपादिभिः पूतः पयोव्रती ब्रह्मचारी भवति। ऋत्विजोऽपि पयोव्रतरहितनिगमान् कुर्वन्ति। एते धर्माः **काम्येष्टिप्राङ्निगमा** इत्युच्यन्ते॥

यासां कालविशेषो नोपदिष्टस्तासां काम्यानां पर्वणि शुक्लपक्षे देवनक्षत्रे प्रयोगः। नैमित्तिकेष्टीनां तु निमित्तानन्तरमेव॥

५१४. **प्रजाकामेष्टिः**—यजमानः प्रजाकामः प्रजाकामेष्टिया यक्ष्ये इति संकल्पयति। सद्यस्काला इयमिष्टिः। ऐन्द्राग्नो व्रीहिमय एकादशकपालः पुरोडाशः, सप्तदक्षसामिधेन्यः, पौर्णमासतन्त्रम्। अध्वर्युः पाणिसंमर्शनान्तरं गार्हपत्ये स्नार्तवदाज्यं संस्कृत्याहवनीये चतुर्होतृकूष्माण्डसारस्वतहोमं करोति। प्रधानमुपांशु। अन्वाहार्यमासाद्य वासो दक्षिणां ददाति। पुनरालम्भवर्जं सर्वं प्रकृतिवत्। वार्त्रघ्नावाज्यभागौ शुक्लपक्षे, वृधन्वन्तावपरपक्षे। अथ वा अग्नीषोमविकारे वार्त्रघ्नौ, ऐन्द्रसान्नाय्यविकारे तु वृधन्वन्तौ इत्यापस्तम्बसूत्रम्। **उभावामिन्द्राग्नी आहुवध्या** इति प्रधानस्य पुरानुवाक्या। **अश्रवं हि भूरि दावत्तरावामिति** याज्या। **अबोध्यग्निः समिधा जनानामिति** स्विष्टकृतोऽनुवाक्या। **अवोचाम कवये मेध्यायेति** याज्या। अन्यत्सर्वं हौत्रं प्रकृतिवत्। इयं प्रजाकामेष्टिरित्युच्यते॥

५१५. **इन्द्रियवीर्यप्रतिष्ठाकामेष्टिः**—धर्मसभायां व्यवहारादिभाषणायेन्द्रियवीर्यप्रतिष्ठार्थमिष्ट्या यक्ष्ये इति संकल्पः। **इन्द्राग्नी रोचनादिव** इति प्रधानानुवाक्या। **इनथद् वृत्रमिति** याज्या। अन्यत्सर्वं प्रजाकामेष्टिवत्। इयमिन्द्रियवीर्यप्रतिष्ठाकामेष्टिरुच्यते॥

५१६. **अनुनिर्वापपौष्णेष्टिः**—एतद् इष्टिविधानानन्तरं श्रुतौ **पौष्णं**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चरुमनुनिर्वपतेत्युक्तम् । इन्द्रियवीर्यप्राप्त्यर्थमिष्ट्या यक्ष्य इति संकल्पः । पूषा देवता, चरुर्द्रव्यम् । **वयमुत्वापथस्पत** इति । प्रधानानुवाक्या । **पथस्पथः परिपति वचस्ये**ति याज्या । **पुष्टिमान् पशुमानि**त्यनुमन्त्रणम् । यत्र विशेषतः संयाज्ये नोक्ते तत्र पूर्वेष्टिगते संयाज्ये भवतः अन्यत्प्रकृतिवत् । इयमनुनिर्वापपौष्णेष्टिः ।

५१७. **क्षैत्रपत्येष्टिः**—जनसमूहं प्राप्तो यजमानः प्रतिष्ठाकाम इष्ट्या यक्ष्य इति संकल्पयति । क्षैत्रपत्यश्चरुः । **क्षेत्रस्य पतिना वयमि**त्यनुवाक्या । **क्षेत्रस्य पते मधुमन्तमूर्मि**मिति याज्या । **अन्नाद** इत्यनुमन्त्रणम् । अन्यत्प्राकृतम् । इयं क्षैत्रपत्येष्टिः ॥

५१८. **राक्षोघ्नेष्टिः**—रक्षोगणपीडानिवृत्त्यर्थममावास्यायां महारात्रे रक्षोहननार्थमिष्ट्या यक्ष्य इति संकल्पयति । अग्नये रक्षोघ्नेऽष्टाकपालः पुरोडाशः । वस्त्रादिना परितः श्रयणं कृत्वा प्रधानयागः । देवताया यद्विशेषणं स गुण इत्युच्यते ॥

५१९. तथा च प्रकृतेऽग्ने रक्षोहेति विशेषणं गुणस्तस्य विशेष्यविभक्त्यन्तस्य विशेष्योद्देशानन्तरं गुणस्यापि निर्देशः । एवं सर्वगुणानाम् । **कृणुष्वपाजः प्रसिति**मिति पञ्चदशर्चः आद्याभ्यासरहिताः सामिधेन्यः । **रक्षोहणं वाजिनमाजिघर्म** इति पुरोनुवाक्याऽविज्योतिषा बृहतेति **याज्या अन्नाद** इत्यनुमन्त्रणम् । प्राक् स्विष्टकृतः स्रुवाहुतिमुपजुहोत्यध्वर्यु **रुत स्वानास** इत्यृचा । परिश्रयणं दूरीकृत्य स्विष्टकृदादि । अन्यत्प्राकृतम् । इयं राक्षोघ्नेष्टिः ॥

५२०. **सुरभिमदिष्टिः**—गोमरणनिवृत्यर्थं पुरुषमरणनिवृत्यर्थं भयनिवृत्यर्थं पूतिगन्धनिवृत्यर्थं च पृथगिष्टिसंकल्पः । अग्नये सुरभिमतेऽष्टाकपालः । प्रोक्षणीषु सुगन्धान् निक्षिपति । सुगन्धवन्त ऋत्विजः कर्म कुर्वन्ति । **अग्निर्होतान्यसीददि**त्यनुवाक्या । **साध्वीमकर्देववीति**मिति याज्या । उक्तमनुमन्त्रणम् । प्राकृतमन्यत् । इयं सुरभिमदिष्टिः ॥

५२१. **क्षामवदिष्टिः**—शेषजातिमरणनिवृत्यर्थं संकल्पः । अग्नये क्षामवतेऽष्टाकपालः । **अक्रन्ददग्निस्तनयन्नि**त्यनुवाक्या । **त्वे वसूनि पुर्वणीके**ति याज्या । अग्निदेवताकयागे प्रायोऽन्नाद इत्यनुमन्त्रणम् । गृहदाहनिवृत्तयेऽपीयमेवेष्टिः । इयं क्षामवदिष्टिः ॥

५२२. **कामेष्टिः**—प्रतिबन्धकनिवृत्त्या काम्यकर्मफलःसिद्धयर्थं संकल्प्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्नये कामायाष्टाकपालः । **तुभ्यं ता अङ्गिरस्तमे**त्यनुवाक्या । **अश्याम तं काम**मिति याज्या । इयं कामेष्टिः ॥

५२३. **आयुष्कामेष्टिः**—सर्वायुः सिद्धचर्थं संकल्पः । अग्नय आयुष्मतेऽष्टाकपालः । इन्द्राय त्रात्रे एकादशकपालः । **आ नो अग्ने सुकेतुने**त्यग्नेराज्यभागस्यानुवाक्या । **त्वं सोम महे भग**मिति सोमस्य । अनयोर्जीवातुपदसत्त्वादिमौ जीवातुमन्तावुच्यते ॥

५२४. **आयुष्टे विश्वतो दधदि**त्यग्नेरायुष्मतोऽनुवाक्या । **आयुर्दा अग्न** इति याज्या । **त्रातारमिन्द्रमि**ति त्रातुरिन्द्रस्यानुवाक्या । **मा ते अस्या**मिति याज्या । उभयत्रायुष्मानित्यनुमन्त्रणम् । **पाहि नो अग्न एकये**ति **अग्ने स्वं पारयानव्यो अस्मा**निति च संयाज्ये । इयमायुष्कामेष्टिः ॥

५२५. **भूतिकामेष्टिः(१)**—भूतिकाम इष्टया यक्ष्य इति संकल्पः । अग्नये जातवेदसेऽष्टाकपालः । **तस्मै ते प्रतिहर्यते**त्यनुवाक्या । **दिवस्परि प्रथमं जज्ञ इति** याज्या । **भूतिमानि**त्यनुमन्त्रणम् । इयं भूतिकामेष्टिः ॥(सं०५४३द्र०)

५२६. **रुक्मकामेष्टिः**—रुचं कामयमानः संकल्प्य अग्नये रुक्मवतेऽष्टाकपालः । **शुचिः पावकबन्धु** इत्यनुवाक्या । **दृशानो रुक्म उर्व्या व्यद्यौ**दिति याज्या । इयं रुक्मकामेष्टिः ॥

५२७. **तेजस्कामेष्टिः**—तेजस्कामः संकल्प्य अग्नये तेजस्वतेऽष्टाकपालः । **आयदिषे नृपति तेज आनडि**त्यनुवाक्या । **स तेजीयसा मनसे**ति याज्या । इयं तेजस्कामेष्टिः ॥

५२८. **अन्नकामेष्टिः**—अग्नयेऽन्नवतेऽष्टाकपालः । **उक्षान्नाय वशान्नाये**त्यनुवाक्या । **वद्याहि सूनो अस्ये**ति याज्या । इयमन्नकामेष्टिः ॥

५२९. **अन्नाद्यकामेष्टिः**—अन्नाद्यकामः संकल्पः अग्नयेऽन्नादायाष्टाकपालः । **तुभ्यं ता अङ्गिरस्तमे**ति पुरोनुवाक्या । **तं अश्याम तं कामग्न इति** याज्या । इयमन्नाद्यकामेष्टिः ॥

५३०. **अन्नपतित्वकामेष्टिः**—अन्नपतित्वकामस्य अग्नयेऽन्नपतयेऽष्टाकपालः । पूर्वेष्टिगते याज्यानुवाक्ये । इयमन्नपतित्वकामेष्टिः ॥

५३१. **चिररोगमुक्तिकामेष्टिः**—दीर्घरोगमुक्त्यर्थं संकल्प्य अग्निः पवमानः, अग्निः पावकः, अग्निः शुचिः एतास्तिस्रो देवताः । द्रव्याण्यष्टाकपालाः पुरोडाशाः । अन्वाहार्यमासाद्य हिरण्यं दक्षिणां ददाति । **अग्न अग्ने पवमानस्य आयूंषि पवस** इत्यनुवाक्या । **अग्ने पवस्वे**ति याज्या । **अग्ने**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पावक रोचिषेत्यनुवाक्या । स नः पावक दीदिवे अग्नेः पावकस्य इति याज्या । **अग्निः शुचिव्रततम** इत्यनुवाक्या । **उदग्ने शुचयस्तवेति** अग्ने शुचेः याज्या । इयं चिररोगमुक्तिकामेष्टिः ।।

५३२. **चक्षुःकामेष्टिः(१)**[1]—चक्षुष्कामस्य चक्षुर्दोषनिवृत्त्यर्थम् इष्ट्या यक्ष्ये इति संकल्पः । पूर्वेष्टिवत्सर्वम् । इयं चक्षुष्कामेष्टिः ।।

५३३. **पुत्रकामेष्टिः**—पुत्रकामस्य अग्नये पुत्रवतेऽष्टाकपालः, इन्द्राय पुत्रिणेऽष्टाकपालः । **यस्त्वा हृदा कीरिणेति** प्रथमस्यानुवाक्या । **यस्मै त्वं सुकृते जातवेद** इति याज्या । **त्वे सु पुत्र शवस** इति द्वितीयस्यानुवाक्या । **उक्थ-उक्थे सोम इन्द्रं ममादेति** याज्या । स्विष्टकृतोऽग्निस्तुविश्रवस्तम-मित्यनुवाक्या । **अग्निर्ददाति सत्पतिमिति** याज्या । इयं पुत्रकामेष्टिः ।

५३४ **रसकामेष्टिः**— रसकामस्य अग्नये रसवतेऽजक्षीरे चरुः । अत्र पयसः प्रणयनं नापाम् । **अग्ने रसेन तेजसेत्यनुवाक्या । आपो अद्यान्वचारिषमिति** याज्या । इयं रसकामेष्टिः ।।

५३५. **वसुकामेष्टिः**—वसुकामस्य अग्नये वसुमतेऽष्टाकपालः । **वसुर्वसुपतिर्हिकमित्यनुवाक्या । त्वामग्ने वसुपतिं वसूनामिति** याज्या । इयं वसुकामेष्टिः ।।

५३६. **अभिशापनिवृत्तीष्टिः**—पतितत्वेन जनैरभिशस्यमानस्येष्टिः— वैश्वानराय द्वादशकपालः, वरुणाय चरुः, दधिक्राचरुः । **वैश्वानरो न ऊतये-** इत्यनुवाक्या वैश्वानरस्य, **त्वमग्ने शोचिषेति** याज्या । वरुणस्य **अव ते हेडा वरुणेत्यनुवाक्या, उदुत्तमं वरुणेति** याज्या । **दधिक्राव्णो अकारिषमिति** दधिक्राव्णोऽनुवाक्या, **आ दधिक्राः शवसा पञ्च कृष्टीरिति** याज्या । अन्वाहार्यमासाद्य हिरण्यं दक्षिणा । इयमभिशापनिवृत्तीष्टिः ।।

५३७. **ग्रामकामेष्टिः(१)**[2]-ग्रामकामस्य अग्नये वैश्वानराय द्वादशकपालः, मरुद्भ्यः सप्तकपाल आहवनीयायतनाद् बहिः वैश्वानराय द्वादशकपाला-न्युपधाय प्रदक्षिणमावृत्य गार्हपत्यस्य पश्चान्मरुद्भ्यः सप्तकपालान्युपद-धाति । तत्तदग्निना पर्यग्निकरणम् । दक्षिणं परिधिसन्धिं विमुच्य वैश्वा-नरमुद्वासयति । दक्षिणपरिधिमग्रेण वा । पात्रान्तरे मारुतमुद्वास्य गार्हपत्य-समीपे स्थापयति । वेद्यां वैश्वानरमासादयति । सामिधेन्यनुवचनकाले वेद्यां

---

१. द्वितीया चक्षुष्कामेष्टिः ५५८ पदार्थसंख्यायां द्रष्टव्या ।

२. द्वितीया ग्रामकामेष्टिः ५४७ पदार्थसंख्यायां द्रष्टव्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मारुतं सादयति। वैश्वानरयागः पूर्ववत्। द्वैधसूत्रेऽत्र देवताविपर्यासः। मारुतस्यावदायान्यत्र निधाय वैश्वानरस्यावदायान्यत्र निधाय प्रथमं मारुतस्य यागः, ततो वैश्वानरस्य। अथ वा मारुतस्यावदानादि यागान्तं कृत्वा वैश्वानरस्यावदानादियागः। वैश्वानरस्य **वैश्वानरो न ऊत्येत्यनुवाक्या, पृष्टो दिवीति** याज्या। **मरुता तु मरुतो यद्ध वो दिव** इत्यनुवाक्या। **या वः शर्म शशमानायेति** याज्या। मरुतामनुमन्त्रणं **प्राणैर्ऋध्यासमिति**। इयं ग्रामकामेष्टिः॥

५३८. **भिक्ष्यमाणद्रव्यप्राप्तिकामेष्टिः**—भिक्ष्यमाणद्रव्यप्राप्तिकामस्य अग्नये वैश्वानराय द्वादशकपालः। **वैश्वानरो न ऊत्येत्यनुवाक्या। वैश्वानरस्य सुमताविति** याज्या। इयं भिक्ष्यमाणद्रव्यप्राप्तिकामेष्टिः। भिक्षितद्रव्यप्राप्त्यनन्तरं वैश्वानर्या यजेत॥

प्रतिष्ठाकामः—इष्ट्या यक्ष्य इति संकल्पः पूर्ववदिष्टिः॥

५३९. **पशुकामेष्टिः**(१)–पशुकामस्य ऐन्द्रश्चरुः **इन्द्रं वो विश्वतस्परीत्यनुवाक्या। इन्द्रं नरो नेमधितेति** याज्या। इयं पशुकामेष्टिः॥

५४०. **पशुकामेष्टिः**(२)-अथ द्वितीया-इन्द्रायेन्द्रियावते एकादशकपालः। **इन्द्रियाणि शतक्रतो** इत्यनुवाक्या। **अनु ते दायि महइन्द्रियायेति** याज्या। **इन्द्रियाव्यन्नाद** इत्यनुमन्त्रणम्। इयं द्वितीय पशुकामेष्टिः॥

५४१. **ब्रह्मवर्चसकामेष्टिः**(१)[1]—ब्रह्मवर्चसकामस्य इन्द्राय धर्मवते एकादशकपालः। **आयस्मिन्त्सप्तेत्यनुवाक्या। आमासु पवव**मिति याज्या। **ब्रह्मवर्चसी**त्यनुमन्त्रणमिन्द्रायेन्द्रियावते तथा **इन्द्रायार्कवते** च तथैव। इयं ब्रह्मवर्चसकामेष्टिः॥

५४२. **अन्नकामेष्टिः**– अन्नकामस्य इन्द्रायार्कवत एकादशकपालः। **इन्द्रमिदगाथिनो बृहदित्यनुवाक्या। गायन्ति त्वा गायत्रिण** इति याज्या। **इन्द्रियाव्यन्नाद** इत्यनुमन्त्रणम्। इयमन्नकामेष्टिः॥

५४३. **भूतिकामेष्टि** (२)[2]—भूतिकामस्य त्रिहविष्का। इन्द्राय धर्मवते एकादशकपालः। पूर्ववता याज्यानुवाक्याः। इन्द्रियाव्यन्नाद इति सर्वेषामनुमन्त्रणम्। इयं भूतिकामेष्टिः॥

---

१. द्वितीया ब्रह्मवर्चसकामेष्टिः ५५८ पदार्थसंख्याया द्रष्टव्या।

२. प्रथमा भूतिकामेष्टिः ५२५ पदार्थसंख्यायां द्रष्टव्या।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५४४. **पापक्षयेष्टिः**—पापक्षयकामस्य इन्द्रायांहोमुचे एकादशकपालः। **अंहोमुचे प्रभरेमामनीषेत्यनुवाक्या**। **दिदेव यन्मेति** याज्या। **अंहोमुगित्यनुमन्त्रणम्**। इयं पापक्षयकामेष्टिः॥

५४५. **बन्धादिमोक्षकामेष्टिः**—बद्धो वा शत्रुवेष्टितो वा तन्मोक्षार्थं संकल्प्य इन्द्राय त्रात्रे एकादशकपालः। **त्रातारमिन्द्रमवितारमिन्द्रमित्यनुवाक्या**। **मा ते अस्यां सहसावन्निति** याज्या। **त्रात इत्यनुमन्त्रणम्**। इयं बन्धादिमोक्षकामेष्टिः॥

५३६. **महायज्ञकामेष्टिः**—महायज्ञान् वाजपेयादीन् कर्तुमशक्तस्तत्काम इष्टिं संकल्प्य इन्द्रायार्काश्वमेधवते एकादशकपालः। **अनवस्ते रथमित्यनुवाक्या**। **वृष्णे यज्ञ वृषेति** याज्या। **महायज्ञवानित्यनुमन्त्रणम्**। इयं महायज्ञकामेष्टिः॥

५४७. **ग्रामकामेष्टिः (२)**[1]—ग्रामकामस्य द्वितीया। इन्द्रायानृजवे एकादशकपाला। **अन्वहमासा अन्वित्यनुवाक्या**। **अनु ते दायिमह इति** याज्या। **यामवानित्यनुमन्त्रणम्**। द्वितीया ग्रामकामेष्टिः॥

५४८. **दत्तद्रव्यप्राप्तिकामेष्टिः**—दत्तद्रव्यप्राप्तिकामस्य इन्द्राय प्रदात्रे एकादशकपालः। **प्र दातारं हवामह इत्यनुवाक्या**। **प्र दाता वज्री वृषभ इति** याज्या। **प्र दातृमानित्यनुमन्त्रणम्**। दत्तद्रव्यप्राप्तिकामेष्टिः॥

५४९. **अधिकश्रीकामेष्टिः**—तुल्येभ्योऽधिकश्रीकामस्य इन्द्रायैकादशकपालः। **रेवतीर्नः सधमाद इत्यनुवाक्या**। **प्रोष्वस्मा इति याज्या**। **अधिकश्रीमानित्यनुमन्त्रणम्**। अधिकश्रीकामेष्टिः॥

५५०. **यज्ञकामेष्टिः**—साधारणज्योतिष्टोमादियज्ञकामस्य अग्नावैष्णव एकादशकपालः। **अग्नाविष्णू सजोषसेत्यनुवाक्या**। **अग्नाविष्णू महित द्वामिति याज्या**। **यज्ञवानित्यनुमन्त्रणम्**। इयं यज्ञकामेष्टिः॥

५५१. **ब्रह्मवर्चसकामेष्टिः(२)**[2]-ब्रह्मवर्चसकामस्य द्वितीया पुष्यनक्षत्रयुक्तपौर्णमास्यां प्रातरग्निहोत्रहोमानन्तरं ब्रह्मवर्चसकास इष्ट्या यक्ष्ये इति संकल्पयति। सोमारुद्रो देवता, चरुर्द्रव्यम्, श्वेतवत्सायाः श्वेतवर्णाया गोर्दुग्धं मथितं सदाज्यं भवति। तेनाज्येन हविषः पात्राणां प्रोक्षणं मार्जनं च।

---

१. प्रथमा ग्रामकामेष्टिः ५३७ पदार्थसंख्यायां द्रष्टव्या।

२. प्रथमा ब्रह्मवर्चसकामेष्टिः ५४१ पदार्थसंख्यायां द्रष्टव्या।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतः प्रोक्षणीपात्रे तदाज्यमेव जलस्थान आनयति। **उन्महत**मन्त्रे **अप्**शब्दस्य स्थाने **आज्य**पदस्योहः तद्विशेषणानां क्लीवत्वमेकवचनान्तता प्रोह्याः प्रोक्षण-मन्त्रेऽपि तथैव। द्वैधसूत्रेऽनुकमण्डलौ स्रुवेण तदाज्यं प्रक्षिप्य तेन जलेन प्रोक्षणमार्जनानि विहितानि **प्रोक्षणीरासादये**ति प्रैषे **प्रोक्षणमासादये**त्यूहः, निनयनमन्त्रे **गच्छतेत्यस्य**स्थाने **गच्छे**ति पदम्। प्रधानयागकाले विहारस्य कटादिभिः परिश्रयणम्। तदपहाय स्विष्टकृदादि। सामिधेनीषु **पृथुपाजा** इत्यस्याः पूर्वं **मक्षू देववत** इति **न यजमान रिष्यसी**ति च द्वे ऋचौ प्रक्षेप्तव्ये तथा च सप्तदश सामिधेन्यः। **सोमारुद्राविवृहतमि**त्यनुवाक्या। **सोमा-रुद्रा युवा**मिति याज्या। **ब्रह्मवर्चसी**त्यनुमन्त्रणम्॥

५५२. **दुश्चर्मत्वाभावेष्टिः**—भाविदुश्चर्मत्वाभावकामस्य सोमापौष्ण-श्चरुः। **सोमापूषणा जननेत्य**नुवाक्या। **इमौ देवौ जायमाना**विति याज्या। **सुचर्मे**त्यनुमन्त्रणम्। इयं दुश्चर्मत्वाभावेष्टिः॥

५५३. **संज्ञानीष्टिः**—समाने श्रैष्ठ्यमिच्छन् संकल्प्य अग्नये वसुमते ऽष्टाकपालः, सोमाय रुद्रवते चरुः, इन्द्राय मरुत्वत एकादशकपालः, वरुणा-यादित्यवते चरुः। सर्वासां तन्त्रेण युगपत् प्रधानयागः। सर्वा देवताश्चतु-र्थ्यन्ता उद्दिश्य अनुब्रूहीति प्रैषः। एवं सर्वत्र। उपस्तीर्य सर्वाः क्रमेण द्विर्द्विरवदाय युगपद्यजति। पञ्चमे प्रयाजे **स्वाहाग्निं वसुमन्तं सोमं रुद्रवन्त-मिन्द्रं मरुत्वन्तं वरुणमादित्यवन्तं स्वाहे**ति सर्वेषां सकृत् स्वाहाशब्दः। सर्वासा-मेकैव **अग्निः प्रथमो वसुभि**रित्यनुवाक्या। **स नो देवो वसुभि**रिति याज्या। **श्रेष्ठ** इत्यनुमन्त्रणम्। सप्तदश सामिधेन्यः। वार्त्रघ्नावाज्यभागौ। प्रेद्धो अग्न इमे अग्न इति संयाज्ये। इयं संज्ञानीष्टिरुच्यते॥

५५४. **पूर्णायुःकामस्य शतकृष्णलेष्टिः**—यो मृत्योर्बिभेति स पूर्णायुः प्राप्त्यर्थं संकल्पयत्यायुष्कामः शतकृष्णलया[1] यक्ष्य इति। प्रजापतिर्देवता, आज्ये हिरण्यनिर्मितगुञ्जाप्रमाणकृष्णलमयश्चरुर्द्रव्यम्। पात्रसादने एका चरुस्थाली। अवहननाद्यभावादुलूखलादेर्नासादनम्। घृतस्यैव प्रणीतापात्रे आनयनम्। घृतं प्रणेष्यामीति प्रैषादि भवति। दारुपात्र्यां कृष्णलानोप्य प्रकृतिवन्निर्वपति। **ध्रुवासी**तिमन्त्रेण नवं चरुपात्रमधिश्रित्य तिरःपवित्रे प्रणी-ताज्यमानीय **धर्मास्थे**त्यादिमन्त्रेण कृष्णलानोप्य श्रपयति। चरुधर्मेणोद्वास्य

---

१. कृष्णलशब्दो गुञ्जा (रत्ती) पर्यायः। इह तावत्मानस्य सुवर्णस्य गुटिका अभिप्रेता। तासां शतं संख्येह विवक्षिता।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वेद्यामासादयति । उपस्तरणाभिघारणे यागकाले न भवतः । चतुर्णां कृष्णल-स्थालीगतमेकमवदानम् । तथाज्येन सह एवं द्विरवदाय हवनकाले आज्यमेव जुहोति न कृष्णलानि । तूष्णीमवदानं प्रत्यञ्जनं च । पञ्चावत्तिनां त्रीण्य-वदानानि तथा च द्वादश कृष्णलानि संपद्यन्ते । कृष्णलमेकं जुहुयाद्वा । **हिर-ण्यगर्भः समवर्तताग्र** इत्यनुवाक्या । **प्रजापते न त्वदेतान्यन्य** इति याज्या । **आयुष्मानित्यनुमन्त्रणम्** । चत्वारि कृष्णलानि स्विष्टकृतेऽवद्यति, पञ्चाव-त्तिनस्त्वष्टौ । इडापात्रे अष्टौ, पञ्चावत्तिनो द्वादश । चत्वार्यवान्तरेडायै । प्राशित्रे एकम् । ब्रह्मयजमानभागयोरेकैकम् । सर्वत्राज्येन सह । चतुर्धा-करणं नास्ति । अवत्तानि ब्रह्मणो हस्ते दत्तानि च सर्वाणि समं विभज्य ऋत्विजो गृह्णन्ति । सामान्यदक्षिणाविकल्पः । फलीकरणहोमो न । इयं शतकृष्णलेष्टिः ॥

५५५. **हिरण्यलाभकामेष्टिः**—हिरण्यलाभकामस्य आग्नेयोऽष्टाकपालः, सावित्रो द्वादशकपालः, भूम्यै चरुः । **अग्नेः स प्रत्नवन्नवीयसेत्यनुवाक्या** । **निकाव्या वेधसः शश्वत** इति याज्या । **हिरण्यपाणिमूतय** इति सवितुरनु-वाक्या । **वाममद्य सवितरिति** याज्या । भूमेर्बळित्था **पर्वतानामित्यनुवाक्या** । **स्तोमासस्त्वा विचारिणीति** याज्या । **स्वस्तिमानिति** सवितुरनुमन्त्रणम् । **अन्नाद** इत्यग्नेः । **हिरण्यवानिति** भूमेः । अन्वाहार्यमासाद्य हिरण्यं दक्षिणां ददाति । इयं हिरण्यलाभकामेष्टिः ॥

५५६. **लब्धहिरण्येष्टिः**—हिरण्यलाभे जाते तत्प्रतिष्ठार्थं पुनरेतयेष्टया यजते । सा लब्धहिरण्येष्टिरुच्यते ॥

५५७. **पुंस्त्वकामेष्टिः**—क्लीबत्वनाशपूर्वकपुंस्त्वकामस्य सोमाय वाजिनो श्यामाकश्चरुः । **आप्यायस्व स मे तु त** इत्यनुवाक्या । **सन्ते पयां-सीति** याज्या । **प्र प्रजया च पशुभिश्च जभिषीयेत्यनुमन्त्रणम्** । इयं पुंस्त्व-कामेष्टिः ॥

५५८. **चक्षुष्कामेष्टिः**(२)[1]चक्षुष्कामस्य अग्नये भ्राजस्वतेऽष्टाकपालः, सौर्य-

---

१. प्रथमा चक्षुष्कामेष्टिः ५३२ पदार्थऽसंख्यायां द्रष्टव्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्चरुः पूर्ववदग्नेर्भ्राजस्वतो यागः। आनीग्ध्र षडवत्तदानात् पूर्वम् इडावत्त-चरोर्यजमानाय त्रीन् पिण्डान् प्रतिमन्त्रं प्रयच्छति। **उदु त्यं जातवेदस**मिति प्रथमम्। **सप्त त्वा हरितो रथ** इत्यृचा द्वितीयम्, **चित्रं देवाना**मित्यृचा तृतीयम्। यजमानः पिण्डान् प्राश्याचम्येडाभागं प्राश्नाति। **उदग्ने शुचय-स्तवेत्यग्नेर्भ्राजस्वतोऽनुवाक्या वि ज्योतिषेति याज्या। उदु त्यं जातवेदस-**मिति सूर्यस्यानुवाक्या। **चित्रं देवाना**मिति याज्या। **चक्षुष्मानित्य**नुमन्त्रणम्। इयं द्वितीया चक्षुष्कामेष्टिः॥

५५९. **काम्येष्टिः**—कामसिद्ध्यर्थं या इष्टयो विहितास्ताः काम्येष्टि-पदार्थः सिद्धः।

श्रीपरमेश्वरः प्रसीदतु॥

॥ शिवम् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पाशुक-पदार्थाः

१. **पशुबन्धकालः**—उत्तरायणं शुक्लपक्षो देवनक्षत्रं रेवती वा ऽमावास्या यजनीयदिनं[1] वा ऽनुष्ठानसमयः। अयं पशुबन्धकाल इत्युच्यते ।।

२. **प्रथमप्रयोगपूर्वाङ्गम्**—आद्यप्रयोगे तु पूर्वेद्युर्नान्दीश्राद्धं रात्रावुदकशान्तिः [2]प्रतिसरबन्धश्च क्रियते। परेद्युः स्नानादिपञ्चकानन्तरं पुण्याहवाचनम्[3]। तत्र पशुदेवतायाः प्रथमान्तं नामोच्चार्य प्रीयतामिति यथार्थमूहनीयम्। इदं प्रथमप्रयोगपूर्वाङ्गमित्युच्यते ।।

३. **यजनीयदिनम्**—दर्शपौर्णमासयागकालो यजनीयदिनमित्युच्यते ।।

४. **पशुबन्धसंकल्पः**—गार्हपत्यस्य पश्चात् सपत्नीको यजमानो दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः प्राणानायम्य विष्णुं स्मृत्वा **याः पुरस्तादित्यादि** पठित्वा स्वर्गकामः श्रीपरमेश्वरप्रीत्यर्थं वा ऐन्द्राग्नेन निरूढपशुबन्धेन यक्ष्ये इति त्रिरुपांशु त्रिरुच्चैर्वदति। अयं पशुबन्धसङ्कल्प इत्युच्यते ।।

५. **अग्नीनां समारोपो मन्थनं च**—प्रतिप्रस्थातृप्रशास्तृसहितान् षड्ऋत्विजो वृत्वा ऽर्हयित्वा प्रथमानुष्ठाने पशुना यक्ष्यमाणो ऽन्वारम्भणीयया यक्ष्य इति सङ्कल्पपूर्वकम्[4] अन्वारम्भणीयां समाप्याग्नीनरण्योः समारोप्योदवसाय[5] मन्थति ।।

सकल्पः—यक्ष्ये करिष्ये इत्यादिपदोच्चारणसमकालीनदक्षिणहस्तकरणपात्राधिकरणकजलप्रक्षेपसहितकरिष्यमाणकर्मानुष्ठानप्रतिज्ञा सङ्कल्प इत्युच्यते ।।

६. **उदवसानम्**-समारोपिताग्निमादरणीग्रहणपूर्वकं देवयजनदेशं प्रति गमनमुदवसानमित्युच्यते ।।

---

१. द्र० अग्रे पदार्थसंख्या ३।।
२. द्र० ऐष्टिकपदार्थे संख्या ३६१, पृष्ठ ४६।
३. द्र० ऐष्टिकपदार्थे संख्या ३६७, पृष्ठ ४७।
४. द्र० संकल्पपदार्थोऽस्या एव संख्याया अन्ते।
५. द्र० अग्रे पदार्थसंख्या ६।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७. **चतुर्गृहीतम्**—मन्थनानन्तरमध्वर्युरग्नीन् विहृत्य गार्हपत्ये स्मार्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा आहवनीये मनस्वत्या हुत्वा उद्धरणपक्षे पुनर्विहृत्य षड्ढोतारं[1] मनसा ध्रुत्यान्वारब्धे यजमाने चतुर्गृहीतेनाहवनीये जुहोति। स्रुवेण चतुर्वारं गृहीतमाज्यादि चतुर्गृहीतमित्युच्यते॥

८. **षड्ढोता**—**सूर्यन्ते चक्षुरित्यादीनि** नव वाक्यानि षड्ढोतेत्युच्यन्ते[2]॥ वाचस्पतये ब्रह्मण इदं न ममेति यजमानस्य त्यागः॥

९. **यूपाहुति**—पुनर्विहृत्योपस्थानवरदानान्तः कूष्माण्डहोमः[3]। पुनर्विहृत्य प्रत्येकं चतुर्गृहीतेन सारस्वताहुती पुनर्विहृत्य चतुर्गृहीते **नं उरु विष्णो विक्रमस्वेत्यृचा** जुहोति विष्णवे इदमिति त्यागो यजमानस्य। इयमाहुतिः करिष्यमाणयूपग्रहणार्थत्वाद् यूपाहुतिरित्युच्यते॥

१०. **यूपयोग्यपलाशशाखोपस्थानम्** अध्वर्युः पुनश्चतुर्गृहीतं गृहीत्वा सस्रुवामाज्यस्थालीं बर्हिर्हिरण्यमुदपात्रं चादाय सपरशुं तक्षाणमाहूय एहि यजमानेत्युक्त्वा पूर्वद्वारेण शालाया बहिर्निष्क्रम्य यस्माद् वृक्षाद् यूपग्रहणं चिकीर्षितं तस्य समीपं गत्वा प्रतीच्यां दिशि प्रह्वां शाखां स्वयं प्राङ्मुखोऽत्यन्यानगानित्यादि यजुर्मन्त्रेणोपतिष्ठते। इदं यूपयोग्यशाखोपस्थानमित्युच्यते॥

११. **यूपशाखाञ्जनम्**—तत आज्यस्थाल्याः स्रुवेणोपहत्य[4] शाखामूलमनक्ति। **देवस्त्वासविता मध्वेत्यादियजुषा**। इदं यूपशाखाञ्जनमुच्यते॥

१२. **यूपच्छेदनम्**—तत **ओषधे त्रायस्वैनमिति** मन्त्रेण यूपमूले ऊर्ध्वाग्रं बर्हिनूच्छ्रयति। तदुपरि स्वधितिना तिर्यक् छिनत्ति **स्वधिते मैनꣳहिꣳसीरिति** मन्त्रेण॥

उपहननम्—आज्यस्थाल्यादेः सकाशात् स्रुवादिना पात्रान्तरे आज्यादेर्ग्रहणम् उपहननमित्युच्यते॥

१३. **प्रज्ञातम्**—शाखाछेदनकाले यः प्रथमः शकलः परापतति तं यूपावटे प्रक्षेपार्थं क्वचित् प्रज्ञातं स्थापयति। कस्यचिदपि पदार्थस्य उपयोग-

---

१. द्र० अग्रे पदार्थसंख्या ८।

२. द्र० तै० आर० ३।४। अयं पशुबन्धीयः षड्ढोतृमन्त्रः। चयने वाग्घोता दीक्षा पत्नी इत्यादि षड्ढोतृमन्त्रः। द्र० तै० आर० ३।६॥ तै० ब्रा० ३।१२।५।

३. द्र० ऐष्टिकपदार्थे संख्या ३५५, पृष्ठ ४३।

४. द्र० अग्रे १२ संख्याया अन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

काले शीघ्रलाभार्थम् 'अत्रेदं मया स्थापितमस्तीति' शीघ्रस्मृतिजनकसङ्केतः प्रज्ञातमित्युच्यते ॥

१४. **छेदनप्रयुक्तहोमः**—यूपशाखां छित्वाऽप उपस्पृश्य प्राच्यामुदीच्यां वा पतन्तं यूपं **दिवमग्रेण मा लेखी**रित्यादियजुषाऽनुमन्त्रयते । वृक्षस्य छेदनदेशे हिरण्यं निधाय परिस्तीर्य परिषिच्य पूर्वाहुतेन चतुर्गृहीतेन **वनस्पते शतवल्शमि**त्यादियजुषा स्वाहान्तेन जुहोति । वनस्पतय इदमिति यजमानस्य त्यागः । अयं छेदनप्रयुक्तहोम उच्यते ॥

१५. **यूपाहरणम्—सहस्रवल्शा** वीति पादेन स्वहृदयमभिमृशति । ततोऽप उपस्पृश्य काष्ठतक्ष्णा परशुना मूलादारभ्याग्रपर्यन्तं यूपशाखायाः सर्वा अवान्तरशाखा अध्वर्युश्छेदयति **यं त्वायं स्वधिति**रित्यादियजुषा । सकृन्मन्त्रपाठो न प्रत्यवान्तरशाखम् । हस्तपरिष्वङ्गादनधिकं प्रादेशपरिमाणादनूनम् उपरेण पञ्चारत्नि चषालस्थापनार्थं चतुरङ्गुलाधिकमग्रतश्छिनत्त्य-**च्छिन्नो रायः सुवीर** इति मन्त्रेण । छिन्नशेषस्य मूले चतुरङ्गुलमात्रमुपरं त्यक्त्वाऽवशिष्टमष्टाश्रि चतुरश्रि वा तक्षति । स्वर्वर्थमेकं शकलम् अधिमन्थनार्थं त्रीणि शकलानि स्थापयति । यूपाहुतिप्रभृत्येतावदन्तं कर्म यूपाहरणमित्युच्यते ॥

१६. तदनन्तरं पाशुकवेदिमानं उत्तरवेदितन्नाभ्योर्मानं चात्वालमानम् उत्करकरणं च वरुणप्रघासवत्करोति[1] । पाशुकवेदिमग्निवत्परिस्तृणाति । इदानीं यजमानो भोजनं वपनं नवनीताभ्यञ्जनमक्ष्णोरञ्जनं च करोति । इदानीं देवतासङ्कल्पं करोतीति केषांचिन्मतम् । अध्वर्युरिडाजपं कृत्वाऽग्नीन् विहृत्यान्वाधाय व्रतग्रहणान्ते शाखाहरणपक्षे **इषे त्वे**त्यादियजुषा शाखामाच्छिनत्ति । तूष्णीं प्लक्षशाखामाच्छिद्योभे शाखे तूष्णीमाहृत्य तूष्णीं यजमानमवेक्षयित्वोद्गूहति **यजमानस्ये**त्यादिप्रकृतमन्त्रेण । ततो बर्हिः संभरणादि । ऐक्षवी विधृती भवत इति केचित् । पञ्चविधं बर्हिः । कार्ष्मर्यमयाः परिधयः । सप्तदश सामिधेन्यः । शाखापवित्रकरणमन्त्रे **पशुं हव्यं करोतु मे** इति विशेषः । सायमग्निहोत्रहोमानन्तरमुत्तरेण गार्हपत्यं दर्भान् संस्तीर्य तेषु पशुकुम्भीं[2] शाखा पवित्रं च त्रिगुणां त्रिव्यायामां यूपरशनां[3] द्विगुणां द्विव्यायामां पशुरशनां[4] च, कार्ष्मर्यमय्यौ वपाश्रपण्यौ,[5] विशाखा-

१. वरुणप्रघासे पूर्वत्र ४७२-४७५ संख्याः (पृष्ठ ८२-८३) द्रष्टव्याः ।
२. प्रकृतपदार्थसंख्याया एवान्ते (११९ पृष्ठे) द्रष्टव्या ।
३ अग्रे पदार्थसंख्या १७ द्रष्टव्या ।
४. अग्रे पदार्थसंख्या १८ द्रष्टव्या । ५. अग्रे पदार्थसंख्या १९ द्रष्टव्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेकामपरामविशाखां, कार्ष्मर्यमयं हृदयशूलं[1] यजमानमुखसम्मितं मैत्रावरुणदण्डं चेति द्वन्द्वं सादयति। ततस्तान्युत्तानानि कृत्वा कमण्डलुगताभिरद्भिः **शुन्धध्वमित्यादिप्राकृतमन्त्रेण** प्रकृतिवत्प्रोक्षति॥

पशुकुम्भी--पशोरङ्गानां हृदयादीनां श्रपणार्थं भाण्डं पशुकुम्भीत्युच्यते॥

१७. **यूपरशना**—यूपस्य वेष्टनार्थं या रज्जुः सा यूपरशनेत्युच्यते॥

१८. **पशुरशना**—पशुबन्धनार्था रज्जुः पशुरशनेत्युच्यते॥

१९. **वपाश्रयणी**—वपा श्रप्यते ग्रस्यां सा वपाश्रपणीत्युच्यते॥

२०. **हृदयशूलम्**—यस्मिन् शूले पशुहृदयं प्रोतं भवति, तत् हृदयशूलमित्युच्यते॥

२१. **पशुपूर्वेष्टिः**—अपरेद्युः प्रातरग्निहोत्रहोमानन्तरमन्वाधानव्रतरहितां बर्हिर्लवनादिब्राह्मणतर्पणान्तामाग्नेयीमिष्टिं करोति। सा च सर्वापि प्रकृतिवत् क्रियते। इयं पशुपूर्वेष्टिरित्युच्यते॥

२२. **सद्यस्कालपशुप्रकारः**—पश्वनुष्ठानस्य सद्यस्कालत्वपक्षे तु नान्दीश्राद्धादिवेदिमानं च पूर्वेद्युरेव क्रियते। अपरेद्युः स्नानादिपञ्चकं ततः पशुसङ्कल्पानन्तरमन्वारम्भणीयेष्टिः क्रियते। अग्नीनरण्योः समारोप्य प्रत्यक्षान्वा देवयजनदेशं प्रति नयति। मन्थनपक्षेऽग्नीन् विहृत्य मनस्वत्या हुत्वा पुनर्विहृत्य षड्ढोतृकूष्माण्डसारस्वतहोमानन्तं समानम्। तदनन्तरमग्निदेवत्यां अग्न्यन्वाधानादिब्राह्मणतर्पणान्तां पशुपूर्वेष्टिं करोति ततो यूपाहुत्यादिपाशुकवेदिपरिस्तरणातं करोति। ततः पशुदेवतासंकल्पं कृत्वाऽन्वाधानादिकुंभ्यादिप्रोक्षणान्तं करोति इति विशेषः। अयं सद्यस्कालपशुप्रकार इत्युच्यते॥

२३. **पशुदेवतासंकल्पः**—अपरेद्युराग्नेय्या इष्टेरनन्तरं यजमानो देवतासंङ्कल्पं करोति। पाशुकं हविः वपापुरोडाशाङ्गानि हवींषि। एकादश प्रयाजाः। अग्नीषोमावाज्यभागौ। इन्द्राग्नी पशुदेवता। वनस्पतिः पृषदाज्यदेवता। देवा आज्यपाः। अग्निः स्विष्टकृत्। एकादशानुयाजाः। एकादशोपयाजाः[2]। सूक्तवाकशंयुवाकौ। चत्वारः पत्नीसंयाजाः। एवमात्मकेन साङ्गोपाङ्गेन कर्मणा सद्यो यक्ष्ये इति। अयं पशुदेवतासंकल्पः इत्युच्यते॥

---

१. अग्रे पदार्थसंख्या २० द्रष्टव्या। १. द्र० अग्रो १०९ पदार्थसंख्याया अन्ते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४. **पाशुकपात्रासादनम्**—ततः पाणिसम्मर्शनादि । अग्नीन् परिस्तीर्य हवनीयस्य पुरस्ताद् दर्भान् संस्तीर्य तेषु स्फ्यमग्निहोत्रहवणीं जुहूं वसाहोमहवनीमुपभृतं पृषदाज्यग्रहणीं स्रुवं स्वधितिं ध्रुवां प्राशित्रहरणमिडां वेदमाज्यस्थालीं दधिस्थालीमपूर्वाज्यस्थालीं योक्त्रं वेदाग्रं धृष्टिं उपवेषमिध्मप्रव्रश्चनमन्वहार्यस्थालीं च द्वन्द्वं सादयति । एतत् पाशुकपात्रासादनमुच्यते ॥

२५. **पाशुकपात्राणि**—इमानि स्फ्यादीन्येकविंशतिसंख्याकानि पूर्वेद्युर्गार्हपत्यस्योत्तरत आसादितानि पशुकुम्भ्यादीनि चाष्टौ पाशुकपात्राणीति कथ्यन्ते ॥

२६. एतत्पाशुकपात्रासादनानन्तरं ब्रह्माणं दक्षिणतस्तूष्णीमुपवेश्य पृष्ठ्यांस्तीर्त्वा पवित्रे कृत्वा **यजमान वाचं यच्छे**त्युक्त्वा **वेषाय त्वे**त्यग्निहोत्रहवणीमादाय **प्रत्युष्ट**मित्यादिमन्त्रेण गार्हपत्ये प्रकृतिवत् प्रतितप्य प्रोक्षणीः संस्कृत्य **प्रोक्षिताः स्थे**त्यन्तं कृत्वा पाशुकपात्राणि प्रकृतिवत् प्रोक्ष्याज्यं निरूप्य तूष्णीं दधि निरूप्यापूर्वाज्यं च निर्वपति । आज्यमधिश्रित्य पर्यग्नि करोति । पशुपूर्वेष्टयशक्तौ तु एतस्मिन् काले स्मार्तवत् संस्कृताज्येन चतुर्गृहीतेन अग्निपदं चतुर्थ्यन्तमुद्दिश्य स्वाहान्तेन पूर्णाहुतिहोममात्रं भवति । निर्वापानन्तरं प्राकृतमन्त्रेण वेदंगृहीत्वा प्रकृतिवत् पाशुकीं वेदिं त्रिः सम्मार्ष्टि । तस्याः पश्चादुपविश्य स्फ्यादानादि अग्नीदित्तस्त्रिर्हरेत्यन्तं प्रकृतिवत् करोति । अथस्फ्यमुदपात्रं बर्हिः शम्यामित्येतत्समादाय यजमानपत्नीभ्यां सह चात्वालदेशं गत्वा वरुणप्रघासवच्चात्वालं कृत्वा उत्तरवेदिनाभिप्रच्छादनान्तं[1] करोति । ततो **देवस्य** त्वेत्यादिनाऽभ्रिमादाया **ऽभ्रिरसि नारिरसी**त्यभिमन्त्र्य तयाऽर्धमन्तर्वेदि अर्धं बहिर्वेदि पदमात्रविष्कम्भं यूपावटं परिलिखति । **परिलिखित**मित्यादि यजुषा सकृत् द्विस्तूष्णीम् ॥

यूपावटम्—यूपरोपणार्थं यो गर्तः खन्यते स यूपावट इत्युच्यते ॥

२७. **यूपावटपरिलेखनम्**—यूपावटस्य परिलेखनं यूपावटपरिलेखनमुच्यते ॥

२८. अथाग्नीध्रं संप्रैषमाह—**अग्नीदेहीमं यूपावटं खनोपरसम्मितं प्राक् पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमति खनतात्** इति । आग्नीध्रो यूपावटं

---

१. पूर्वत्र ऐष्टिकपदार्थेषु ८५-८६ पृष्ठयोःचात्वालसंस्कार उत्तरवेदिसंस्कारश्च द्रष्टव्यः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खनति खानयति वा । अध्वर्युर्यदा चात्वालकरणादिनाभिप्रच्छादनान्तं करोति, तदा प्रतिप्रस्थाता त्रिप्रादेशप्रमाणैरनियतकाष्ठैरिध्मं वध्वाऽग्नि-प्रणयनार्थमाहवनीये प्रक्षिप्य ज्वलयति ॥

औत्तरवेदिकम् —चात्वालकरणादि उत्तरवेदिनाभिप्रच्छादनान्तं वरुण-प्रघासपर्वोक्तं कर्म औत्तरवेदिकमित्युच्यते ॥

२९. **पाशुकस्रुगासादनम्** —यूपावटपरिलेखनानन्तरमाग्नीध्रश्चात्वालमृदा पूरितां पात्रीमग्न्युद्धरणपात्र्युपयमनार्थमग्निसमीपे स्थापयति । अध्वर्यु-स्तूष्णीमुत्पूताः प्रोक्षणीः प्रतिप्रस्थात्रे प्रयच्छतीत्यादि यजमानकर्तृकाहुति-त्रयहोमान्तं कर्म वरुणप्रघासपर्वोक्तम् [1]**अग्निप्रणयननामकमिदानीं** करोति । अग्निप्रणयनानन्तरं ब्रह्मा पाशुकवेद्या दक्षिणत उत्तरवेद्यार्जवेन मन्त्रेणोप-विशति । तस्य पश्चाद्यजमानः । अध्वर्युरुत्तरं परिग्राहं परिगृह्य योयुपित्वा तिर्यञ्चं स्फ्यं प्रकृतिवत् स्तब्ध्वा सम्प्रैषमाह--**प्रोक्षणीरासादयेध्मबर्हिरुपसादय स्रुवं च स्वधितिं च स्रुचश्चसंमृड्ढि तूष्णीं पृषदाज्यग्रहणीं पत्नीं सन्नह्याज्येन दघ्ना चोदेहीति** । प्रोक्षण्यासादनादिप्रकृतिवत्, संमार्जने विशेषः – शाला-मुखीये प्रतितप्य स्रुववत् स्वधितिं, जुहूवद् वसाहोमहवन्याः, उपभृद्वत् पृषदा-ज्यग्रहण्याश्च सम्मार्गः । जुह्वामाज्यग्रहणपर्यन्तं प्रकृतिवत् । उपभृति चतु-र्गृहीतं गृहीत्वा **महीनां पयोसी**ति मन्त्रेण पृषदाज्यग्रहण्यामाज्येनोपस्तृणीते । **विश्वेषां देवानां तनूरि**ति द्वितीयमुपस्मरणम् । **ऋदध्यासमद्ये**त्यादियजुषा तस्यां दर्भद्वयान्तर्धानेन दधि गृह्णाति । बर्हिर्द्वयंदूरीकृत्य **विष्णो हृदयमसी**ति प्रथममभिघारयति । एक**मिषे**त्यादिमन्त्रेण द्वितीयमभिघारणम् । यजमान-श्चरोस्वेत्यादिर्चतुर्भिरुपभृदाज्यग्रहाननुमन्त्र्यौत्तरैश्चतुर्भिर्मन्त्रैः पृषदाज्य-ग्रहान् अनुमन्त्रयते । अध्वर्युः पञ्चविधं बर्हिः पाशुकवेद्यां स्तीर्त्वा कार्ष्म-र्यमयान् परिधीन् उत्तरवेद्यां परिधाय विधृत्योराश्ववालं प्रस्तरं निधायोप-भृदननन्तरं तन्मन्त्रेणोपभृत उत्तरतः पृषदाज्यग्रहणीमासाद्य तदुत्तरतो ध्रुवा-मासादयति । एतत् जुह्वाद्यासादनं पाशुकस्रुगासादनमित्युच्यते ॥

३०. आज्यस्थाल्याज्यपूरितं स्रुवं स्वधितिं चाग्रेण स्रुचां दक्षिणतो नीत्वा प्रस्तरे जुह्वा दक्षिणतः सादयति । प्राकृते स्रुवासादनमन्त्रे **स्योना**दिपदानां यथार्थमूहो द्विवचनमेकवचनस्थाने भवति । स्रुवस्वधितौ यथा दक्षिणतो नीतौ तथैवोत्तरत आनीय ध्रुवायामवदधाति । अत्रापि प्रकृतिप्राप्तमन्त्रे ऊह्योग्यानां**मृषभा**दि पदानां यथार्थं द्विवचनान्तता भवति, स्वधितेर्द्विती-

---

१. द्र० पूर्वत्र ८७ तमे पृष्ठे ४८५ संख्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यस्य सत्त्वात्। सर्वाज्याभिमन्त्रणान्तं प्रकृतिवत्। **अग्न्याधानप्रभृत्येतावदन्तं कर्म पशवङ्गप्राकृतमुच्यते** ॥

३१. **यूपप्रक्षालनम्**—अथ केवलपाशुकम्—प्रदक्षिणमावृत्त्या प्रत्यङ्ङागद्रत्य तूष्णीं संस्कृता यवमतीः प्रोक्षणीर्बर्हिर्मुष्टिं सस्रुवां स्मार्ताज्यस्थालीं स्वरुं रशने मैत्रावरुणदण्डं प्रथमपतितयूपशकलं हिरण्यमुदपात्रं चादायोत्तरवेदि समीपे निधायोदपात्रोदकेन यूपं प्रक्षालयति—**यत्ते शिवतः परावधोदित्यृचा**। एतद्यूपप्रक्षालनमुच्यते ॥

३२. **यूपप्रोक्षणम्**—ततश्चात्वालोत्करयोर्मध्यमार्गेण यूपमानीय यूपावटस्य पुरस्ताद्यूपं प्रागग्रं शाययित्वोत्तरवेद्या उत्तरतस्तिष्ठन् **पृथिव्यै त्वेत्यादिमन्त्रेण** यवमतीभिः प्रोक्षणीभिर्मूलादारभ्याग्रपर्यन्तं सकृदेव प्रोक्षति। एतद्यूपप्रोक्षणमित्युच्यते ॥

३३. **शुन्धतां लोक** इत्यादिमन्त्रेण यूपावटेऽतिशिष्टाः प्रोक्षणीर्निनयति। **यवोसि यवयेत्यादिमन्त्रेण** यूपावटे यवान् प्रक्षिपति। प्राचीनावीती बर्हिर्मुष्टिं द्वेधा कृत्वा एकं भागं प्रागग्रमपरं दक्षिणाग्रं च कृत्वा द्वयोर्भागयोर्मध्यं यूपावटस्य मध्ये यथा स्यात् तथा भागद्वयं निदधाति **पितृणां सदनमसीति** मन्त्रेण। तस्य मध्ये हिरण्यं निधाय तस्योपरि **पितृभ्यः स्वाहेति** मन्त्रेण स्रुवाहुतिं जुहोति। यजमानोपि प्राचीनावीती भूत्वा **पितृभ्य इदं न ममेति** त्यागं पठति।

यूपशकलप्रक्षेपः—अध्वर्युर्यज्ञोपवीती प्रथमपतितं यूपशकलं यूपावटे प्रक्षिपति **स्वावेशोस्यग्रेगा** इत्यादिमन्त्रेण। अयं यूपशकलप्रक्षेप इत्युच्यते ॥

३४. ततः सस्रुवां स्मार्तज्यस्थालीं स्वरुं यूपरशनां मैत्रावरुणदण्डमुदपात्रं चादाय एहि यजमानेति यजमानमामन्त्र्याग्रेण यूपं परीत्य दक्षिणत उदङ्मुखतिष्ठति। यजमानो यूपस्यावटस्य च मध्येनोत्तरतो गत्वाऽग्रेण यूपं परीत्याध्वर्योर्यूपस्य च मध्येन पश्चाद् गत्वोदङ्मुखस्तिष्ठति। पत्नी तु अध्वर्योरुत्तरतो यजमानस्य दक्षिणतः पश्चाद् गत्वोदङ्मुखी तिष्ठति। [1]उपरसमीपे अध्वर्युः [2]चषालमुन्मुच्याज्येन यूपाग्रे स्रुवेणानक्ति—**देवस्त्वा सवितेत्यादिमन्त्रेण**। चषालमन्तरतो बाह्यतश्च स्वभ्यक्तं कृत्वा यूपाग्रे प्रतिमुञ्चति **सुपिप्पलाभ्यस्त्वेत्यादिमन्त्रेण** ॥

चषालः—चषालो यूपकटक इति कोशात् (अमर २।७।१८) पञ्चा-

---

१. द्र० अग्रे ३५ संख्याया अन्ते। २. द्र० अत्रैवान्तिमे भागे।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रत्निपरिमाणयूपस्य अग्रभागे अधिके चतुरङ्गुलोच्चे सन्तक्षिते कटकवत् यः प्रवेश्यते स चतुरङ्गुलमात्रः सुबिलः चषाल इत्युच्यते ॥

३५. ततस्तक्षणकाले चिह्नितामग्निष्ठामस्त्रि[1] स्रुवेणाभिघारयन्नाह—[2]यूपायाज्यमानायानुब्रूहीति । अञ्जनप्रभृति स्वर्वगूहनपर्यन्तं पत्नीयजमानौ यूपं नोत्सृजेताम् । अध्वर्युरुपर्याज्यमानयति । यजमानस्तेनाज्येन यूपमुपरवर्जं सर्वतः समनक्ति, पत्न्युपरमनक्ति ।

उपरः—अत्र पञ्चारत्निपरिमाणयूपस्य मूलप्रदेशे प्रथमोरत्निपरिमितो भागो यो यूपावटे रोप्यते स उपर इत्युच्यते ॥

३६. **यूपाञ्जनप्रैषः**—अयं यूपायेत्यादिप्रैषो यूपाञ्जनप्रैष इत्युच्यते ॥

३७. **अग्निष्ठास्त्रिः**—यूपस्य चतस्रोष्टौ वा ऽस्रयो भवन्ति तत्राग्निसंमुखास्त्रिः अग्निष्ठास्त्रिरित्युच्यते ॥

३८. **यूपाच्छ्रयणप्रैषः**—अध्वर्युरवटाद् बहिर्यूपमुच्छ्रयन्नाह—उच्छ्रीयमाणानुब्रूहीति । अयं यूपोच्छ्रयणप्रैष इत्युच्यते ॥

३९. **यूपोच्छ्रयणम्**—अध्वर्युर्यजमानेन सह यूपमुच्छ्रयति—**उद्दिवं स्तभानेत्यादिमन्त्रेण यातेधामानीति** द्वाभ्यामृग्भ्यां यूपमवटे प्रवेशयति । अग्निष्ठामस्त्रिमाहवनीयस्याभिमुखीं करोति । एतद् यूपोच्छ्रयणमित्युच्यते ॥

४०. **चषालावेक्षणम्**—ततः स्थिरस्य यूपस्य चषालं यजमानमवेक्षयति—**तद्विष्णो**रित्यृचा । इदं चषालावेक्षणमित्युच्यते ॥

४१. **यूपसहननम्**—ततो **ब्रह्मवनि त्वे**त्यादिमन्त्रेणावटे प्रदक्षिणं मृत्तिकां प्रवेशयति । मैत्रावरुणदण्डेन यूपमभितः संहन्ति—**ब्रह्म दृंह क्षत्रं दृंहे**त्यादिमन्त्रेण । इदं यूपसंहननमित्युच्यते ॥

४२. **यूपपरिव्ययणप्रैषः**—अवटं पार्श्वभूम्यपेक्षयाऽन्यूनमनतिरिक्तं पुरीषेण प्रच्छाद्य तत्रोदपात्रोदकं प्रदक्षिणं नीय यूपरशनामादाय त्रिः संभुज्य मध्यमेन गुणेन यूपं नाभिदघ्ने त्रिः प्रदक्षिणं परिव्ययन्नाह—परिवीयमाणायानुब्रूहीति । अयं परिव्ययणप्रैष उच्यते ॥

४३. ततः **परिवीरित्यृचा** परिव्ययति । यूपसमीपमारभ्य परस्पर संलग्नं कृत्वाऽन्तं प्रवेश्य कुशलक्रियया ग्रन्थिं कृत्वा. रशनाग्रं निर्भिद्य रशना-

---

१. द्र० अग्रे ३७ संख्या । २. द्र० अग्रे ३६ संख्या ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मूलं प्रवेश्याग्निष्ठायामस्रुच मध्यमं रशनागुणं निर्भिद्य तत्र स्वरुं प्रवेशयति—**प्रन्तरिक्षस्ये**त्यादि **गूहामी**त्यन्तेन मन्त्रेण ।

स्वरुः—यूपतक्षणकाले पतितं शकशं प्रकृते गूह्यमानं स्वरुपदवाच्यम् ।।

४४. **यूपसंस्कारः**—यूपप्रक्षालनप्रभृति (संख्या ३१) एतावदन्तं कर्म यूपसंस्कार इत्युच्यते ।।

४५. **पशुप्रायश्चित्ताहुतयः**—अथैनं पशुं हरिद्रामलकादिभिः स्नापितमन्तरेण चात्वालोत्करौ प्रपाद्य यूपाहवनीययोर्मध्येन दक्षिणतो नीत्वा यूपस्य पुरस्तात् प्रत्यङ्मुखं यः कश्चिद्धारयति । पशोरुक्तो यो वर्णो विधिवाक्ये यथा **वायव्यं श्वेतमालभेते**त्यादौ श्वेतवर्णस्तादृशवर्णविशिष्टपश्वभावे अथ वा पशोः प्रतिषिद्धत्वेऽध्वर्युर्नित्याज्यस्थाल्याज्येन वसाहोमहवन्या प्रायश्चित्ताहुतीर्जुहोति—**अग्निर्मूर्धे**त्यृचा । अग्नय इदं न ममेति त्यागो यजमानस्य । **अग्नाविष्णू सजोषसे**त्यृचा । अग्नाविष्णुभ्यामिति त्यागः । **इन्द्रं विश्वा अवीवृधन्नि**त्यृचा । इन्द्रायेदमिति त्यागः । **वायो शतं हरीणामि**त्यृचा । वायव इदमिति त्यागः । **प्रजापते न त्वदि**त्यृचा । प्रजापतय इदमिति त्यागः । एता आहुतयः पशुप्रायश्चित्ताहुतय उच्यन्ते ।।

४६. **प्रतिषिद्धपशुः**—एकशृङ्गश्छिन्नकर्णोन्धो भग्नदन्तो वामनश्छिन्नपुच्छः शिपिविष्टो वधिरः कच्छन्तियुक्त एकखुरश्च पशुः प्रतिषिद्धपशुरुच्यते ।।

४७. **पशूपाकरणम्**=प्रतिबर्हिर्मन्त्रं **वदन् इषेत्वे**ति मन्त्रेण द्वे बर्हिषी गृहीत्वा पशोः शृङ्गयोर्मध्ये बर्हिर्भ्यामन्वारभ्येन्द्राग्निभ्यां **त्वा जुष्टमि**त्यादिमन्त्रेण यजमानेन सह मनसा सङ्कल्प्योपाकरोति—**उपवीरसी**त्याद्यृचा **प्रजापतेर्जायमाना** इत्यृचा **इमं पशुं पशुपते** इत्यृचा **अनुमन्यस्वे**ति यजुषा च । इदं पशूपाकरणमित्युच्यते ।।

४८. बर्हिषी अन्यैः पदार्थैरसंसृष्टे प्रज्ञाते[1] निधायोत्तरवेदिसमीपे पूर्वपरिगृहीतशकलत्रयमध्ये एकमधिमन्थनशकलं प्रागागतं निदधाति—**अग्नेर्जनित्रमसी**ति मन्त्रेण । तस्य पार्श्वयोः प्रागायतौ वृषणौ हस्ताभ्यां युगपदन्वञ्चौ निदधाति—**वृषणौ स्थ** इति मन्त्रेण । **उर्वश्यस्यायुरसी**त्यादिमन्त्रेण दक्षिणेन हस्तेनोत्तरारणिं सव्येनाधरारणिमादत्ते । **घृतेनाक्ते** इत्यादिमन्त्रेणारणिद्वयमपूर्वाज्यस्थाल्यां समनक्ति ।

---

१. द्र० पाशुकपदार्थ संख्या १३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रजातीयः—अधिमन्थनशकले अरणी निधाय प्रजातीयं यजमानं वाचयति—**गायत्रं छन्दोनुप्रजायस्वे**त्यादियजुर्मन्त्रः । प्रजात्यै अग्निप्रजननाय हितमिति व्युत्पत्त्या प्रजातीय इत्युच्यते ॥

४९. **मन्थनप्रैषः**—मन्थन्नाह—'अग्नये मथ्यमानायानुब्रू३हि' इति । अयं मन्थनप्रैष उच्यते ॥

५०. **सप्रहरणप्रैषः**—अग्नौ जाते सत्याह—'जातायानुब्रू३हि' इति । यजमानान्वारब्धोध्वर्युर्जातमग्निमाहवनीये **भवतं नः समनसावित्यृचा** प्रहरति । अस्मात् प्रहरणात् पूर्वं 'प्रह्रियमाणायानुब्रू३हि' इति प्रैषो होतारं प्रति सप्रहरणप्रैष इत्युच्यते ॥

५१. **पशुनियोजनम्**—अपूर्वाज्येन सकृद्गृहीतेन आहवनीये प्रहृतस्याग्नेरुपरि **अग्नावग्निश्चरती**त्यृचा जुहोति । ततो **देवस्य त्वे**ति मन्त्रेण द्विगुणां रशनामादाय तया सव्यशृङ्गवर्जं पशुं अक्ष्णया शिरसि बध्नाति—**ऋतस्य त्वा देवहविरि**त्यादिमन्त्रेण । द्विगुणायाः पशुरशनायास्त्रिगुणाया यूपरशनायाश्च प्रान्तावेकीकृत्य **धर्षा मानुषा**निति मन्त्रेण बध्नाति । इदं कर्म पशुनियोजनमित्युच्यते ॥

५२. **अद्भ्यस्त्वौषधीभ्य** इत्यादिमन्त्रेण तूष्णीं संस्कृताभिरद्भिः पशुं प्रोक्षति । पात्रान्तरे जलमानीय **अपां पेरुसी**ति मन्त्रेण पशुं पाययति ॥

पशु प्रोक्षणम्—तूष्णीं संस्कृताभिरद्भिः पशुमुपरिष्टात् प्रोक्ष्य **स्वात्तं चिदि**त्यादिमन्त्रेण अधस्तात् प्रोक्षति प्रोक्षणीर्निधाति । एतत्पशुप्रोक्षणमित्युच्यते ॥

५३. अथेध्मात्समिधमाददान आह—'अग्नये समिध्यमानायानुब्रू३हि' इत्यादि जौहवाघारपर्यन्तं प्रकृतिवत् ।

पशुसमञ्जनम्—तदनन्तरमुदङ्ङागत्याघारशेषजौहवाज्येन पशु ललाटे समनक्ति **सन्ते प्राणो वायुने**त्यादिमन्त्रेण । **सं यजत्रैरङ्गानी**ति मन्त्रेण ककुदि । **सं यज्ञपतिराशिषे**ति मन्त्रेण दक्षिणश्रोण्याम् । इदं पशुसमञ्जनमित्युच्यते ॥

५४. ततो ध्रुवां समज्य यथायतनं स्रुचौ सादयित्वा प्रवरं प्रवृणीते । तत्र होतुःप्रवरानन्तरं आश्राव्य प्रत्याश्राविते मित्रावरुणौ प्रशास्तारौ प्रशास्तादित्युक्त्वा मैत्रावरुणस्य नाम गृह्णाति । अमुकशर्मा मानुष इति । घृतवतीशब्दश्रवणानन्तरं जुहूपभृतावादायात्याक्रम्याश्राव्य प्रत्याश्रावित आह—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समिद्भ्यः प्रेष्येति । द्वितीयादिप्रयाजेषु प्रेष्येत्येव वदति प्रशास्तृप्रैषान्ते तेन सह यजेति वदति न वा । चतुर्थाष्टमयोः प्रयाजयोरौपभृदाज्यस्य जुह्वां समानयनम् । स्वाहा कृतीभ्यः संस्रावस्य जुह्वां रक्षणम् । पञ्चमप्रयाजे यो यजमानस्य त्यागः स एव षष्ठादिषु । दशप्रयाजानिष्ट्वोदङ्ङित्याक्रम्य स्वरुं स्वधितिञ्चादाय तौ सह जुह्वां समज्य ताभ्यां सहैव पशुं समनक्ति—**घृतेनाक्तौ पशुं त्रायेथा**मिति मन्त्रेण । स्वधितिं शमितुर्हस्ते प्रयच्छति स्वरुं रशनायामवगूहति ।

पर्यग्निकरणप्रैषः—यथायतनं स्रुचौ सादयित्वाह—पर्यग्नये क्रियमाणायानुब्रूहि इति । अयं पर्यग्निकरणप्रैष इत्युच्यते ॥

५५. **पाशुकपर्यग्निकरणम्**—तत आनीध्र आहवनीयादुल्मुकमादायान्तरेण चात्वालोत्करावुत्तरेण शामित्रमग्रेण पशुं जघनेन स्रुच इत्येवंरीत्या त्रिः प्रदक्षिणं पर्येति । यथोल्मुकमन्तर्भवति स्वयं बहिर्भवति तथा । इदं पाशुकपर्यग्निकरणमुच्यते ॥

५६. **अपाव्यानि**—ततोध्वर्युरपूर्वाज्यात् सकृद्गृहीतेन [1]परिसरणत्रयमध्ये प्रथमे एकम् उत्तरयोः परिसरणयोर्द्वे द्वे एवं पञ्चापाव्यानि जुहोति[2]—**प्रजानन्त** इत्येका **येषामीशे पशुपति**रिति द्वितीया **ये बध्यमान**मिति तृतीया **य आरण्याः पशवः** इति चतुर्थी **प्रमुञ्चमाना** इति पञ्चमी । एता ऋचोऽपाव्यानीत्युच्यन्ते ॥

प्रजापतय इदमिति प्रथमयोस्त्यागः । अग्नये वायवे विश्वेभ्यो देवेभ्य इति क्रमेण तृतीयादीनाम् ।

५७. **परिसरणम्**—आग्नीध्रस्य पर्यग्निकरणार्थं प्रदक्षिणं गमनं परिसरणमित्युच्यते ॥

५८. **अपाव्यहोमः**—अथ वा परिसरणानुसरणं विना यथासम्भवं होमः। अयमपाव्यहोम इत्युच्यते ॥

५९. **शामित्रोऽग्निः**—आग्नीध्र आहवनीयसमीपे उल्मुकं निधाय यथागतन्त्रिः पुनः पर्येति । तदनन्तरं प्रतिप्रस्थाता उपवेषण पुराणगार्हपत्यादुदीवोङ्गारान्निरूहति—**मातरिश्वनो घर्मोसी**ति मन्त्रेण । तानादाय दक्षिणया द्वारा दक्षिणेन विहारं ब्रह्मयजमानयूपानामन्तरत आहरन् स्वयं बहिर्गच्छन्

---

१. द्र० अग्रे पदार्थसंख्या ५७ ।

२. द्र० अयमपाव्यहोम उच्यते । द्र० अग्रे पदार्थसंख्या ५८ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अन्तरेण चात्वालोत्करावुदग्गत्वा शामित्रशालायां निदधाति। अयं निहितो ऽग्निः शामित्र इत्युच्यते ॥

६०. आग्नीध्रः यूपोत्तरवेद्योर्मध्येन शामित्रशालां प्रतिनीयमानस्य पशोरग्रत उल्मुकं गृहीत्वा गच्छति। अध्वर्युर्यजमानश्च पशुं वपाश्रपणीभ्यामन्वारभेते ।

उपप्रैषः=अध्वर्युराश्राव्य प्रत्याश्रावितेऽाह—**उपप्रेष्य होतर्हव्या देवेभ्यः** इति। अयमुपप्रैष इत्युच्यते ॥

६१. अन्तरेण चात्वालोत्करावुदञ्चं नीयमानं पशुमनुमन्त्रयते **नाना प्राणो यजमान** इति मन्त्रेण। आग्नीध्र उदङ्मुखं निष्क्रम्य किञ्चित्प्राङ् गत्वा शामित्रसकाशे उल्मुकं निदधाति। अध्वर्युस्तस्योल्मुकस्योत्तरतः प्राग्वोदग्वोपाकरणबर्हिषोर्मध्ये एकं बर्हिरपास्यति—**पृथिव्याः सम्मृचः पाहि**[1] इति मन्त्रेण।

उपाकरणबर्हिः—पूर्वं येन बर्हिर्द्वयेन पशोरुपाकरणं कृतं[1] तदुपाकरणबर्हिरुच्यते ॥

६२. **शमितृप्रैषः**—अध्वर्युः शमितारं प्रत्याह—अकृण्वन्तं मायुं संज्ञपयतेति। अयं शमितृप्रैषइत्युच्यते ॥

६३. **संज्ञपनम्**—तस्मिन् बर्हिषि प्रतीचीनशिरसमुदीचीनपादं पशुं शाययित्वा शमितारः संज्ञपयन्ति। एवंरीत्या पशोर्मारणं संज्ञपनमित्युच्यते ॥

६४. **वाशनादिनिमित्ताहुतयः**—यजमान ऋत्विजश्च संज्ञप्यमानं पशुमनवेक्षमाणाः सन्तः संज्ञपनकाले पृषदाज्यसमीपे आसते **इह प्रजा विश्वरूपा रमन्तामि**त्यृचं च जपन्ति। शमितारः संज्ञपनानन्तरं संज्ञप्त इत्याहुः। अध्वर्युरुपाकरणप्रभृति संज्ञपनपर्यन्तं पशोर्वाशने वेपने पलायने मरणे शकृत्कृतौ मूत्रकरणे च प्रतिनिमित्तं निमित्तक्रमेण तिस्रस्तिस्र आहुतीर्जुहोति—**यदस्य पारे रजस** इत्यादितिसृभिर्ऋग्भिः। तत्र द्वितीयस्यामृचि वाशने निमित्ते **यस्माद् भीषा वाशिष्ठा** इति पाठः। वेपने तु **वाशिष्ठा** इति पदस्य स्थाने **वेपिष्ठा** इति पदमूहनीयम्। एवं सर्वनिमित्तेषु। अग्नये वैश्वानरायेदमिति यजमानस्य त्याग आद्ये। अन्त्ययोस्तु रुद्राय मीढुष इति। उदकोपस्पर्शश्च। एता वाशनादिनिमित्ताहुतय उच्यन्ते ॥

---

१. द्र० पाशुकपदार्थसंख्या ४७।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

६५. **संज्ञप्ताहुतिः**-ततोऽपूर्वाज्याद् सकृद् गृहीतेन **यत्पशुर्मायुमकृतेत्यादि**-मन्त्रेण जुहोति । अग्नय इति त्यागो यजमानस्य । इयं संज्ञप्ताहुतिरित्युच्यते।।

६६. शमितार **उगेत्यादिमन्त्रेण** पश्वभिमुखं गच्छन्ति । **अदितिः पाश**-मित्यादि मन्त्रेण पाशात् प्रमुच्यमानं पशुमनुमन्त्रयते । अविशाखया वपा-श्रपण्या पाशमादाया**रातीयन्त**मित्यादिमन्त्रेण नैर्ऋत्यां दिशि निरस्यति । अथ प्रतिप्रस्थाता पत्नीमुत्थाप्योदकमण्डलुं धारयित्वा **नमस्त आतानेति**मन्त्रे-णादित्यमीक्षयति । अन्तरेण· चात्वालोत्करौ पत्नीमुदङ्ङुपनिष्क्रमय्य प्राचीं-मुदानयन्ननर्वाप्रेहीत्यादिमन्त्रं वाचयति । अध्वर्युः पशुसमीपे अपो वीक्षमाणां पत्नीं **आपो देवो**रित्यादिमन्त्रं वाचयति ।

संज्ञप्तपश्वाप्यायनम् स्वयमेव मन्त्रं ब्रुवाणा पत्नी जलं सिञ्चन्ती सती क्रमेण पशोरङ्गान्याप्याययति—**वाक् त आप्यायता**मिति मन्त्रेण वाचं, **प्रा-णस्त** इति नासिके । एवं **चक्षुस्त** इति चक्षुषी । **श्रोत्रं त** इति श्रोत्रे । चक्षु-रादेर्द्वित्वात् मन्त्रे एकवचनान्तप्रयोगात्प्रतिस्थानं मन्त्रावृत्तिरिति केचित् । **या ते प्राणाञ्छुगित्यादिमन्त्रं** सकृदेव वदति । पूर्वमाप्यायितानि वागादी-न्यङ्गानि संमृशति । ततो **नाभिस्त आप्यायता**मिति नाभिम् । **पायुस्त** इति गुदम् । ततः **शुद्धाश्चरित्रा** इत्यादिमन्त्रेण पशोश्चतुरः पादानेकीकृत्य प्रक्षालयति । अतिशिष्टा अपः पशोः पृष्ठमूलादारभ्याग्रपर्यन्तं निनयति । **शं महोभ्या**मिति मन्त्रेण । एतावत् कर्म संज्ञप्तपश्वाप्यायनमित्युच्यते ।।

६७. **त्वक्छेदनम्** —अध्वर्युः पत्नीमन्यत्र गमयित्वा पशोर्दक्षिणपार्श्वे द्वितीयमुपाकरणवर्हिः[1] **ओषधे त्रायस्वैन**मिति मन्त्रेण प्रागग्रं निदधाति । **स्वधिते मैनं हिंसी**रिति मन्त्रेण तस्योपरि स्वधितिं तिर्यञ्चं निदधाति । बर्हिषा सह त्वचं छित्त्वा बर्हिषोऽग्रं दक्षिणहस्ताङ्गुलल्यन्तराले सक्तं कृत्वा बर्हिषोऽधोभागस्योभावन्तौ सह गृहीत्वा रुधिराक्तं छिन्नप्रदेशं नैर्ऋत्यां दिशि **रक्षसां भागोसी**त्यादिमन्त्रेण निरस्यति । इदं त्वक्छेदनमित्युच्यते ।।

६८. **वपोद्धरणं वपोत्खेदनं वा**—ततोऽप उपस्पृश्य छिन्नप्रदेशं पुनर्वि-स्तीर्णं कृत्वा **इषे त्वे**तिमन्त्रेण वपामुद्धरति । इदं वपोद्धरणं वपोत्खेदनमिति चोच्यते ।।

६९. **वपा** हृदयं हृन्मेमेदस्तु वपा वसेतिकोशात् । (अमर २।६।१५) मेदोविशेषः सर्वोदरव्यापो पोलिकाकारोतिश्वेतवर्णी वपेत्युच्चते ।।

---

१. द्र० पाशुकपदार्थसंख्या ४७ । एकस्यो पाकरणबर्हिषोऽपासनं ६१ संख्या द्रष्टव्यम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७०. **वपाप्रक्षालनम्**—तया वपया सशाखां वपाश्रपणीं **घृतेनेत्यादि प्रोर्ण्वाथामित्यन्तेन** मन्त्रेण प्रच्छादयति। अविशाखया[1] वपाश्रपण्या वपाया अधोभागं गृहीत्वा वपां स्वधितिनाऽच्छिन्नो राय इत्यादिमन्त्रेण छिनत्ति। प्राङ्मुखः पर्यावृत्य वपामद्भिः प्रक्षालयति। एतद् वपाप्रक्षालनमित्युच्यते॥

७१. **वपाप्रतितपनम्**—अथैनां वपां शामित्राग्नौ प्रतितपति। एतद् वपाप्रतितपनमुच्यते॥

७२. **पशूल्मुकप्रक्षेपणम्**—आग्नीध्रः शामित्रसकाशे पूर्वनिहितनुल्मुकमादायान्तरेण चात्वालोत्करावुत्तरवेद्यभिमुखो गच्छति। तस्य पश्चादध्वर्युः **उर्वन्तरिक्षमन्विहीतिमन्त्रेण** गच्छति। यजमानो वपाश्रपणीमन्वारभते। आग्नीध्र उल्मुकमाहवनीये प्रक्षिपति। इदं पशूल्मुकप्रक्षेपणमित्युच्यते॥

७३. **उपाकरणबर्हिरग्रप्रक्षेपः**——अध्वर्युराहवनीयस्योत्तरपार्श्वस्थेष्वङ्गारेषु पूर्वमङ्गुल्यन्तराले स्थापितं बर्हिषोऽग्रं प्रक्षिपति **वायो वीहीत्यादि**मन्त्रेण। अयमुपाकरणबर्हिरग्रप्रक्षेप इत्युच्यते॥

७४. **स्तोकाहुतिः**—प्रदीप्तस्य बर्हिरग्रस्य ज्वालायां वपां वपाश्रपण्या किञ्चित् प्रतितप्य यूपाहवनीययोरन्तरेण नीत्वा दक्षिणतः प्रतिप्रस्थात्रे प्रयच्छति। प्रतिप्रस्थाता आहवनीयस्य दक्षिणतः उदङ्मुखः स्थित्वा श्रपयति। अध्वर्युरासीनः श्रप्यमाणाया वपाया उपरि अपूर्वाज्येन **त्वामु ते दधिर** इत्यृचा स्रुवाहुतिं जुहोति। जातवेदसेऽग्नय इदमिति यजमानस्य त्यागः। इयं स्तोकाहुतिरित्युच्यते॥

७५. **वपाश्रपणम्**—अथाध्वर्युर्होतारं सम्प्रेष्यति—'स्तोकेभ्योनुब्रूहि' इति। इदं वपाश्रपणमुच्यते॥

७६. **वपालंकरणम्**—वपायां शृतायां सत्यां पात्रान्तरेऽपूर्वाज्येन उपस्तीर्य वपाश्रपणीसकाशाद् वपामुद्धृत्य तस्मिन् पात्रेऽवधायाग्नावधिश्रित्य अपूर्वाज्येनाभिघार्योदगुद्वास्य तेनैवाज्येन सान्नाय्यवन्मन्त्रेणालङ्करोति। इदं वपालङ्करणमुच्यते॥

७७. **वपासादनम्**—स्रुचां दक्षिणतः पञ्चहोत्रा[2] वपामासादयति। इदं वपासादनमुच्यते॥

७८. **अग्निर्होतेत्यादीनि**[3] पञ्च वाक्यानि पञ्चहोतृपदवाच्यानि॥

---

१. वपा श्रपण्यां विशाखा अविशाखा च द्वौ भागौ भवतः। द्र० ११८ पृष्ठान्ते।
२. द्र० अग्रिमा ७८ संख्या। ३. द्र० तै० आर० ३।३।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

७९. **उत्तमप्रयाजप्रैषप्रैषः**—यजमानेनासन्नाभिमन्त्रणे कृते स्रुगादापनमन्त्रगत**घृतवती**शब्दं श्रुत्वा ऽध्वर्युर्जुहूपभृतावादायात्याक्रम्याश्राव्य प्रत्याश्रावितै मैत्रावरुणं प्रत्याह—**स्वाहाकृतीभ्यः प्रेष्येति**। अयमुत्तमप्रयाजप्रैषप्रैष उच्यते ॥

८०. मैत्रावरुणेन प्रेषितो होता एकादशीं प्रयाजयाज्यां पठति—होत्रा वषट्कृतेऽध्वर्युरुत्तमप्रयाजेन प्रचरति। तत उदङ्ङत्याक्रम्य प्रयाजशेषेण ध्रुवामभिघार्य पृषदाज्यमभिघार्य दक्षिणतो गत्वा वपामभिघार्य यथागतं प्रतिनिवृत्य चतुर्वारं ध्रुवाया आज्यं गृह्णान आह--**अग्नय आज्यस्यावदीयमानस्यानुब्रू३हि** इति। ततोऽत्याक्रम्याश्राव्य प्रत्याश्रावित आह--**अग्नय आज्यं प्रस्थितं प्रेष्येति**। ततो मैत्रावरुणप्रेषितो होता यजति। होत्रा वषट्कृतेऽध्वर्युः प्रकृतिवत् प्रथमाज्यभागेन प्रचरति एवं द्वितीयाज्यभागेन। तत्र **सोमायाज्यस्यावदीयमानस्यानुब्रू३हि' 'सोमायाज्यं प्रस्थितं प्रेष्येति** प्रैषयोर्विशेषः। उभयत्र याजमानं प्रकृतिवत्।

वपानुयाज्याप्रैषः—अथापूर्वाज्येन जुह्वामुपस्तीर्य तदुपरि हिरण्यशकलमवधाय वपामेकीकृत्य स्रुवेणाददान आह—**इन्द्राग्निभ्यां छागस्य हविषो वपाया मेदसोनुब्रू३हीति**। अयं वपानुयाज्याप्रैष उच्यते ॥

८१. **वपायाज्याप्रैषः**—वपां स्रुचि निधाय तदुपरि हिरण्यशकलं निधायापूर्वाज्येनाभिघार्यापूर्वाज्यस्थालीं सस्रुवामाहवनीयसकाशे निधायात्याक्रम्याश्राव्य प्रत्याश्रावित आह—**इन्द्राग्निभ्यां छागस्य वपा मेदः प्रस्थितं प्रेष्येति**। अयं वपायाज्याप्रैष उच्यते ॥

८२. **वपायागः, वपाप्रचारो वा—स्वाहा देवेभ्यः** इति मन्त्रेण पुरस्तात् स्रुवेणाज्याहुतिं जुहोति। देवेभ्य इदमिति यजमानस्य त्यागः। अध्वर्युर्होतुर्याज्याया उपक्रमकाले **जातवेदो वपये**त्यृचं स्वाहाकारान्तां पठन् वषट्कारसमकालं स्रुङ्मुखेन वपां जुहोति। याजमानं प्रकृतिवत्। **देवेभ्यः स्वाहे**ति मन्त्रेणोपरिष्टात् स्रुवाहुतिं जुहोति। याजमानं पूर्ववत्। आज्यभागानन्तरमेतावत् कर्म वपायाग इति वपाप्रचार इति चोच्यते ॥

८३. **वपाश्रपण्यनुप्रहरणम्**—ततो विशाखां वपाश्रपणीं प्रागग्रामविशाखां वपाश्रपणीं प्रत्यगग्रां च कृत्वाऽऽहवनीये **स्वाहोर्ध्वनभस**मित्याद्यृचा सस्वाहाकारयानुप्रहरति। इदं वपाश्रपण्यनुप्रहरणमुच्यते ॥

---

१. त्रिप्रभृतीनामन्त्यमक्षरम् उत्तममित्युच्यते (काशिका ४।१।७८)। इहैकादश प्रयाजा इत्युक्तं पुरस्तात्। तस्मादिह उत्तमप्रयाजशब्देनैकादशः प्रयाजो ज्ञेयः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

८४. ऊर्ध्वनभसे मारुतायेदमिति यजमानस्य त्यागः। वपाश्रपण्योरुपरि संस्रावेणाभिजुहोति। तत उदङ्ङुत्याक्रम्य यथायतनं स्रुचौ सादयित्वा षड्ऋत्विजो यजमानः पत्नी च चात्वालदेशं गत्वा परस्परस्याह्वानं कुर्युः। तद्यथा—पत्न्येहि, होतरेहि, ब्रह्मनेहि, प्रतिप्रस्थातरेहि, प्रशास्तरेहि, अग्नीदेहि, यजमान एहि, इत्यध्वर्युराह्वयति। ततः पत्नी होत्रादीनध्वर्य्यन्तानुक्तरीत्याह्वयति। एवं होतृब्रह्मप्रतिप्रस्थातृप्रशास्त्रग्नीद्यजमानः क्रमेण आत्मानं वर्जयित्वा सर्वेषामुक्तरीत्याह्वानं कुर्युः।

वपामार्जनम्—तत **इदमापः प्रवहतेति निमुञ्चामि शपथादिति** च द्वाभ्यामृग्भ्यां चात्वाले सर्वे मार्जयन्ते। यजमानः **सुमित्रा न आप ओषधयः सन्त्विति** मन्त्रेणाञ्जलिनापो गृह्णाति **दुर्मित्रास्तस्मै भूयासुरित्यादिमन्त्रेण** नैर्ऋत्यां दिशि ता अपो निरस्यति। सर्वे अपः स्पृष्ट्वा स्वे-स्वे स्थान उपविशन्ति। इदं वपामार्जनमित्युच्यते॥

८५. **पशुपुरोडाशनिर्वापप्रैषः**—अथाध्वर्युराह—अग्नीत् पशु पुरोडाशं निर्वप, प्रतिप्रस्थातः पशुं विशाधि इति। अयं पशुपुरोडाशनिर्वापप्रैष उच्यते॥

८६. ततः आग्नीध्रः पाणी सम्मृश्य शालामुखीयस्य[1] पुरस्ताद् दर्भेषु पात्राणि सादयति—स्फ्यमेकादशकपालानि शूर्पं कृष्णाजिनम् उलूखलं मुसलं दृषदमुपलां मेक्षणं पिष्टोद्वपनीं प्रणीताप्रणयनं दारुपात्रीं मदन्तीं च।

शालामुखीयः—प्राकृत आहवनीयः शालामुखीय इत्युच्यते॥

८७. ततो ब्रह्मोपवेशनादि प्रकृतिवत्। निर्वापादिषु अग्निपदस्य स्थाने इन्द्राग्निपदम्। शालामुखीयस्य पश्चादाप्यलेपनिनयनान्तं करोति।

पश्वङ्गप्रग्रहप्रैषः—प्रतिप्रस्थाता हविष्कृदन्ते आप्यनिनयनान्ते वा सम्प्रैषमाह—शमितर्हृदयं जिह्वां वक्षस्तानि सार्धं कुरुतात् तनिम मतस्नौ तानि सार्धं सव्यं दोरेकचरं कुरुतान्नानापार्श्वे अवधत्ताद् दक्षिणां श्रोणिमध्युद्धि कुरुताद् दक्षिणं दोः सव्यां श्रोणिमणिमद्गुदस्य तानि व्यङ्गानि कुरुताद् वनिष्ठुं च जाघनीं चावधत्तात् बहु यूः कुरुतात् त्रिः पशुं प्रच्यावयतात् त्रिः प्रच्युतस्य पशोर्हृदयमुत्तमं कुरुतादिति[2]। अयं पश्वङ्गग्रहणप्रैष इत्युच्यते॥

८८. अध्वर्युः शामित्राग्नौ पशुकुम्भीमधिश्रयति—**द्यौरसि पृथिव्यसी**त्यादिमन्त्रेण पशुकुम्भ्यां शाखापवित्रमुदग्रं निदधाति। तस्यां प्रभूतमुदकमानीय सर्वाण्यङ्गानि निक्षिप्य सुशृतानि यथास्युस्तथा श्रपयति। पश्वङ्गेषु

---

१. द्र० अस्याः पदार्थसंख्याया अन्ते। २. द्र० बौधा० श्रौत ४।८।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भृतेषु सत्सु आग्नीध्रो दक्षिणेनाज्यस्थालीं सस्रुवां सव्येन दारुपात्रीं वेदमित्येतत् समादायान्तर्वेदि पुरोडाशासादनान्तं करोति ।

पशुपुरोडाशानुवाक्याप्रैषः—यजमानेनासन्नाभिमन्त्रणे कृते ऽध्वर्युर्जुहूपभृतोरुपस्तीर्य पुरोडाशस्य पूर्वार्धादवद्यन्नाह—**इन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रू३हीति** । अयं पशुपुरोडाशानुवाक्याप्रैष इत्युच्यते ।।

८९. जुह्वां प्रकृतिवदवदाय प्रत्यञ्जनान्तं कृत्वोपभृति स्विष्टकृदर्थं पुरोडाशस्योत्तरार्धात् सकृदवदाय द्विरभिघार्य न प्रत्यनक्ति ।

पशुपुरोडाशयाज्याप्रैषः—अत्याक्रम्याश्राव्य प्रत्याश्रावित आह—**इन्द्राग्निभ्यां पुरोडाशं प्रस्थितं प्रे३ष्येति** । अयं पशुपुरोडाशयाज्याप्रैष इत्युच्यते।।

९०. वषट्कृते जुहोति । इन्द्राग्निभ्यामिदमिति यजमानस्य त्यागोऽनुमन्त्रणं च प्राकृतम् ।

पशुपुरोडाशस्विष्टकृदनुवाक्याप्रैषः—अध्वर्युरुपभृत्स्थं पुरोडाशं जुह्वां समावपमान आह—**अग्नयेऽनुब्रू३हीति** । अयं पशुपुरोडाशस्विष्टकृदनुवाक्याप्रैष उच्यते ।।

९१. **पशुपुरोडाशस्विष्टकृत्प्रैषप्रैषः**—ततोऽत्याक्रम्य प्रत्याश्रावित आह—**अग्नये प्रे३ष्येति** । अयं पशुपुरोडाशस्विष्टकृत्प्रैषप्रैष उच्यते ।।

९२. वषट्कृते प्रकृतिवज्जुहोति । प्राकृताग्नेययागवद्यजमानस्य त्यागानुमन्त्रणे । ततो हविरुच्छिष्टोद्वासनान्तं प्रकृतिवत् । ततः स्रुचि चतुर्गृहीतं गृहीत्वाऽन्वाहार्यपचने इध्मप्रव्रश्चनान्यभ्याधाय फलीकरणहोमं कृत्वा प्रणीतानिनयनान्तं प्रकृतिवत् ।

पाशुकहविरासादनप्रैषः—अथ संप्रैषमाह—अग्नीदुत्तरं बर्हिरुपसादय, प्रतिप्रस्थातः पशौ संवदस्वेति । अयं पाशुकहविरासादनप्रैष इत्युच्यते ।।

९३. **शमितृप्रश्नोत्तरे**—तत आग्नीध्रः स्रुचां दक्षिणतो बर्हिरास्तीर्य तदुपरि यूपाहवनीययोरन्तरेणेडसून[1] माहृत्य कृष्णशाखायामुपगूहति । प्रतिप्रस्थाता आज्यस्थालीं स्रुवं चादाय पूर्वगृहीतात् पृषदाज्याज्जुह्वां गृहीत्वान्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य शमितारं पृच्छति—शृत[ँ]हविः३शमितः, इति । शमिता हृदयशूलं पुरतो धारयन् 'शृतम्' इति प्रत्याह । प्रतिप्रस्थाता पुनः किंचिद् गत्वा पूर्ववत् पृच्छति । शमिता तथैव प्रत्याह पुनः किंचिद् गत्वा तथैव तृतीयप्रश्नोत्तरे । इमे प्रश्नोत्तरे शमितृप्रश्नोत्तरे इत्युच्येते ।।

---

१. द्र० बौधा० श्रौत ४।१।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९४. **हविरानयनार्थगमनमन्त्राः**—अत्र प्रथमगमने **पूषा मा पशुपाः पात्विति** मन्त्रः, **पूषा मा पथिपाः पात्विति** द्वितीयगमने मन्त्रः, तृतीयगमने **पूषा माधिपाः पात्विति**मन्त्रः। अथ वा तूष्णीमेव गमनत्रयम्। एते हविरानयनार्थगमनमन्त्रा इत्युच्यन्ते ॥

९५. **हविरलंकरणम्**—प्रतिप्रस्थाता उक्तरीत्या शामित्राग्निसमीपं गत्वा शमितुर्हस्ताच्छूलमादाय तेन शूलेन हृदयरूपमवदानं भित्त्वा तच्छूलं शमितुर्हस्ते दत्वा पृषदाज्येन हृदयादीन्येकादशावदानानि युगपदभिघारयति **सन्ते मनसा मन** इत्यादिना स्वाहाकारान्तेन मन्त्रेण। पुनराज्यस्थाल्याज्येन स्रुवगृहीतेन सर्वाण्यवदानान्यभिघार्योदगुद्वास्य पुनराज्येनाभिघार्य एकादशावदानानि प्रत्येकं **यस्ते आत्मा पशुष्वित्यादिमन्त्रेणालङ्करोति**। उक्तमन्त्रेणाभिघारणं हविरलङ्करणमित्युच्यते ॥

९६. **अङ्गाहरणप्रैषः**—ततो विपूः कृत्वा हरतेति परिकर्मिणः प्रतिप्रेष्यति। अयमङ्गाहरणप्रैष उच्यते ॥

९७. **पाशुकहविरासादनम्**—अध्वर्युर्जुह्वामुपभृति च ध्रुवाज्येनोपस्तृणाति। इडापात्रे आज्यस्थाल्याज्यनोपस्तृणाति। वसाहोमहवन्यामपूर्वाज्यनोपस्तृणाति। स्वयं यूपस्य बहिर्मार्गेण गच्छन् जूहूम् उपभृतं वसाहोमहवनीम् इडापात्रं प्राशित्रहरणं च यूपाहवनीययोरन्तरेणाहृत्य दक्षिणतो हविषः सादयति। परिकर्मिणस्तु अङ्गानि यूष्णः पृथक् कृत्वा यूषं पात्रान्तरे गृहीतं स्थापयन्ति। पश्वङ्गानि यूपाहवनीययोरन्तरेणाहरन्ति। अध्वर्युस्तान्यङ्गानि स्रुचां दक्षिणतः प्लक्षशाखसमीपे पञ्चहोत्रासादयति। ततः पात्रान्तरस्थं यूषं यूपाहवनीयोरन्तरेणाहृत्याङ्गानां दक्षिणतः सादयति। असन्नानि हवींषि **यन्ते अग्न** इत्यृचा यजमानोनुमन्त्रयते। इदं पाशुकहविरासादनमित्युच्यते ॥

९८. **अङ्गावदानप्रैषः**—ततोऽध्वर्युः प्लक्षशाखायां हृदयं निधाय स्वधितिना तस्याग्रे छिन्नप्रदेशादवद्यन्नाह—**मनोतायै हविषोवदीयमानस्यानुब्रूहीति**। अयमङ्गावदानप्रैष इत्युच्यते ॥

९९. **पश्वङ्गावदानम्**—हृदयाज्जुह्वां द्विरवद्यति ततो जिह्वायाः सकाशात् द्विरवद्यति। ततो वक्षसस्तनिम्नश्च वृवययोर्मेदसी पृथक् स्थापयित्वा दक्षिणवृवयात्सव्यवृवयात् सव्याद् दोष्णो दक्षिणात् पार्श्वात्सव्यात् पार्श्वाद् दक्षिणश्रोण्या अध्युध्या ऊर्ध्वप्रदेशाद्गुदं त्रेधा कृत्वा मूलमुपयड्भ्योऽग्रं स्विष्टकृदर्थं निधाय मध्यं द्वेधा कृत्वा जुह्वामवदधाति। पूर्वस्थापितदक्षिणवृवयमेदोयूष्णि निधाय प्रसार्य तेन जुहूं प्रच्छाद्य यूष्णोपसिच्य ध्रुवाज्येन पूरि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तेन यूपाहवनीययोर्मध्याहृतेन स्रुवेण जुह्वां गृहीतान्यङ्गान्यभिघारयति । सर्वाण्यङ्गानि द्विर्द्विरवद्यति । सर्वत्रोपस्थानाभिमर्शप्रत्यञ्जनानि न भवन्ति । तत उपभृति सकृद् दक्षिणस्य दोष्णः सकृत् सव्यश्रोणेः पिशितमवदाय पूर्वनिहितं गुदस्याग्रं निधाय यूषमानीय तदुपरि सव्यवृक्कयमेदो निधाय प्रसार्य तत्रोपभृतं प्रच्छाद्य यूष्णोपसिच्य पूर्ववद् द्विरभिघारयति । अवत्तावशिष्टेभ्योऽङ्गेभ्यः प्राशित्रमवदायाज्यस्थाल्याः सकाशाद् गृहीताज्येन स्रुवदण्डेन जुह्ववदानवत् द्विरभिघार्य निदधाति । इडापात्र्याम् अवदानकाले ऽवशेषितान् हृदयजिह्वावक्षोभागान् तनिममतस्नु वनिष्ठुं च द्विर्द्विरादाय अन्यैरप्यनुक्तैरस्थिवर्जितैरङ्गैरिडां वर्धयित्वा यूष्णोपसिच्य जुह्वङ्गवद् आज्यस्थाल्याज्येन स्रुवेणाभिघारयति,। वसाहोमहवन्यां वसां गृहीत्वा यूष्णोपसिच्य जुह्वङ्गवदपूर्वाज्येन स्रुवेणाभिघारयति । इदं कर्म पश्वङ्गावदानमुच्यते ।।

१००. **अवदानाभिमर्शनमन्त्रः**—तत **ऐन्द्रः प्राणो अङ्गे अङ्गे** इत्यादिमन्त्रेणावदानान्यभिमृशति । अयं मन्त्रोऽवदानाभिमर्शनमन्त्र इत्युच्यते ।।

१०१. अथ दक्षिणपार्श्वस्य मांसवत्प्रदेशेन वसाहोमहवन्यां गृहीतां वसां मिश्रयति—**श्रीरस्यग्निस्त्वेत्यादिमन्त्रेण** । जाघनीं यथाहृतं प्रत्याहृत्य पश्चान्नीत्वा शालामुखीयस्य समीपे निदध्युः । पश्वङ्गानि जुहूं उपभृतं इडापात्रीं वसाहोमहवनीं प्राशित्रहरणं च यथाहृतं पर्याहृत्य यथास्थानं निदध्युः ।

पश्वङ्गानुवाक्याप्रैषः—अध्वर्युर्यथागतं प्रत्येत्य जुहूपभृतावाददान आह—**इन्द्राग्निभ्यां छागस्य हविषोनुब्रूहीति** । अयं पश्वङ्गानुवाक्याप्रैष उच्यते ।।

१०२. **पश्वङ्गाहविर्याज्याप्रैषप्रैषः**—अत्याक्रम्याश्राव्य प्रत्याश्रावित आह—**इन्द्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येति** । अयं हविर्याज्याप्रैषप्रैष उच्यते ।।

१०३. **वसाहोमः**—प्रतिप्रस्थाता आहवनीयस्योत्तरतस्तिष्ठन् याज्याया अर्धर्चे होत्रा पठिते वसाहोमं **घृतं घृतपावानः पिबतेत्यृचा** जुहोति । अन्तरिक्षायेदमिति यजमानस्य त्यागः । अयं वसाहोम इत्युच्यते ।।

१०४. **अङ्गयागः**—होतुर्वषट्कारे अध्वर्युर्जुह्वा जुहोति । यजमान इन्द्राग्निभ्यामिदं न मम । इन्द्राग्नियोरहं देवयज्ययेन्द्रियावी भूयासमिति त्यागानन्तरमनुमन्त्रयते । अयमङ्गयाग इत्युच्यते ।।

१०५. **दिग्घोमः**—ततः प्रतिप्रस्थातोपविश्य वसाहोमशेषेण दिशो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

जुहोति—**दिशः प्रदिश** इत्यादि मन्त्रेण। दिग्भ्य इदमिति यजमानत्यागः। अयं दिग्घोम इत्युच्यते ॥

१०६. **वनस्पतियागः**—ततोऽध्वर्युः प्रदक्षिणमावृत्य जुह्वामुपस्तीर्य स्रुवेण पृषदाज्यं सकृद् गृहीत्वाऽऽह—**वनस्पतयेनुब्रूहीति** द्विरभिघार्य प्रसव्यमावृत्याश्राव्य प्रत्याश्रावित आह—**वनस्पतये प्रेष्येति**। वषट्कृते पूर्वा आहुतीरतीहाय जुहोति। वनस्पतय इदमिति यजमानस्य त्यागः आयुष्मानित्यनुमन्त्रणञ्च। अयं वनस्पतियाग इत्युच्यते ॥

१०७. **पश्विडाभक्षणम्**—अध्वर्युरुपभृति गृहीतान्यङ्गानि जुह्वां समावपमान आह—**अग्नये स्विष्टकृतेनुब्रूहीति**। आश्राव्य प्रत्याश्रावित आह—**अग्नये स्विष्टकृते प्रेष्येति**। वषट्कृते पूर्ववज्जुहोति। संक्षालननिनयनानन्तरं होत्रङ्गुलिपर्वाञ्जनादि करोति। उपहूतायामिडायां वनिष्ठुमग्नीधे षडवत्तं संपाद्य ददाति। इडाभागमपि ददातीति केषाञ्चिन्मते। षडृत्विजो यजमानश्चेडां भक्षयन्ति। इदं पश्विडाभक्षणमुच्यते ॥

१०८. मार्जनानन्तरं ब्रह्मणे प्राशित्रं परिहरेत्यादि कृत्वा ब्रह्मणे वक्षः परिहरेत्याह। तत आग्नीध्रस्तथा करोति। यजमानः अन्वाहार्यप्रतिग्रहानन्तरम् ऋत्विग्भ्यो गां ददाति। **देवस्येत्यादिप्रतिग्रहमन्त्रे** ब्रह्मण ओदनमित्यस्य स्थाने **रुद्राय गा**मिति विशेषः।

उपयाजप्रैषः—अथाऽध्वर्युः सम्प्रैषमाह—**अग्नीदौपयजानङ्गारानाहरोपयष्टरुपसीद ब्रह्मन् प्रस्थास्यामः समिधमाधायाग्नीन् सकृत्संमृढढीति**। अयमुपयाजप्रैष इत्युच्यते ॥

१०९. **गुदहोमा उपयाजाः**—तत आग्नीध्रः शामित्राग्निसकाशादङ्गारादाय होतुः पुरस्तादासादयन्ति। प्रतिप्रस्थाता गुदतृतीयभागं वसाहोमहवनीञ्चादाय होतुरुत्तरपार्श्वे उपविश्य गुदं प्रत्यनुयाजमनुयाजप्रचारकाले स्वधितिना ऽसंभिन्दन् प्रच्छिद्य वसाहोमहवन्या अपर्यावृत्य जुहोति। अध्वर्युः पृषदाज्यग्रहणीस्थं समस्तं पृषदाज्यं विहृत्य जुह्वां समानीय पृषदाज्यग्रहणीमुपभृत्स्थाने धृत्वा ऽत्याक्रम्याश्राव्य प्रत्याश्रावित आह—**देवेभ्यः प्रेष्येति**। वषट्कारसमकालम् अध्वर्युः पृषदाज्यं जुहोति,प्रतिप्रस्थाता गुदखण्डं **समुद्रं गच्छ स्वाहेति** मन्त्रेण जुहोति। देवाय बर्हिषि इदमिति समुद्रायेदमिति च त्यागानन्तरं बर्हिषोऽहमित्यादि प्रकृतिवदनुमन्त्रणं च यजमानस्य। अध्वर्युर्द्वितीयादिष्वनुयाजेषु मैत्रावरुणं प्रति प्रेष्येत्येव प्रेष्यति। ऊर्जादिषु बर्हिर्वर्जेष्वनुयाजेषु प्रशास्त्रा सह यजेति वदति। प्रतिप्रस्थाता द्वितीयादि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ष्वनुयाजेषु **अन्तरिक्षं गच्छ स्वाहे**त्यादि **वैश्वानरं गच्छ स्वाहे**त्यन्तैर्दशभिर्मन्त्रैर्होतुर्वषट्कारसमकालं क्रमेण दशगुदखण्डानि प्रच्छिद्य जुहोति। एते प्रतिप्रस्थ तृकर्तृका गुदहोमा उपयाजा इत्युच्यन्ते ॥

११०. **अनुयाजेषु यजमानस्य त्यागाः**—यजमानस्य द्वितीयादिष्वनुयाजेषु त्यागाः क्रमेण—देवीभ्यो द्वार्भ्यं इदम्० अन्तरिक्षायेदम्० प्रथमानुयाजे। देवीभ्यामुषासानक्ताभ्यामिदम्०, देवाय सवित्र इदम्० द्वितीये। देवीभ्यां जोष्ट्रीभ्यामिदम्० अहोरात्राभ्यामिदम्० तृतीये। देवीभ्यामूर्जाहुतिभ्यामिदं० मित्रावरुणाभ्यामिदम्० चतुर्थे। देवाभ्यां दैव्याभ्यां होतृभ्यामिदम्० सोमायेदम्० पञ्चमे। देवीभ्यस्तिसृभ्यस्तिसृभ्यो देवीभ्य इदम्० यज्ञायेदम्० षष्ठे। देवाय नराशंसायेदम्० छन्दोभ्य इदम्० सप्तमे। देवाय वनस्पतय इदम्० द्यावापृथिवीभ्यामिदम्० अष्टमे। देवाय बर्हिषेवारितीभ्य इदम्० दिव्याय नभस इदम्० नवमे। देवायाग्नये स्विष्टकृत इदम्० अग्नये वैश्वानरायेदम्० दशमे। इति द्वितीयादिषु दशसु त्यागा एते ॥

अनुयाजानां यजमानस्यानुमन्त्राणि—अथानुमन्त्रणानि क्रमेण प्रथमादीनामेकादशानामनुयाजानाम्—बर्हिषोऽहं देवयज्यया प्रजावान् भूयासम्। द्वारामहं देव० प्रजावा०। उषासानक्तयोरहम्० जोष्ट्र्योरहम्०। ऊर्जाहुत्योरहं०। पशुमान्०। दैव्ययोर्होत्रोरहम्०। तिसृणां तिसृणामहम्० नराशंसस्याहं देवयज्यया०। वनस्पतेरहम्० आयुष्मान्०। बर्हिषोवारितीनामहं० प्रजावान्०। अग्नेः स्विष्टकृतोहं० आयुष्मान् यज्ञेन प्रतिष्ठां गमेयम् ॥

औपयाजिकधूमान्वेक्षणम्—तत प्रतिप्रस्थाता बर्हिषि हस्तौ निमार्ष्टि—**अद्भ्यस्त्वौषधीभ्यः** इत्यादि मन्त्रेण। **तनूत्वचमि**त्यादिमन्त्रेण यजमान औपयाजिकं धूममन्वीक्षते।

स्वरुहोमः—अध्वर्युरुदङ्ङित्याक्रम्य जुह्वां स्वरुमवधायोत्तरवेदेः पुरस्तात् प्रत्यङ्मुखस्तिष्ठन् **दिवन्ते धूमो गच्छत्वि**त्यादिमन्त्रेण जुहोति। यजमानः वायव इदमिति त्यागं पठति। अयं स्वरुहोम इत्युच्यते ॥

१११. अध्वर्युर्यथायतनं स्रुचौ सादयित्वा वाजवतीभ्यां स्रुग्व्यूहने उपभृदनन्तरं तेनैव मन्त्रेण पृषदाज्यग्रहणीं व्यूहति। सूक्तवाकप्रैषे **ब्रूही**ति पदस्य स्थाने **प्रेष्ये**ति वदति। उज्जितिवाचने आज्यभागानन्तरम् **इन्द्राग्नियोरह० वनस्पतेरह० देवानामाज्यपाना**मित्यादि प्रकृतिवत्। प्रस्तरेण सह शाखापवित्रं प्रहरति। अग्नीदित्यादि संस्रावहोमान्तं प्रकृतिवत्। उत्करे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्रुचो विमुञ्चति । तन्मन्त्रे **वामित्यादिनां** द्विवचनानां स्थाने **वः** इत्यादीनां बहुवचनानामूहः, पृषदाज्यग्रहण्यास्तृतीयत्वात् । प्रदक्षिणमावृत्य प्रत्यङ्ङुद्रुत्य सोमं त्वष्टारं चाज्यस्थाल्याज्येन चतुर्गृहीतेनेष्ट्वा जुह्वामुपस्तीर्य जाघन्या अलोमप्रदेशात् द्विरवदायाभिघार्य देवानां पत्नोः पूर्ववद् यजति । पुनर्जुह्वामुपस्तीर्य जाघन्या अधोभागात् द्विरवदायाभिघार्याग्निं गृहपतिं यजति । अत्रैते चत्वार एव पत्नीसंयाजा भवन्ति । अन्तिमयोर्द्वयोर्होमद्रव्ये प्रकृत्यपेक्षया विशेषः प्रदर्शित एव । होतुर्हस्ते उपस्तीर्य जाघन्या अलोमप्रदेशात् द्विरवदाय दत्वाऽभिघार्य प्रकृतिवदिडामन्वारभते । इडोपह्वानानन्तरमग्नीधे जाघन्या अधोभागादेव षडवत्तं प्रकृतिवद् दत्वा स्रुचि चतुर्गृहीतं गृहीत्वा ऽन्वाहार्यपचने प्रकृतिवत् प्रायश्चितं हुत्वा पत्नी व्रतं विसर्ज्य प्राङेत्य ध्रुवामाप्याय्य दर्शपूर्णमासोक्तप्रायश्चित्तानि हुत्वा पञ्चधातून् समज्य प्रहृत्य दक्षिणेन पदा वेदिमाक्रम्य तिष्ठन् ध्रुवाज्यात् स्रुवेणोपहत्य जुहोति **यज्ञ यज्ञं गच्छेत्यादिमन्त्रेण** । यज्ञायेदमिति यजमानस्य त्यागः । पुनस्तथैव जुहोति **एष ते यज्ञ** इत्यादिमन्त्रेण । यज्ञपतय इदमिति यजमानस्य त्यागः । ततः स्रुवं निधाय ध्रुवामादाय प्रकृतिवत् समिष्टयजुर्जुहोति । तता यजमानो विष्णुक्रमादिव्रतविसर्गान्तं प्रकृतिवत् करोति । ततोऽध्वर्युः स्फयमुदपात्रं हृदयशूलं चादाय **एहि यजमानेति** यजमानमामन्त्र्य पत्न्या सर्वैर्ऋत्विग्भिश्च सहान्तरेण चात्वालोत्करावुदङ्ङपनिष्क्रामति ।

हृदयशूलोपगूहनम्– अध्वर्युरग्रेण स्फ्येनोद्धृत्यावोक्ष्य शुष्कार्द्रयोः सन्धौ हृदयशूलमुपगूहति । सर्वे **शुगसि तमभिशोचेत्यादिमन्त्रं** पठन्ति । इदं हृदयशूलोपगूहनमुच्यते ॥

११२. अध्वर्युर्हृदयशूलं **धाम्नो धाम्नो राजन्नित्यादि** मन्त्रेण प्रोक्षति । यजमानोऽञ्जलिना ऽपो गृह्णाति—**सुमित्र्या न आप ओषधय** इत्यादिमन्त्रेण । ता अपो नैर्ऋत्यां दिशि **दुर्मित्र्यास्तस्मै भूयासुरित्यादिमन्त्रेण** प्रक्षिपति । सर्व अप उपस्पृश्य हृदयशूलमनवेक्षमाणा आगच्छन्तः सन्ताऽर्धपथे आर्द्राः सपलाशास्तिस्रस्तिस्रः समिध आददते । प्रत्येकमादाने **एधोस्येधिषीमहीतिमन्त्रः** । आगत्याहवनीये ग्रहणक्रमेण समिधोभ्यादधति । तत्र तिसृणां समिधामाधाने प्रत्येकं क्रमेण **समिदसि स्वाहा, तजोसि स्वाहा, तेजो मयि धेहि स्वाहेति** त्रयो मन्त्राः ।

बर्हिरुपोषणम्—ततः सर्वे **अपो अन्वचारिषमित्यृचा** आहवनीयमुप-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तिष्ठन्ते । औपयाजिके ऽग्नौ वेद्यां स्तीर्णं बर्हिरुपोषति **यत्कुसीदमित्यादि** भवामीत्यन्तेन मन्त्रेण । इहं बर्हिरुपोषणमुच्यते ।।

११३. **पाशुकसक्तुहोमः**—ततो यजमानो व्रीहिसक्तून् वा अपूर्वाज्येनोपस्तीर्णाभिघारितान् बर्हिषा प्रदीप्ते आहवनीये अञ्जलिना **विश्वतोपवी**त्यादिमन्त्रेण जुहोति । अग्नय इदमिति त्यागः हस्तौ परस्परं संघृष्य **अश्वादेक** इत्यादिमन्त्रं पठन् लेपमपनयति । अयं पाशुकसक्तुहोम इत्युच्यते ।।

यान्ययामित्यादिमन्त्रेण पूर्ववत् द्वितीयं जुहोति । जीवेभ्य इदमिति त्यागः । पूर्वमन्त्रेण हस्तलेपमपनयति । **अनृणा अस्मिन्नित्यादि** मन्त्रेण तृतीयं जुहोति । अग्नय इदमिति त्यागः । हस्तलेपनि नयनं समन्त्रकं पूर्ववत् ।

११४. **उत्तरवेद्युपस्थानम्**—वेद्यां तिष्ठन्नुत्तरवेद्यग्निमुपतिष्ठते—**अयं नो नभेत्यादिमन्त्रेण** । इदमुत्तरवेद्यग्न्युपस्थानमुच्यते ।।

११५. **वायूपस्थानम्**—**स त्वं नोनभेत्यादि मन्त्रेण** वायुमुपतिष्ठते । इदं वायूपस्थानमित्युच्यते ।।

११६. **आदित्योपस्थानम्**—**देव सऽस्पयनेत्यादिमन्त्रेणा**दित्यमुतिष्ठते । इदं पाशुकादित्योपस्थानमित्युच्यते ।।

११७. **अन्तिमयूपोपस्थानम्**—**आशासान** इत्यादि यजमानाय तिष्ठेत्यन्तेन **मन्त्रेण** यूपमुपतिष्ठते । इदमन्तिमयूपोपस्थानमित्युच्यते ।।

११८. बर्हिरुपोषणप्रभृति (पूर्वसंख्या ११२ अन्ते) एतावत्पर्यन्तं कर्माध्वर्युर्यजमानो वा करोति ।

समारोपणपक्षे पत्नीयजमानाभ्यामन्वारब्धो ऽध्वर्युः उत्तरवेद्यग्निम् **अयन्त** इत्यादिमन्त्रेण समिधि समारोपयति । तां समिधं **आजुह्वान** इत्यादि सीदतेत्यन्तेन मन्त्रेण शालामुखीय ऽभ्यादधाति । **उद्बुध्यस्वाग्ने** प्रतीत्यृचा **त्रयस्तिऽशदिति** यजुषा च शालामुखीयं ज्वलयित्वा ऽपूर्वाज्यं स्रुचि चतुर्गृहीतं गृहीत्वा **सप्त मे अग्न** इत्यृचा पूर्णाहुतिं जुहोति । सप्तवते ऽग्नय इदमिति यजमानस्य त्यागः । यजमानो ऽध्वर्यवे गां वरं ददाति ।। ततो **यज्ञो बभूवेत्यादि** ब्राह्मणतर्पणान्तं प्रकृतिवत् ।

अथ समारोपणपक्षे ऽग्नीन् समारोप्याग्निहोत्रशालां गत्वा मथित्वा विहृत्य मनस्वतीं हुत्वा होमकाले उपस्थिते सत्यग्नि होत्रहोमं करोति । **बौधायनसूत्रानुसारेण** यजमानपत्नीप्रतिप्रस्थात्रध्वर्व्वाग्नीध्राणां पाशुकसम्बन्धिकर्माणि प्रतिपादितानि ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अथाश्वलायनसूत्रानुसारेण होतृमैत्रावरुणयोः कर्माणि प्रतिपाद्यन्ते—

तत्र पश्वनष्ठानात् पूर्वम् आग्नेयी आग्नावैष्णवीतिष्टिद्वयम्, अनयोरन्यतरा वा, अथवा कापि न । इति पक्षत्रयम् । एवं पश्वनुष्ठानानन्तरमपि पक्षत्रयम् ।

११९. **पाशुकाग्नेयेष्टिः**—तत्राग्नेयीष्टौ **अग्निर्मूर्धा दिवः ककुदित्यग्ने** पुरोनुवाक्या । **भुवो यज्ञस्य रजसश्चनेतेति** याज्या । अन्यत्सर्वं प्रकृतिवत् । इयं पाशुकाग्नेयेष्टिरित्युच्यते ॥

पाशुकाग्नावैष्णवेष्टिः—आग्नावैष्णव्यामिष्टौ **अग्नाविष्णू सजोषसेत्यग्नाविष्णवो** पुरोनुवाक्या, **अग्नाविष्णू महिधामप्रिय वामिति** याज्या । अन्यत् सर्वं प्रकृतिवत् अनयोरिष्टयोः संस्थाजपो नास्ति । इयं पाशुकाग्नावैष्णवेष्टिरुच्यते ॥

१२०. **यूपाञ्जनीयानुवाचनम्**—**यूपायाज्यमानायानुब्रू३हीति** प्रेषितो होता पाशुवन्धिक्या वेदेः पश्चात् मन्त्रेण निरसनोपनेशने कृत्वा यूपाञ्जनीया ऋचोन्वाह । आदौ सामिधेनीवद् हिंकृत्य **अञ्जन्ति त्वामध्वरे देवयन्त** इत्यृचं त्रिवारमनुब्रूयात् । तृतीये वचने अर्धर्चमुक्त्वा प्रैषान्तरश्रवणपर्यन्तं विरमेत् । **यूपायोच्छ्रीयमाणायानुब्रू३हीति** प्रेषितो द्वितीयार्धर्चान्तिमप्रणवान्तेनोच्छ्रयस्व **वनस्पते** इत्यृचं सन्धाय तदन्तिमप्रणवेन **समिद्धस्य श्रयमाणः पुरस्तादित्यृचम्** । तत उक्तरीत्यैव **ऊर्ध्व ऊ षुण ऊतय** इति द्वे ऋचौ ततो **जातो जायते सुदिनत्व अह्नामित्यृचं** सन्धाय तस्या अर्धर्चं प्रैषान्तरश्रवणपर्यन्तं विरमेत् । ततो **यूपाय परिवीयमाणायानुब्रू३हीति** प्रेषितोऽवशिष्टार्धर्चप्रणवान्तेन **युवा सुवासाः परिवीत आगादित्यृचं** परिधानीयां त्रिवारमनुब्रूयात् । समस्तव्याहृतिमन्त्रेण वाग्विसर्गः । इदं यूपाञ्जनीयानुवचनमित्युच्यते ॥

१२१. **यूपाञ्जनीया ऋचः**—ततश्चातुर्मास्योक्तरीत्याऽग्निमन्थनम् । पूर्वोक्ता ऋचो यूपाञ्जनाय हिता इति व्युत्पत्या यूपाञ्जनीया इत्युच्यन्ते ॥

१२२. **अग्नये समिध्यमानायानुब्रू३हीति** प्रेषित **पृथुपाजा अमर्त्य** इति द्वे धाय्यासंज्ञके ऋचौ अधिके कृत्वा वेदिश्रोण्योत्तरया पार्ष्णी समां निधाय स्थित्वा सप्तदश सामिधेनीरनुब्रूयात् । आज्यभागद्वेव तानामावाहनानन्तरम् **इन्द्राग्नी आ३वह** इति विशेषः, **वनस्पतिमा३वह** इति विशेषः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रवृत्ताहुतयः—सम्मार्गैः सम्मृज्याप उपस्पृश्य प्रवृत्ताहुतीर्जुहोति प्रत्यगुदगाहवनीयाद् अवस्थायाज्यस्थाल्याः स्रुवेणाज्यमादाय जुहोति। तत्र मन्त्राः—**जुष्टो वाचे भूयासं जुष्टो वाचस्पतये देवि वाक् यद्वाचे मधुमत्तमं तस्मिन्मा धाः सरस्वत्यै वाचे स्वाहा**। पुनः स्रुवेणाज्यमादाय पञ्चाहुतीर्विग्रहं जुहोति **स्वाहा वाचे, स्वाहा वाचस्पतये, स्वाहा सरस्वत्यै, स्वाहा सरस्वते, महोभ्यः संमहोभ्यः स्वाहा**। वाच इदमिति त्यागः प्रथमे। द्वितीयादिषु यथालिङ्गं यजमानस्य त्यागः। एताः षडाहुतयः प्रवृत्ताहुतय इत्युच्यन्ते॥

१२३. **मैत्रावरुणदण्डप्रदानम्**—प्रवृत्ताहुतिहोमानन्तरं **प्रशास्तस्तीर्थेन प्रपद्यस्वेति** मैत्रावरुणं प्रत्याह। ततः प्रशास्ता तीर्थेन प्रपद्यते। होता प्राङ्मुखः प्रशास्त्रे दण्डं प्रददाति दक्षिणोत्तराभ्यां पाणिभ्याम्—**मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रयच्छामि** इति मन्त्रेण। ततः प्रशास्ता **मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रतिगृह्णाम्यवक्रो विथुरो भूयास**मिति दण्डं प्रतिगृह्णाति। इदं कर्म मैत्रावरुणदण्डप्रदानमित्युच्यते॥

१२४. प्रशास्ता दण्डं प्रतिगृह्योत्तरेण होतारमतिव्रजेद् दक्षिणेन दण्डं हरेन्न चानेन कञ्चिदपि संस्पृशेत् आप्रैषवचनात्। होतृषदनात् दक्षिणतः प्रह्वो ऽवस्थाय वेद्यां दण्डमवष्टभ्य ब्रूयात्। प्रैषांश्चादेशमनुवाक्यां च सप्रैषे पूर्वा प्रैषात् पर्यग्निस्तोकमनोतोन्नीयमानसूक्तानि च सोमे। उपविश्यान्यत् पठेत्।

समित्प्रैषः—अध्वर्युणा समिद्भ्यः प्रेषितः सन् आह—**होता यक्षदग्निं समिधा सुषमिधा समिद्धं नाभा पृथिव्याः सङ्गथे वामस्य वर्ष्मन् दिव इडस्पदे वेत्वाज्यस्य होतर्यज**[1]॥ १॥ अयं समित्प्रैष इत्युच्यते॥

१२५. **तनूनपात्प्रैषः**—अध्वर्युणा प्रेष्येत्युक्ते आह—**होता यक्षत् तनूनपातमदितेर्गर्भं भुवनस्य गोपाम्। मध्वाद्य देवो देवेभ्यो देवयानान् पथो अनक्तु वेत्वाज्यस्य होतर्यज॥ २॥** अयं तनूनपात्प्रैष इत्युच्यते॥

१२६. **नाराशंसप्रैषः**—प्रेष्येत्युक्ते आह—**होता यक्षन्नाराशंसं नृशस्त्रं नृः प्रणेत्रम्। गोभिर्वपावान्त्स्याद् वीरैः शक्तीवान् रथैः प्रथमयावा हिरण्यश्चन्द्री वेत्वा०॥ ३॥** अयं नाराशंसप्रैष उच्यते॥

२७. **इडप्रैषः**—**होता यक्षदग्निमिड ईडितो देवो देवां आवक्षद् दूतो हव्य-**

---

१. अयं प्रैषो ऽग्रे पठ्यमानाश्च प्रैषाः मै० सं ४।१३।२ स्थाने द्रष्टव्याः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाडमूरा । उपेमं यज्ञमुपेमां देवो देवहूतिमवतु वेत्वा० ॥ ४ ॥ अयमिडप्रैष उच्यते ॥

१२८. बर्हिःप्रैषः—होता यक्षद् बर्हिः सुष्टरीमोर्णम्रदा अस्मिन् यज्ञे वि च प्र च प्रथतां स्वासस्थं देवेभ्यः । एमेनदद्य वसवो रुद्रा आदित्याः सदन्तु प्रियमिन्द्रस्यास्तु वे० ॥ ५ ॥ अयं बर्हिःप्रैष उच्यते ॥

१२९. द्वारां प्रैष—होता यक्षद् दुर ऋष्वाः कवष्यो कोशधावनीरुदाताभिजिहतां विपक्षोभिः श्रयन्तां सुप्रायणा अस्मिन् यज्ञे विश्रयन्तामृतावृधो व्यन्त्वा ० ॥ ६ ॥ अयं द्वारां प्रैष उच्यते ॥

१३०. उषासानक्ताप्रैषः—होता यक्षदुषासानक्ता बृहती सुपेशसोनृः पतिभ्यो योनिं कृण्वाने । संस्मयमने इन्द्रेण देवैरेदं बर्हिः सीदतां वीतामाज्यस्य होत० ॥ ७ ॥ अयमुषासानक्ताप्रैषः उच्यते ॥

१३१. दैव्याहोतृप्रैषः—होता यक्षद् दैव्या होतारा मन्द्रा पोतारा कवी प्रचेतसा । स्विष्टमद्यान्यः करदिषा स्वभिगूर्तमन्य ऊर्जा सतवसेमं यज्ञं दिवि देवेषु धत्तां वीतामाज्यस्य० ॥ ८ ॥ अयं दैव्यहोतृप्रैष उच्यते ॥

१३२. तिस्सृणां देवीनां प्रैषः—होता यक्षत् तिस्रो देवीरपसामपस्तमा अच्छिद्रमद्येदमपस्तन्वताम् । देवेभ्यो देवीर्देवमपो व्यन्त्वाज्यस्य० ॥ ९ ॥ अयं तिसृणां देवीनां प्रैष उच्यते ॥

१३३. त्वष्टृप्रैषः—होता यक्षद् त्वष्टारमचिष्टुमपाक रेतोधां विश्रदसं यशोधाम् । पुरुरूपमकाभकर्शनं सुपोषः पोषैः स्यात सुवीरो वीरैर्वेत्वा० ॥ ॥ १० ॥ अयं त्वष्टृप्रैष उच्यते ॥

१३४. वनस्पतिप्रैषः—होता यक्षद् वनस्पतिमुपावस्रक्षद्धियो जोष्टारं शशमं नरः । स्वदात्स्वधितिर्ऋतुधाद्य देवो देवेभ्यो हव्यावाड् वेत्वा० ॥ ॥११॥ अयं वनस्पतिप्रैष उच्यते ॥

१३५. होता तु दण्डप्रदानानन्तरं होतृषदनस्य पश्चादवस्थायार्हं—दैधिषव्य इत्यादि मन्त्रेण होतृषदनाभिमन्त्रणादि स्रुगादापनान्तं प्रकृतिवत् करोति ।

आप्रीसूक्तानि—प्रयाजसम्बन्धिन्यो याज्या ऋचो यत्र पठितास्तानि सूक्तान्याप्रीसूक्तानीति गीयन्ते ॥

१३६. शौनकगोत्रस्य यजमानस्य समिद्धो अग्निर्निहितः पृथिव्यामि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

त्याप्रीसूक्तं भवति। वासिष्ठगोत्रस्य **जुषस्व नः समिधमिति** सूक्तम्। अन्येषां सर्वेषां **समिद्धो अद्य मनुषो दुरोण** इति सूक्तम्। इत्येकः पक्षः।

सुसमिद्धो न आ वहेति काण्वगोत्रस्याप्रीसूक्तम्। **समिद्धो अग्न आवहेति** आङ्गिरसगोत्रस्य। **समिद्धो अद्य राजसीति** आगस्त्यगोत्रस्य। **समित्समित्सुमना बोध्यस्मे** इति विश्वामित्राणाम्। **सुसमिद्धो व्यशोचिषेत्या**त्रेयगोत्रस्य। **समिद्धो विश्वतस्परीति** काश्यपगोत्रस्य। **इमां मे अग्ने समिद्धं जुषस्वेति** वाध्र्यश्वगोत्रस्य। **समिद्धो अद्य मनुषो दुरेणे** इति जामदग्न्यगोत्रस्यानुक्तानामन्येषां च। इति द्वितीयः पक्षः।

अध्वर्युप्रेषितो मैत्रावरुणः पूर्वोक्तैः समित्प्रैषादिप्रैषैर्होतारं प्रेष्यति। होता यजमानगोत्रानुसारेण तत्तत्सूक्तगता आप्रीसंज्ञकयाज्याः पठति।

पर्यग्निकरणानुवचनम्---पर्यग्नये क्रियमाणायानुब्रूहीति प्रेषितो मैत्रावरुणः **अग्निर्होता नो अध्वर** इति तृचं सूक्तम्, अभिहिकारानन्तरं **आद्योत्तमे** ऋचौ त्रिरभ्यस्यान्वाह। एतदनुवचनं पर्यग्निकरणसाधनत्वात् करणल्युटा पर्यग्निकरणमित्युच्यते॥

१३७. **अध्रिगुप्रैषप्रैषः**—ततो मैत्रावरुणो होतारं प्रेष्यति—**अजैदग्निरसनद् वाजं देवो देवेभ्यो हव्यवाट् प्राञ्जोभि हिन्वा नोधे नाभिः कल्पमानो यज्ञस्यायु प्रतिरन्नुपप्रेष्य होतर्हव्या देवेभ्य** इति। अयमध्रिगुप्रैषप्रैष इत्युच्यते॥

१३८. **अध्रिगुप्रैषः**—ततो मैत्रावरुणप्रेषितो होता ऽध्रिगुप्रैषमाह—

दैव्याः शमितार आरभध्वमुत मनुष्या उपनयत मेध्यादुर आशासाना मेधपतिभ्यां मेधम्। प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पिताऽनु भ्राता सगर्भ्योऽनु सखा सयूथ्यः। उदीचीना अस्य पदो निधत्तात् सूर्यं चक्षुर्गमयताद् वातं प्राणमन्ववसृजतादन्तरिक्षमसुं दिशः श्रोत्रं पृथिवीं शरीरम्। एकधास्य त्वचमाच्छ्यतात् पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणं वारयध्वात् श्येनमस्य वक्षः कृणुतात् प्रशसा बाहू शलादोषणी कश्यपेवांसाच्छिद्रे श्रोणी कवषोरूस्रेकपर्णाष्ठीवन्तावष्टिवशतिरस्य वङ्क्रयस्ता अनुष्ठ्योच्यावयताद् गात्रं गात्रमस्यानूनं कृणुतात्। ऊवध्यगोहं पार्थिवं खनतात्। अस्ना रक्षः संसृजतात्। वनिष्ठुमस्य माराविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता रवत् शमितारः। अध्रिगो शमीध्वं सुशमि शमीध्वं शमीध्वमध्रिगा३उ अपाप॥' इति। अध्रिगो इत्यादि अपापेत्यन्तं त्रिवारं पठति। अयमध्रिगुप्रैष इत्युच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३९. अत्र प्रैषे **अरना रक्षः संसृजतादिति** वाक्यं उपान्त्यवाक्यस्थं **शमितार** इति पदं अन्त्यवाक्यस्थं **अपापेति** पदं चोपांशु प्रयुज्यते। ततः **शमितारो यदत्र सुकृतं कृणवथास्मासु तद्यद् दुष्कृतमन्यत्र तदिति** मन्त्रं जपित्वा यथोपविष्ट एव दक्षिणाङ्गेनावृत्य प्रत्यङ्मुखो निहारं पृष्ठतः कृत्वास्ते। एवं मैत्रावरुणोपि। पशुसंज्ञपनानन्तरं होतृमैत्रावरुणौ तथैवावृत्य प्राङ्मुखावासाते।

स्तोकानुवचनम्– वपाश्रपणकाले अध्वर्युणा स्तोकेभ्यो ऽनुब्रू३हीति प्रेषितो मैत्रावरुणो **जुषस्व सप्रथस्तममित्यृचमिमं नो यज्ञमिति** सूक्तं चाध्यर्धकारवर्जं सामिधेनीवदन्वाह। इदं स्तोकानुवचनमित्युच्यते॥

१४०. **स्वाहाकृतीप्रैषः**—अध्वर्युणा स्वाहाकृतीभ्यः प्रेष्येति प्रेषितो मैत्रावरुणो होतारं प्रेष्यति—'होतायक्षदग्निं स्वाहा ऽऽज्यस्य स्वाहा मेदसः स्वाहा स्तोकानां स्वाहा स्वाहाकृतीनां स्वाहा हव्यसूक्तीनां स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यन्तु होतर्यजेति'। अयमेकादशस्य प्रयाजस्य प्रैषः स्वाहाकृतीप्रैष इत्युच्यते॥

१४१. उक्तप्रैषेण प्रेषितो होता मन्त्रेण निरसनोपवेशने कृत्वा **ऽग्निर्होतावेत्वित्यादि** स्रुगादापनं पठित्वा एकादशीं प्रयाजयाज्यां पठति। वार्त्रघ्नावाज्यभागौ। मैत्रावरुणोनुवाक्यां पठति।'प्रैषांश्चादेशमनुवाक्यां च'इत्याश्वलायनसूत्रे(श्रौत ३।२।२०,२१)। मैत्रावरुणो यत्र यागे भवति तत्र स एवानुवाक्यां पठेदित्युक्तत्वात्। **होता यक्षदग्निमाज्यस्य जुषतां हविर्होतर्यजेति** प्रैषं मैत्रावरुणो ऽध्वर्युणाऽन्य आज्यस्यावदीयमानस्यानुब्रूहीति प्रेषितः पठति— **अयं होता यक्षदित्यादिप्रैष** आग्नेयाज्यभागप्रैष इत्युच्यते॥

१४२. अनेन प्रेषितो होता **ऽग्निं जुषाणो अग्निराज्यस्येति** याज्यां पठति। अध्वर्युणा **सोमाद्याज्यस्यावदीयमानस्यानुब्रूहीति** प्रेषितो मैत्रावरुणो अनुवाक्यां पठति।

सौम्याज्यभागप्रैषः– ततो ऽध्वर्युणा **सोमाद्याज्यं प्रस्थितं प्रेष्येत्युक्ते** प्रशास्ता **होतायक्षत् सोमाद्याज्यस्य जुषतां हविर्होतर्यजेति** प्रैषेण होतारं प्रेष्यति। अयं प्रैषः सौम्याज्यभागप्रैष इत्युच्यते॥

१४३. अनेन प्रेषितो होता **ये यजामहे सोमं जुषाणः सोम आज्यस्य हविष** इति याज्यां पठति। अध्वर्युणा **इन्द्राग्निभ्यां छागस्य वपाया मेदसोवदीयमानस्यानुब्रूहीति** प्रेषितो मैत्रावरुण **आ वृत्रहणा वृत्रहभिः शुष्मैरित्यनुवाक्यां** पठति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वपायाज्याप्रैषः--तत **इन्द्राग्निभ्यां छागस्य वपाया मेदसः प्रेष्येति** प्रेषितः सन् होता **यक्षदिन्द्राग्नी छागस्य वपया मेदसो जुषेतां हविर्होतर्यजेति** प्रेषेण होतारं प्रेष्यति । अयं वपायाज्याप्रैष इत्युच्यते ॥

१४४. अनेन प्रेषितो होता 'शुचि नु स्तोमं नवजातमद्य' इति याज्यां पठति ।

ब्रह्मादिवपामार्जनम्—वपाहोमानन्तरं ब्रह्मा होता मैत्रावरुणश्च चात्वाले मार्जयन्ते—**सुमित्र्या न आप ओषधयः सन्तु दुर्मित्र्यास्तस्मै सन्तु यो ऽस्मान् द्वेष्टि यञ्च वयं द्विष्म** इति मन्त्रेण । मैत्रावरुणस्तु दण्डं निधाय । इदं ब्रह्मादिवपामार्जनमित्युच्यते ॥

१४५. **पशुपुरोडाशयाज्याप्रैषः**—ततः पुरोडाशश्रपणपर्यन्तं ब्रह्मादयस्तीर्थेन निष्क्रम्य तूष्णीमासते । श्रृतेषु पश्वङ्गेषु तीर्थेन प्रविश्य पुरोडाशेन प्रचरन्ति । **तत्राभरतं शिक्षतं वज्रबाहू** इति मैत्रावरुणो ऽनुवाक्यां पठति, **इन्द्राग्निभ्यां पुरोडाशस्यावदीयमानस्यानुब्रूहीत्यध्वर्युणा** प्रेषितः सन् अध्वर्युणा **इन्द्राग्निभ्यां पुरोडाशं प्रस्थितं प्रेष्येत्युक्ते** मैत्रावरुणो **होता यक्षदिन्द्राग्नी पुरोडाशस्य जुषेतां हविर्होतर्यजेति** वदति । अयं पशुपुरोडाशयाज्याप्रैष इत्युच्यते ॥

१४६. **पुरोडाशस्विष्टकृत्प्रैषः**—ततो होता **गीर्भिर्विप्रः प्रमतिमिच्छमान** इति याज्यां पठति । ततोऽध्वर्युणा **ऽग्नये ऽनुब्रूहीत्युक्ते इळाभग्ने पुरुदंसं सनिंगो**रित्यनुवाक्यां मैत्रावरुणः पठति । अध्वर्युणा **ऽग्नये प्रेष्येत्युक्ते** मैत्रावरुणो **होता यक्षदग्नि पुरोडाशस्य जुषतां हविर्होतर्यजेति** पठति । अयं पुरोडाशस्विष्टकृत्प्रैष इत्युच्यते ॥

१४७. **पशुपुरोडाशप्रचारः**—ततो होता **स्वदस्व हव्या समिषो दीदिहीति** याज्यां पठति । अयं (=१४५-१४६-१४७ संख्यासूक्तः) पशुपुरोडाशप्रचार इत्युच्यते ॥

१४८. **मनोतृसूक्तम्**—इडाभक्षणान्ते मार्जनम् । **मनोतायं हविषोऽवदीयमानस्यानुब्रूहीत्यध्वर्युणा** प्रेषितो मैत्रावरुणः अभिहिंकृत्य अध्वर्धकारवर्जं सामिधेनीवत् **त्वं ह्यग्ने प्रथमो मनोतेति** सूक्तमन्वाह । इदं **मनोतृसूक्तमित्युच्यते** ॥

१४९. अध्वर्युणा **इन्द्राग्निभ्यां छागस्य हविषो ऽनुब्रूहीत्युक्ते** मैत्रावरुण **उभावामिन्द्राग्नि आहुवध्या** इत्यनुवाक्यां पठति । अध्वर्युणा **इन्द्राग्निभ्यां छागस्य हविः प्रस्थितं प्रेष्येत्युक्ते** मैत्रावरुणो **होता यक्षदिन्द्राग्नी**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छागस्य हविष आत्तामद्य मध्यतो मेध उद्धृतं पुरा द्वेषोभ्यः पुरा पौरुषेय्या-गृभः ॥ धस्तां नूनं घासे अज्राणां यवसप्रथमानां सुमत्क्षराणां शतरुद्रिया-णामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गाद-ङ्गादवत्तानां करत एवेन्द्राग्नीजुषेतां हविर्होतर्यजेति प्रैषेण होतारं प्रेष्यति। ततो होता प्रचर्षणिभ्यः पृतना हवेष्विति याज्यां पठति। अस्या अर्धर्चं पठित्वा यावत्प्रतिप्रस्थाता वसाहोमं करोति तावद्विरमति। जाते वसाहोमे उत्तरार्ध-र्चेन वषट्करोति।

वनस्पतियाज्याप्रैषः—अध्वर्युणा वनस्पतयेऽनुब्रूहीत्युक्ते मैत्रावरुणा देवेभ्यो वनस्पते हवींषीति पुरोनुवाक्यां पठति। अध्वर्युणा वनस्पतये प्रेष्ये-त्युक्ते मैत्रावरुणो होता यक्षद्वनस्पतिमभिहिपिष्टतमयारभिष्ठया रशनया-धित। यत्राग्नेराज्यस्य हविषः प्रिया धामानि यत्र सोमस्याज्यस्य हविषः प्रिया धामानि यत्रेन्द्राग्न्योश्छागस्य हविषः प्रिया धामानि यत्र वनस्पतेः प्रिया पाथांसि यत्र देवानामाज्यपानां प्रिया धामानि यत्राग्नेर्होतुः प्रिया धामानि तत्रैतं प्रस्तुत्येवोपस्तुत्येवोपावस्रक्षद्रभीयांसमिव कृत्वीकरदेवं देवो वनस्पतिर्जुषतां हविहोतर्यजेति प्रैषेण होतारं प्रेष्यति। अयं वनस्पतियाज्या-प्रैष इत्युच्यते ॥

१५०. ततो होता वनस्पतेरशनया नियूयेति याज्यां पठति। अध्वर्युणा ऽग्नये स्विष्टकृते ऽनुब्रूहीत्युक्ते मैत्रावरुणः पिप्रीहि देवां उशतो यविष्ठे-त्यनुवाक्यां पठति।

पशुस्विष्टकृद्याज्याप्रैषः—अध्वर्युणाऽग्नये स्विष्टकृते प्रेष्येत्युक्ते मैत्रा-वरुणो होता यक्षदग्निं स्विष्टकृतमयाडग्निरग्नेराज्यस्य हविषः प्रियाधामान्य-याट् सोमस्याज्यस्य हविषः प्रिया धामान्ययाडिन्द्राग्न्योश्छागस्य हविषः प्रिया धामान्ययाड् वनस्पतेः प्रिया पाथांस्ययाड्देवानामाज्यपानां प्रिया धामानि यक्षदग्नेर्होतुः प्रिया धामानि यक्षत् स्वं महिमानमायजतामेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविर्होतर्यजेति होतारं प्रेष्यति। अयं पशुस्विष्ट-कृद्याज्याप्रैष इत्युच्यते ॥

१५१. ततो होता स्विष्टकृन्निगदरहितामग्ने यदद्य विशो अध्वरस्य होतरिति याज्यां पठति। ततः पश्विडाभक्षणं मार्जनान्तं कृत्वा ऽनुयाजैश्च-रन्ति।

एकादशानुयोजप्रैषाः[1]—अध्वर्युणा देवेभ्यः प्रेष्येत्युक्ते मैत्रावरुणः—१.

---

१. द्र० तै० ब्रा० ३।६।१३ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

देवं बर्हिः सुदेवं देवैः स्यात् सुवीरं वीरैर्वस्तोर्ज्येताक्तोः प्रभ्रियेतात्य-न्यान् राया बर्हिष्मतो मदेम वसुवनेवसुधेयस्य वेतु यजेति होतारं प्रेष्यति। होता प्राकृतेनैव प्रथमानुयाजेन यजति ।। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—२. देवीर्द्वारः संघाते विड्वीर्यामञ्छिथिरा ध्रुवा देवहूतौ वत्स ईमेनास्तरुण आमिमीयात् कुमारो वानवजातो मैनाअर्वारेणुककाटः पृणग्वसुवने वसुधे-यस्य व्यन्तु यजेति होतारं प्रेष्यति। होता—देवीर्द्वारो वसुवने वसुधेयस्य व्यन्तु वौ३षडिति याज्यां पठति । अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—३. देवी उषासानक्ता ऽद्यास्मिन् यज्ञे प्रयत्यह्वे तामपि नूनं दैवीविशः प्राया-सिष्टां सुप्रीते सुधिते वसुवने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति। होता—देवी उषासानक्ता वसुवने वसुधेयस्य वीतां वौ३षडिति यजति। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—४. देवीं जोष्ट्री वसुधिती ययोरन्या ऽधा द्वेषांसि यूयवदान्यावक्षद् वसुवार्याणि यजमानाय वसुवने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति। होता--देवीजोष्ट्री वसुवने वसुधेयस्य वीता वौ३षडिति यजति। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—५. देवी ऊर्जाहुती इषमूर्ज-मन्या ऽऽवक्षत सर्ग्घि सपीतिमन्या नवेन पूर्वं दयमानाः स्याम पुराणेन नवं तामूर्जमूर्जाहुती ऊर्जयमाने अधातां वसुवने वसुधेयस्य वीतां यजेति होतारं प्रेष्यति। होता--देवी ऊर्जाहुती वसुवने वसुधेयस्य वीतां वौ३षडिति यजति। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—६. देवा दैव्या होतारा नेष्टारा पोतारा हताघशंसा वा भरद्वसू वसुवने वसुधेयस्य वीतां यजेति प्रेष्यति। होता—देवा दैव्या होतारा वसुवने वसुधेयस्य वीतां वौ३षडिति यजति। अध्वर्युणा प्रेष्ये-त्युक्ते मैत्रावरुणः—७. देवीस्तिस्रस्तिस्रो देवीरिडा सरस्वती भारती द्यां भारत्यादित्यैरस्पृक्षत् सरस्वतीमं रुद्रैर्यज्ञमावीदिहैवेडया वसुमत्या सधमादं मदेम वसुवने वसुधेयस्य व्यन्तु यजेति होतारं प्रेष्यति। होता—देवीस्तिस्र-स्तिस्रो वसुवने वसुधेयस्य व्यन्तु वौ३षडिति यजति। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—८. देवो नराशंसस्त्रिशीर्षा षडक्षः शतमिदेनं शितिपृष्ठा आदघति सहस्रमीं प्रवहन्ति मित्रावरुणेदस्य होत्रमर्हतो बृहस्पतिः,स्तोत्रमश्विना ऽऽध्वर्यवं वसुवने वसुधेयस्य वेतु यजेति प्रेष्यति। होता देवो नराशंसो वसुवने वसुधेयस्य वेतु वौ३षडिति यजति। अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—९. देवो वनस्पतिर्वर्षप्रावा घृतनिर्णिग् द्यामग्रेणास्पृक्षदान्तरिक्षंमध्येनाऽऽ प्राः पृथिवीमुपरेणादृंहीद् वसुवने वसुधेयस्य वेतु यजेति होतारं प्रेष्यति। होता—देवो वनस्पतिर्वसुवने वसुधेयस्य वेतु वौ३षडिति यजति। अध्व-र्युणा प्रेष्येत्युक्ते मैत्रावरुणः १०. देवं बर्हिर्वारितीनां निधे धासि प्रच्युतौ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नामप्रच्युतं निकामधरणं पुरुस्पार्हं यशस्वदेना बर्हिषाऽज्या वर्हीष्यभिष्याम् वसुवने वसुधेयस्य वेतु यजेति प्रेष्यति । होता – देवं बर्हिर्वारितीनां वसुवने वसुधेयस्य वेतु वौ३षडिति यजति । अध्वर्युणा प्रेष्येत्युक्ते मैत्रावरुणः—११. देवो अग्निः स्विष्टकृत् सुद्रविणा मन्द्रः कविः सत्यमन्माऽऽयजी होता होतुर्होतुरायजीयानग्ने यान् देवानयाड् यां अपिप्रेर्ये ते होत्रे अमत्सत तां ससनुषीं होत्रां देवंगमां दिवि देवेषु यज्ञमेरयेमं स्विष्टकृच्चाग्ने होताऽभूर्वसुवने वसुधेयस्य नमोवाके वीहि यजेति प्रेष्येति । होता अनेन निगदेन आदौ **होता यक्षदित्यस्य** स्थाने **ये यजामह** इति पदं पठित्वा अन्ते **यजेत्यस्य** स्थाने **वषट्कारं** कृत्वा यजति । एते मैत्रावरुणेन पठ्यमाना एकादश अनुयाजप्रैषा इत्युच्यन्ते ॥

१५२ अध्वर्युणा इषिता दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता३ब्रूहीत्युक्ते मैत्रावरुणः—अग्निमद्यहोतारमवृणीतायं यजमानः पचन् पक्तीः पचन् पुरोडाशं गृह्णन्नग्नय आज्यं गृह्णन्त्सोमायाज्यं बध्नन्निन्द्राग्निभ्यां छागं सूपस्था अद्य देवो वनस्पतिरभवदग्नय आज्येन सोमायाज्येनेन्द्राग्निभ्यां छागेनाघस्तां तं मेदस्तः प्रतिपचताग्रभीष्टामववृधेतां पुरोडाशेन त्वामद्यर्षआर्षेय ऋषीणां नपादवृणीतायं यजमानो बहुभ्य आसङ्गथेभ्यः ॥ एष मे देवेषु वसु वार्यायक्ष्यत इति ता या देवा देवदानान्यदुस्ता न्यस्मा आचशास्वा च गुरस्वेषितश्च होतरसि भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता३ब्रू३हीति प्रैषेण होतारं प्रेष्यति । ततो होता सूक्तवाकं पठति—तत्राज्यभागदेवतानन्तरं **इन्द्राग्नी इदं हविरजुषेतामवीवृधेतां, वनस्पतिरिदं हविरजुषतावीवृधत महो ज्यायोकृत । ततो देवा आज्यपा** इत्यादि प्रकृतिवत् संस्थाजपवर्जं सर्वं अध्वर्युणा उपोह्यमानं हृदयशूलमनुमन्त्रयते होता मैत्रावरुणो ब्रह्मा च—शुगसि योस्मान् द्वेष्टि यं च वयं द्विष्मस्तमभिशोचेति मन्त्रेण । ततः द्वीपे राज्ञो वरुणस्य गृहोभितो हिरण्ययः । स नो घृतव्रतो राजा धाम्नो धाम्न इह मुञ्चतु ॥ धाम्नो धाम्नो राजन्नितो वरुण नो मुञ्च ॥ यदापो अघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च । मयि वायो मोघधीहिसीरतो विश्वव्यचाभूस्त्वे वरुण नो मुञ्च ॥ सुमित्र्या न आप ओषधयः सन्तु दुर्मित्र्यास्तस्मै भूयासुर्योस्मान् द्वेष्टि यं च वयं द्विष्मः ॥ एतैर्मन्त्रैस्तस्योपरिष्टादप उपस्पृशन्ति ।

पाशुकसमिदाधानम्—शूलमनवेक्षमाणा असंस्पृशन्तः प्रत्यायन्तस्तिस्रस्तिस्रः समिधो गृह्णीयुः—**अग्नेः समिदसि तेजोसि तेजोमयि धेहि**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति प्रथमाम्, **एधोस्येधिषीमहीति** द्वितीयाम्, **समिदसि समेधिषीमहीति** तृतीयाम् । एत्योपतिष्ठन्ते— **आपो अद्यान्वचारिषमित्यृचा** । ततो ग्रहणक्रमेण समिधोभ्यादधत्याहवनीये—**अग्नेः समिदसि तेजोसि तेजोमेदाः स्वाहेति** प्रथमाम्, **सोमस्य समिदसि दुरिष्टैर्मा पाहि स्वाहेति** द्वितीयाम् । **पितॄणां समिदसि मृत्योर्मा पाहि स्वाहेति** तृतीयाम् । इदं पाशुकसमिदधानमित्युच्यते॥

१५३. ततः संस्थाजपेनोपतिष्ठन्ते । एतावान् 'अथवाश्वलायनसूत्रानुसारेण' इत्यादि ग्रन्थः (पृष्ठ १३९, पं० १) होतृब्रह्ममैत्रावरुणपाशुककृत्यमुच्यते ॥

१५४. **निरूढपशुः पशुबन्धो वा**-इदं सर्वं पाशुकं कर्म निरूढपशुरिति पशुबन्ध इति चोच्यते ॥

१५५. अथ सप्तमी हविर्यज्ञसंस्था पशुत्रयसाध्या सौत्रामण्याख्या तदीयपदार्थनामानि प्रोच्यन्ते । सा द्विविधा—एका **कौकिली** अपरा **चरका** सर्वापीयं नित्या हविर्यज्ञसंस्थान्तर्गतत्वात् । **एतयाऽन्नाद्यकामो यजेत स्वर्गकामश्चेत्यादिना** फलश्रवणात् काम्यत्वमपि । **बार्हस्पत्यं पशुं चतुर्थं यदीत्यादिना** नैमित्तिकत्वमपि श्रूयते । **यजेतसौत्रामण्यामपत्नीकोप्यसोमप** इत्यैतरेयब्राह्मणोक्ता या अपत्नीका सोमपयजमानकर्तृका सौत्रामणी सा कौकिल्येव स्वतन्त्रता । **अग्निं चित्वा सौत्रामण्या यजेतेत्यादौ** अङ्गत्वेन श्रूयमाणा चरकैव ।

सौत्रामणीकालः—तत्र कौकिल्या बौधायनसूत्रस्य समग्रस्यानुपलभ्यमानत्वात् आपस्तम्बोक्तसूत्रानुसारेण बौधायनसूत्राविरुद्धः प्रयोगः अनुक्तो चरकातिदेशः । तस्य निरूढपशुकाल एवानुष्ठानकालः । पर्वणि यथा त्रिपशुरूपं प्रधानकर्म संपद्येत तथा कर्तव्यम् । तथा च द्वादश्यां नान्दीश्राद्धोदकशान्तिप्रतिसरबन्धादिकृत्वा त्रयोदश्यामैन्द्रेण पशुना आदित्यचरुणा च प्रचर्य चतुर्दश्यां त्रिपशूपसथं कृत्वा पर्वणि त्रिपशुमवभृथं महापितृयज्ञं च कृत्वा प्रतिपदि वायोधसेन पशुना आदित्येन चरुणा च प्रचर्य समापयति । असम्भवे पितृयज्ञोपि प्रतिपदि कार्यः । **त्र्यहे पुरस्तादिति** वचनं सुरासन्धानकरणपक्षे नवभ्यामारम्भपरम् । अयं सौत्रामणीकाल इत्युच्यते ॥

१५६. यद्यपि सुरोच्छेषणभक्षस्यैव निषेधो न तु **स्वाद्वीन्त्वेत्यादिमन्त्रैः** सुरासन्धानकरणादेस्तथापि कल्पोक्तसुरासन्धानप्रकारस्येदानीमुच्छिन्नत्वात् लोकविद्विष्टत्वात् **पयोग्रहा वा स्युरित्यापस्तम्बवचनाच्च** मुख्यसुराग्रहणमुपेक्ष्य पयोग्रहग्रहणपक्षाश्रयणं क्रियते । यदि चयनं चिकिर्षति तर्हि त्रिपशौ प्रधानभूते एव कुर्यात् । आद्यन्तपश्वोस्तु न । तयोरङ्गत्वात् । समप्रधान्यपक्षे तयोरहि चयनं कुर्यात् । सुरासन्धानपक्षस्यानाश्रयणात् अन्वाधाना-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दि तिस्तोरात्रीर्वसतीत्यन्तं निवर्तते । पयसः सुराप्रतिनिधित्वात् स्थानापत्या-सुराधर्मा अनूहश्च भवन्ति । नतु सान्नाध्यधर्मा आज्यधर्मा वा भवन्ति । यथाप्रयोगचातुर्मास्यवत् एकप्रयोगत्वात् सर्वार्थमुदवसानम् ।

उदवसानम्—प्राकृतविहारात् अन्यत्र गमनं कर्मानुष्ठानार्थम् उदवसान-मित्युच्यते ॥

१५७. ऋत्विग्वरणं षढ्ढोतृकूष्माण्डादिहोमश्च सकृदेव सर्वपश्वर्थः । ते एव विहाराः । दक्षिणतः पैतृकी वेदिः । आद्यन्तपशुबन्धयोः पाशुकी वेदि-स्तु द्वादशपदा भवति ॥ त्रिपशौ साग्निचित्ये निरग्निचित्ये वा ऽष्टादशपदा सा भवति ।

सौत्रामणीकर्मसबन्धिनः पदार्थाः—त्रयो यूपाः, चयनार्थं शर्कराः साग्नि-चित्ये ।

सुराग्रहाः—सुराग्रहार्थं क्रमेण पलाशन्यग्रोधाश्वत्थकाष्ठनिर्मितान्युलू-खलाकाराण्यूर्ध्वमुखानि प्रादेशमात्राणि त्रीणि पात्राणि । एतान्येव सुराग्रहा इत्युच्यन्ते ॥

१५८. **पयोग्रहाः**—यज्ञियस्य फलेग्रहेः पलाशादिवृक्षस्य तादृशान्येव त्रीणि पात्राणि तानि पयोग्रहा इत्युच्यन्ते ॥

१५९. **द्रोणकलशः**—जुहूसदृशे महापुष्करे द्वे पात्रे ते द्रोणकलशपद-वाच्ये ॥

१६०. एकः कुम्भः । शतातृण्णास्थाली । नकलबदरकर्कन्धूनां सक्तवः । नकलादयो बदरभेदाः यवगोधूमोपवाकानां सक्तवः । हरितयवाः । श्येनस्य पक्षिणो द्वौ पक्षौ । सिंहव्याघ्रवृकानां लोमानि । अजाविलोम्नां दशापवित्र-मध्वर्योः । गवाश्वलोम्नां प्रतिप्रस्थातुः । नाभिदघ्नपादा अरत्निमात्रशीर्ष-ण्यानूच्यामौञ्जविवयना या सा आसन्दीत्युच्यते ॥

१६१. प्रभूतं पयः । अन्येपि य उपयुक्ताः पदार्थास्ते सम्पादनीयाः ।

सौत्रामणीसंकल्पः—श्रीपरमेश्वरप्रीत्यर्थं स्वर्गकामो वा कौकिल्या सौत्रा-मण्या यक्ष्ये' त्रिरुपांशु त्रिरुच्चैः । अयं सौत्रामणीसङ्कल्प इत्युच्यते ॥

१६२. प्रशास्तृषष्ठामृत्विजो वृत्वा ऽर्हयित्वा इडाजपं कृत्वा अन्वारम्भ-णीयामिष्टिं कृत्वा ऽरण्योरग्नीन् समारोप्य अथ वा ऽजस्तानग्नीन् गृहीत्वो-दवसाय मथित्वा मनस्वत्या जुहोति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निचयन संकल्पः—साग्निचित्ये तु **याः पुरस्तादि** जपित्वा स्वर्गकाम आरुणकेतुकमग्नि चेष्ये' इत्ययमग्निचयनसङ्कल्प इत्युच्यते ।।

१६३. **ऐन्द्रपशुसंकल्पः**—**पुनर्याः पुरस्तादित्यादि** जपित्वा 'श्रीपरमेश्वर-प्रीत्यर्थमैन्द्रेण पशुना यक्ष्ये' इत्ययमैन्द्रपशुसङ्कल्प इत्युच्यते ।।

१६४. **सौत्रमणीपूर्वपशुः**—ततोऽग्नीन् विहृत्य षढ्ढोतृकूष्माण्डसार-स्वतहोमाः सर्वपश्वर्थमादावेव सकृत् । न तु प्रतिपश्वावर्तते एकप्रयोगत्वात् । पश्विष्टिस्त्वावर्तते । परन्त्वाश्वलायनमते पूर्वोत्तरयोरैन्द्रपश्वोरङ्गत्वात् पश्विष्टिस्तयोर्न भवति । समप्राधान्ये तु सर्वपशुषु पश्विष्टिर्भवति । पशुत्रये च वेदियूपाहुत्यादि यूपोपस्थानान्तं निरूढवत् करोति । अस्मिन्नैन्द्रपशौ ऋषभो दक्षिणा । पुनरालम्भवर्जं सन्तिष्ठत एष पशुः । अयं सौत्रामणीपूर्व-पशुरित्युच्यते ।।

१६५. **सौत्रामणीपूर्वेष्टिः**—अथ तदानीमेव पुनर्विहृत्यादित्येष्टिः । आदित्यौ द्वौ कौकिल्यां सौत्रामण्यामिति कर्मान्तसूत्रात् । अस्यामिष्टौ वत्सो दक्षिणा । **वत्सं पूर्वस्यां ददाति मातरमुतरस्या**मिति वचनात् । अंहसो मुच्ये-यमिति यजमानस्यानुमन्त्रणम् । पुनरालम्भवर्जमियमिष्टिः सन्तिष्ठते । इयं सौत्रामणीपूर्वेष्टिरित्युच्यते ।।

१६६. **त्रिपशुसङ्कल्पः**—ततो द्व्यहः सद्यो वा त्रिपशुः । 'श्री' परमेश्वर-प्रीत्यर्थं त्रिपशुना पशुबन्धेन यक्ष्ये' इति सङ्कल्प इदानीमेव चयनसङ्कल्प इत्येके । अयं त्रिपशुसङ्कल्प इत्युच्यते ।।

१६७. अथ त्रिपश्वनुष्ठानोपयोगिनी पाशुकी वेदिः । सा चेत्थं निर्मा-तव्या—प्राकृतविहारात् पूर्वतः पूर्वनिर्मितामैन्द्रपश्वनुष्ठानोपयोगिनीं पाशुक-वेदिमुद्धास्य यूपञ्चोद्धास्याहवनीयात् संचरमवशेष्य सौमिक्या वेदेर्द्विसप्त-त्यधिकनवशतंपदक्षेत्रफलायास्तृतीयांशक्षेत्रफलमूलषट्त्रिंशत्यङ्गुलदण्डेन द्वा-दशपदा प्राची दशपदा पश्चादष्टादशपदा पुरस्तादिति सौत्रामणिकी वेदिः कार्या । शम्यामात्रोत्तरवेदिर्भवति द्वादशाङ्गुलपदपक्षे षट्तिलो नैकविंश-त्यङ्गुलदण्डेन दशाङ्गुलपदपक्षे सप्तदशाङ्गुलदण्डेनापि । तत्रैव त्रिभाग-दण्डादि । त्रयोदशाङ्गुलसमचतुरस्रोत्तरनाभिः । साग्नौ **मयि गृह्णामीत्यु-**

---

१. यत्करोषि यदश्नासि यज्जुहोसीत्यादिना सर्वकर्मणां परमेश्वरप्रीत्यर्था-वगतेः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पधानमन्त्रप्रभृति **ये ब्राह्मणा बहुविद** इत्यन्तं कृत्वा, आरुणकेतुकचयनपक्षे सद्यस्कालत्वपक्षे तु पश्विष्टचनन्तरं यूपाहुत्यादि भवति ।

अग्निचयनपक्षे तु वेदं विमाय परिस्तीर्य भोजनवपनस्नानवासःपरिधानाञ्जनाभ्यञ्जनादि दीक्षायारूपं कुर्वन्ति । त्रिपशोर्देवतासङ्कल्पः । सौत्रामण्याः सप्तदश सामिधेन्यः, एकादश प्रयाजाः, अग्नीषोमावाज्यभागौ, अश्विनौ सरस्वती इन्द्रः सुत्रामा च ग्रहदेवताः, वनस्पतिः, पृषदाज्यदेवता देवा आज्यपाः, अग्निः स्विष्टकृत् । समानं स्विष्टकृदिति पक्षे नात्र स्विष्टकृदुल्लेखः । इन्द्रः सविता वरुणश्च पुरोडाशानां देवताः । अग्निः स्विष्टकृत् । एकादशानुयाजाः । एकादशोपयाजाः सूक्तवाकशंयुवाकौ । अष्टौ पत्नीसंयाजाः ।

एवमात्मकेनेत्यादि श्वः सद्यो वा यक्ष्ये इति सङ्कल्प्य अग्नीन् विहृत्य अन्वाधानादिव्रतोपायनं शाखाहरणादि । चयनपक्षे मैत्रावरुण्याः शाखां प्लक्षशाखां चाहृत्य पञ्चविधं बर्हिः प्रसूमयं प्रस्तरं ऐक्षवी विधृती त्रयोविंशतिदारुकमिध्मं चाहृत्य वेदं करोति । चयनपक्षे इदानीमेव वेदिकरणम् । तदन्तरं यूपावटीयाच्छङ्कोः प्रत्यक् त्रिभागास्त्रय इत्युत्तमं चक्रं परिलिख्य कर्षूः खात्वोच्छ्रयन्त्यपस्पाः । अथ पाचत्याज्यस्थालीमित्यादि मयि गृहणाम्यग्रे **अग्निमित्यादिना** दर्भस्तम्बे चाहुतीर्हुत्वा अथ पाचतिस्फ्यमुदपात्रं बर्हिः शम्यामित्यादि चात्वाललेखनप्रभृत्युत्तरवेदिनाभिप्रच्छादनान्तं करोति ।

खरः—उत्तरवेद्या दक्षिणतश्चात्वालपुरीषेण हस्तमात्रं चतुरङ्गुलोन्नतं चतुरस्रमायतनं करोति तत् खर इत्युच्यते ।।

१६८. तत्र स्रुचां स्थापनं करोति । तस्य खरस्य पश्चादपरः खरः क्रियते । तस्मिन् ग्रहाः स्थाप्यन्ते । ततोऽभ्यादानादि यूपावटकरणान्तम् । तत **इन्द्रघोषस्त्वेत्यादिना** संस्रावाभिघारणादि सिकतासमीकरणान्तं ततः शाखापवित्रमुपवेषं च करोति ततोऽग्निप्रणयनं करोति । ततो ब्रह्मयजमानयोः स्वायतने उपवेशनम् । ततोऽध्वर्युरुत्तरपरिग्रहादि स्फ्यप्रक्षालनान्तं करोति । आग्नीध्रः शालामुखीये स्रुचः प्रतितप्य स्रुववत् स्वधिति सम्मार्ष्टि । अध्वर्युः जुह्वाग्रहणादि सर्वाज्याभिमन्त्रणान्तं करोति ।

सौत्रामणी पाशुकपात्राणि—ततः सायमग्निहोत्रं हुत्वा शालामुखीयस्योत्तरतः दर्भेषु तिस्रः पशुकुम्भीः त्रीणि शाखापवित्राणि तिस्रो यूपरशनाः पशुरशनाश्च त्रीणि वपाश्रपणी युग्मानि । त्रीणि हृदयशूलानि, त्रीन् पयोग्रहांस्तथा सुराग्रहांश्च, नकलबदरकर्कन्धूनां यवगोधूमोपवाकानां च सक्तून्, द्वे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

श्येनपत्रे द्वे दशापवित्रे द्वौ द्रोणकलशौ; शेषा तृष्णां स्थालीं चासादयति। एतानि सौत्रामणीपाशुकपात्राणीत्युच्यन्ते ॥

१६९. ततो मैत्रावरुण्याः सायंदोहः। श्वोभूते प्रातरग्निहोमानन्तरं प्रातर्दोहः। आरुणकेतुकचयनपक्षे महारात्रे जागृतो भूत्वा तदानीमेवापकृष्य प्रातरग्निहोत्रं जुहोति।

अपकर्ष—कर्मणो विहितकालात् पूर्वमेव यदनुष्ठानं तदपकर्ष इत्युच्यते ॥

१७०. तत आग्नेयीं पश्विष्टिं समाप्य संमर्शनादि करोति। आज्यं दधि च निरूप्यापूर्वाज्यं च निर्वपति। आज्यमधिश्रित्य पर्यग्नि करोति। चयनाभावे इदानीं वेदिकरणं **अग्नीदितस्त्रिर्हरेत्यन्तम्**। चयनपक्षे उत्तरपरिग्राहादि करोति। प्रतिप्रस्थाता स्फ्यमग्निहोत्रहवणीं जुहूद्वयमित्यादि पात्राण्यासाद्य **कर्मणे वामित्यादि** करोति। ऊर्ध्वमुखानां ग्रहाणां जुहूवत्सम्मार्गः। आज्यं निरूप्य **महीनां पयोसीति** पत्नीमाज्यमवेक्षयति। अध्वर्युर्द्रोणकलशे प्रभूतं पयो निर्वपति तूष्णीम्। प्रतिप्रस्थाता सुरास्थानीयं पयः प्राकृतवेद्यां निदधाति। अध्वर्युः पर्य्यग्निकरणादि करोति। **प्रोक्षणीरासादयेध्मबर्हिरुपसादय स्रुवं च स्रुचश्च संमृढ्धि तूष्णीं पृषदाज्यग्रहणीं पत्नीं सन्नह्याज्येन दध्ना चोदेहि प्रतिप्रस्थातः सुरासोमस्य विद्धि** इति प्रेष्यति। ततः प्रतिप्रस्थाता सुराकुम्भं दशापवित्रं श्येनपत्रं ग्रहान् द्रोणकलशं नकलबदरकर्कन्धूनां यवगाधूमोपवकानां च सक्तून् सिंहव्याघ्रलोमानि शतातृष्णां स्थालीं चादाय पूर्वया द्वारा निष्क्राम्यान्तर्वेद्यासादयति।

सुरापयसोरुत्पवनम्—अथाध्वर्युः आज्यमुत्पूय स्वीयेनोदग्देशेनाजाविलोमनिर्मितेन दशापवित्रेण द्रोणस्थं पय उत्पुनाति **पुनाति ते परिस्रुतमित्यृचा**। प्रतिप्रस्थाता सुरास्थानीयं कुम्भस्थं पयः स्वीयेनोदग्देशेन गवाश्वलोमनिर्मितेन दशापवित्रेणान्तर्हिते स्वीयद्रोणकलशे ऽवनायोत्पुनाति—**ब्रह्म क्षत्रं पवते तेज इत्यादिना रसेनान्नं यजमानाय धेहीत्यन्तेन** यजुषा। इदं सुरापयसोरुत्पवनमित्युच्यते ॥

१७१. सुरास्थानीयं पयः कुम्भे किञ्चित् परिशेषयति। ततोऽध्वर्युः प्रोक्षण्युत्पवनादि **ऋषभौ स्थ इत्यादियजुषा** स्रुवस्वधितिसादनान्तं कृत्वा वेद्यामेव ग्रहेषु वक्ष्यमाणमन्त्रैः क्रमेण पयो गृह्णाति—

पयोग्रहासादनम्-कुविदङ्ग यवमन्त इत्यृचा उपयामगृहीतोस्यश्विभ्यां त्वा जुष्टं गृह्णामीति यजुषा च प्रथमे गृहीत्वा यवसक्तुभिः संश्रित्य स्वीयश्येन-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पत्रेण परिमृज्य **एष ते योनिस्तेजसे त्वा**' इति मन्त्रेण स्रुचां पश्चात् खरे सादयति। अग्रेण दक्षिणाग्निं वेद्यामेव पूर्वकृते द्वितीयखरे सादयतीत्यन्विलाग्रन्थे उक्तम्। ततः पूर्वोक्तयैवर्चा **उपयामगृहीतोसि सरस्वत्यै त्वा जुष्टं** गृह्णामीति यजुषा च द्वितीये ग्रहे गृहीत्वा गोधूमसक्तुभिः संश्रित्य पूर्ववत् परिमृज्य **एष ते योनिर्वीर्याय त्वा** इति मन्त्रेण पूर्ववत् सादयति। ततस्तयैवर्चा **उपयामगृहीतोसीन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामी**ति यजुषा च गृहीत्वोपवाकसक्तुभिः संश्रित्य परिमृज्य **एष ते योनिर्बलाय त्वा** इति मन्त्रेण सादयति। प्रागपवर्गमुदगपवर्गं वा ग्रहाणां खरे सादनम्। एतत्पयोग्रहासादनमित्युच्यते॥

१७२. **पयोग्रहोपस्थानम्**——ततः सन्नान् ग्रहानुपतिष्ठते—**तेजोसि तेजो मयि धेहि** इति मन्त्रेण प्रथमग्रहम्, **वीर्यमसि वीर्यं मयि धेहि** इति मन्त्रेण द्वितीयम्, **बलमसि बलं मयि धेहि** इति मन्त्रेण तृतीयम्।

सुरास्थानीयपयोग्रहासादनम्———आग्नीध्रः द्रोणकलशस्थं सुरापयः पात्रान्तरे कृत्वा द्रोणोपरि धृतगोबालपवित्रमवनीय धारां करोति, प्रतिप्रस्थाता धारायां गृह्णाति। **नाना हि वां देवहितं सदस्कृतं मा संसृक्षाथां परमे व्योमन्। सुरा त्वमसि शुष्मिणी सोम एष मा मा हिंसीः स्वां योनिमाविशन्। उपयामगृहीतोस्याश्विनं तेजोऽश्विभ्यां त्वां जुष्टं गृह्णामि**। आभ्यामृग्यजुर्भ्यां पर्णमये पात्रे गृहीत्वा बर्हिषी अन्तर्धाय नकलसक्तुभिः सिंहलोमभिश्च संश्रित्य बर्हिषी दूरीकृत्य स्वीयेन श्येनपत्रेण परिमृज्य पयोग्रहाणां पुरतः उत्तरतो वा प्रागपवर्गमुदगपवर्गं वा सादयति—**एष ते योनिर्मोदाय त्वे**ति मन्त्रेण। नैयग्रोधे पात्रे द्वितीयं गृह्णाति। **नाना हि वामि**त्यृचं पठित्वा **उपयामगृहीतोसि सारस्वतं वीर्यं सरस्वत्यै त्वा जुष्टं गृह्णामि**ति यजुषा। ततो बर्हिषी अन्तर्धाय बदरसक्तुभिः व्याघ्रलोमभिश्च संश्रित्य अपोद्धृत्य बर्हिषी स्वीयश्येनपत्रेण परिमृज्य **एष ते योनिरानन्दाय त्वे**ति मन्त्रेण सादयति। आश्वत्थे पात्रे तृतीयं गृह्णाति—नाना हि **वामि**त्यृचा **उपयामगृहीतोस्यैन्द्रं बलमिन्द्राय त्वा सुत्राम्णे जुष्टं गृह्णामी**ति यजुषा च। बर्हिषी अन्तर्धाय कर्कन्धुसक्तुभिर्वृकलोमभिश्च संश्रित्य अपोद्धृत्य बर्हिषी श्येनपत्रेण परिमृज्य **एष ते योनिर्महसे त्वे**ति मन्त्रेण सादयति। सिंहादिलोमाभावे सिंहव्याघ्रवृकान् ध्यायति। एतत्कर्म सुरास्थानीयपयोग्रहासादनमित्युच्यते॥

१७३. **सुराग्रहोपस्थानम्**—सन्नान् गृहानध्वर्युः प्रतिप्रस्थाता यजमानश्चोपतिष्ठन्ते। **ओजोसी**त्यादि **सुरावन्तमि**त्यन्तैर्वाक्यमन्त्रैः। तेषु तु वसु-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाक्यसमूहेषु प्रथमवाक्यसमूहान्तपठितस्य **ऋतेन सत्यमिन्द्रियम**ित्यादिवाक्यत्रयस्यानुषङ्गः क्रियते। तथाहि—'ओजोऽस्योजो मयि धेहि। मन्युरसि मन्युं मयि धेहि। महोसि महो मयि धेहि। सहोसि सहो मयि धेहि। या व्याघ्रं विषूचिका। उभौ वृकं च रक्षति। श्येनं पतत्रिणं सिंहं सेमं पात्वंहसः। संपृचः स्थ सम्मा भद्रेण पृङ्क्त। विपृचः स्थ विमापाप्मना पृङ्क्त। सोमो राजा मृतं सुतः। ऋजीषेणाजहान्मृत्युम्। ऋतेन सत्यमिन्द्रियम्। विपानं शुक्रमन्धसः। इन्द्रस्येन्द्रियम्। इदं पयोमृतं मधु॥ १॥ सोममद्भ्यो व्यपिबत् छन्दसा हंसः शुचिषत्। ऋतेन०॥ २॥ अद्भ्यः क्षीरं व्यपिबत्। कुङ्ङाङ्गिरसो धिया। ऋतेन०॥ ३॥ अन्नात्परिस्रुतो रसम्। ब्रह्मणा व्यपिबत्क्षत्रम्। ऋतेन०॥ ४॥ रेतो मूत्रं विजहाति। योनिं प्रविशदिन्द्रियम्। गर्भो जरायुणा वृतः। उल्बं जहाति जन्मना। ऋतेन०॥ ५॥ वेदेन रूपे व्यकरोत्। सत्यानृते प्रजापतिः। ऋतेन०॥ ६॥ सोमेन सोमौ व्यपिबत्। सुतासुतौ प्रजापतिः ऋतेन०॥ ७॥ दृष्ट्वा रूपे व्याकरोत्। सत्यानृते प्रजापतिः। ऋतेन०॥ ८॥ दृष्ट्वा परिस्रुतो रसम्। शुक्रेण शुक्रं व्यपिबत्। पयः सोमं प्रजापतिः। ऋतेन सत्यमिन्द्रयम्। विपानं शुक्रमन्धसः। इन्द्रस्येन्द्रियम्। इदं पयोमृतं मधु॥ ९॥ एतत्सुराग्रहोपस्थानमित्युच्यते॥

१७४. उपस्थायाप उपस्पृशन्ति। ततः प्रतिप्रस्थाता ग्रहान् गृहीत्वा ऽवशिष्टसुरं कुम्भद्रोणकलशं चादायाहवनीयस्याग्रतः दक्षिणखरस्थाग्निसमीपे सादयति। विशाखयोः शिक्यं शतमानं पवित्रं शतातृष्णञ्चासाद्य खरस्य पूर्वतः पुराणभस्मना खरान्तरं कृत्वा तस्मिन् वल्मीकवपां निदधाति। ब्रह्माणं चोपवेशयति। अप उपस्पृश्य **यन्मे अग्न** इत्यादिमन्त्रं वाचयति यजमानम्।

सौत्रामणीपशवः—ततो यूपप्रक्षालनादि पाशुकं कर्म चरकवत् करोति। त्रयः पशव आलभ्यन्ते। तत्राश्विभ्यां धूम्रवर्णश्छागः, सरस्वत्यै मेषश्छागो वा, इन्द्राय ऋषभः। कलियुगे तु गवालम्भनिषेधाद् वृषभप्रतिनिधित्वेन छागो भवति। छाग ऋषभकार्ये इति गोपालकारिकोक्तत्वात्। **वृष्णिर्वै**त्यापस्तम्बसूत्रोक्तत्वात्(१९।२।१)मेषो वा भवति। प्रतिनिधिस्वीकारेऽपि पशुनामादेशादौ ऋषभशब्द एव प्रयोक्तव्यः। न तु वृष्णिशब्दो उस्रशब्दो गोशब्दो वा। मन्त्रपाठे ऋषभशब्ददर्शनात्। एते सौत्रामणीपशव इत्युच्यन्ते॥

१७५. पर्यग्निकरणे विशेषः। आग्नीध्रो द्वितीये पर्याये पर्यग्निकुर्वन् प्रतिप्रस्थात्रा उत्तरवेदेर्दक्षिणेन पथा गत्वा तत्र खरे उल्मुकैकदेशं प्रक्षिप्य करी-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

षादिनोपसमाधायोपसादिते सति आग्नीध्रः शेषेणोल्मुकेन पर्यायान् समाप्य तदेवोल्मुकं पृथङ् निधाय पशुश्रपणकाले तदर्थं प्रणयति। **अथोल्मुकप्रथमा** इत्यादिना विहितस्य शामित्रशालां प्रति पशुनयनस्याङ्गभूतमुल्मुकं पृथङ्-निहितस्यैवैकदेशो गृह्यते। तमेकदेशं कार्यानन्तरमाहवनीये प्रक्षिपति। ऋषभे निषण्णे सति **तमुदुस्तातिष्ठेत्यादिमन्त्रेणोत्थापयति**। ततो वपाप्रचारान्तं पाशुकं चरकवद् भवति। पश्वङ्गमन्त्रेषु पशुबोधकशब्दानां पशुबहुत्वाद् बहुवचनान्तत्वेन सर्वत्रोहः कार्यः।

अश्व्यनुवाक्याप्रैषः—अश्विभ्यां छागस्य वपाया मेदसोनुब्रू३हि इत्यनुवाक्याप्रैषः। अयमश्व्यनुवाक्याप्रैष इत्युच्यते॥

१७६. **अश्वियाज्याप्रैषप्रैषः—अश्विभ्यां छागस्य वपां मेदः प्रस्थितं प्रेष्येति** मैत्रावरुणं प्रत्यध्वर्युः प्रेष्यति। अयमश्वियाज्याप्रैषप्रैष इत्युच्यते॥

१७७. **सरस्वत्यनुवाक्याप्रैषः—सरस्वत्यै मेषस्य वपाया मेदसोनुब्रू३हि** इति। अयं सरस्वत्यनुवाक्याप्रैष इत्युच्यते॥

१७८. **सरस्वतीयाज्याप्रैषप्रैषः—सरस्वत्यै मेषस्य वपां मेदः प्रस्थितं प्रेष्येति**। अयं सरस्वतीयाज्याप्रैषप्रैष इत्युच्यते॥

१७९. यजमानः अश्विभ्यामिदम्०। अश्विनोरहं देवयज्ययेन्द्रियावी भूयासम्। जेमानं महिमानं गमेयमिति वा। सरस्वत्या इदम्०। सरस्वत्या अहं देवयज्ययेन्द्रियावी भूयासम्। जेमानमित्यादिविकल्पः पूर्ववत् अनुमन्त्रयते।

ऐन्द्रानुवाक्याप्रैषः—एतद्यागद्वयानन्तरं अध्वर्युः **इन्द्राय ऋषभस्य वपाया मेदसोनुब्रू३हि** इति। अयं ऐन्द्रानुवाक्याप्रैष इत्युच्यते॥

१८०. **ऐन्द्रयाज्याप्रैषप्रैषः—इन्द्राय ऋषभस्य वपां मेदः प्रस्थितं प्रेष्ये**-त्ययऐन्द्रयाज्याप्रैषप्रैष इत्युच्यते॥

१८१. ततो वपामार्जेनान्तं समानम्। इदानीमेव वा पयोग्रहादिग्रहणम्। ततः 'प्रतिप्रस्थातः पशून् विशाधि' इत्यादि करोति। नैतेषु पशुपुरोडाशा विद्यन्ते। **ग्रहपुरोडाशा ह्येते** इति वचनात्—

सौत्रामणीपशुश्रपणप्रैषः—शमितर्हृदयानि जिह्वावक्षांसि तानि कुरुतात् तनिमानिमतस्नूस्तानि सार्धं सव्यानि दोषाण्येकचराणि कुरुतान्नाना पार्श्वाण्यवधत्तादक्षिणाः श्रोणीरध्युद्धीः कुरुताद् दक्षिणानि दोषाणि सव्या श्रोणीरणिमन्ति गुदानां तानि अङ्गानि कुरुताद् वनिष्ठूश्च जाघनीश्चावधत्ताद

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वहुपूष्णः कुरुतात् त्रिः पशून् प्रच्यावयतान् त्रिःप्रच्युतानां पशूनां हृदयान्युत्तमानि कुरुतात् । तस्य तस्य पशोरित्यध्याहारे तु एकवत् प्रैषोऽयन्वेतीत्यनूहो वा । अयं सौत्रामणीपशुश्रपणप्रैष इत्युच्यते ॥

१८२. इदानीमप्रेषित एवाग्नीध्रः त्रीन् पुरोडाशान्निर्वपति । इन्द्रायैकादशकपालम्, सवित्रे द्वादशकपालम्, वरुणाय दशकपालम् । सर्वाणि कपालानि त्रयस्त्रिंशद् भवन्ति । अत्रैव वरुणमेककपालं निर्वपति । आमिक्षाश्रपणं साग्नौ आप्यनिनयनान्तं करोति । पश्वङ्गश्रपणकाले ग्रहैः प्रचरन्ति । अध्वर्युः पयोग्रहान् वंशरज्वादिना युगपद्धोमार्थमेकत्र बध्वा आदत्ते । प्रतिप्रस्थाता तथैवेकीकृत्य सुराग्रहानादत्ते ।

सुराग्रहानुवाक्याप्रैषः—अध्वर्युर्मैत्रावरुणं सम्प्रेष्यति—**अश्विभ्यां सरस्वत्या इन्द्राय सुरासोमानामनुब्रू३हि** इति । अयं सुराग्रहानुवाक्याप्रैष इत्युच्यते ॥

१८३. **सुराग्रहयाज्याप्रैषप्रैषः**———अत्याक्रामतोध्वर्युं प्रतिप्रस्थातारौ । अध्वर्युराश्रावयति, आग्नीध्रेण प्रत्याश्राविते **अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्णे सुरासोमान् प्रतिप्रस्थान् प्रेष्य** इति । अयं प्रैषः सुराग्रहयाज्याप्रैषप्रैष इत्युच्यते ॥

१८४. **सुराग्रहहोममन्त्रौ**—होतृवषट्कारसमकालं प्रतिप्रस्थाता सुराग्रहान् अध्वर्युः पयोग्रहान् सहोभौ स्वाहान्ताभ्यां जुहुतः । 'सुरावन्तं बर्हिषदं सुवीरं यज्ञं हिन्वन्ति महिषा नमोभिः । दधानाः सोमं दिवि देवतासु मदेमेन्द्रं यजमानाः स्वर्काः स्वाहा' इत्यध्वर्योः । 'यस्ते रसः सम्भृत ओषधीषु सोमस्य शुष्मः सुरया सुतस्य । तेन जिन्व यजमानं मदेन सरस्वत्यश्विनाविन्द्रमग्निं स्वाहा' इति प्रतिप्रस्थातुः । चरकोक्तयोः 'अहाव्यग्नेहविः' 'यस्मिन्नश्वास'[1] इत्यनयोर्निवृत्तिः । इमौ सुराग्रहहोममन्त्रावित्युच्येते ॥

१८५. अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्ण इदं न ममेति त्यागो यजमानस्य । अत्र हुतानुमन्त्रणं नास्ति । सोमधर्मत्वात् ।

सुराग्रहहोमानुमन्त्रणम्—करणपक्षे आपस्तम्बसूत्रोक्तं अनुमन्त्रणं साम्नाय्यवत् ग्राह्यम् । अहाव्यग्नेहविरास्येते स्रुचीव घृतं चमू इव सोमः । वाजसनीं रयिमस्मे सुवीरं प्रशस्तं धेहि यशसं बृहन्तम् ॥ १ ॥ यस्मिन्नश्वास ऋषभास

---

१. अनयोः प्रतीकरूपेण निर्दिष्टयोर्मन्त्रयोः सकलः पाठः उत्तरपदार्थसंख्यायां द्रष्टव्यः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उक्षणो वशामेषा अवसृष्टास आताः। कीलालपे सोमपृष्ठाय वेधसे हृदामतिं जनय चारुमग्नये ॥ २ ॥ इति मन्त्राभ्यां सुराग्रहान् हुतान् हूयमानान्वानुमन्त्रयते यजमानः। इदं मन्त्रद्वयं सुराग्रहहोमानुमन्त्रणमित्युच्यते ॥

१८६. होतुरनुवषट्कारे तु उभौ तूष्णीं जुहुतः। यजमानः अग्नय इदम्०। अग्नेरहं देवयज्ययायुष्मान् यज्ञेन प्रतिष्ठां गमेयमित्यनुमन्त्रयते। प्रतिप्रस्थातुर्दक्षिणखरस्थाग्नौ वा होमः। तत्पक्षे शालामुखीयादग्नेरिध्मं प्रणीयोत्तरवेदिवत् सम्भारनिधानं अध्वराहुत्यादि परिस्तरणपरिधीध्मादि सम्मार्गान्तं तूष्णीमध्वर्युपुरुषाः कुर्वन्तीति विशेषः। प्रतिप्रस्थाता ऽऽश्विनं संस्रावं सारस्वते ऽवनयति सारस्वतमैन्द्रे।

सुराग्रहभक्षविधिः—ततः प्रत्याक्रम्याश्विनं पयोग्रहमध्वर्युर्भक्षयति—'यमश्विना नमुचेरासुरादधिसरस्वत्यसुनोदिन्द्राय। इमं तं शुक्रं मधुमन्तमिन्दुं सोमं राजानमिह भक्षयामि' इति मन्त्रेण। प्रतिप्रस्थातान्नीध्रश्च सारस्वतं भक्षयतः—'यदत्ररिप्तं रसिनः सुतस्य यदिन्द्रो अपिबच्छचीभिः। अहं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि'इति मन्त्रेण।'इदं हविः प्रजननं मे अस्तु दशवीरं सर्वगणं स्वस्तये। आत्मसनि प्रजासनि पशुसन्यभयसनि लोकसनि ॥ अग्निः प्रजां बहुलां मे करोत्वन्नं पयो रेतो अस्मासु धत्त। रायस्पोषमिषमूर्जमस्मासु दीधरत् स्वाहा' आभ्यामृग्भ्यामैन्द्रं ब्रह्मयजमानौ भक्षयतः। प्रतिप्रस्थाता ऐन्द्रं सुराग्रहं होत्रे हरति। पयोग्रहत्वात् होता प्रत्यक्षं भक्षयति। प्राणभक्षो वा। यदि होता न भक्षयति तदा खरे उपविष्टः कश्चिद् ब्राह्मणो भक्षयति। **नाना हि वाम्** इत्यृचा **यदत्र शिष्टम्** इत्यृचा च। यदि ब्राह्मणं न विन्देत् तर्हि आहवनीयस्य दक्षिणतो भस्मनिर्मितखरस्थवल्मीकवपायामवनयति एताभ्यामेव मन्त्राभ्याम्। अयं सुराग्रहभक्षविधिरित्युच्यते ॥

१८७. अत्र ग्रहपात्राणां सुरानिनर्देन पूरणं श्येनपत्रावगूहनञ्च। वंशपादानुच्छ्रित्य तयोरुपरि दक्षिणाग्रं दीर्घवंशं निधाय वंशशिक्यं च बध्वा शिक्ये शतातृष्णं कुम्भं निधाय दक्षिणाग्रगोवालपवित्रान्तर्हितं कृत्वा पवित्रे शतमानं हिरण्यं निधाय तत्रावशिष्टं सुरास्थानीयं पयोऽवनयति। यत्पतितं द्रोणे धाराशेषं तद्दक्षिणामुखः प्राचीनावीती तिष्ठन् **सोमप्रतीकाः पितरस्तृप्णुत** इति मन्त्रेण शतातृष्णकुम्भतो धारा अग्नौ पातयति।

सुराधारोपस्थानम्—तासु पतितासु अध्वर्युर्ब्रह्मा होता यजमानश्च प्राचीनावीतिनो दक्षिणामुखा उपतिष्ठन्ते—पवमानः सुवर्जनः। पवित्रेण

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विचर्षणिः। यः पोता स पुनातु मा ॥ १ ॥ पुनन्तु मा देवजनाः। पुनन्तु मनवो धिया। पुनन्तु विश्व आयवः ॥ २ ॥ जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देवदीद्यत्। अग्ने क्रत्वा क्रतूंरनु ॥ ३ ॥ यत्ते पवित्रमर्च्चिषि। अग्ने विततमन्तरा। ब्रह्म तेन पुनीमहे ॥ ४ ॥ उभाभ्यां देवसवितः। पवित्रेण सवेन च। इदं ब्रह्म पुनीमहे ॥ ५ ॥ वैश्वदेवी पुनती देव्यागात्। यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदन्तः सधमाद्येषु। वयं स्याम पतयो रयीणाम् ॥ ६ ॥ वैश्वानरो रश्मिभिर्मा पुनातु। वातः प्राणेनेषिरो मयोभूः। द्यावापृथिवी पयसा पयोभिः, ऋतावरी यज्ञिये मा पुनीताम् ॥ ७ ॥ बृहद्भिः सवितस्तृभिः। वर्षिष्ठैर्देवमन्मभिः। अग्ने दक्षैः पुनाहि मा ॥ ८ ॥ एतैरष्टाभिर्मन्त्रैः। एतत्सुराधारोपस्थानमित्युच्यते ॥

१८८ उपस्थानानन्तरं प्रत्यङ्मुखो ऽध्वर्युः—त्वं सोम प्रचिकितो मनीषेति, त्वया हि नः पितर इति, वन्वन्न वात इति, त्वं सोमपितृभिः संविदान इति, तस्मै त इन्दो हविषा विधेमेति पञ्चभिर्ऋग्भिरुपतिष्ठते। उदङ्मुखो ब्रह्मा बर्हिषदः पितर ऊत्यर्वागिति, त आगता बसेति, आहं पितॄन्त्सुविदत्रानिति, उपहूताः पितरः सोम्यास इति चतसृभिर्ऋग्भिरुपतिष्ठते। प्राङ्मुखो होता—अग्निष्वाताः पितर एह गच्छतेति, ये अग्निष्वात्ता ये ऽनग्निष्वात्ता इति, वान्यायै दुग्धे इति, अग्निष्वात्ता इति चतसृभिर्ऋग्भिरुपतिष्ठते। अत्र सुराग्रहस्थापनं चरकवत् खरे भवति।

सौत्रामण्यङ्गपितृतर्पणम्—ततो यजमानः प्राचीनावीती आहवनीयस्य दक्षिणतः सुरास्थानीयं अवशिष्टं पयः पित्रादिभ्यो वेद्यामवनयति—पितृभ्यः स्वधाविभ्यः स्वधा नमः। पितामहेभ्यः स्वधाविभ्यः स्वधा नमः। प्रपितामहेभ्यः स्वधाविभ्यः स्वधा नमः। अक्षन् पितरः। अमीमदन्त पितरः। अतीतृपन्त पितरः। अमीमृजन्त पितरः। पितरः शुन्धध्वम् इत्येतैर्मन्त्रैः। एतत् सौत्रामण्यङ्गपितृतर्पणमित्युच्यते ॥

१८९. **सौत्रामण्यङ्गपित्रुपस्थानम्**—ब्रह्मयजमानहोतारो दक्षिणामुखा उपतिष्ठन्ते—पुनन्तु मा पितरः सोम्यासः। पुनन्तु मा पितामहाः। पुनन्तु प्रपितामहाः० ॥ १ ॥ पवित्रेण शतायुषा। पुनन्तु मा पितामहाः। पुनन्तु प्रपितामहाः विश्वमायुर्व्यश्नवै० ॥ २ ॥ अग्न आयूंषि पवस आसुवोर्जमिषञ्चनः ॥ आरे बाधस्वदुच्छुनाम्० ॥ ३ ॥ अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यम्। दधत्पोषं रयिं मयि० ॥ ४ ॥ पवमानः सुवर्जनः० ॥ ५ ॥ पुनन्तु मा देवजनाः० ॥ ६ ॥ जातवेदः पवित्रवत्० ॥ ७ ॥ यत्ते पवित्रमर्चिषि०

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

॥ ८ ॥ उभाभ्यां देव सवितः० ॥ ९ ॥ वैश्वदेवी पुनती देव्यागात्० ॥ ॥ १० ॥ इति दशशिर्क्ष्गिभः । इदं सौत्रामन्याङ्गपित्रुपस्थानमित्युच्यते ॥

१९०. **सौत्रामण्यङ्गपैतृकहोमः**—ततो ऽध्वर्युर्जुह्वा सकृद्गृहीतेनाज्येन जुहोति—'ये समानाः समनसः पितरो यमराज्ये । तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां स्वाहा' इत्यनेन मन्त्रेण । पितृभ्य इदं न ममेति यजमानस्य त्यागः । तथैव प्रतिप्रस्थाता जुहोति—'ये सजाताः समनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पताम् अस्मिन् यज्ञे शतं समाः स्वाहा' इति मन्त्रेण । पूर्ववत् त्यागः । अयं सौत्रामण्यङ्गपैतृकहोम इत्युच्यते ॥

१९१. अथाप उपस्पृश्य यज्ञोपवीतानि कुर्वते । अत्रान्वाहार्यमासाद्य चत्वारिंशद् गा दक्षिणात्वेन ददाति शिशुसहितां वडवां च । चयनपक्षे धेन्वृषभानडुहामन्यतमो वरः । एकविंशतिशतसहस्रान्विष्टकानामन्यतमा दक्षिणा । एवं धेन्वादिवर एकविंशतिगवादीनां विकल्पः । पष्ठौहीत्वन्तर्वत्नी वाससा समुच्चीयते । तथा च 'ऋत्विजः अयं व ओदनः इदं वश्चत्वारिंशद्गोनिष्क्रयद्रव्यं सशिशु वडवानिष्क्रयद्रव्यं च यथाभागं प्रतिगृह्णीध्वम् ।' 'अध्वर्य इदन्ते एकविंशतिगोनिष्क्रयद्रव्यं पष्ठौहीहिरण्यनिष्क्रयद्रव्यं वासो निष्क्रयद्रव्यं च यथाभागं प्रतिगृह्णीष्व' अथवा 'अध्वर्य इमानि त एकविंशतिगोपष्ठौहीहिरण्यवासांसि प्रतिगृह्णीष्व' इति यजमानः प्रतिग्राहयति । ते पूर्वोक्तप्रकारेण प्रतिगृह्णीयुः ।

अयं (पदार्थसंख्या १८२ त आरभ्य) कर्मसमूहः सुराग्रहप्रचार इत्युच्यते॥

१९२. ततः अग्नीदुत्तरं बर्हिरुपसादय प्रतिप्रस्थातः पशुषु संवदस्वेति प्रैषादि । त्रिषु पात्रेषु पृथक् यूषाणि निदधाति—सन्ते मनसा म०हाश्विभ्यां त्वा जुष्टमभिघारयामीति मन्त्रेण पृषदाज्येनाश्विनं हविरभिघार्यान्येन पृषदाज्येन **सरस्वत्यै त्वे**त्यूहितमन्त्रेण सारस्वतमभिघार्य पृषदाज्यान्तरेण **इन्द्राय त्वे**त्यूहितमन्त्रेण ऐन्द्रं हविरभिघारयति । स्वाहोष्मण इति तन्त्रेण करोति । यस्त आत्मेति तु पर्यायेण । ततो 'दृंह गा दृह गोपतिम्' इत्यादि पञ्चहोत्रोपसादनान्तं करोति । एकैकस्य स्वस्व स्वस्य शूलस्य पार्श्वभागे धारणं करोति । क्रमेण सन्नाभिमर्शनं करोति । चतसृषु जुह्वादिषूपस्तृणीते । मनोतायै हविषोवदीयमानस्येत्यादि ।

चयनपक्षे ऐन्द्रः प्राण इत्याद्यन्ते उदुम्बरमये पात्रे मृत्युर्गृहं प० विपश्चिते० । उत्तरवेद्यामासादयति । श्रीरसीत्यादि ततः अश्विभ्यां छागस्य हविषोमुब्रू३हि इति यथालिङ्गमूहेन हविर्भिः प्रचरन्ति । सरस्वत्यै मेषस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हविषोनुब्रू३हि । इन्द्राय ऋषभस्य हविषोनुब्रू३हि । साऽन्नाय्यवद् यजमानस्यानुमन्त्रणम् (अनुपलब्धम्) सूत्रे इडाभेदपक्ष एवोक्तः । स्विष्टकृदादिभेदपक्षे तु वनस्पतिना चारित्वा स्रुचावग्नीधे प्रदायाग्रेणाहवनीयमुत्तरतो गत्वा त्रयाणां शृङ्गशफकुष्टिकैर्यूषभिश्चाष्टावष्टावुपहोमान् जुहोति । तद्यथा—अष्टसु पात्रेषु एकैकशफकुष्टिके निधाय प्रथमपशूयूष्णा पूरयति । एवमष्टौ पात्राणि । अष्टमे शृङ्गे अप्यनुषजति । उदगायता पात्रपङ्क्तिः कार्या । एवं द्वितीयस्याष्टौ । इति चतुर्विंशति पात्राणि संस्थाप्य वक्ष्यमाणमन्त्रैर्हुत्वा सम्पातान् ग्रेहेष्ववनीय शफकुष्टिकमग्नौ प्रहरति । अष्टमषोडशचतुर्विंशतितमाहुतौ हूयमानायां शफकुष्टिकशृङ्गाणामनुप्रहरणम् । प्रतियूषाहुतौ सम्पातान् आश्विनपात्रे आनयति । उत्तराहुत्यष्टकसम्पातान् सारस्वतग्रहे । तृतीयाहुत्यष्टकसम्पातानैन्द्रैग्रहेऽवनयतित्यभिषेचनार्थम् ।

आश्विनकुष्टिकशफहोममन्त्राः—तत्र होममन्त्राः—सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् स्वाहा ॥ १ ॥ अश्विभ्यां सरस्वत्या इन्द्राय सुत्राम्ण इदं न ममेति यजमानस्य त्यागः । सम्पातमवनीय कुष्टिकशफावग्नावनुप्रहरति । एवं सर्वत्र । तदस्य रूपममृतं शचीभिस्त्रो दधुर्देवताः संरराणाः । लोमानि शष्पैर्बहुधा नतोक्मभिस्त्वगस्य मांससभवन्नल्लाजाः स्वाहा ॥ २ ॥ सर्वत्र यथालिङ्गत्यागः । तत्तत्पशुदेवतानाम्नेति केचित् । तदश्विना भिषजा रुद्रवर्त्तनी सरस्वती वयति पेशो अन्तरः । अस्थिमज्जानं मासरैः कारोत्तरेण दधतो गत्वविः स्वाहा ॥ ३ ॥ सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शनं वयः । रसंपरिस्रुता न रोहितं नग्नहुर्धीरस्तरं नवेम स्वाहा ॥ ॥ ४ ॥ पयसा शुक्रममृतं जनित्रं सुरया मूत्राञ्जनयन्ति रेतः । अरामतिं दुर्मतिं बाधमाना ऊवध्यं वातं सब्रुवन्त धाराः स्वाहा ॥ ५ ॥ इन्द्रः सुत्रामा हृदयेन सत्यः पुरोडाशेन सविता जजान । यकृल्लोमानं वरुणो भिषज्यन्मतस्नेवायव्यैर्नमिनाति पित्तं स्वाहा ॥ ६ ॥ अन्त्राणि स्थालीमधु पिन्वमाना गुदापात्राणि सुदुधा न धेनुः । श्येनस्य पत्रं नष्णीहाशचीभिरासन्दीनाभिरुदरं न माता स्वाहा ॥ ७ ॥ कुम्भो वनिष्ठुर्जनिता शचीभिर्यस्मिन्नग्रे योन्यां गर्भो अन्तः । ष्णाशीर्व्यक्तः शतधार ऊत्सो दुहेन कुम्भीं स्वधां पितृभ्यः स्वाहा ॥ ॥ ८ ॥ एते मन्त्रा अश्विनकुष्टिकशफहोममन्त्रा इत्युच्यन्ते ॥

१९३. **सारस्वतकुष्टिकशफहोममन्त्राः**—अथ द्वितीयस्य—मुखं सदस्यशिर इत्सदेन जिह्वा पवित्रमश्विना सं सरस्वती॥ चप्पन्नपायुर्भिषगस्य बालो वस्तिर्न शेपो हरसा तपस्वी स्वाहा ॥ १ ॥ अश्विभ्यां चक्षुरमृतं ग्रहाभ्यां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छागेन तेजो हविषा शृतेन । पक्ष्माणि गोधूमैः क्वलैरुतानि पेशो न शुक्लमसितं वसाते स्वाहा ॥ २ ॥ अविर्न मेषो नसि वीर्याय प्राणस्य पन्था अमृतो ग्रहाभ्याम् ॥ सरस्वत्युपवाकैर्व्यानं नस्यानि वर्हिर्बदरैर्जजान स्वाहा ॥३॥ इन्द्रस्य रूपमृषभो वलाय कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्याम् । यवा न बर्हिर्भ्रुवि केसराणि कर्कन्धु जज्ञे मधु सारघं मुखात् स्वाहा ॥ ४ ॥ आत्मन्नुपस्थेन वृकस्य लोम मुखे श्मश्रूणि न व्याघ्रलोमम् । केशा न शीर्षन् यशसे श्रियै शिखा सिंहस्य लोम त्विषिरिन्द्रियाणि स्वाहा ॥ ५ ॥ अङ्गान्यात्मन्भिषजा तदश्विनात्मानमङ्गैः समधात्सरस्वती । इन्द्रस्य रूपं शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधाना स्वाहा ॥ ६ ॥ सरस्वती योन्यां गर्भमन्तरश्विभ्यां पत्नी सुकृतं विभर्ति । अपां रसेन वरुणो न साम्नेन्द्रं श्रियै जनयन्नप्सु राजा स्वाहा ॥ ७ ॥ तेजः पशूनां हविरिन्द्रियावत्परिस्रुता पयसा सारघं मधु । अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याममतः सोम इन्दुः स्वाहा ॥ ॥ ८ ॥ एते सारस्वतकुष्ठिकशफहोममन्त्रा इत्युच्यन्ते (द्र०तै०ब्रा० २।६।४)॥

१९४. **ऐन्द्रकुष्ठिकशफहोममन्त्राः**—अथ तृतीयस्य । तत्र सीसेन तन्त्रं मनसा मनीषिण इत्यादीनां षोडशानामृचां द्वाभ्यां एकैकाहुतिर्भवती । तद्यथा —सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति । अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥ तदस्य रूपममृतं शचिभिस्तिस्रो दधुर्देवताः संरराणाः । लोमानि शष्पैर्बहुधा न तोक्मभिस्त्वगस्य मांसमभवन्न लाजाः स्वाहा ॥ १ ॥ अनया रीत्या ऽष्टौ होमान् करोति । एते ऋग्द्वयात्मका मन्त्राः ऐन्द्रजुष्ठिकशफहोममन्त्रा इत्युच्यन्ते ॥

१९५. **आसन्दीप्रतिष्ठापनम्**—अथा ऽध्वर्युः—मित्रोसि वरुणोसि । समहं विश्वैर्देवैः । इति द्वाभ्यां वाक्यमन्त्राभ्यां पूर्वं संपादितामासन्दीं यजमानायतने प्रतिष्ठापयति । एतत्कर्म आसन्दीप्रतिष्ठापनमित्युच्यते ॥

१९६. **आसन्द्यास्तरणम्**—तत क्षत्रस्य नाभिरसि । क्षत्रस्य योनिरसि । एतद्वाक्यद्वयात्मकमन्त्रेण तस्यामासन्द्यां वास आस्तृणाति । एतदासन्द्यास्तरणमित्युच्यते ॥

चत्वारोऽपि वाक्यमन्त्रा आसन्दीप्रतिष्ठापने विनियुक्ता इति केचित् । तन्मते वास आस्तरणं न भवति ।

१९७. **आसन्द्युपवेशनम्**-यजमान-स्योनामासीद । सुषदामासीद । मा त्वा हिंसीत् । मा मा हिंसीत् । इति वाक्यचतुष्टयात्मकेन मन्त्रेण उपविशति । एतदासन्द्युपवेशनमित्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९८. **आसन्द्यासीनयजमानानुमन्त्रणम्**—अध्वर्युः—निषसाद धृतव्रतो वरुणः पस्त्या स्वा। साम्राज्याय सुक्रतुः। इत्यृचा आसन्द्यामासीनं यजमानमभिमन्त्रयते। एतदासन्द्यासीनयजमानाभिमन्त्रणमित्युच्यते॥

१९९. **यजमानस्य संस्रावैरभिषेचनम्**—अध्वर्युः प्रत्यङ्मुखस्तिष्ठन् आसन्द्यामासीनं यजमानम् आश्विनपात्रस्थसंस्रावेणाभिषिञ्चति—देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामश्विनो र्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामीति मन्त्रेण। ततः सारस्वतपात्रस्थसंस्रावेणाभिषिञ्चति—देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामीति मन्त्रेण। ततः ऐन्द्रपात्रस्थसंस्रावेणाभिषिञ्चति—देवस्य त्वा० हस्ताभ्यां। इन्द्रस्येन्द्रियेण श्रियै यशसे बलायाभिषिञ्चामीति मन्त्रेण।

यजमानहस्तसम्मर्शनम्—तदनन्तरं कोऽसि कतमोऽसि कस्मै त्वा कतमाय त्वा इति वाक्यद्वयेन यजमानस्य हस्तौ सम्मृशति। एतद्यजमानहस्तसम्मर्शनमित्युच्यते॥

२००. **व्यस्तव्याहृतिहोमः**—व्यस्ताभिर्व्याहृतिभिस्तिस्रः स्रुवाहुतीर्जुहोति। तद्यथा—भूः स्वाहा। भुवः स्वाहा। सुवः स्वाहा। यथालिङ्गत्यागो यजमानस्य। अयं व्यस्तव्याहृतिहोम इत्यच्यते॥

२०१. **मङ्गलनामाह्वानम्**—यजमानो राजसूयवन्मङ्गलनाम्ना ऽऽह्वयति। अन्तः स्मायं यन्—सुश्लोकाँ३ इति सङ्ग्रहीतारम्, सुमंगला३ इति भागदुघम्, सत्यराजां३ इति क्षत्तारं। एतत्कर्म मङ्गलनामाह्वानमित्युच्यते॥

२०२. **अङ्गसंस्पर्नम्**—ततो यथालिङ्गमङ्गानि सम्मृशति। 'शिरो मे श्रीः' इति शिरः। 'यशो मुखम्' मुखम्। 'त्विषिः केशाश्च श्मश्रूणि' इति केशश्मश्रूणि। 'राजा मे प्राणो अमृतम्' इति नासिकाम्। 'सम्राट् चक्षुः' इति चक्षुषी। 'विराट् श्रोत्रम्' इति श्रोत्रे। 'जिह्वा मे भद्रम्' इति जिह्वाम्। 'वाङ्महः' इति वाचम्। 'मनो मन्युः' इति मनः। 'स्वराड् भ्राजः' इति हृदयललाटे। 'मोदाः प्रमोदा अङ्गुलीरङ्गानि' इत्यङ्गुलीरङ्गानि च। 'चित्तं मे सहः' इति चित्तम्। 'अभिसन्धाय' इति हृदयम्। 'बाहू मे बलमिन्द्रियम्' इति बाहू। 'हस्तौ मे कर्मवीर्यम्' इति हस्तौ। 'आत्मक्षत्रमुरो मम' इति मध्यशरीरमुरश्च। 'पृष्ठीर्मे राष्ट्रमुदरमंसौ' इति पृष्ठमुदरमंसौ च। 'ग्रीवाश्चश्रोण्यौ' इति ग्रीवाश्रोण्यौ। 'उरू अरत्नी जानुनी' इत्यूरू 'अरत्ने जानुनी। विशो मेऽङ्गानि सर्वतः' इति सर्वाङ्गानि। 'नाभिर्मे चित्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विज्ञानम्' इति नाभिम् । 'पायुर्मेऽपचितिर्भसत्' इति पायुम् । 'आनन्दनन्दावाण्डौ मे' इति वृषणौ । 'भगः सौभाग्यं पसः' इति प्रजननम् । असम्भवतामभिसन्धाय जपेत् । एवम् यथालिङ्गमङ्गानि संस्पृश्याप उपस्पृशति । इदमङ्गसंस्पर्शनमित्युच्यते ॥

२०३. **आसन्दीप्रत्यवरोहणम्**—अथासन्द्याः प्रत्यवरोहति—'जङ्घाभ्यां पद्भ्यां धर्मोसि । विशि राजा प्रतिष्ठति' इति वाक्यद्वयेन मन्त्रेण । अवरुह्य जपति—'प्रतिक्षत्रे प्रतितिष्ठामि राष्ट्रे । प्रत्यश्वेषु प्रतितिष्ठामि गोषु । प्रत्यङ्गेषु प्रतितिष्ठामि पुष्टे । प्रतिद्यावापृथिव्योः प्रतितिष्ठामि यज्ञे ।' एतत् कर्म आसन्दीप्रत्यवरोहणमित्युच्यते ॥

२०४. **आज्याहुती**—अथाध्वर्युराज्याहुतिं जुहोति—'त्रयो देवा एकादश । त्रयस्त्रिंशाः सुराधसः । बृहस्पतिपुरोहिताः । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाहुतयो मे कामान् समर्धयन्तु स्वाहा ॥' देवेभ्य इदम्० इति यजमानस्य त्यागः । अध्वर्युः पुनराज्याहुतिं जुहोति—भूः स्वाहा । अग्नय इदं न ममेति यजमानस्य त्यागः ।

यजमानस्य लोमादिसंमर्शनम्—अथ यजमानो यथालिङ्गमङ्गानि सम्मृशति—लोमानि प्रयतिर्मम' इति लोमानि । 'त्वङ्म आनतिरागतिः' इति त्वचम् । 'मांसं म उपनतिः' इति जिह्वाम् । 'वस्वस्थि मज्जा म आनति' इति मज्जानम् । लोमादीनि मज्जान्तान्यङ्गानि सम्मृश्याप उपस्पृशति । इदं लोमादिसम्मर्शनमित्युच्यते ॥

२०५. ततः चयनपक्षे स्विष्टकृतः पुरस्तान्मृत्युग्रहहोमो भवति । विद्युदसि विद्य मे पाप्मानम्। वृष्टिरसि वृश्च मे०। अग्नीध्रः स्रुचावादाय स्विष्टकृत्प्रभृति इडान्तैः पशुभिः प्रचरति । मृत्यग्रहभक्षश्च । अथैनान् पुरोडाशान् पाचयति—ऐन्द्रमेकादशकपालम्, सावित्रं द्वादशकपालम्, वारुणं दशकपालं च । **अग्नीन् पुरोडाशानाहरेति** अग्नीध्रो दक्षिणेनाज्यस्थालीमित्यादिरीत्या व्याहृतिमन्त्रेण हवींष्यन्तर्वेद्या सादयति । यजमानः **यन्मे अग्ने** इत्यादिनाभिमन्त्रयते ·

अप्रैषः सप्रैषो वा प्रचारः । अप्रैष इति तु युक्तम् । अत एव होतुरादेशोऽपि भवति (१) अश्विनोरहं देवयज्ययेन्द्रियावी भूयासम् । (२) सरस्वत्या अहं देवयज्यया स्वस्तिमान् पशुमान् भूयासम् । (३) इन्द्रस्य सुत्राम्णोहं देवयज्यया धर्मभाग्भूयासम् । एतानि क्रमेण आश्विनसारस्वतैन्द्रयागानां यजमानस्यानुमन्त्रणानि । सर्वेषां यागानामन्नाद इत्येव वानुमन्त्रणम् । इडामार्ज-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नान्ते तन्त्रेण स्विष्टकृदिडान्तम् इत्यापस्तम्बोक्तपक्षे अत्र मृत्युग्रहभक्षः। गर्भिणीं वडवामत्र वा ददाति। ततो हविरुच्छिष्टमुद्वासयति।

चयनपक्षे मैत्रावरुण्याऽऽमिक्षया प्रचर्य वाजिनेनेष्ट्वा अग्नीदौपथानङ्गारानित्यादि करोति। समुदितैस्त्रयाणां पशूनां गुदकाण्डैरुपयाजप्रचारो भवति—दिवं वो धूमो गच्छत्वन्तरिक्षम्० **पृणध्वं स्वाहेत्यूहः**। यद्येकस्तदा प्रकृतिवत्। सूक्तवाके यथालिङ्गमूहः। आज्यभागदेवतानन्तरम् अश्विनोरहमुज्जतिमनूज्जेषम्। सरस्वत्या अहमुज्जितिमनूज्जेषम्। देवानामाज्यपानामित्यादि प्रकृतिवत्। त्रीणि समिष्टयजूंषि भवन्ति। यजमानो विष्णुक्रमान् क्रान्त्वा व्रतं विसृज्य यज्ञविमोकान्तं करोति।

शूलकर्म—अथाध्वर्युः स्फ्यमुदपात्रं हृदयं शूलमित्यादि शूलोद्वासनान्तं कर्म करोति। इदम् शूलकर्मेत्युच्यते॥

२०६. **सौमिकोऽवभृथः**—अथावभृथेन चरन्ति। **साम चैव नाह देवीराप एष वो गर्भ इति चेति** बौधायनचरकसौत्रामणीसूत्रात् सौमिको ऽवभृथ इति ज्ञेयम्। परिभोजनीयान् वेदं च कृत्वा पाणी सम्मृश्याग्नीन् परिस्तीर्य गार्हपत्यस्योत्तरतस्तृणेषु पात्राण्यासाद्योत्तरवेदिसमीपे ब्रह्माणमुपवेश्य पृष्ठ्यास्तरणादि करोति। उत्तरवेदिसमीपे प्रणीतासादनम्। प्रोक्षणीभिर्वा सयवनम्। पुराणगार्हपत्ये निर्वापादि।

वारुणमेककपालं पुरोडाशं निर्वपति। आप्यनिनयनान्ते। **प्रोक्षणीरासादय स्रुवं च स्रुचं च संमृढ्ढि पत्नी सन्नह्याज्येनोदेऽहि** इत्यध्वर्युराग्नीध्रं प्रेष्यति। 'प्रत्युष्टं रक्षः प्रत्युष्टा अरातयोऽग्नेर्वा तेजिष्ठेन तेजसा निष्टपामि' इत्यूहितमन्त्रेण स्रुवस्रुचोर्निष्टपनम्। पत्नीं सन्नह्याज्यमवेक्षयित्वा यजमानं चाज्यमवेक्षयित्वा ऽऽज्यं प्रकृतिवदुत्पुनाति। 'विष्णवसि वैष्णवं धामासि प्रजापत्यम्' इत्यनेन मन्त्रेणाज्यमभिमन्त्रयते। **स्योनं ते सदनमि**त्यादिमन्त्रेण एककपालमावि: पृष्ठं कृत्वा **यन्मे अग्ने** इत्यादिनाभिमन्त्रयते।

आज्यस्थालीं स्रुवं जुहूं स्फ्यं बर्हिर्मुष्टिमेककपालं पुरोडाशं प्रतिवसनीये वाससी सुराग्रहपात्राणि वालानि शततृण्णां स्थालीं हृदयशूलादीन्यादाय अन्तरेण चात्वालोत्करावुङ्ङुपनिष्क्रामन्ति—'द्वे स्रुती अशृणवं पितृणामहं देवानामुत मर्त्यानाम्। याभ्यामिदं विश्वमेजत्समेति यदन्तरा पितरं मातरञ्च' इति मन्त्रेण। 'उरुं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवा उ। अपदे पादा प्रतिधातवेकरुतापवक्ता हृदया विधश्चित्' इत्यनेन यत्रापस्तत्र यन्ति। न सामानि गायन्ति। 'शतं ते राजन् भिषजः सहस्रमुर्वी गम्भीरा सुमतिष्टे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अस्तु । बाधस्व दूरे निर्ऋतिं पराचैः कृतं चिदेनः प्रमुमुग्ध्यस्मत्, इत्यृचमपो दृष्ट्वा जपन्ति । अपामन्तमधितिष्ठन्ति । अत्र प्रसिद्धं दृश्यशूलैश्चरित्वा स्फ्येनोद्धृत्यावोक्ष्य शुष्कस्य चार्द्रस्य च सन्धावित्यादि० वरुण नो मुञ्चेत्यन्तम् शूलानां कर्म करोति ।

वायव्यानि पात्राणि—तत उदकसमीपे दक्षिणापवर्गाणि वायव्यानि सादयति—षट् ग्रहपात्राणि, द्वौ द्रोणकलशौ, एकं कुम्भम्, दशापवित्रादि । एतानि पात्राणि वायव्यानीत्युच्यन्ते ॥

२०७. **अवभृथीयवायव्यासादनम्**—'यस्ते देव वरुण गायत्रीं छन्दाः पाशः । ब्रह्मन्प्रतिष्ठितः । तं त एतेनावयजे' इत्यनेन मन्त्रेण पर्णमयं सादयति । 'यस्ते देव वरुण त्रिष्टुप् छन्दाः पाशः । क्षत्रे प्रतिष्ठितः । तं त एतेनावयजे' एतावन्मन्त्रेण नैयग्रोधम् । ,यस्ते देव वरुण जगती छन्दाः पाशः । विक्षु प्रतिष्ठितः । तं त एतेनावयजे' इति मन्त्रेणाश्वत्थम् । 'यस्ते देव वरुणानुष्टुप्छन्दाः पाशः । पशुषु प्रतिष्ठितः । तं त एतेनावयजे' इत्यनेन मन्त्रेण शतातृण्णां स्थालीं ग्रहाणां दक्षिणतः । तद् दक्षिणतस्तूष्णीं सतं द्रोणकलशौ वालानन्यच्च यत्सोमावलिप्तं प्रत्सर्वं निदधाति । एतदवभृथीयवायव्यासादनमित्युच्यते ॥

२०८. **सौत्रामण्यवभृथाहुतयः**—अथ बर्हिः प्रासनादि करोति । अपस्त्रिः संमृज्य वर्हिर्वर्जांश्चतुरः प्रयाजानिष्ट्वा आज्यभागाभ्यां प्रचर्य वारुणमेककपालं पूर्वार्धादपरार्धाच्चावदाय उच्चैर्जुहोति । अवते स्विष्टकृति स्रुवेण पञ्चाहुतीर्जुहोति—१. 'यद्देवा देवहेडनं देवाश्चकृमा वयम् । अग्निर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः स्वाहा'॥ २. 'यदि दिवा यदि नक्तमेनांसि चकृमा वयम् । वायुर्मा तस्मादेनसो विश्वान्मुञ्चत्वंहसः स्वाहा ॥' ३. यदि जाग्रद्यदि स्वप्नदेनांसि चकृमा वयम् । सूर्यो मा तस्मादेनसो मुञ्चन्त्वंहसः स्वाहा ।' अत्र क्रमेण अग्नये वायवे सूर्यायेति यथालिङ्गं यजमानस्य त्यागाः । ४. 'यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यच्छूद्रे यदर्य एनश्चकृमा वयम् । यदेकस्याधिधर्मणि तस्याऽवयजनमसि स्वाहा' प्रजापतय इदं न ममेति त्यागः । ५. 'यदापो अघ्निया वरुणेति शपामहे ततो वरुण नो मुञ्च स्वाहा ।' वरुणायेदं न ममेति त्यागः । एताः पञ्चाहुतयः सौत्रामण्यवभृथाहुतय इत्युच्यन्ते॥

२०९. **अवभृथानुमन्त्रणमन्त्रः**--ततः स्विष्टकृदादि । अपः सकृत् समृज्यापबर्हिषौ द्वावनुयाजौ यजति । **ससुद्रे ते०स्रुवं** प्रतिष्ठाप्य अभिपूर्वं हुत्वा ऽवभृथं यजमानो ऽनुमन्त्रयते—अवभृथ निचुम्पुण निचेरुरसि निचुङ्कुण । अव देवै-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

र्देवकृतमनोयाट् । अव मर्त्यैर्मर्त्यकृतम् । उरोरा नो देवरी रिषस्पाहि ।' अयमवभृथानुमन्त्रणमन्त्र इत्युच्यते ॥

२१०. ततः 'सुमित्र्या न आप ओषधयः सन्तु । दुर्मित्र्यास्तस्मै भूयासुः । योऽस्मान् द्वेष्टि यं च वयं द्विष्मः' । 'द्रुपदादिवेन्मुमुचानः । स्विन्नः स्नात्वी मलादिव । पूतं पवित्रेणेवाज्यम् । आपः शुन्धतु मैनसः ।' इति द्वाभ्यां मन्त्राभ्यामाष्णुत्य शालीनप्सु सम्प्रकीर्य अञ्जलिनोपसिच्य **इमं विष्यामी**ति मन्त्रेण योक्त्रं विसृज्य अन्योऽन्यं धावयन्ति ।

ततोऽभिषेकादि । स्नात्वा प्रतिवसनीये वाससी परिधाय 'उद्वयं तमसस्परि पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्' इत्यादित्यमुपतिष्ठते । 'प्रतियुतो वरुणस्य पाशः । प्रत्यस्तो वरुणस्य पाशः' इति मन्त्रेणोदकान्तं प्रत्यस्यति । ततः प्रतिप्रस्थातरुन्नो नय । तिस्रस्तिस्रः समिधः कुर्वत इत्यादि । 'अपो अन्वचारिषं रसेन समसृक्ष्महि । पयस्वां अग्न आगमं तं मा संसृज वर्चसा । प्रजया च धनेन च । समावर्त्ति पृथिवी । समुषाः समु सूर्यः । समु विश्वमिदं जगत् । वैश्वानरज्योतिर्भूयासम् । विभुं कामं व्यश्नवै' एतैर्वाक्यमन्त्रैराहवनीयमुपतिष्ठते ।

अध्वर्युः स्रुवाहुतिं जुहोति—**भूः स्वाहा** । अग्नय इदम्० इति त्यागः । व्रतविसर्गादि पुनरालम्भब्राह्मणतर्पणान्तं कृत्वा औपयजिके औत्तरवेदिके वा ऽग्नौ उत्तरवेदिदक्षिणेंसे बर्हिरुपोषति । **यत्कुसीद**मित्यादिहोम औत्तरवेदिके वा । वाय्वादित्ययूपोपस्थानसमारोपणाभ्याधानपूर्णाहुतिवरदानञ्चेति। व्रतविसर्गादि पुनरालम्भवर्जं ब्राह्मणतर्पणान्ता सन्तिष्ठते त्रिपशुसौत्रामणी ।

सौत्रामणीसम्बन्धिमहापितृयज्ञः—तदानीमेव असंभवे श्वो वा विहृत्य महापितृयज्ञवदनुष्ठानं भवति । **याः पुरस्ता**दित्यादि । 'महापितृयज्ञहविर्भिर्यक्ष्ये' इति सङ्कल्पः । **प्रजापते न त्वदेतानि यदन्तरिक्षं पृथिवीमुत द्यामि**त्युपस्थानान्तं करोति । अयं सौत्रामणीसम्बन्धिमहापितृयज्ञ इत्युच्यते ॥

२११. **सौत्रामण्युत्तराङ्गैन्द्रपशुः**—अथ प्रतिपदि ऐन्द्रपशुवत् सङ्कल्पप्रभृति । इन्द्राय वायोधसे पशुमालभते । नात्र समारोपः । सौत्रामणीत्रिपशुवेदिमुद्वास्य यूपं चोद्वास्य आहवनीयस्याग्रे द्वादशपदां वेदिं विमायोतरवेदिं शम्यामात्रीं प्रादेशमात्रीं योनिं च करोति । नात्र सौमिकी वेदिर्न चयनम् । ऋषभो दक्षिणा । पुर्णाहुत्यन्तं पुनरालम्भवजं ऐन्द्रं पशुं समापयति । अयं सौत्रामण्युत्तराङ्गैन्द्रपशुरित्युच्यते ॥

२१२. **सौत्रामण्युत्तरादित्येष्टिः**—तदनन्तरं पुनर्विहृत्य पूर्ववदादित्येष्टिं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

करोति । समातरं गां दक्षिणां ददाति । पुनरालम्भवर्जं ब्राह्मणतर्पणान्तं करोति । इयं सौत्रामण्युत्तरादित्येष्टिरिति गीयते ॥

२१३. तदनन्तरं अग्नीन् समारोप्य स्वान्यग्न्यायतनानि सम्प्राप्य मथित्वा ऽग्नीन् विहृत्याग्निहोत्रं जुहोति । एवावता ग्रन्थेन[1] कौकिलसौत्रामणीसम्बन्धियजमानब्रह्माध्वर्व्वाग्नीध्रप्रतिप्रस्थातृणां कर्माणि प्रतिपादितानि ।

अथ होतृमैत्रावरुणयोः कर्म आश्वलायनसूत्रानुसारेण प्रोच्यते—ऐन्द्रस्य पशोः पश्विष्टचादि सर्वं निरूढवद् भवति । आवाहनकाले होता आज्यभागदेवतावाहनानन्तरम् 'इन्द्रमा३वह । वनस्पतिमा३वह । देवां आज्यपां'आ३वह इत्यादि प्रकृतिवत् । अध्रिगुप्रैषे **मेधपतये मेधमित्यूहः** ।

सौत्रामणीप्रयाजमन्त्राः—अध्रिगुप्रैषात्पूर्वमेव प्रयाजाः । आश्वलायनानुक्तत्वात् यजुर्वेदोक्तप्रकारेण । तद्यथा 'ये३ यजामहे भूर्भुवः स्वः समिद्ध इन्द्र उषसामनीके पुरोरुचा पूर्वकृद् वावृधानः । गोभिर्वपावान् मधुना समञ्जन् त्रिभिर्देवैस्त्रिशता वज्रबाहुर्जघान वृत्रं विदुरो ववारा३ वौ३षट्' ॥ ॥ १ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवर्नराशंसः प्रतिशूरो मिमानस्तनूनपात् प्रतियज्ञस्य धाम । गोभिर्वपावान् मधुना समंञ्जन् हिरण्यैश्चग्द्री यजति प्रचेता३ वौ३षट् ॥ २ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवरीडितो देवैर्हरिवां अभिष्ठिराजुह्वानो हविषा वर्धमानः । पुरन्दरो मघवान्वज्रबाहुरायातु यज्ञमुप नो जुषाणा३ वौ३षट्, ॥३॥'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवर्जुषाणो बर्हिर्हरिवान्न इन्द्रः प्राचीनं सीदत् प्रदिशा पृथिव्याः । उरुव्यचाः प्रथमानं स्योनमादित्यैरक्तं वसुभिः सजोषा३ वौ३षट्' ॥ ४ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवरिन्द्रं दुरः कवष्पो धावमाना वृषाणं यन्तु जनयः सुपत्नीः । द्वारो देवीरभितो विश्रयन्तीं सुवीरा वीरं प्रथमानामहोमी३ वौ३षट्' ॥ ५ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारान्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवरुषासानक्ता बृहती बृहन्तं पयस्वती सुदुघे शूरमिन्द्रम् । पेशस्वती तनुना

१. पाशुकपदार्थसंख्या १५५ (पृष्ठ १४८) आरभ्य 'पाशुकपदार्थसंख्या २१२ (पृष्ठ१६७) पर्यन्तेन ग्रन्थेन इत्यर्थः ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

संव्ययन्ती देवानां देवी यजतः सुरुक्मे३ वौ३षट्' ॥ ६ ॥ 'वाग्वषट्कार-नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । नचैद्वेतन्वत? इति वचनात् । 'ये३ यजामहे भूर्भुवः सुवर्देव्या मिमाना प्रथमा पुरुत्रा होताराविन्द्रे प्रथमा सुवाचा मूर्धन्यज्ञस्य मधुना प्राचीनं ज्योतिर्हविषा वृधाता३ वौ३षट्' 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । अत्र याज्यान्तविसर्गलोपः । इतरश्च रेफीति वचनात् । 'ये३ यजामहे भूर्भुवः सुवस्तिस्रो देवीर्हविषा वर्धमाना इन्द्रं जुषाणा वृषणं न पत्नी । अच्छिन्नं तन्तुं पयसा सरस्वतीडादेवी भारती विश्वतूर्ती३ वौ३षट्' ॥ ८ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवस्त्वष्टा दधदिन्द्राय शुष्ममपाकोऽचिष्टुर्य-शसे पुरूणि । वृषा यजन्वृषणं भूरिरेता मूर्धन्यज्ञस्य समनक्तु देवा३न्वौ३षट्' ॥ ९ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । 'ये३ यजामहे भूर्भुवः सुवर्वनस्पतिरवसृष्टो न पाशैस्त्मन्यास-मञ्जन् क्षमिता न देवः । इन्द्रस्य हव्यैर्जठरं पृणानः स्वदाति हव्यं मधुना घृतेना३ वौ३षट्' ॥ १० ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । [† आ० श्रौत १।५।११॥]

अध्रिग्वपापनामकौ देवशमितारौ—तत आश्वलायनसूत्रपठितमध्रिगुमू-हेन पठति—'अध्रिगुश्चापापश्चोभौ देवानां शमितारौ ताविमं पशुं श्रपयता प्रविद्वांसौ यथा यथास्य श्रपणं तथा तथेति' श्रुत्युक्तत्वादध्रिग्वपापनामकौ देवशमितारावुच्येते ॥

२१४. दशप्रयाजाः पूर्वमनुष्ठिताः । इदानीमेकादशेन यजति । स यथा-'ये३ यजामहे भूर्भुवः स्ववस्तोकानामिन्दुं प्रतिशूर इन्द्रो वृषायमाणो वृष-भस्तुरासाट् । घृतप्रुषा मधुना हव्यमुन्दन्मूर्धन्यज्ञस्य जुषतां स्वाहा३ वौ३षट् ॥ ११ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । एते एकादश आपस्तम्बसूत्रपठिता मन्त्राः सौत्रामणीप्रयाजा इति गीयन्ते ॥

२१५. अथैतेषां प्रैषा उच्यन्ते । ते च यथा—होता यक्षत् समिधेन्द्रमिड-स्पदे नाभा पृथिव्या अधि । दिवो वर्ष्मन्त्समिध्यत ओजिष्ठश्चर्वणीसहान्वे-त्वाज्यस्य होतर्यज ॥ १ ॥ होता यक्षत् तनूनपातमृतिभिर्जेतारमपराजित-मिन्द्रं देवं सुवर्विदं पथिभिर्मधुमत्तमैर्नराशंसेन तेजसा वेत्वाज्यस्य होत-र्यज ॥ २ ॥ होता यक्षदिडाभिरिन्द्रमिन्द्रमीडितमाजुह्वानममर्त्यम् । देवो दैवैः सवीर्यो वज्रहस्तः पुरन्दरो वेत्वाज्यस्य होतर्यज ॥३॥ होता यक्षद् बर्हिषेन्द्रं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निषध्वरं वृषभं नर्यापसम् । वसुभीरुद्रैरादित्येभिर्नियुद्भिर्वहिरासदद्वेत्वाज्यस्य होतर्यज ॥ ४ ॥ होता यक्षदोजो न । वीर्यꣳ सहो द्वार इन्द्रमवर्धयन् ॥ सुप्रायणा विश्रयन्तामृतावृधो द्वार इन्द्राय मीढुषे वियन्त्वाज्यस्य होतर्यज ॥ ५ ॥ होता यक्षदुसे इन्द्रस्य धेनू सुदुघे मातरौ मही । सवातरौ न तेजसा वत्समिन्द्रमवर्धतां वीतामाज्यस्य होतर्यज ॥ ६ ॥ होता यक्षद् दैव्या-होतारा भिषजा सखाया हविषेन्द्रं भिषज्यतः । कवी देवौ प्रचेतसाविन्द्राय धत्त इन्द्रियं वीतामाज्यस्य होतर्यज ॥ ७ ॥ होता यक्षत् तिस्रो देवीस्त्रयस्त्रिधातवोपसम् । इडा सरस्वती भारती मही इन्द्रपत्नीर्हविषमतीर्वियन्त्वाज्यस्य होतर्यज ॥ ८ ॥ होता यक्षत् त्वष्टारमिन्द्रं भिषजं सुयजं घृतश्रियम् । पुरुरूपꣳ सुरेतसं मघोनिमिन्द्राय त्वष्टा दधदिन्द्रियाणि वेत्वाज्यस्य होतर्यज ॥ ॥ ९ । होता यक्षद् वनस्पतिꣳ शमितारꣳ शतक्रतुं धियो जोष्टारमिन्द्रियम् । मध्वा समञ्जन् पथिभिः सुगेभिः स्वदाति हव्यं मधुना घृतेन वेत्वाज्यस्य होतर्यज ॥ १० ॥ ततो **ऽग्निर्होता नो अध्वर** इत्यादि पर्यग्नये क्रियमाणायान्वाह निरूढवत् । तदनन्तरं 'होता यक्षदिन्द्रस्य स्वाहा ऽयज्यस्य स्वाहा मेदसः स्वाहास्तोकानाꣳ स्वाहा कृतीनां स्वाहा हव्यसूक्तीनाꣳ स्वाहा देवाँ आज्यपान् स्वाहेन्द्रꣳ होत्राज्जुषाणा इन्द्र आज्यस्य वियन्तु होतर्यज ॥ ११ ॥ एते एकादश आपस्तम्बसूत्रपठिताः[1] प्रैषाः सौत्रमणीप्रयाजप्रैषा इत्युच्यन्ते ॥

२१६. **वपायागः**—ततो निरूढवदाज्यभागप्रचारः । ततो वपायागे—आचर्षणिप्रा वृषभो जनानाꣳ राजा कृष्टीनां पुरुहूत इन्द्रः । स्तुतः श्रवस्यन् मनसो यमद्रिग्युक्ता हरी वृषणायाह्यर्वो३म् इत्यनुवाक्यामध्वर्युप्रेषितो मैत्रावरुणः पठति—होता यक्षदिद्रं छागस्य वपाया मेदसो जुषतां हविर्होतर्यज ।' अध्वर्युप्रेषितो मैत्रावरुणो ऽनेन प्रैषेण होतारं प्रेष्यति । ये३ यजामहे सुविवेषयज्माधिषणा जजानस्तवै पुरापार्यादिन्द्रमह्नः । अꣳहसो यत्र पीपरद् यथा नो नावेव यान्तमुभये हवन्ता३इ वौ३षड् । इत्यनया याज्यया होता यजति । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारातं जपति । होतृमैत्रावरुणयोर्निरूढवच्चात्वाले वपामार्जनं भवति । पुरोडाशयागे—तꣳ सध्रीचीरूत यो वृष्णीयानि पौꣳ स्यानि निपुतः स्नश्चुरिन्द्रम् । समुद्रं न सिन्धव उक्थशुष्मा उरुव्यचसङ्गिर आषिशन्तो३म् । इत्यनुवाक्या मैत्रावरुणस्य । 'होता यक्षदिन्द्रं पुरोडाशस्य जुषतां हविर्होतर्यज' इत्यनेन

---

१. द्र० तै० ब्रा० २।६।७ क्वचित् भेदेन ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रैषेण होतारं प्रेष्यति । ये३ यजामहे भूर्भुवः सुवः सत्यमित्तन्नत्वावाँ अन्यो अस्तीन्द्रदेवो न मर्त्यो ज्यायान् । अहन्नहिं परिशयानमर्णोऽवा सृजो अपो अच्छा समुद्रां इ वौ३षड् होता ऽनय याज्यया यजति । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारान्तं जपति । अथ स्विष्टकृतः—त्वामीडते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः । यस्य देवैरासदो वर्हिरग्ने-हान्यस्मै सुदिना भवन्तो३म् —इत्यनुवाक्या । होता यक्षदग्निं पुरोडाशस्य जुषतां हविहोतर्यज । अनेन प्रैषेण होतारं प्रेष्यति । 'ये३ यजामहे भूर्भुवः सुवरग्निँ सुदीतिँ सुदृशं गृणन्तो नमस्यामस्त्वेड्यं जातवेदः । त्वां दूत-मरतिँ हव्यवाहं देवा अकृण्वन्नमृतस्य नाभा वौ३षड् ,वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः इति वषट्कारानन्तरं जपति । अङ्गयागे- मनोतायै हविषोवदीयमानस्यानुब्रूहि' इत्यध्वर्युप्रेषितो मैत्रावरुणो ऽभिहिङ्कृत्य **त्वं ह्यग्ने प्रथमो मनोते**ति सूक्तयमन्वाह । ततः **प्र ससाहिषे पुरुहूत शत्रून् ज्येष्ट-स्ते शुष्म इह रातिरस्तु इन्द्राभरदक्षिणेनाप्रसूनि पतिः सिन्धूनामसि रेवती-नो३म्** इति पुरोनुवाक्यां मैत्रावरुणो वदति । होता यक्षदिन्द्रं छागस्य हविष आदद्दद्य० गृभः । घस्तान्नूनं० करदेवन्देवो जुषतां हविर्होतर्यज । इत्यनेन होतारं प्रेष्यति । ये३ यजामहे भूर्भुवः सुवः सशेवृधमधिधाद्युम्नमस्मै महि क्षत्रं जननाषाडिन्द्रतव्यम् । रक्षा च नो मघोनः पाहि सूरीराये चनः स्वपत्या इषे धा३ वौ३षड् । होता ऽनया याज्यया यजति । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारान्तं जपति । ततो देवेभ्यो वनस्पते हवीं-षीत्यादिवनस्पतियागो निरूढवत् ।

एकादशानुयाजप्रैषाः—देवं वर्हिरिन्द्रँ सुदेवं देवैर्वीरवस्तीर्णं वर्हिर्वेद्याम-वर्धयद्वस्तोर्वृतां प्राक्तोर्भृतं रायावर्हिष्मतोत्यागाद् वसुवने वसुधेयस्य वेतु यज ॥ १ ॥ देवीद्वारं इन्द्रं संघाते वीड्वीर्यामन्नवर्धयन्नावत्सेन तरुणेन कुमा-रेण च मीविताग्रपार्वाणँ रेणुककाटं नुमन्तां वसुवने वसुधेयस्य वियन्तु यज ॥ २ ॥ देवी उषासानक्तेन्द्रं यज्ञे प्रयत्यह्वे तान्देवीर्विंशः प्राया-सिष्ठाँ सुप्रीते सुधीते अभूतां वसुवने व्वसुधेयस्य वीतां यज ॥ ३ ॥ देवी जोष्ट्री वसुधिती देवमिन्द्रमवर्धय तामयाव्यन्याघाद्वेषाँस्यान्यावाक्षीद् वसु-वार्याणि यजमानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥ ४ ॥ देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रमवर्द्धतामिषमूर्जमन्यावाक्षीत् सन्धिँ सपीति-मन्या नवेन पूर्वं दयमाने पुराणेन नवमधातामूर्जमूर्जाहुती वसु वार्याणि यज-मानाय शिक्षिते वसुवने वसुधेयस्य वीतां यज ॥५॥ देवा दैव्या होतारा देव-मिन्द्रमवर्धताँ हताघशँसावाभार्ष्टां वसु वार्य्याणि यजमानाय शिक्षितौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसुवने वसुधेयस्य वीतां यज ॥६॥ देवी स्तिस्रिस्तिस्रो देवीः पतिमिन्द्रमवर्धयन्नस्पृक्षद् भारती दिवꣳ रुद्रैर्यज्ञꣳ सरस्वतीडा वसुमति गृहान् वसुवने वसुधेयस्य वियन्तु यज ॥७॥ देव इन्द्रो नराशꣳमस्त्रिवरूथस्त्रिवधूरो देवमिन्द्रमवर्धयच्छतेन शितिपृष्ठानामाहितः सहस्रेण प्रवर्तते मित्रावरुणे दस्युहोत्रमर्हतो बृहस्पतिस्तोत्रमश्विनाध्वर्यवं वसुवने वसुधेयस्य वीतां यजः ॥८॥ देव इन्द्रो वनस्पतिर्हिरण्यपर्णो मधुशाखः सुपिप्पलो देवमिन्द्रमवर्धयद् दिवमग्रेणाप्रादान्तरिक्षं पृथिवीदृꣳहीद् वसुवने वसुधेयस्य वेतु यज ॥९॥ देवं बर्हिर्वारितीनां देवमिन्द्रमवर्धयत् स्वासस्थयमिन्द्रेणासन्नमन्या बर्हीꣳष्यभ्यभूद् वसुवने वसुधेयस्य वेतु यज ॥१०॥ देवो अग्निः स्विष्टकृद् देवमिन्द्रमवर्धयत् स्विष्टं कुर्वन् स्विष्टकृत्स्विष्टमद्य करोतु नो वसुवने वसुधेयस्य वेतु यज ॥११॥ एते एकादशानुयाजप्रैषाः । एषामकैकेन मैत्रावरुणो होतारं प्रेष्यति । होता एतैरेव प्रैषैर्यजेत्यस्य स्थाने **वषट्कारं** कृत्वा यजति । एवं सति प्रैषा एव याज्या भवन्ति । अग्निमद्येत्यादिप्रैषे यथादेवतमूहो भवति । अन्यत् सर्वं निरूढवत् । एतावत् कर्म सौत्रामणीपूर्वाङ्गैन्द्रपशुरित्युच्यते ॥

२१७. **सौत्रामणीपूर्वाङ्गादित्येष्टिः**—अथादित्येष्टिः । तत्रादितिर्देवता, चरुर्द्रव्यम् । सामिधेनिप्रभृति सर्वं प्रकृतिवत् । **अदितिर्न उरुष्यत्विति** प्रधानस्यानुवाक्या । **मही मू षु मातरं सुव्रताना**मिति याज्या । इति विशेषः । इतीयं सौत्रामणीपूर्वाङ्गादित्येष्टिरिति गीयते ॥

२१८. **सौत्रामणीदेवतावाहनम्**—अथ त्रिपशोः । पश्विष्ट्यग्निप्रणयनमन्थनानि पूर्ववत् । आवाहनकाले—आज्यभागावाहनानन्तरम् अश्विनावा३वह, सरस्वतीमा३वह, इन्द्रमा३वह, वनस्पतिमा३वहेत्यादि पूर्ववत् । एतत् सौत्रामणीदेवतावाहनमित्युच्यते ॥

२१९. **त्रिपशोरनुयाजानां प्रैषा याज्याश्च**—यजशब्दान्तैः प्रैषैर्मैत्रावरुणो होतारं प्रेष्यति,वषट्कारान्ताभिर्याज्याभिर्होता यजति। होता यक्षत् समिधाग्निमिडस्पदेऽश्विनेन्द्रं सरस्वतीमजो धूम्रो न गो धूमैः क्वलैर्भेषजं मधु शष्पैर्न तेज इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वियन्त्वाज्यस्य होतर्यज ॥१॥ ये३ यजामहे भूर्भुवः सुवः समिद्धो अग्निरश्विना तप्तो घर्मो विराट सुतः । दुहे धेनुः सरस्वती सोमꣳ शुक्रमिहेन्द्रिया३वौ३षट् ॥१॥ वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । होता यक्षत् तनूनपात् सरस्वत्यविर्मेषो न भेषजं पन्था मधुमता भरन्नश्विनेन्द्राय वीर्यम् । बदरैरूपवाकाभिर्भेषजं तोक्मभिः पयः सोमः परिस्रुताघृतंमधु वियन्त्वाज्यस्य होतर्यज ॥२॥ ये यजामहे भूर्भुवः सुवस्तनूनपाता भिषजा सतेश्विनोभा सरस्वती

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मध्वरजाꣳसीन्द्रियमिन्द्राय पथिभिर्वहा३न्वौ३षट् ॥२॥ एते प्रैषायाज्ये वसिष्टादिभिन्नानाम् । होता यक्षन्नराशꣳसंनग्नहुं पतिं सुरायै भेषजं मेषः सरस्वतीभिषग् रथो न चन्द्रमश्विनोर्वपा इन्द्रस्य वीर्यम् बदरैरूप०वियन्त्वाज्यस्य होतर्यज ॥२॥ ये यजामहे भूर्भुवः सुवरिन्द्रायेन्दुꣳ सरस्वती नराशꣳसेन नग्नहुः । अधात मश्विनामधु भेषजं भिषजासुता ३वौ३षट् ॥२॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । एते प्रैषयाज्ये वसिष्ठादीनाम् । होता यक्षदिडेडित आजुह्वाना सरस्वतीमिन्द्रं बलेन वर्धयन्नृषभेण गवेन्द्रियमश्विनेन्द्राय वीर्यम् । यवैः कर्कन्धुभिर्मधुलाजैर्नमासरं पयः सोमः परिसुता घृतं मधु वियन्त्वाज्यस्य होतर्यज ॥३॥ ये३ यजामहे भूर्भुवः सुवराजुह्वाना सरस्वतीन्द्रायेन्द्रियाणि वीर्यम् । इडाभिरश्विना विषꣳ समूर्जꣳ सꣳ रयिं दधूवौ३षट् । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इतिवषट्कारानन्तरं जपति । होता यक्षद् बर्हिः सुष्टरीमोर्णम्रदाभिषङ्नासत्या भिषजाश्विनाश्वाशिशुमती भिषक् धेनुः सरस्वती भिषक् । दुह इन्द्राय भेषजं पयसोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज ॥४॥ ये३ यजामये भूर्भुवः सुवरश्विना नमुचेः सुतꣳ सोमꣳ शुक्रं परिस्रुता । सरस्वतीतमाभरद् वर्हिषेन्द्राय पातवा३वौ३षट् । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । होता यक्षद् दुरो दिशः कवष्यो न व्यचस्वतीरश्विभ्यां न दुरो दिश इन्द्रो न रोदसी दुघे दुहे कामान् सरस्वत्यश्विनेन्द्राय भेषजम् । शुक्रं न ज्योतिरिन्द्रियं पयः सोमः परिस्रुता घृतं मधु वियन्त्वाज्यस्य होतर्यज ॥५॥ ये३ यजामहे भूर्भुवः सुव कवष्यो न व्यचस्वतीरश्विभ्यां न दुरोदिशः । इन्द्रो न रोदसी दुघे दुहे कामान्त्सरस्वती३वौ३षट् ॥५॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानंन्तरं जपति । होता यक्षत् सुपेशसोषे नक्तं दिवाश्विना सञ्जजाने समञ्जाते सरस्वत्या त्विषिमिन्द्रे न भेषजम् । श्येनो न रजसा हृदा पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज ॥६॥ ये यजामहे भूर्भुवः सुवरुषासानक्तमश्विना दिवेन्द्रꣳसायमिन्द्रियैः । सञ्जानाने सुपेशसा समञ्जाते सरस्वत्या३ वौ३षट् ॥६॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥ होता यक्षद् दैव्या होतारा भिषजाश्विनेन्द्रं न जागृवी दिवानक्तं न भेषजैः । शूषꣳसरस्वती भिषक् सीसेन दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वीतामाज्यस्य होतर्यज ॥७॥ ये३ यजामहे भूर्भुवः सुवः पातं नो अश्विना दिवा पाहि नक्तं सरस्वती । दैव्या होतारा भिषजा पातमिन्द्रꣳ सचासुता३वौ३षट् ॥७॥ 'वाग्वषट्कारं नमस्ते अस्तु मा मा हिंसीः' इति

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वषट्कारानन्तरं जपति । होता यक्षत्तिस्रोदेवीर्नभेषजं त्रयस्त्रिधातवोपसो-रूपमिन्द्रे हिरण्ययमश्विनेडा न भारती वाचा सरस्वती महइन्द्रायदधुरिन्द्रियं पयः सोमः परिस्रता घृतं मधु वियन्त्वाज्यस्य होतर्यज ॥८॥ ये३ यजामहे भूर्भुवः सुवस्तिस्रस्त्रेधा सरस्वत्यश्विना भारतीडा । तीव्रं परिस्रुता सोम-मिन्द्रायसुषवुर्मदां३ वौ३षट् ॥८॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । होता यक्षत् त्वष्टारमिन्द्रमश्विना भिषजं न सरस्वत्योजो न जूतिरिन्द्रियं वृको न रभसो भिषक् । यशः सुरया भेषजꣳश्रियानमासरं पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज ॥९॥ ये३ यजामहे भूर्भुवः सुवरश्विना भेषजं मधु भेषजं नः सरस्वती । इन्द्रे त्वष्टा यशः श्रियꣳरूपꣳरूपमधुस्सुताइ३ वौ३षट् ॥९॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । होता यक्षद् वनस्पतिꣳ शमितारꣳ शतक्रतुं भीमं न मन्युꣳ राजानं व्याघ्रं नमसाश्विना-भामम् । सरस्वती भिषगिन्द्राय दुह इन्द्रियं पयः सोमः परिस्रुता घृतं मधु वेत्वाज्यस्य होतर्यज ॥१०॥ ये३ यजामहे भूर्भुवः सुवर्ऋतुथेन्द्रो वनस्पतिः शशमानः परिस्रुता कीलालमश्विभ्यां मधुदुहे धेनुः सरस्वती३ वौ३षट् ॥१०॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारान्तरं जपति । एते त्रिपशोरनु-याजानां प्रैषा याज्यासहिता उक्ताः । एते मन्त्रा वक्ष्यमाणावेकादशौ याज्या-स्त्रिप्रयाजयाज्याप्रैषौ च प्रैषा इत्युच्यन्ते ॥

२२०. ततो मैत्रावरुणो **ऽग्निर्होता नो अध्वर** इत्यादिपर्यग्नि क्रियमाणा-यान्वाह । ततो होता **दैव्याः शमितार उत मनुष्या** इत्यादि वाक्यरूपमध्रि-गुसंज्ञकं यथार्थमाश्वलायनसूत्रोक्तप्रकारेणोहेन पठति । होता अध्रिगुं पठित्वा 'अध्रिगुश्चापापश्चोभौ देवानाꣳ शमितारौ ताविमं पशुꣳ श्रपयतां चविद्वाꣳ सौ यथायथास्य श्रपणं तथा तथा ।' इति त्रिर्जपति ।

सौत्रामण्याश्विनयागः—ये३ यजामहे भूर्भुवः सुवर्गोभिर्न सोममश्विना मासरेण परिष्कृता । समधाताꣳ सरस्वत्या स्वाहेन्द्रे सुतं मधू३ वो३षट् ॥ ॥११॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारान्तरं जपति ।

होता वक्ष्यमाणप्रैषेण प्रेषितो ऽनया याज्यया यजति । स प्रैषो यथा । होता यक्षदग्निꣳ स्वाहा ऽऽज्यस्य स्तोकानाꣳ स्वाहा मेदसां पृथक् स्वाहा छागमश्विभ्याꣳ स्वाहा मेषꣳ सरस्वत्यै स्वाहर्षभमिन्द्राय सिꣳ हाय सहसेन्द्रियꣳ स्वाहा ऽग्निं न भेषजꣳस्वाहा सोममिन्द्रियं स्वा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हेन्द्रꣳ सुत्रामाणꣳ सवितारं वरुणं भिषजां पतिं प्रियम्पाथो न भेषजम्। स्वाहा देवाँ आज्यपान् स्वाहा ऽग्निꣳ होत्राज्जुषाणो अग्निर्भेषजं पयः सोमः०वियन्त्वाज्यस्य होतर्यज ॥११॥

सौत्रामण्याश्विनानुवाक्या—आज्यभागानन्तरं वपायागो भवति—अश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती। आशुक्रमासुराद्वसुमघमिन्द्राय जभ्रिरो३म्। इति सौत्रामण्याश्विनानुवाक्येति गीयते।

२२१. होता यक्षदश्विनौ छागस्य वपाया मेदसो जुषताꣳ हविर्होतर्यजेति प्रैषेण होतारं मैत्रावरुणः प्रेष्यति। ये३ यजामहे भूर्भुवः सुवर्यमश्विना सरस्वती हविषेन्द्रमवर्धयन्। स बिभेद बलं मघं नमुचा वासुरे सचा३ वौषट्॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। अयं पुरोनुवाक्याप्रभृतिः सौत्रामण्याश्विनयाग इत्युच्यते॥

२२२. **सौत्रामणीसारस्वतयागः** 'यमश्विना सरस्वती हविषेन्द्रमवर्धयन्। स बिभेद बलं मघं नमुचा वासुरेसचो३म्' इति पुरोनुवाक्या। 'होता यक्षत्सरस्वतीं मेषस्य वपाया मेदसो जुषतांꣳ हविर्होतर्यज' इति प्रैषः। ये३ यजामहे भूर्भुवः सुवर्यमश्विना सरस्वती स बिभेद बलं मघं नमुचा वासुरेसचा३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। अयं सौत्रामणीसारस्वतयाग इति गीयते।

२२३. **सौत्रामणीप्रधानैन्द्रवपायागः**—तमिन्द्रं पशवः सचाश्विनोंभा सरस्वती। दधाना अभ्यनूषत हविषा यज्ञमिन्द्रियो३म् इत्यनुवाक्या। होता यक्षदिन्द्रं वृष्णमेषस्य वपाया मेदसो जुषताꣳहविर्होतर्यज इति प्रैषः। ये३ यजामहे भूर्भुवः सुवरश्विना हविरिन्द्रियं नमुचेर्धिया सरस्वती। आशुक्रमासुराद्वसुमघमिन्द्राय जभ्रिरा३इ वौ३षट्। वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। इतिं याज्या। अयं सौत्रामणी प्रधानैन्द्रवपायाग इत्युच्यते॥

२२४. **अश्विनग्रहानुवाक्या**—वपायागानन्तरं चात्वाले मार्जयित्वा ग्रहैः प्रचरन्ति। युवꣳ सुराममश्विना नमुचा वासुरे सचा। विपिपाना शुभस्पति इन्द्रं कर्म स्वावतो३म्। इयमृक् आश्विनग्रहानुवाक्येति गीयते।

२२५. **आश्विनग्रहप्रषः**—होता यक्षदश्विना सरस्वतीमिन्द्रꣳ सुत्रामाणमिमे सोमाः सुरामाणश्छागैर्न मेषैर्ऋषभैः सुताः शष्पैर्न तोक्मभिर्लाजैर्न हस्वन्त्येमदामासरेण परिष्कृताः। शुक्राः पयस्वन्तोमृताः प्रस्थिता वो मधुश्चुत-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्तानश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा जुषन्ताꣳ सौम्यं मधु पिबन्तु मदन्तु वियन्तु सोमꣳ होतर्यज । अयमाश्विनग्रहप्रैष इत्युच्यते ॥

२२६. **सौत्रामण्याश्विनग्रहप्रचारः**—येऽ३ यजामहे भूर्भुवः सुवः पुत्रमिव पितरावश्विनोभेन्द्रावतं कर्मणा दꣳसनाभिः । यत्सुरामं व्यपिबच्छचीभिः सरस्वती त्वामधवन्नभीष्णाऽ३द् वौ३षट् । वाग्वसुरासुतस्याग्र वीही३ वौ३षट् । इत्यनुवषट्कारः । एतद्याज्यान्तं कर्म आश्विनसौत्रामणीग्रहप्रचार इत्युच्यते ॥

२२७. **स्थाल्युपस्थानम्**—**होता अग्निष्वात्ताः तितर एह गच्छतेति** तिसृभिर्ऋग्भिः प्रत्यङ्मुखः स्रवन्तीं स्थालीमुपतिष्ठते । एतत् स्थाल्युपस्थानमित्युच्यते ॥

२२८. आथङ्गयागः । तत्र **त्वं ह्यग्ने प्रथमो मनोतेति** सूक्तं सामिधेनीवन्मैत्रावरुणोन्बाह ।

आश्विनहविःप्रचारः—'अश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयोऽ३म् इत्यनुवाक्या । 'होता यक्षदश्विनौ छागस्य हविष आत्ताम्० गृभः । घस्तानूनं० करत एवाश्वनौ जुषेताꣳ हविर्होतर्यज' इति प्रैषः । येऽ३ यजामहे भूर्भुवः सुवस्ता नासत्या सुपेशसा हिरण्यवर्तनी नरा । मध्य वसाहोमार्थमवसायोत्तरार्धं पठति । सरस्वती हविष्मतीन्द्रकर्मसुनोवताऽ३ वौ३षट् । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । अयमाश्विनहविःप्रचार इत्युच्यते ॥

२२९. **सारस्वतहविःप्रचारः**—तत भिषजा सुकर्मणा सा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्राय दधुरिन्द्रियोऽ३म् इत्यनुवाक्या । होता यक्षन्मेषस्य हविष आद० गृभः । घस्तान्नूनम्० करदेवेन्द्रः सरस्वती जुषतां हविर्होतर्यज । इति प्रैषः । येऽ३ यजामहे भूर्भुवः सुवस्ताभिषजा सुकर्मणासा सुदुघा सरस्वती । स वृत्रहा शतक्रतुरिन्द्रायदधुरिन्द्रियाऽ३न् वौ३षट् । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । अयं सारस्वतहविःप्रचार इत्युच्यते ॥

२३०. **ऐन्द्रहविःप्रचारः**—ता भिषजा सुकर्मणा सा सुदुघा सरस्वती । सवृत्रहा शउक्रतुरिन्द्राय दधुरिन्द्रियोऽ३म् । होता यक्षदिन्द्रं वृष्णेर्मेषस्य हविष आद० गृभः । घस्तान्नूनं० करदेवेन्द्रो जुषताꣳ हविर्होतर्यज इति प्रैषः । येऽ३ यजामहे भूर्भुवः सुवरश्विना गोभिरिन्द्रियमश्वेभिर्वीर्यं बलम् । हविषेन्द्रꣳ सरस्वती यजमानमवर्धयाऽ३न् वौ३षट् । इति याज्या । 'वाग्वषट्कार

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नमते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। अयमैन्द्रहविः-प्रचार इत्युच्यते ॥

२३१. **सौत्रामण्यङ्गैन्द्रपुरोडाशयागः**—वनस्पतियागे स्विष्टकृत्कारे देवतानिगदे यथार्थमूहः। पुरोडाशानां प्रैषाभावात् अप्रेषित एव होता यजति। य इन्द्र इन्द्रियं दधुः सविता वरुणो भगः। स सुत्रामा हविष्पतिर्यजमानाय सश्चतो३म्। होतैवेमामनुवाक्यां पठति—ये३ यजामहे भूर्भुवः सुवरिन्द्रं सविता वरुणो दधद्यजमानाय दाशुषे। आदत्त नमुचेर्वसु सुत्रामा वलमिन्द्रिया३न् वौ३षट्। इति याज्या। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। अयं सौत्रामण्यङ्गैन्द्रपुरोडाशयाग उच्यते ॥

२३२. **सौत्रामण्यङ्गसावित्रपुरोडाशयागः**—सविता वरुणो दधत् सुत्रामा वलमिन्द्रियो३म् इत्यनुवाक्या। ये३ यजामहे भूर्भुवः सुव सवितारं वरुणः क्षत्रमिन्द्रियं दधुः। सरस्वती यदधाना यज्ञमाशता३ वौ३षट्। इति याज्या। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इतिवषट्कारानन्तरं जपति। अयं सौत्रामण्यङ्गसावित्रपुरोडाशयाग उच्यते ॥

२३३. **सौत्रामण्यङ्गवारुणपुरोडाशयागः**—वरुणः क्षत्रमिन्द्रियं भगेन सविता श्रियम्। सुत्रामा यशसा वलं दधाना यज्ञमाशतो३म् इत्यनुवाक्या ये३ यजामहे भूर्भुवः सुवर्वरुणं य इन्द्र इन्द्रियं दधु० यजमानायसश्चता३ वौ३षट्। इति याज्या। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। अयं सौत्रामण्यङ्गवारुणपुरोडाशयाग उच्यते ॥

२३४. पशुभिः प्रचर्य पुरोडाशेन प्रचरन्तीति वचनाद्धविः प्रचारानन्तरं पुरोडाशप्रचारः।

एकादशत्रिपश्वनुयाजप्रैषाः—अथानुयाजाः—देवं वर्हिः सरस्वती सुदेवमिन्द्रे अश्विना तेजो न चक्षुरक्ष्योर्बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥१॥ देवीद्वारो अश्विना भिषजेन्द्रे सरस्वती प्राणं न वीर्यं नसि द्वारो दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥२॥ देवी उषासावश्विना भिषजेन्द्रे सरस्वती वलं न वाचमास्य उषाभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥३॥ देवी जोष्ट्री अश्विना सुत्रामेन्द्रे सरस्वती श्रोत्रं न कर्णयोर्यशो जोष्ट्रीभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥४॥ देवी ऊर्जाहुती दुघे सुदुघे पयसेन्द्रे सरस्वत्यश्विना भिषजा शतमुक्थं न ज्योतिः स्तनयेराहुती धत्त इन्द्रियं वसुवने वसुधेयस्य वीतां यज ॥५॥ देवा देवानां

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिषजा होतारावित्रमश्विना वषट्कारैः सरस्वतीत्विषिं न हृदयेमतिꣳहोतृभ्यां दधुरिन्द्रियं वसुवने वसुधेयस्य वीतां यज ॥६॥ देवीस्तिस्रस्तिस्रो देवीः सरस्वत्यश्विना भारतीडा शूषं न मध्ये नाभ्यामिन्द्राय दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥७॥ देव इन्द्रो नराशꣳसस्त्रिवरूथः सरस्वत्याश्विभ्यामीयते रथो रेतो न रूपममृतं जनित्रमिन्द्राय त्वष्टा दधदिन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज ॥८॥ देव इन्द्रो वनस्पतिर्हिरण्यपर्णो अश्विभ्याꣳ सरस्वत्याः सुपिप्पल इन्द्राय पच्यते मध्वोजो न जूतिमृषभो न भामं वनस्पतिर्नो दधदिन्द्रियाणि वसुवने वसुधेयस्य वियन्तु यज ॥९॥ देवं बर्हिर्वारितीनामध्वरे स्तीर्णमश्विभ्यामूर्णम्रदाः सरस्वत्या. स्योनमिन्द्र ते मद ईशायै मन्युꣳ राजानं बर्हिषा दधुरिन्द्रियं वसुवने वसुधेयस्य वियन्तु यज ॥१०॥ देवो अग्निः स्विष्टकृद् देवान् यक्षद्यथा यथꣳ होतारावित्रमश्विना वाचा वाचꣳ सरस्वतीमग्निꣳ सोमꣳ स्विष्टकृत्विष्ट इन्द्रः सुत्रामा सविता वरुणो भिषगिष्टो देवो वनस्पतिः स्विष्टा देवा आज्यपा इष्टो अग्निरग्निना होता होत्रे स्विष्टकृद् यशो न दशदिन्द्रियमूर्जमपचितिꣳ स्वधां वसुवने वसुधेयस्य वियन्तु यज ॥११॥ एते एकादश त्रिपश्वनुयाजप्रैषा उच्यन्ते ॥

२३५. **सौत्रामणिसूक्तवाकप्रैषः**—एतेषामेकैकेन क्रमेण मैत्रावरुणो होतारं प्रेष्यति । होता तु एतैरेव **यजेत्यस्य** स्थाने वषट्कारं कृत्वा क्रमेण यजति । अग्निमद्य होतारमवृणीतायꣳ सुता सुतो यजमानः पचन् पक्तीः पचन् पुरोडाशान् गृह्णन् ग्रहान् गृह्णन्नग्नय आज्यं गृह्णन् सोमायाज्यं बध्नन्नश्विभ्यां छागꣳ सरस्वत्या इन्द्राय बध्नन्त्सरस्वत्यै मेषमिन्द्रायाश्विभ्यां बध्नन्नन्द्रायर्षभमश्विभ्याꣳ सरस्वत्यै सूपस्था अद्य देवी वनस्पतिरभवदग्नय आज्येन सोमायाज्येनाश्विभ्यां छागेन सरस्वत्या इन्द्राय सरस्वत्यै मेषेणेन्द्रायाश्विभ्यामिन्द्रायर्षभमश्विभ्याꣳ सरस्वत्या अक्षꣳस्त मेदस्तः प्रतिपचताग्रभीषुरवीवृधन्त ग्रहैरपातामश्विना सरस्वतीन्द्रः सुत्रामा वृत्रहा सोमान् सुराम्ण उपोक्थामदाश्रौद्वीमदा अदन्नवीवृधन्ताङ् गूषैस्त्वामद्य ऋषभार्षेयर्षीणां न पादवृणीताꣳ सुतासुती यजमानो वहुभ्य आसङ्गथेम्यः। एष मे दे०सूक्ता३ ब्रू३हि । अनेन मैत्रावरुणो होतारं प्रेष्यति । अयं सौत्रामणीसूक्तवाकप्रैष उच्यते ॥

२३६. **सौत्रामणीसूक्तवाकः**—अनेन प्रैषेण प्रेषितो होता सूक्तवाकं पठति । तत्र विशेषः—**आज्यभागदेवतावाहनान्तरम्**—अश्विनाविदं हविरजुषेतामवीवृधेतां महो ज्यायोक्राताम् । सरस्वतीदं हविरजुषतावीवृधत-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महो ज्यायोकृत । इन्द्र इदं हविरजुषताऽकृत । वनस्पतिरिदमित्यादि निरूढवत् ।

अथ सौत्रामण्यङ्गपितृयज्ञः—तत्प्रकारः सर्वं आश्वलायनोक्तः लुप्तजपेत्याश्वलायनवचनान्मयि गृह्णामीत्यादिजपानां लोपः नेह प्रादेश इत्यादिना प्रादेशकरणादिनिषेधश्च । दक्षिणामुखस्तिष्ठन् अभिहिङ्कृत्य **उशन्तस्त्वा निधीमहीत्यृचं** त्रिरनवानमन्वाह ताः सामिधेन्यो भवन्ति । तृतीयप्रणवेन सह **आ३वह देवान् पितॄन् यजमानायेत्यस्यानुषङ्गः** । आज्यभागदेवतावाहनानन्तरं सोमं पितृमन्तमा३वह । पितॄन् बर्हिषद आ३वह । पितॄनग्निष्वात्तानाऽवह । देवाँ आज्यपाँ आ३वह । अग्निं कव्यवाहनमा३वह । इत्यावाहने विशेषः ।

सीद होतरित्यध्वर्युणोक्ते तूष्णीं निरसनोपवेशने करोति । स्रुगादापने विशेषः—**ईळामहै देवान् पितॄनीळेन्यानित्यादि** । बर्हिर्वर्जं चत्वारः प्रयाजा भवन्ति । उत्तमप्रयाजे विशेषः—ये३ यजामहे भूर्भुवः सुवः स्वाहा ऽग्नि स्वाहा सोमं स्वाहा सोमं पितृमन्तं स्वाहा पितॄन् बर्हिषदः स्वाहा पितॄनग्निष्वात्तान् स्वाहाग्निं कव्यवाहनं स्वाहा देवान् पितॄनाज्यपानित्यादि ।

आ नो अग्ने सुकेतुनेत्याग्नेयाज्यभागस्यानुवाक्या । त्वꣳ सोम महे भगमिति सौम्यस्यानुवाक्या । **जुषाण** इत्यादिरुभयोः पूर्ववद्याज्ये । अनयोरनुवाक्योर्जीवपदसत्वात् इमावाज्यभागौ जीववन्तावित्युच्यते ।।

२३७. **त्वꣳ सोम प्रचिकितो मनीषेति त्वया हिः नः पितरः सोम पूर्वं** इति च द्वे ऋचौ एकानुवाक्या भवति अध्यर्धमनवानम् । ये३ यजामहे भूर्भुवः सुव सोमं पितृमन्तं त्वꣳ सोमपितृभिः संविदानो० रयीणाꣳ स्व३धा नमः । इति सोमस्य पितृमतो यज्यानुवाक्ये ।। **बर्हिषद. पितर ऊत्यर्वागिति आहं पितॄन् सुविदत्राँ अवित्सीति** च पूर्ववदनुवाक्या । **उपहूता पितरः सोम्यास** इति याज्या । इति पितॄणां बर्हिषदम् । **अग्निष्वाता पितर एह गच्छतेति ये अग्निष्वात्ता येऽनग्निष्वात्ता** इति च मिलित्वा ऽनुवाक्या । **वन्यायै दुग्ध** इत्यादिर्याजा । इति पितॄणामग्निष्वात्तानाम् ।। याज्याया आदौ **ये स्वधामह** इति **ये यजामह** इत्यस्य स्थाने प्रयुज्यते। अवघ्राणभक्षणम् । **सुसन्दृशं त्वा वयमित्यादिनोपस्थानादि** सर्वं चातुर्मास्यान्तर्गतपितृमेधवद् भवति ।

इन्द्राय वयोधसे पत्नीसंयाजादि सर्वं निरूढवत् । आज्यभागावाहनानन्तरम् । **इन्द्रं** वयोधसमा३वह । वनस्पतिमित्यादि निरूढवत् । प्रयाजेषु विशेषः—होता यक्षदिडस्पदे समिधानं महद्यशः सुसमिद्धं वरेण्यमग्निमिद्धं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वयोधसम्। गायत्रीं छन्द इन्द्रियं त्र्यविं गां वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥ ॥१॥ येऽ३ यजामहे भूर्भुवः सुवः समिद्धो अग्निः समिधा सुषमिद्धो वरेण्यः। गायत्रीं छन्द इन्द्रियं त्र्यविर्गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। होता यक्षच्छुचिव्रतं तनूनपातमुद्भिदं यं गर्भमदितिर्दधे शुचिमिन्द्रं वयोधसम्। उष्णिहं छन्द इन्द्रियं दित्यवाहं गां वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥२॥ येऽ३ यजामहे भूर्भुवः सुवस्तनूनपाच्छुचिव्रतस्तनूनपाच्च सरस्वती। उष्णिहं छन्द इन्द्रियं दित्यवाङ्गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। द्वितीयप्रयाजप्रैषयाज्ययोर्वसिष्ठादिषु तदितरेषु च प्रवृत्तिः। अन्यस्यानुक्तत्वात्। होता यक्षदीडेऽन्यमीड्यं वृत्रहं तमभिडाभिरोड्यꣳ सहः सोममिन्द्रं वयोधसम्। अनुष्टुभं छन्द इन्द्रियं त्रिवत्सो गौर्वयो दधद् वेत्वाज्यस्य हविर्होतर्यज ॥३॥ येऽ३ यजामहे भूर्भुवः सुवरिडाभिरग्निरीड्यः सोमो देवो अमर्त्यः। अनुष्टुप् छन्द इन्द्रियं त्रिवत्सो गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥३॥ होता यक्षत्सुबर्हिषदं पूषण्वन्तममर्त्यꣳ सीदन्तं बर्हिषी प्रिये ऽमृतेन्द्रं वयोधसम्। बृहतीछन्द इन्द्रियं पञ्चावि गां वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥४॥ येऽ३ यजामहे भूर्भुवः सुवः सुबर्हिरग्निः पूष्वाꣳ स्तीर्णं बर्हिरमर्त्यः। बृहतीछन्द इन्द्रियं पञ्चाविर्गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥४॥ होता यक्षद्वाचस्वतीः सुप्रायणा ऋतावृधो द्वारो देवीर्हिरण्ययीर्ब्रह्माण इन्द्रं वयोधसम्। पंक्तिश्छन्द इहेन्द्रियं तुर्यवाहं गां वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥५॥ येऽ३ यजामहे भूर्भुवः सुवर्दुरो देवीर्दिशो मही ब्रह्मा देवो बृहस्पतिः। पंक्तिश्छन्द इहेन्द्रियं तुर्यवाङ्गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥५॥ होता यक्षत् सुपेशसे सुशिल्ये बृहती उभे नक्तोषसा न दर्शते विश्वमिन्द्रं वयोधसम्। त्रिष्टुभं छन्द इन्द्रियं पष्ठवाहं गां वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥६॥ येऽ३ यजामहे भूर्भुवः सुवरुषे यह्वा सुपेशसा विश्वे देवा अमर्त्याः। त्रिष्टुप् छन्द इन्द्रियं पष्ठवाड्गौर्वयोदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥६॥ होता यक्षत् प्रचेतसा देवानामुत्तमं यशो होतारा दैव्या कवी सयुजेन्द्रं वयोधसम्। जगती छन्द इहेन्द्रियमनड्वाहं गां वयो दधद् वेत्वाज्यस्य हविर्होतर्यज ॥७॥ येऽ३ यजामहे भूर्भुवः सुवर्दैव्या होतारा भिषजेन्द्रेण सयुजायुजा। जगती छन्द इहेन्द्रियमनड्वान् गौर्व-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योदधू३ वौ३षट्। 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्-कारानन्तरं जपति ॥७॥ होता यक्षत् पेशस्वतीस्तिस्रो देवीर्हिरण्ययीर्भारती-र्बृहतीर्महीः पतिमिन्द्रं वयोधसम्। विराजं छन्द इन्द्रियं धेनुं गां वयो दधद् वेत्वाज्यस्य हविर्होतर्यज ॥८॥ ये३ यजामहे भूर्भुवः सुवस्तिस्र इडा सरस्वती भारती मरुतो विशः। विराट् छन्द इहेन्द्रियं धेनुर्गौर्वयोदधू३ वौ३षट् ॥८॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। होता यक्षत् सुरेतसं त्वष्टारं पुष्टिवर्धनँ रूपाणि बिभ्रतं पृथक् पुष्टिमिन्द्रं वयोधसम्। द्विपद छन्द इन्द्रियमुक्षाणं गां वयो दधद् वेत्वाज्यस्य हविर्होतर्यज ॥९॥ ये३ यजामहे भूर्भुवःसुवस्त्वष्टा तुरीयो अद्भुत इन्द्राग्नी पुष्टिवर्धना। द्विपाच्छन्द इहेन्द्रियमुक्षा गौर्न वयोदधू३ वौ३षट् ॥ ९ ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति। होता यक्षत् ऋतुं हिरण्यपर्णमुक्थिनँ रशनां बिभ्रतं वशिं भगमिन्द्रं वयोधसम्। ककुभं छन्द इहेन्द्रियं वशां वेहतं गां न वयोदधद् वेत्वाज्यस्य हविर्होतर्यज ॥१०॥ ये३ यजामहे भूर्भुवः सुवः शमिता नो वनस्पतिः सवितः प्रसुवन् भगम्। ककुप् छन्द इहेन्द्रियमुक्षागौर्नवयोदधू३ वौ३षट् ॥१०॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥ ततो मैत्रावरुणस्या-**ग्निर्होता नो अध्वर** इत्यादि पर्यग्निकरणानुवचनं निरूढवत्। होतु**र्दैव्याः शमितार आरभध्व**मित्यादि ऐन्द्रपशुवत्। ततो मैत्रावरुण एकादशं प्रयाजप्रैषं पठति। स यथा होता यक्षत् स्वाहाकृतीरग्निं गृहपतिं पृथग्वरुणं भेषजं कविं क्षत्रमिन्द्रं वयोधसम्। अतिच्छन्दसं छन्द इहेन्द्रियं बृहदृषभं गां वयो दधद् वेत्वाज्यस्य हविर्होतर्यज ॥११॥ ये३ यजामहे भूर्भुवः सुवः स्वाहा यज्ञं वरुणः सुक्षत्रो भेषजं करत्। अतिछन्दाश्छन्द इन्द्रियं बृहदृषभो गौर्वयो दधू३ वौ३षट् ॥११॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्-कारानन्तरं जपति ॥ आज्यभागप्रचारो निरूढवत्।

अथ वपायागः—वसन्तेनर्तुना देवा वसवस्त्रिवृतास्तुतम्। रथन्तरेण तेजसा हविरिन्द्रे वयोदधो३म्। इत्यनुवाक्या। होतायक्षदिन्द्रं वयोधसं छागस्य वपाया मेदसो जुषताँ हविर्होतर्यज। अयं प्रैषः ॥ ये३ यजामहे भूर्भुवः सुवर्ग्रीष्मेण देवा ऋतुना रुद्रा पञ्चदशे स्तुतम्। बृहता यशसा बलँ हवि-रिन्द्रे वयोदधू३ वौ३षट् ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥ इयं याज्या ॥ वपामार्जनं पूर्ववत्।

अथ पुरोडाशयागः—वर्षाभिर्ऋतुनादित्यास्तोमे सप्तदशे स्तुतम्। वैरू-पेण विशौजसा हविरिन्द्रे वयोदधो३म्। इयमनुवाक्या। होता यक्षदिन्द्रं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वयोधसम् । पुरोडाशस्य जुषताꣳ हविर्होतर्यज ॥ अयं प्रैषः । शारदेनर्तुना देवा एकविꣳश ऋभवस्तुतम् । वैराजेन श्रियाश्रियꣳ हविरिन्द्रे वयोदधू३ वौ३षट् । ये३ यजामहे भूर्भुवः सुवरग्निꣳ सुदीतिꣳ सुदृशं गणन्तो नमस्यामस्त्वेड्यं जातवेदः । त्वां दूतमरतिꣳ हव्यवाहं देवा अकृण्वन्नमृतस्य नाभी३ वौ३षट् । इयं पुरोडाशस्विष्टकृतो याज्या । 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति ॥

अथाङ्गयागः- हेमन्तेनर्तुनादेवा मरुतास्त्रिणवे स्तुतम् । बलेन शक्वरीः सहो हविरिन्द्रे वयोदधो३म् । इयमनुवाक्या । होतायक्षदिन्द्रं वयोधसं छागस्य हविष आददद्य मध्यतो मेद उद्भृतम्० घस्ताम्० करदेवेन्द्रो वयोधा जुषतां यज । अयं प्रैषः । ये३ यजामहे भूर्भुवः सुवः शैशिरेणर्तुनादेवास्त्रयस्त्रिꣳश ऋभव स्तुतम् । अर्धर्चे वसाहोमार्थमारभेत् । रैवतेन श्रियाश्रियꣳ हविरिन्द्रे वयोदधू३ वौ३षट् ॥ 'वाग्वषट्कार नमस्ते अस्तु मा मा हिंसीः' इति वषट्कारानन्तरं जपति । वनस्पतियागादि पूर्ववत् ।

अथानुयाजाः—देवं वर्हिरिन्द्रं वयोधसं देवमिन्द्रमवर्धयद् गायत्रिया छन्दसेन्द्रियं तेज इन्द्र वयोदधद् वंसुवने वसुधेयस्य वेतु यज ॥१॥ देवीर्द्वारो देवमिन्द्रं वयोधसं देवीर्देयमवर्धयन्नुष्णिहा छन्दसेन्द्रियं प्राणमिन्द्रे वयोदधद् वसुवने वसुधेयस्य व्यन्तु यज ॥२॥ देवी देवं वयोधसमुषे इन्द्रमवर्धतामनुष्टुभा छन्दसेन्द्रियं वाचमिन्द्रे वयोदधद् वसुवने वसुधेयस्य वीतां यज ॥३॥ देवी जोष्ट्री देवमिन्द्रं वयोधसं देवी देवमवर्धतां बृहत्याछन्दसेन्द्रियꣳ श्रोत्रमिन्द्रे वयोदधद् वसुवने वसुधेयस्य वीतां यज ॥४॥ देवी ऊर्जाहुतीदेवमिन्द्रं वयोधसं देवी देवमवर्धतां पङ्क्त्या छन्दसेन्द्रियꣳ शुक्रमिन्द्रे वयोदधद् वसुवने वसुधेयस्य वीतां यज ॥५॥ देवा दैव्या होतारा देवमिन्द्रं वयोधसमवर्धत्यं त्रिष्टुभा छन्दसेन्द्रियं बलमिन्द्रे वयोदधद् वसुवने वसुधेयस्य वीतां यज ॥६॥ देवीस्तिस्रस्तिस्रो देवीर्देवंवयोधसं पतिमिन्द्रमवर्धयन् जगत्या छन्दसेन्द्रियं बलमिन्द्रे वयोदधद् वसुवने वसुधेयस्य व्यन्तु यज॥७॥ देवी नराशꣳसो देवमिन्द्रं वयोधसन्देवो देवमवर्धयद्विराजा छन्दसेन्द्रियꣳरेत इन्द्रे वयोदधद् वसुवने वसुधेयस्य वेतु यज ॥८॥ देवो वनस्पतिर्देवमिन्द्रं वयोधसं देवो देवमवर्धद्विराजा छन्दसेन्द्रियं भगमिन्द्रेवयोदधद् वसुवने वसुधेयस्य वेतु यज ॥९॥ देवं बर्हिर्वारितीनां देवमिन्द्रं वयोधसं देवं देवमवर्धयत्ककुभा छन्दसेन्द्रियं यश इन्द्रे वयोदधद् वसुवने वसुधेयस्यं वेतु यज ॥१०॥ देवो अग्निः स्विष्टकृद् देवमिन्द्रं वयोधसं देवो देवमवर्धयदतिच्छन्दसा छन्दसेन्द्रियं क्षत्रमिन्द्रे वयोदधद् वसुवने वसुधेयस्य वेतु यज ॥११॥ एते एकादशानुयाजप्रैषाः । एषा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मेकैकेन मैत्रावरुणो होतारं प्रेष्यति । होता च एतैः प्रैषैर्यजतिशब्दस्थाने वषट्-कारयुतैर्याज्याभूतैः क्रमेण यजति ।

सूक्तवाके आज्यभागानन्तरम्—इद्रो वयोधा इदꣳ हविरजुषतावीवृधत-महो ज्यायोकृत इति विशेषः । अन्यत्सर्वं निरूढवत् ।

अथादित्येष्टिः—तत्रदितिर्देवता, चरुर्द्रव्यम् । अदितिर्न उरुष्यतीत्यनुवाक्या । महीम् षुमातरं सुव्रतानामिति याज्या । उपदेशादितराणीति वचनात् सर्वं याजुषवत् । शेषं प्रकृतिवत् ॥ इदं कौकिलसौत्रामणीहोतृमैत्रावरुणकर्मेत्युच्यते ॥

॥ शुभं भूयात् ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निष्टोमिकाः पदार्थाः

१. **अग्निष्टोमारम्भकालः**—तस्य वसन्ततौ देवनक्षत्रेषु पौर्णमास्याम-मावास्यायां तयोः प्रतिपदि वा यथा सुत्या दीक्षा वा भवेत् तथारम्भः क्रियते ॥ इत्ययमग्निष्टोमारम्भकाल इत्युच्यते ॥

२. **अग्निष्टोमीयदीक्षानिर्णयः**—एका तिस्रो वा दीक्षा । अमावास्यायां सुत्यायां तत् प्रतिपद्यपि द्वादश । बहुदीक्षासु त्वन्तिमदिने प्रवर्ग्यसम्भरणम् । एकादीक्षायां तद्दिने चरणात् पुरो वा । अयमग्निष्टोमीयदीक्षानिर्णय इत्युच्यते ॥

३. **पित्रादिभिः सोमयागकरणाभावे प्रायश्चित्तम्**—यस्य पित्रादिभिः सोमयागो न कृतस्तस्य प्रायश्चित्तत्वेन ऐन्द्राग्नः पशुः श्रुतिचोदितः । तस्य पूर्वं पृथगनुष्ठानम् । अथवा ऽग्निष्टोमाङ्गाग्नीषोमीयपशुना समानतन्त्रता । एवं यस्यत्रिपुरुषपर्यन्तं वेदाध्ययनं न जातम् अग्न्याधानं च न जातं स दुर्ब्राह्मण इत्युच्यते । तस्य प्रायश्चित्तत्वेनाश्विनः पशुर्विहितः । तस्यानुष्ठान-मपि पूर्वपशुवद्विकल्पेन बोध्यम् ॥

४. **अग्निष्टोमारम्भात् पूर्वकृत्यम्**—अग्निष्टोमारम्भस्य पूर्वदिने नान्दी-श्राद्धं भवति । रात्रावुदकशान्तिः प्रतिसरबन्धश्च । आरम्भदिने प्रातः स्ना-नादिपञ्चकं यजमानपत्न्योः षोडशर्त्विजाञ्च । पुण्याहवाचने इन्द्रादयः प्रीय-न्तामिति विशेषः । यजमानो गार्हपत्यस्य पश्चादुपविश्य पत्न्या सह प्राणा-नायम्य **पुरुष एवेदमित्यृचा विष्णुं स्मृत्वा याः पुरस्तादित्यादि हृदये निवि-ष्टमित्यन्तं जपति** । ततो देशकालौ सङ्कीर्त्य विच्छिन्नसोमपीथसन्धानार्थ-मैन्द्राग्नेन पशुना दौर्ब्राह्मण्यपरिहारार्थमाश्विनेन पशुना च अग्नीषोमीयेण पशुना समानतन्त्रम् ।

अग्निष्टोमसङ्कल्पः—यक्ष्यमाणो द्वादशस्तोत्रेण द्वादशशस्त्रेण रथन्तर-साम्ना सप्रवर्ग्येण शतगवदक्षिणेन ज्योतिष्टोमेनाग्निष्टोमसंस्थेन चतुष्टोमेन सोमेन स्वर्गकामो यक्ष्ये । एवं त्रिरुपांशु त्रिरुच्चैः सङ्कल्पयति । अयमग्नि-ष्टोमसङ्कल्प इत्युच्यते ।

५. **सोमप्रवाकवरणम्**— सङ्कल्पानन्तरं **तन्म** इत्यादि **ओं तथेत्यन्तं** प्रकृतिवत् । सोमादि द्रव्यम्, इन्द्रादयो देवताः, अस्मिन् ज्योतिष्टोमे-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऽग्निष्टोमे सोमे सोमप्रवाकं त्वामहं वृणे । इति सोमप्रवाकं वृणीते । स भविष्यामीति वदति । इदं सोमप्रवाकवरणमुच्यते ।।

६. **सोमप्रवाकः**—सोमाख्ये यज्ञे यो यजमानेन वृतः सन् ब्रह्मादीनामाह्वानं करोति । स सोमप्रवाक इत्युच्यते ।।

७. **ऋत्विगाह्वानम्**—ततो यजमानः सोमप्रवाक 'सोमं मे प्रब्रूह्यृत्विग्भ्यः' इति सोमप्रवाकं प्रत्याह । ततः स 'केभ्य' इति पृच्छति । ततो यजमानः देवदत्तादिभ्य इति ब्रह्मादीनां नामन्याह । ततः सोमप्रवाको ब्रह्मादीनां गृहेषु क्रमेण गत्वा तानाह्वयति । तद्यया—'यज्ञदत्तशर्मणः सोमो भविष्यति तत्र भवता ब्रह्मत्वं कर्तव्यम्' । ततो ब्रह्मा—'का यज्ञः, क ऋत्विजः, का दक्षिणा' इति सोमप्रवाकं पृच्छति । ततः स 'ज्योतिष्टोमोऽग्निष्टोमः सोमो यज्ञः, रङ्गनाथशर्मादय ऋत्विजः, शतं गावो दक्षिणा' इति प्रत्याह । एवं सर्वेषामृत्विजां सोमप्रवाकेन साकं प्रश्नोत्तराणि भवन्ति । तत्र ब्रह्मत्वमित्यस्य स्थाने हौत्रं आध्वर्यवं औद्गात्रं प्राशास्त्रं ब्राह्मणच्छंसित्वं प्रतिप्रस्थातृत्वं प्रस्तोतृत्वं अच्छावाकीयं नेष्टृत्वं प्रतिहर्तृत्वं आग्नीध्रं उन्नेतृत्वं सुब्रह्मण्यत्वं पोतृत्वं ग्रावस्तुत्त्वं एते शब्दा बोध्याः । इदमृत्विगाह्वानमित्युच्यते ।।

८. **सौमिकर्त्विग्वरणम्**—यजमानः सोमप्रवाकेनाहूतान् यज्ञशालायां प्राप्तानृत्विजः क्रमेणाधानवद् वृत्वार्हयति द्वितीयिनस्तृतीयिनः पादिनश्च ।

प्रथमा ऋत्विजः—होता ब्रह्माऽध्वर्युरुद्गात्रा च प्रथमा इत्युच्यन्ते ।।

९. **द्वितीयिन[1] ऋत्विजः**-मैत्रावरुणो ब्राह्मणाच्छंसी प्रतिप्रस्थाता प्रस्तोता च द्वितीयिन इत्युच्यन्ते ।।

१०. **तृतीयिन[2] ऋत्विजः**—अच्छावाक आग्नीध्रो नेष्टा प्रतिहर्ता च तृतीयिन इत्युच्यन्ते ।।

११. **पादिन[3] ऋत्विजः**—ग्रावस्तुत्पोतोन्नेता सुब्रह्मण्यश्च पादिन इत्युच्यन्ते ।।

१२. **चमसाध्वर्यवः**—ततो दश चमसाध्वर्यून् परिकर्मिणश्च सोमप्रवाकवद् वृत्वार्हयति । इदं सौमिकर्त्विग्वरणमित्युच्यते ।।

---

१. अधिन इति संज्ञान्तरम् । ब्रह्मादीनामपेक्षया अर्धदक्षिणभागिनो भवन्ति ।

२. एते ब्रह्मादीनामपेक्षया दक्षिणायास्तृतीयांशभागिनः ।

३. एते ब्रह्मादीनामपेक्षया चतुर्थभागभाजिनो भवन्ति ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१३. **शालाप्रवेशः**—अध्वर्युस्तीर्थेन प्रविश्येडादिशान्ति जपित्वा पशुबन्धवद् यजमानेन सह **अयं ते योनिर्ऋत्वियः** इत्यृचाऽग्निं समारोपयति। यजमान उदकुम्भं पुरस्कृत्य पत्न्यन्वारब्धः सोमारणीसहितः सर्वैः सम्भारैश्च सहितः सत्विक् **आ नो भद्राः** इत्यादिशान्तिसूक्तानि पठन् यज्ञशाला स्वस्य दक्षिणतः पश्चाद् वाचेदुत्तरेण शालां परीत्य पूर्वाह्ले पूर्वद्वारेण प्रविशति। सा च भृत्यैः कुशलैः पूर्वमेव कारिता भवति। प्राचीनवंशा चतुर्दिक्ष्वतीकाशा दक्षिणतो वर्षीयसी चतुर्दिक्ष्वरत्निमात्रमध्यद्वारवती षोडशप्रक्रमव्यासा द्वादशप्रक्रमविस्तीर्णा दीर्घचतुरस्रा। तस्याः शालाया दक्षिणतो व्रत श्रपणागारं भवति। पश्चात् पत्नीशाला। इदं कर्म शालाप्रवेश इत्युच्यते॥

१४. **प्राग्वंशा शालाः**—इयं शाला प्राग्वंशा इत्युच्यते॥

१५. **द्वादशिको विहारः**—प्राग्वंशस्य पश्चिमाच्छङ्कोरनुस्यन्द्यं सार्धपदत्रयं सार्धतिलद्वयाधिकाङ्गुलद्वयं च मुक्त्वा शङ्कुं निहन्ति। स च गार्हपत्यमध्यशङ्कुः। सार्धतिलद्वयाधिकसप्तदशङ्गुलया रज्वा शङ्कौ पाशं प्रतिमुच्य मण्डलं परिलिखति। तद् गार्हपत्यस्यायतनं भवति। एवं सति पश्चाद् गार्हपत्यस्य सार्धपदद्वयमवशिष्टं भवति। पञ्चतिलाधिकचतुस्त्रिंशदङ्गुलं च गार्हपत्यस्यायतनं सम्पद्यते। प्राग्वंशपूर्वशङ्कोः प्रत्यञ्चमनुस्यन्द्यं सार्धपदत्रये शङ्कुं निहन्ति। स आहवनीयमध्यः। द्विपदमाहवनीयायतनं सम्पद्यते। आहवनीयस्याग्रे सार्धपदमवशिष्टं भवति। गार्हपत्याहवनीययोरन्तरालं पञ्चधा षोढा वेत्यादिप्रकारेण दक्षिणाग्नेर्मध्यदेशं कल्पयित्वा शङ्कुं निहत्य पादोनतिलाधिकचतुर्विंशत्यङ्गुलया रज्ज्वा मण्डलं परिलिख्य मध्यशङ्कोरञ्जसा उदगध्यर्धतिलद्वयाधिकद्वादशाङ्गुले षडङ्गुले वा शङ्कुं निहत्य तत्र पाशं प्रतिमुच्य तयैव रज्ज्वा मण्डलं परिलिख्य तयोः संसर्गौ नियम्योत्तरं धनुरुत्सृजेत्, दक्षिणं दक्षिणाग्नेरायतनं भवति। आहवनीयस्य पश्चात्प्राकृतवेदिः। तत्पश्चादवशिष्टो विशयः। इत्यन्तादन्तपक्षेण द्वादशिको विहारः। शेषं प्रकृतिवत्। अयं द्वादशिको विहार इत्युच्यते॥

१६. **पूर्वशान्तिः**—ऋत्विजस्तीर्थेन प्रविश्येडादिशान्ति जपन्ति। अध्वर्युः पशुबन्धवन्मथित्वाऽऽयतनान्युद्धृत्यावीक्ष्याग्नीन् विहृत्य परिस्तीर्य परिषिच्य गार्हपत्ये स्मार्त्तवदाज्यं संस्कृत्य स्रुचि चतुर्गृहीतं गृहीत्वा मनस्वत्याहवनीये जुहोति। पुनर्विहृत्याध्वर्यु ब्रह्माग्नीद्यजमाना यथायतनं पूर्वां शान्तिं पठन्ति—'नमो वाचे नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रपतयः परादुर्माह-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मृषीत्मन्त्रकृतो मन्त्रपतीन् परादां वैश्वदेवीं वाचमुद्यासꣳशिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत्।। शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्म प्रजापतिः ।। भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳशुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोनुमदन्तु ।। ओं शान्तिः शान्तिः शान्तिः ।।' नमो वाचे इत्यत आरभ्यैतावान्मन्त्रः पूर्वशान्तिरित्युच्यते ।।

१७. अथाध्वर्युः प्राग्वंशशालाया अग्रभागे धनुर्माने गर्तं खात्वा शोधितया मृदाऽभिपूर्य तदुत्तरतस्तृणेषूदक्संस्थं वराहविहतं वल्मीकवपां शुष्कां दूर्वां कंसे छागपय इत्यासाद्य तेषामुत्तरतः प्रागग्रेषु दर्भेषु प्राचीनग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य उत्तरस्य शालाखण्डस्याग्रे स्फ्येनोद्धृत्यावोक्ष्य सैकतं परिमण्डलं खरं कृत्वा तं कुशैर्दूर्वाभिः प्रच्छाद्य परिश्रित्योत्तरतो द्वारं कृत्वा खरसमीपे अर्मकपालपिष्टानि शर्करापिष्टानि अजकृष्णाजिनलोमानि फलकं वेणुशलाकां च साद्यति। कुशलं कर्तारं सन्निधाप्य गार्हपत्ये प्रवर्ग्यमदन्तीरधिश्रित्य वेद्यामुभयतस्तष्टामरत्निमात्रीं वैष्णवीमभ्रिं प्राचीं निधाय द्वाराणि परिश्रित्य पत्नीशालायां पत्नीमुपवेश्याग्नीन् परिस्तीर्य दक्षिणेनाहवनीयं ब्रह्मयजमानावुपवेश्य यजमानेऽन्वारब्धे 'युञ्जते मन उत युञ्जते धियो विप्रा विप्रस्य बृहतो विपश्चितः। विहोत्रा दधे वयुनाविदेक इन्महो देवस्य सवितुः परिष्टुतिः स्वाहा' इति मन्त्रेणाहवनीये जुहोति। यजमानः देवाय सवित्र इदं न ममेति त्यागं पठति। दीक्षिते तु यजमाने स्वाहाकाररहितं पूर्वोक्तं मन्त्रं जपत्यध्वर्युः।

वराहविहतम् – वराहेणोत्खाता मृत्तिका वराहविहतमुच्यते ।।

१८. **वल्मीकवपाः**—वल्मीकमृत्तिका वल्मीकवपेत्युच्यते ।।

१९. **महावीरनिर्माणम्**—ततोऽध्वर्युः 'देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामाददे' इति पूर्वं वेद्यां स्थापितां वैष्णवीमभ्रिमादत्ते—**अभ्रिरसि नारिरस्यधवरकृद्देवेभ्यः** इति अभ्रिं सव्येन धृत्वा दक्षिणहस्तेनाभिमन्त्रयते—'उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे। उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशूर्भवा सचा' इत्युत्तिष्ठते। 'प्रैतु ब्रह्मणस्पतिः प्रदेव्येतु सूनृता। अच्छा वीरं नर्यं पङ्क्तराधसं देवा यज्ञं नयन्तु नः' इति तीर्थेन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

निष्क्रामति । तूष्णीं दक्षिणतो ब्रह्मयजमानावपवेशयति । 'देवी द्यावापृथिवी अनु मे मँसाथम्' इति मृदमुपतिष्ठते ।'ऋध्यासमद्य मखस्य शिरः'इति मृदमभ्र्या प्रहरति । अप उपस्पृश्य 'मखाय त्वा' इति मृदं हरति । 'मखस्य त्वा शीर्ष्णे' मृदमुत्तरतः कृष्णाजिने निवपति । एवमभ्रिप्रहरणादि निवपनान्तं समन्त्रकं त्रिः कृत्वा तूष्णीं चतुर्थं करोति । स्वल्पां मृदं परिशेषयति । ततः 'इयत्यग्र आसीत्' इति वराहविहतमुपतिष्ठते । अभ्रिप्रहरणादि समन्त्रकं त्रिः कृत्वा चतुर्थं तूष्णीं कृत्वा वराहविहतमपि परिशेषयति । 'देवीर्वभ्रीरस्य भूतस्य प्रथमजा ऋतावरीः' इति वल्मीकवपामुपतिष्ठते । अभ्रिप्रहरणादि वराहविहतवत् । 'इन्द्रस्यौजोसि' इति दूर्वामुपतिष्ठते । अभ्रिप्रहरणादि पूर्ववत् । 'अग्निजा असि प्रजापते रेतः' इति छागपय उपतिष्ठते । अभ्रिप्रहरणादि पूर्ववत् । छागापयो न परिशेषयति । मृद्वर्जशेषानत्रैव कृष्णाजिने प्रकिरति । अध्वर्यु ब्रह्मयजमाना अन्यतोमुखा अनभिश्वसन्तः 'ऐतु ब्रह्मणस्पतिरादेव्ये तु सूनृता । अच्छा वीरं नर्य्यं पङ्क्तराधसं देवा यज्ञमानयन्तु नः'इति तत्कृष्णाजिनमानयन्ति । 'आयुर्धेहि प्राणं धेह्यपानं धेहि व्यानं धेहि चक्षुर्धेहि श्रोत्रं धेहि मनो धेहि वाचं धेह्यात्मानं धेहि प्रतिष्ठां धेहि मां धेहि मयि धेहि' इति तत्कृष्णाजिनं खरे सादयन्ति । अध्वर्युः अर्मकपालशर्करापिष्ठैरजकृष्णाजिनलोमभिश्च कृष्णाजिनस्थां मृदं संसृज्य 'मधु त्वा मधुला करोतु' इति मदन्तीभिरद्भिः सम्मिश्रयति । 'मखस्य शिरोसि' इति मृदः पिण्डं करोति । स्वल्पां मृदं परिशेषयति। 'यज्ञस्य पदे स्थः' इति अङ्गुष्ठाभ्यां पिण्डं त्रेधा विभज्य त्रीन् पिण्डान् कृत्वैकैकस्य त्रींस्त्रीन् पिण्डान् करोति । 'गायत्रोसि' इति तेषां एकं पिण्डं कर्त्रे प्रयच्छति । कर्ता 'गायत्रेणा त्वा छन्दसा करोमि' इति तेन पिण्डेन महावीरस्य मूलं करोति । अध्वर्युः 'त्रैष्टुभोसि' इति द्वितीयं पिण्डं प्रयच्छति । कर्ता 'त्रैष्टुभेन त्वा छन्दसा करोमि' इति तेन मध्यं करोति । अध्वर्युः 'जागतोसि' इति तृतीयं प्रयच्छति । कर्ता 'जागतेन त्वा छन्दसा करोमि' इति तेन विलं करोति । प्रादेशोच्छ्रायं पृथुबुध्नं पृथुग्रीवं मध्ये सन्नतं महावीरं कृत्वा वेणुशलाकयोदरं कृत्वा विलस्याधस्त्यङ्गुले रास्नां परिमण्डलं पर्यस्यति 'मखस्य रास्नासि' इति मन्त्रेण ।'अदितिस्ते विलं गृह्णातु पाङ्क्तेन छन्दसा' इति विलं प्रकाशयति । 'सूर्यस्य हरसाश्राय' इति महावीरमादित्येनाभितपति । तूष्णीं खरे निदधाति । अध्वर्युर्निहितमनुमन्त्रयते 'मखोसि' इति मन्त्रेण ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

महावीरः—एवमेकस्य प्रथमस्य पिण्डस्य त्रिभिः पिण्डैः कृतो पात्रविशेषो महावीर इत्युच्यते ॥

२०. **रौहिणकपाले**—एवं पिण्डद्वयस्य त्रींस्त्रीन्पिण्डान् कृत्वा तैर्महावीरद्वयं समन्त्रकं करोति । अतिशिष्टया मृदा सशेषया तूष्णीं पिन्वने रौहिणकपाले आज्यस्थालीं च करोति । अवशेषितया मृदापि सशेषया प्रवाते प्रतिलिप्योवातयति । रौहिणपुरोडाशभर्जनार्थे कपाले रौहिणकपाले इत्युच्येते ॥

२१. **महावीरादीनां तापनादि कर्म**—महावीरादिषूपवातेषु सत्सु अध्वर्युर्गार्हपत्यादग्निमाहृत्य पुंसोश्वस्यैकविंशतिशकृत्पिण्डान् आदीपयति—'वृष्णो अश्वस्य निष्यदसि वरुणस्त्वा धृतव्रत आधूपयतु मित्रावरुणयोर्ध्रुवेण धर्मणा' इति मन्त्रेण । ऋस्य मन्त्रस्यावृत्त्या त्रीनपि महावीरान् क्रमेणान्तर्बहिश्च धूपयति । तूष्णीं पिन्वनादीनि धूपयति । शालाया उत्तरतो गर्तं खात्वा पचनेनावस्तीर्योदग्विलान्महावीरानायातयति । तेषां पुरस्तात् पिन्वने पश्चाद्रौहिणकपाले आज्यस्थालीं च । इन्धनेनोपरिष्टात् प्रच्छाद्य मृदाऽवलिम्पति—'अर्चिषे त्वा' इति पुरस्तादग्निनोपोषति । 'शोचिषे त्वा' इति दक्षिणतः । 'ज्योतिषे त्वा' इति पश्चात् । 'तपसे त्वा' इत्युत्तरतः । महावीरादिषु पक्वेषु गोपयश्छागापयो धृष्टिमश्म सन्दावं सतं सन्दंशं खारीं शिक्यं कृष्णाजिनं चादाय 'अभीमं महिना दिवं मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम्' इत्याभ्यामृग्भ्यामपाक्रामति । 'सिद्ध्यै त्वा' इति धृष्टिमादत्ते । 'देवस्त्वा सवितोद्वपतु सुपाणिः स्वङ्गुरिः सुबाहुरुत शक्त्या' इति तया धृष्ट्या प्रथमान् महावीरादङ्गारानुद्वपति । 'उत्तिष्ठ बृहन् भवोर्ध्वस्तिष्ठ ध्रुवस्त्वम्' इति सन्दंशेन महावीरमुच्छ्रयति । 'अपद्यमाना पृथिव्यामाशादिश आपृण' इति स्वस्थाने सादयति । 'सूर्यस्त्वा चक्षुषान्वीक्ष ऋजवे त्वा सुक्षित्यै त्वा भूत्यै त्वा' इति महावीरमीक्षते । 'इदमहममुमामुष्यायणं ब्रह्मवर्चसेन पर्यूहामि' इति यजमानस्य नामगोत्रे उच्चार्य प्रदक्षिणं पुरीषेण पर्यूहति । सन्दंशेन महावीरं सते निधाय 'गायत्रेण त्वा छन्दसा छृणद्मि त्रैष्टुभेन त्वा छन्दसा छृणद्मि जागतेन त्वा छन्दसा छृणद्मि छृणत्तु त्वा वाक् छृणत्तु त्वोर्क् छृणत्तु त्वा हविश्छृन्धि वाचं छृन्ध्यूर्जं छृन्धि हविर्देवपुरश्चरसघ्यासं त्वा' इति महावीरमन्तर्बहिश्छागापयसा छृणत्ति । गोपयसा तूष्णीमभिषिञ्चति । एवं द्वितीयतृतीययोर्महावीरयोः समन्त्रकं अङ्गारोद्वपनादि भवति । तूष्णीं पिन्व-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नादीनाम् । सर्वं खार्यां निधाय कृष्णाजिनेन प्रच्छाद्योत्तरे शालाखण्डे शिक्ये स्थापयति । यथा पत्नीदर्शनविषयो न भवेत्तथा ।

उत्तरशान्तिः मन्त्राः—पूर्ववदुत्तरां शान्तिं जपन्ति—शन्नो वातः पवतां मातरिश्वा शन्नस्तपतु सूर्यः । अहानि शं भवन्तु नः शꣳरात्रिः प्रतिधीयताम् । शमुषा नो व्युच्छतु शमादित्य उदेतु नः । शिवा नः शन्तमा भव सुमृडीका सरस्वती । मा ते व्योम सन्दृशि । इडायै वास्त्वसि । वास्तुमद्वास्तुमन्तो भूयास्म मा वास्तोश्छित्समह्यवास्तुः स भूयाद्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः । प्रतिष्ठासि प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छित्समह्यप्रतिष्ठः स भूयाद्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः । आवात वाहि भेषजं विवात वाहि यद्रपः । त्वꣳ हि विश्वभेषजो देवानां दूत ईयसे ॥ द्वाविमौ वातौ वात आसिन्धोरापरावतः । दक्षं मे अन्य आवातु परान्यो वातु यद्रपः ॥ यद्दो वात ते ऽमृतस्य निधिर्हितः । ततो नो देहि जीवसे ततो नो धेहि भेषजम् ॥ ततो नो मह आवह वात आवातु भेषजꣳ शंभू-र्मयोभूर्नो हृदे । प्र ण आयूꣳषि तारिषत् । इन्द्रस्य गृहोसि तं त्वा प्रपद्ये सगुः साश्वः । सह यन्मे अस्ति तेन ॥ भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवः सुवः प्रपद्ये वायुं प्रपद्ये नार्तां देवतां प्रपद्ये श्मानमाखणं प्रपद्ये प्रजापते-र्बह्म कोशं ब्रह्म प्रपद्य ओं प्रपद्ये । अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च पयोवातः स्वस्त्या स्वस्तिमान् तया स्वस्त्या स्वस्तिमानसानि ॥ प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः ॥ कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ कस्त्वा सत्यो मदानां मꣳहिष्ठो मत्सदन्धसः । दृढा चिदा रुजे वसु । अभी षु णः सखीनामविता जरितॄणाम् । शतं भवास्यूतिभिः॥ वयः सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः ॥ ईशानां वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् ॥ सुमित्रा न आप ओषधयः सन्तुः । दुर्मित्राꣳतस्मै भूयासुर्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः ॥ आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥ यो वः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ।। तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ।। पृथिवी शान्ता साग्निना शान्ता सा मे शान्ता शुचꣳ शमयतु । अन्तरिक्षꣳशान्तं तद्वायुना शान्तं तन्मे शान्तꣳ शुचꣳ शमयतु । द्यौः शान्ता सादित्येन शान्ता सा मे शान्ता शुचꣳ शमयतु ।। पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः शान्तिरवान्तरदिशः शान्तिरग्निः शान्तिरन्तरिक्षꣳ शान्तिरादित्यः शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्गौः शान्तिरजा शान्तिरश्वः शान्तिः पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर्मे अस्तु शान्तिः । तयाहꣳ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः ।। एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु मा माꣳश्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः ।। उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मणोदस्थाममृताँ अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं मोदाम शरदः शतं भवाम शरदः शतंꣳ शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं ज्योक् च सूर्य दृशे । य उदगान्महतोर्णवाद् विभ्राजमानः । सरिरस्य मध्यात् स मा वृषभो लोहिताक्षः सूर्यो विपश्चिन्मनसा पुनातु ।। ब्रह्मणश्चोतन्यसि ब्रह्मण आणी स्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं वेद तदहं धारयाणि. मा मद्वेदो विविस्रसत् ।। मेधामनीषे मा विशताꣳ समीची भूतस्य भव्यस्यावरुध्यै सर्वमायुरापाणि सर्वमायुरपाणि । अभिर्गीभिर्यदतो न ऊनमाप्याययं हरिवो वर्धमानः ।। यदा स्तोतृभ्यो महिगोत्रारुजासि भूयिष्ठभाजो अथिते स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् ।। ओं शान्तिः शान्तिः शान्तिः ।' **शन्नो वात** इत्यादय एतावन्तो मन्त्राः उत्तरशान्तिरित्युच्यते ।।

२२. **प्रवर्ग्यसंभरणम्**—इदं महावीरादिसम्पादनं प्रवर्ग्यसम्भरणमित्युच्यते ।।

२३. **देवयजनाध्यवसाय,**—यजमानो गार्हपत्यस्य पश्चादुपविश्य 'आज्यं पशवः पुरोडाशीया एते मे यज्ञार्थाः यावद् यज्ञे उपयोक्ष्यन्ते तावन्मे यज्ञार्थं शेषाद् ब्राह्मणा भुञ्जीरन् इह यक्ष्ये' इति सङ्कल्प्य 'एदमगन्म देवयजनं पृथिव्या यदजुषन्त पूर्व ऋक्सामाभ्यां यजुषा सन्तरन्तो रायस्पोषेण समिषा

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मदेम' इति मन्त्रेण । इतः पश्चादित उत्तरत इतः पुरस्तात् । इतो दक्षिणतः इति देवयजनमध्ये स्थित्वा प्रागादिदेवयजनभूमिं निश्चिनोति । अयं यज्ञभूमिनिश्चयो देवयजनाध्यवसाय उच्यते ॥

२४. अध्वर्युः वेद्युत्करयोर्मध्येन राजानं प्रपाद्य मध्यमे वंशे राजानं वध्वा पुनरग्नीन् विहृत्य परिस्तीर्य दक्षिणतो ब्रह्मयजमानावुपवेश्य स्रुचि चतुर्गृहीतं गृहीत्वा मनसा हुत्वा 'महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता । अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता । वाचस्पते हृद्विधेनामन् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिः सोममपात् । मा दैव्यस्तंतुश्छेदि मा मनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा' इति मन्त्रेण यजमाने ऽन्वारब्धे सत्याहवनीये जुहोति । यजमानो 'वाचस्पतये ब्रह्मण इदं न मम' इति त्यागं पठति । पुनर्विहृत्य कूष्माण्डैर्हुत्वोपस्थानं वरदानं च कृत्वा पुनर्विहृत्य चतुर्गृहीतं गृहीत्वापशुबन्धवद्यूपाहुतिं जुहोति । अपरं चतुर्गृहीतं गृहीत्वाज्यस्थालीं सस्रुवां बर्हिर्हिरण्यमुदपात्रमादायेत्यादिप्रकारेण समन्त्रकेन पशुबन्धवद् अवतक्षणनिधानान्तं यूपाहरणं करोति ।

व्रतम्—ततः पत्नीयजमानौ व्रतश्रयणागारे पर्युषितत्वादिदोषरहितं सर्पिर्मिश्रं पयोमिश्रं वा भक्षयतः । इदं भक्षणीयद्रव्यं व्रतमित्युच्यते ॥

२५. **यजमानस्य केशश्मश्रुवपनम्**—अध्वर्युः वाससी क्षुरं द्वाविंशतिदर्भपिञ्जूलानि नवनीतमञ्जनद्रव्यं सतूलां शरेषीकाञ्चादाय **एहे यजमानेति** यजमानमाह्वयति । तीर्थदेशं गच्छति । एवं प्रतिप्रस्थाता ऽपरिमितानि दर्भपिञ्जूलान्यादाय पत्न्या सह तीर्थं गच्छति । अध्वर्युः 'आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे' इति प्राङ्मुखस्यासीनस्य यजमानस्य दक्षिणं गोदानमद्भिः क्लेदयति । 'ओषधे त्रायस्वैनम्' इति एकदर्भपिञ्जूलस्यैकं भागं दक्षिणगोदाने ऊर्ध्वाग्रमनूच्छ्यति । 'स्वधिते मैनꣳ हिꣳसीः' इति पिञ्जूलस्योपरि तिर्यञ्चꣳ स्वधितिं निदधाति । 'देवश्रूरेतानि प्रवपे' इति दर्भपिञ्जूलं मध्ये वपति । यजमानः स्वस्त्युत्तराण्यशीय इति उत्पान्तं प्रत्यभिमृशति । एवं वामगोदाने दर्भपिञ्जूलस्यार्धस्य वपनं कृत्वा—

नापितप्रैषः—अध्वर्युर्नापिताय क्षुरं प्रयच्छन् नापितं प्रेष्यति- 'नापितोप्तकेशश्मश्रुं मे निकृत्तनखं प्रब्रूतात्' । अयं नापितप्रैष इत्युच्यते ॥

२६. **प्रतिप्रस्थातृनापितप्रैषः**—प्रतिप्रस्थाता पत्न्या दक्षिणसव्योपपक्ष-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

योरपरिमितदर्भपिञ्जूलवपनं करोति। ततो नापितोप्तोपपक्षां मे निकृत्त-नखां प्रब्रूतात्। अनेन प्रैषेण नापिताय क्षुरं प्रयच्छन् प्रेष्यति। अयं प्रति-प्रस्थातृनापितप्रैष इत्युच्यते॥

२७. **दीक्षाङ्ग-वपनम्**—ततो नापितो यजमानस्य केशश्मश्रुवपनं नख-निकृन्तनं च कृत्वा पत्न्या उपपक्षवपनं नखनिकृन्तनं च करोति। दक्षिणगो-दानक्लेदनादि एतदन्तं कर्म दीक्षाङ्गवपनमित्युच्यते॥

२८. **दीक्षाङ्गस्नानपरिधाने**—अध्वर्युः 'आपो अस्मान्मातरः शुन्धन्तु घृतेन नो घृतपुवः पुनन्तु' इति यजमानं स्नपयति। 'विश्वमस्मत्प्रवहन्तु रिप्रम्' इति अङ्गधूलिं सम्यक् प्रधाव्य प्रप्लावयति। यजमानः 'उदाभ्यः शुचिरापूत एमि' इति तीरं प्रत्येति। वस्त्रस्य प्रान्तभागेन आत्मानं प्रति-च्छाद्य तिरः पवित्रं पयस्वत्या पय आचामति ऐष्टिकवत्। 'सोमस्य तनूरसि तनुवं मे पाहि' इति प्रदक्षिणमहतं वासः परिधत्ते। प्रतिप्रस्थाता तूष्णीं पत्नीं स्नपयित्वा अहतं वासः परिधापयति। इमे दीक्षाङ्गस्नानपरिधाने उच्येते॥

२९. **दीक्षाङ्गभ्यञ्जनम्**—यजमानः पाणिभ्यां नवनीतं सम्प्रप्लाव्य 'महीनां पयोसि वर्चोधा असि वर्चो मयि धेहि' इति तेन मुखमभ्यङ्क्ते। तूष्णीमनुलोममङ्गानि। पृष्ठं यजमानस्याध्वर्युरभ्यङ्क्ते। पत्नी तूष्णीं स्व-यमेवाभ्यङ्क्ते। इदं दीक्षाङ्गाभ्यञ्जनमुच्यते॥

३०. **दीक्षाङ्गाञ्जनम्**—अध्वर्युः प्रत्यङ्मुखः उपविश्य 'वृत्रस्य कनी-निकासि चक्षुष्पा असि चक्षुर्मे पाहि' इति सव्येन पाणिना शरेषीकया यज-मानस्य दक्षिणमक्ष्यनक्ति। द्विस्तूष्णीम्। एवं सव्यमक्ष्यनक्ति। पत्नी स्व-यमेवतूष्णीमक्षिणी उक्तमेणाङ्क्ते। इदं दीक्षाङ्गाञ्जनमुच्यते॥

३१. **दीक्षाङ्गपवनम्**—'चित्पतिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति सप्तभिर्दर्भपिञ्जूलैर्यजमानस्य मुखं पावयति। वाक्प-तिस्त्वा पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति सप्तभिः पि-ञ्जूलैर्नाभिम्। 'देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति सप्तभिर्गुल्फौ। पिञ्जूलानि प्रोक्ष्योदग्दिशि निरस्यति। 'तस्य ते पवित्रपते पवित्रेण यस्मै क़म्पुनेतच्छकेयम्' इति मन्त्रं यजमानं वाचयति। एवं प्रतिप्रस्थाता पत्नीं तूष्णीमपरिमितैर्दर्भपिञ्जूलैः पावयति। इदं दीक्षाङ्गपवनमुच्यते॥

३२. **दीक्षाङ्गशालाप्रवेशः**—अथाऽध्वर्युर्यजमानेनात्मनः सव्यं पार्णि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्राहयित्वा 'यद्वो देवा स आगुरे यज्ञियासो हवामहे' इति शालामानयति। 'इन्द्राग्नी द्यावापृथिवी आप ओषधीः' इति पूर्वया द्वारा शालां प्रवेशयति। तीर्थेन प्रवेश्याग्रेणाहवनीयं नीत्वा यस्य दक्षिणतः कुशेषु कृतनिरसनमुदङ्-मुखमुपवेशयति। अयं दीक्षाङ्गशालाप्रवेश उच्यते॥

३३. **पत्नीशालाप्रवेशः**—'त्वं दीक्षाणामधिपतिरसि' इत्याहवनीयमीक्षयति। अध्वर्युर्यजमानौ इमं मन्त्रं पठतः—'इह मा सन्तं पाहि' इत्युभौ स्वात्मानमीक्षेते। प्रतिप्रस्थाता पत्नीमपरया द्वारा प्रवेशयति 'प्रैतु ब्रह्मणस्पत्नी वेदिं वर्णेन सीदतु। अथाहमनुकामिनी स्वे लोके विशा इह'। गार्हपत्यस्योत्तरमार्गेण प्राचीमुदानयन्निमं मन्त्रं वाचयति। सा तीर्थेन प्रविश्यासने निरसनं कृत्वा 'सुप्रजस्त्वावयँसुपत्नीरुपसेदिम अग्ने सपत्नदम्भनमदब्धासो अदाभ्याम्' इत्युपविशति। अयं पत्नीशालाप्रवेश उच्यते॥

३४. **दीक्षणीयेष्टिः**—अथ यजमानो गार्हपत्यस्य पश्चादुपविश्य 'दीक्षणीयेष्ट्या यक्ष्ये' इति सङ्कल्पयति। दीक्षणीयेष्टिसम्बन्धि हविः—व्रीहिमयः पुरोडाशो द्रव्यम्, पञ्च प्रयाजाः, अग्नीषोमावाज्यभागौ, अग्नाविष्णू देवता, देवा आज्यपा इत्यादि प्रकृतिवत्। अध्वर्युरिडाशान्तं 'देवा गातुविदः' इत्यृचं च गार्हपत्यस्योत्तरत उपविश्य जपति। ततो ऽग्नीन् विहृत्यान्वाधानं कृत्वा आज्येडान्तां दीक्षणीयामिष्टिं सूर्यास्तात् प्रागेव समापयति। दीक्षणीयेष्टिप्रभृतिष्विष्टिषु व्रतग्रहणं ब्रह्मवरणं पत्नीसन्नहनाद्यूनेतिरिक्तं धीपातै इत्यस्य वाचनान्तं ब्रह्मयजमानभागौ चतुर्धा करणं, अन्वाहार्यं, फलीकरणं समिष्टयजुः, प्रणीतास्थापनं, विष्णुक्रमश्च न भवन्ति। ततः 'त्वां त्रयोविँशतिध' इति इध्मसम्भरणमन्त्रे ऊहः। प्राकृतदेवतास्थाने **अग्नाविष्णुभ्यामित्याद्यूहो** यथास्थानं कर्तव्यः। प्रधानयागानुमन्त्रणम् 'अग्नाविष्णवोरहं देवयज्यया वृत्रहा भूयासम्' इति। यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयात्, मन्द्रं प्रायणीयायां, मन्द्रतरमातिथ्यायाम्, उपांशूपसत्सु इति बौधायनसूत्रात् यथेच्छस्वरो दीक्षणीयायां भवति। आज्येडान्ते 'उलूखले मुसले' इत्यृचा दक्षिणाग्नौ प्रायश्चित्तहोमं कृत्वा प्राङेत्याध्वर्युरेव ध्रुवामाप्याययति। एतावत्कर्म दीक्षणीयेष्टिरित्युच्यते॥

३५. **दीक्षाहुतयः**—ततोऽध्वर्युर्ध्रौवाज्यमाज्यस्थाल्यां प्रत्यवनीय तेनाज्येन स्रुवेण अन्वारब्धे यजमाने चतस्र आहुतीर्जुहोति—आकूत्यै प्रयुजे ऽग्नये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वाहा, मेधायै मनसे ऽग्नये स्वाहा, दीक्षायै तपसे ऽग्नये स्वाहा, सरस्वत्यै पूष्णे ऽग्नये स्वाहा। एता आहुतयो दीक्षाहुतय इत्युच्यन्ते ॥

३६. एतैरेवमन्त्रैः **स्वाहेत्यस्य** स्थाने **इदं न ममेति** पाठेन यजमानस्य सर्वत्र त्यागः। ततः 'आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवी उर्वन्तरिक्षं बृहस्पतिर्नो हविषा वृधातु स्वाहा' इति चतुर्गृहीतेन स्रुचा जुहोति। 'अद्भ्यो द्यावापृथिवीभ्यामन्तरिक्षाय बृहस्पतय इदं न ममेति यजमानस्य त्यागः। पुनश्चतुर्गृहीतेन स्रुचं पूरयित्वा विश्वेदेवस्य नेतुर्मर्तो वृणीत सख्यम्। विश्वे राय इषुध्यसि द्युम्नं वृणीत पुष्यसे स्वाहा' इति जुहोति। यजमानः सवित्र इदं न ममेति। ततस्तूष्णीमन्तर्वेदि प्रणीतां निनयति।

दीक्षोपवेशनम्—ततः साङ्गकृष्णाजिनं कृष्णविषाणां वासो मेखलामौदुम्बरदण्डमुष्णीषं च अग्रेणाहवनीयं पर्याहृत्य यजमानाय प्रयच्छति। प्रतिप्रस्थाता तथैव कुम्बं कुरीरं वासो योक्त्रं च पत्न्यै प्रयच्छति। तद्यथा—अध्वर्युर्यजमानायतने साङ्गं कृष्णाजिनं प्राचीनग्रीवमुत्तरलोमोपस्तृणाति। यजमानः 'ऋक्सामयोः शिल्पे स्थस्ते वामारभेते मा पातमस्य यज्ञस्योदृचः' इति आस्तीर्णस्य कृष्णाजिनस्य पश्चात् पराङ्मुख उपविश्य कृष्णाजिनस्य श्वेतभागे दक्षिणाङ्गुष्ठो भवेत् कृष्णभागे तस्यैवाङ्गुलयो भवेयुस्तथा सम्मृशति। 'इमां धियꣳशिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि। ययातिविश्वा दुरिता तरेम सुतर्माणमधिनावꣳ रुहेम'इति कृष्णाजिनस्योपरि दक्षिण जान्वाच्याभिसर्पति। उपस्थं कृत्वोपविशति। इदं दीक्षोपवेशनमुच्यते ॥

३७. **दीक्षाङ्गमेखलाबन्धनम्**—'ऊर्गस्याङ्गिरस्यूर्जस्तम्रदा ऊर्जं मे यच्छ' इति कटिप्रदेशे मौञ्जीमेखलां प्रदक्षिणं पर्यस्यति। इति दीक्षाङ्गमेखलाबन्धनमुच्यते ॥

३८. **दीक्षाङ्गपत्नीसन्नहनम्**—'पाहि मा मा मा हिꣳसी' इति निष्टर्क्यं ग्रन्थि करोति। प्रतिप्रस्थाता 'आशासाना सौ मनसम्' इत्यृचा 'सन्नह्यामि पयसा घृतेन सन्त्वानह्याम्यप ओषधीभिः। सन्त्वा नह्यामि प्रजयाहमद्य सा दीक्षिता सनवो वाचमस्मे' इत्यृचा च पत्नीं योक्त्रेण सन्नह्यति। इदं दीक्षाङ्गपत्नीसन्नहनमुच्यते ॥

३९. **उष्णीषवेष्टनम्**—अध्वर्युः 'विष्णोः शर्मासि शर्म यजमानस्य शर्म मे यच्छ' इति यजमानं वाससा प्रोर्णोति। 'नक्षत्राणामतीकाशात् पाहि इति वसनस्यातीकाशेषु वाचयति। वस्त्रस्यान्तान् शिरस्येव सङ्क्षपति 'श्रिया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ते शिरो वेष्टयामि श्रियै यशसे ब्रह्मवर्चसाय' इति प्रदक्षिणमुष्णीषेण यजमानस्य शिरो वेष्टयति । इदमुष्णीषवेष्टनमित्युच्यते ॥

४०. **कुम्बकुरीरामध्यूहनम्**—प्रतिप्रस्थाता तूष्णीं पत्नीशिरसि कुम्भकुरीरमध्यूहति । इदं कुम्बकुरीराध्यूहनमुच्यते ॥

४१. **कृष्णविषाणा**—अध्वर्युः 'इन्द्रस्य योनिरसि' इति यजमानाय त्रिवलिं पञ्चावलिं वा कृष्णविषाणां शाण्या रज्वा बद्धां प्रयच्छति । यजमानः 'मा मा हिꣳसी'इति प्रतिगृह्य वसनप्रान्ते बद्ध्वा 'कृष्यै त्वा सुसस्यायै' इति तयान्तर्वेदि विद्यमानं लोष्टमुद्धन्ति । कृष्णमृगशृङ्गं कृष्णविषाणेत्युच्यते ॥

४२. 'सुपिप्पलाभ्यस्त्वौषधीभ्यः' इति तया दक्षिणं गोदानं कण्ड्यते । प्रतिप्रस्थाता पत्न्या वसनस्यान्ते शङ्कुं बद्ध्वा 'एतेन कण्डूयस्व'इति वदति।

दीक्षाङ्गदण्डग्रहणम्—'सूपस्था देवो वनस्पतिः' इति यजमानपरिमितं ऊर्द्ध्वाग्रं दण्डं यजमानाय ददाति । यजमानः 'ऊर्द्ध्वो मा पाह्योदृचः' इति दण्डं प्रतिगृह्णाति । इदं दीक्षाङ्गदण्डग्रहणमुच्यते ॥

४३. अध्वर्युः 'स्वाहा यज्ञं मनसा द्यावापृथिवीभ्याꣳ स्वाहोरोरन्तरिक्षात् स्वाहा यज्ञं वातादारभे'इति मन्त्रं यजमानं वाचयति । यजमानो मुष्टिं कृत्वा वाचं नियमयति नक्षत्रोदयपर्यन्तम् ।

दीक्षितत्वज्ञापनम्—अध्वर्युः आहवनीयसमीपे तिष्ठन् त्रिरुपांशु ब्रवीति 'अदीक्षिष्टायं ब्राह्मणो नीलकण्ठशर्मा पाराशरगोत्रो ऽनन्तशर्मणः पुत्रो रामशर्मणः पौत्रो नृसिंहशर्मणो नप्ता तमिन्द्रायेन्द्राग्निभ्यां वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यो ब्राह्मणेभ्यः सोमपेभ्यश्च ब्रूमः' इति । ततः शालाया बर्हिर्निष्क्रम्य त्रिरुच्चैरेवमेव ब्रवीति । इदं दीक्षितत्वज्ञापनमुच्यते ॥

४४. **यजमानवशासनम्**—दीक्षितोसि दीक्षितवादं वद सत्यमेव वद मा ऽनृतं मा स्मयिष्ठा मा कण्ड्यथा मा ऽपावृथा, यदि स्मयासै अपि गृह्यस्मथासै, यदि कण्ड्यासै कृष्णविषाणया कण्ड्यासै, यदि वाचं विसृजेर्ब्रैष्णवीमृचमनुद्रवतान्मा त्वान्यत्र दीक्षितविमितात् सूर्योभ्युदियान्माभिनिर्मुक्ताद्यानि देवतानामानि, यथा ख्यातं तान्याचक्ष्वाथ यान्यदैवतानामानि यथा ख्यातं तान्याचक्षाण उपरिष्टाद्विचक्षणं धेहि, चनसितवतीं विचक्षणवतीं वाचं वद कृष्णाजिनान्मा व्यच्छेत्था दण्डाच्च । इति यजमानं संशास्ति । इदं यजमानशासनमुच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

४५. यजमानः सर्वं तथा करोति। 'विश्वे देवा अभि मा मा वृत्रन्यूषा सन्यासोमो राधसा देवः सविता वसोर्वसुदावा' इत्यप्रत्याख्यायिनं दातारं प्रतिसनीहारान् प्रहिणोति।

सनिः—सनिस्त्वध्येषणा याच्ञाभिषस्तिर्याच्चनार्थनेति कोशाद् (अमर० ७।३२) याचनीयं द्रव्यं सनिरित्युच्यते॥

४६. **सनियाचनम्**—'रास्वेयत्सोमाभूयोभरमापृणन् पूर्त्या विराधिमाहमायुषा' इति धनमाहरन्तं सनीहारं दृष्ट्वा जपति। 'चन्द्रमसि मम भोगाय भव' इती आनीतं हिरण्यं रजतं वा प्रतिगृह्णाति। 'वस्त्रमसि मम भोगाय भव' इति वस्त्रम्। 'उस्तासि मम भोगाय भव' इति गाम्। 'हवियोसि मम भोगाय भव' इत्यश्वम्। 'छागोसि मम भोगाय भव' इति छागम्। 'मेषोऽसि मम भोगाय भव' इति मेषम्। 'प्राजापत्यमसि मय भोगाय भव' इत्यनादिष्टं सर्वमन्यत्। एतत् कर्म सनियाचनमुच्यते।

४७. अध्वर्युः आहवनीयस्योत्तरतस्तिष्ठन् 'अग्नीन् ज्योतिष्मत कुरुत, दीक्षित वाचं यच्छ, पत्नि वाचं यच्छ। इति प्रेष्यति।

पत्नीयजमानव्रतपयःसाधनम्—ततः पूर्वद्वारेण निष्क्रम्य गोश्चतुर्भ्यः स्तनेभ्यः पयो दोहयित्वा गार्हपत्यस्य पश्चादुपविश्य उदीचोङ्गारान्निरुह्य तेषु तत्पयोधिश्रित्य दर्भोल्मुकेनाभिद्योत्य तस्मिन् पयसि स्रुवेणापः प्रत्यनीय पुनरभिद्योत्य त्रिः पर्यग्निकृत्वा मेक्षणेनालोड्य श्रपयित्वोदगुद्वास्याङ्गारान् प्रत्यूह्य उत्तरे शालाखण्डे शिक्ये स्थापयति। प्रतिप्रस्थाता दक्षिणद्वारेण निष्क्रम्य पत्न्यर्थं व्रतं दोहयित्वाऽध्वर्युवद् दक्षिणाग्नौ श्रपयित्वा दक्षिणे शालाखण्डे शिक्ये निदधाति। एतत् पत्नीयजमानव्रतपयःसाधनमुच्यते॥

४८. यजमानः नक्षत्रोदये जाते सति दण्डकृष्णाजिने समादाय पूर्वद्वारेण वहिर्निष्क्रम्य शालाया अग्रतस्तिष्टन् 'भूर्भुवः सुवः' इति सकृदुपांशूकृत्वा **व्रतं कृणुते**ति त्रिरुच्चैर्वदति। अध्वर्युणा **वाचं यच्छे**ति प्रोक्तस्य वाङ्यमस्य इदानीमेव विसर्गः।

दीक्षाव्रतभ्रेषप्रायश्चित्तानि—'अबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिसाँ श्रेष्ठो दीक्षे मा मा हासीः' अमेध्यदर्शने सत्युक्तमन्त्रेण यजमानः सूर्यमुपतिष्ठते। रात्रौ तु आहवनीयम्। 'उन्दतीर्बलं धत्तौजो धत्त बलं धत्त मा मे दीक्षां मा तपो निर्वधिष्ट' इमं मन्त्रं पर्जन्येनाभिवृष्टो ऽभिवृष्यमाणो वा जपति। अनृतभाषणे कृते सति 'इमं मे वरुण' 'तत्त्वा यामि' 'त्वं नो अग्ने' 'स त्वं नो अग्न' इति चतस्रो वारुणीर्ऋचो जपति। 'देवाञ्जनमगन् यज्ञ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्ततो मास्य यज्ञस्याशीरनुवर्धताम्' भूतिर्दध्ना घृतेन मुञ्चतु यज्ञो यज्ञपतिमꣳहसः' दण्डस्य कृष्णाजिनस्य वा विच्छेदे सति इमं मन्त्रं जपति । असंस्कृतपयः पाने यथाविहितस्तनातिक्रमे च जलेनाचमनं कृत्वा 'शिवाः पीता भवथ यूदमापोस्माकं योना वुदरे सुशेवाः । इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जीवसे' इति जपति । वमनेष्ठीवने वा जाते 'यदत्रापि रसस्य मे निरष्टविषमस्पृतः । अग्निष्टत् सोमः पृथिवी पुनरात्मन् दधातु मे' इति जपति । रेतः स्कन्दने सति 'यन्मेरेतः परितोषात्तदर्पिथ । अग्निहोत्रमिव सोमेन तदहं पुनराददे' इति तद्रेतोऽनुमन्त्र्य 'इमं मे वरुण' 'तत्वा यामि' इति द्वे स्रुवाहुती जुहोति । मूत्रं करिष्यन् पुरीषं वा पृथिव्याः सकाशात् लोष्ठमादत्ते —'इयं ते यज्ञियातनूः' इति । ततो मूत्रं पुरीषं वा तस्मिन् स्थले करोति । 'अपो मुञ्चामि न प्रजामꣳहोमुचः स्वाहा कृताः पृथिवीमाविशत' इति मन्त्रान्ते । तत आचम्य 'पृथिव्या सम्भव' इति लोष्ठं पूर्वगृहीतं यथास्थानं निदधाति । कफे निर्गते सति 'कफस्यानामापः स्थ स्वाहाकृताः पृथिवीमावियत' इति जपति । अश्रुपाते जाते 'वीभत्सानामापः स्थ स्वाहा कृता पृथिवी माविशत' इति जपति । स्वेदे निर्गते सति 'तपस्यानामापः स्थ स्वाहाकृता पृथिवीमाविशत' इति जपति । दुःस्वप्नदर्शने सति उत्थायाहवनीयसपीपमेत्य 'दुःस्वप्नपापस्वप्नोपभुक्तैर्ब्रह्माहमन्तरं करवे नहि स्वप्नमुपग्रथत' इति जपति। स्वप्नेऽन्तभोजने दृष्टे 'यदत्रमद्यते नलं न तत्प्रातः क्षुधोऽवति । सर्वं तदस्मान् माहिꣳसीर्नहि तद्दृष्टश्चेदिवा' इति जपति । स्वदेहे रुधिरमुत्पतितं दृष्ट्वा कण्डूयित्वा वा 'नमो रुद्रियाभ्योऽद्भ्यः स्वाहा' इति जपति । पर्जन्ये वर्षति सति यदि धावेत् तदा 'नमो रुद्राया वास्तोष्पतय आयने विद्रवण उद्याने यत्परायणे । आवर्तने विवर्तने यो गोपायति तꣳहुवे' इति जपति अन्येन दीक्षितेन सह समागमे 'कया नश्चित्र आभुवद्' इत्यृचं जपति । देवयजनादन्यत्र स्थाने सूर्योदयास्तमयौ यदि स्यातां तदा 'सूर्यो मा देवो देवेभ्यः पातु वायुरन्तरिक्षाद्यजमानो ऽग्निर्मा पातु चक्षुषः । सक्षशूष सवितर्विश्वचर्षणः एतेभिः सोमनामभिर्विधेम ते तेभिः सोम नामभिर्विधेम ते' इति जपति । एतानि दीक्षाव्रतभ्रेषप्रायश्चितानीत्युच्यते ॥

४९. **दीक्षितयजमानस्य शयनमन्त्रः**—शयनकालं स्वायतने प्राचीनग्रीवमुत्तरलोम कृष्णाजिनमास्तीर्य 'अग्ने त्वꣳसुजागृहि वयꣳ सुमन्दिषीमहि गोपाय नः स्वस्तये प्रबुधे नः पुनर्ददः' अनेन मन्त्रेणाग्न्यभिमुखः शेते । अयं दीक्षितस्य यजमानस्य शयनमन्त्र इत्युच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५०. **व्रतसंज्ञकपयोभक्षणम्**—पत्नी गार्हपत्यस्य पश्चात् तूष्णीं शेते। अध्वर्युः मध्यरात्रे यजमानं प्रबोध्य 'त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा। त्वं यज्ञेस्वीड्यः' इति यजमानः पयो व्रतयिष्यन्नप आचामति—'दैवीं धियं मनामहे सुमृडीकामभिष्टये। वर्चोधां यज्ञवाहसं सुपारा नो असद्वशे' इति। ततो ऽध्वर्युणा दत्तं व्रतं पयः स्वायतने उपविश्य कंसेन परिश्रित्य व्रतयति 'ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितारस्ते नः पान्तु ते नो ऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहा' इति प्राश्याचम्य 'शिवाः पीता भवथ यूयमापोस्माकं योनावुदरे सुशेवाः। इरावतीरनमीवा अनागसः स्वस्ति नो भवथ जीवसे' इति जपति। प्रतिप्रस्थातृदत्तं व्रतं पयः परिश्रित्य पत्नी तूष्णीं व्रतयति। उभावपि स्वं स्वं पात्रं निर्णिज्य प्रयच्छतः। इदं व्रतसंज्ञकपयोभक्षणमुच्यते।

५१. अध्वर्युः अपररात्रे प्रेष्यति—'त्रिस्तनव्रतं दोहयता' अग्नीन् ज्योतिष्मतः कुरुत, व्रत्य वाचं यच्छ, पत्नि वाचं यच्छ। इति अध्वर्युप्रतिप्रस्थातारौ पूर्ववद् दोहयित्वा श्रपयित्वा पूर्ववत्संस्कृत्य शिक्ये स्थापयतः। दैक्षमेव चतुस्तनं व्रतं पत्न्या भवति। यजमानः सूर्योदयानन्तरं अग्रेण शालां तिष्ठन् 'भूर्भुवः सुवः' इति जपित्वा व्रतं कृणुतेति त्रिरुच्चैर्वदति। अध्वर्युः एहि यजमान इत्याहूय शालां प्रपादयति।

प्रायणीयेष्टिः—यजमानो गार्हपत्यस्य पश्चादुपविश्य 'प्रायणीयेष्टयां यक्ष्ये' इति प्रकृतिवत् सङ्कल्पयति। प्रायणीयेष्टिसम्बन्धि हविः व्रीहिमयश्चरुः, आज्यञ्च; पञ्चप्रयाजाः; अग्नीषोमावाज्यभागौ; पथ्या स्वस्ति, अग्निः, सोमः, सविता, अदितिश्च प्रधानदेवताः। 'देवा आज्यपा' इत्यादि प्रकृतिवत्। अस्यामिष्टौ अन्वाधानं नास्ति। अध्वर्युः असिदादानादि कर्म प्रकृतिवत् करोति। चरोः पयसि जले वा श्रपणम्। पयसि श्रपणपक्षे तु ब्रह्मन्नपः पयश्च प्रणेष्यामीति विशेषः।

उपहोमः सोमशोधनादिप्रैषाङ्गहोमः—[1]यज्ञयोगमन्त्रजपान्ते गार्हपत्ये स्मार्तवदाज्यं संस्कृत्याहवनीये स्रुवेण जुहोति 'कवियंशस्य वितनोति पन्थां नाकस्य पृष्ठ अधिरोचने दिवः। येन हव्यं वहसि यासि दूत इतः प्रचेता अमुतः सनीयान् स्वाहा' इति। कवयेऽग्नय इदं न मम इति यजमानस्यजति। अयमुपहोमः सोमशोधनादिप्रैषाङ्गहोम इत्युच्यते॥

---

१. द्र० पृष्ठ १६, पदार्थः ११६॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

५२. अध्वर्युः उपनिष्क्रम्य प्रेष्यति—'सौमविक्रयिन् सोमꣳशोधयोपरवाणां काले रोहेति चर्मण्यपामन्ते ब्राह्मणो दक्षिणत आस्तां ता गावो दूरं मा गुर्धासु सोमक्रयणी च सोमवानावनड्वाहौ सोमवाहनमनः प्रक्षालयतोद्धृतफलकम्' इत्यनेन प्रेषेण प्रेषितः सोमविक्रयी सोमशोधनादि यथोक्तं करोति।

प्रायणीयेष्टिः—ततोऽध्वर्युः प्रकृतिवत् घृष्ट्यादानादि कृत्वा चातुर्मास्यवत् चरुं श्रपयित्वा 'सूर्यस्ते चक्षुः। वातं प्राणः। द्यां पृष्ठम्। अन्तरिक्षमात्मा। अङ्गैर्यज्ञम्। पृथिवीꣳ शरीरैः" इति षड्ढोतृनामकेन वाक्यसमूहेनान्तर्वेदि चरुमासादयति। प्रकृतौ तु समस्तव्याहृतिभिर्हविरासादनम्। प्रयाजशेषेणाभिघारणे विशेषः—प्रथमं ध्रुवां पञ्चकृत्वोऽभिघार्य ततश्चरुमभिघार्य उपभृतमभिघारयति। अस्यामिष्टौ आज्यभागप्रचारो वैकल्पिकः। पृथक्पृथक् चतुर्गृहीतेन ध्रौवाज्येन प्राच्यां दक्षिणस्यां प्रतीच्यां उदीच्यां च क्रमेण पथ्यां स्वस्तिं अग्निं सोमं सवितारं चोपांशु यजति। सर्वत्र **दद्धिरसीत्य**नुमन्त्रणम् यजमानस्य। अदितिं चरुणा मध्ये यजति, **अन्नाद** इत्यनुमन्त्रणम्। अदितियागानन्तरं अध्वर्युः—'मरुतो यद्धवो दिवः सुम्नायन्तो हवामहे। आ तू न उपगन्तन'इति मारुतीमृचमनुपठति। स्विष्टकृद्यागे विशेषः—जुह्वामुपस्तीर्य ध्रुवाज्याच्चतुरवदाय सकृच्चरोरुत्तरार्धादवदाय द्विरभिघार्य चरुसम्बन्धिमेक्षणं जुहूपभृतोरधोभागेन नीत्वा आग्नीध्राय प्रयच्छन्नाह—'अतिबालयतादेव मा नु प्राहार्षीः'इति। ततोऽत्याक्रम्य स्विष्टकृता प्रचरति। आग्नीध्रो मेक्षणमग्नेरुपरि प्राङ्नीत्वा ऽभ्युक्ष्योत्तरतः सादयति। ततोऽध्वर्युर्जुहूसंक्षालनादि करोति। इडावदाने विशेषः—इडामुपस्तीर्य ध्रुवाज्यादष्टकृत्वोऽवदाय द्विश्चरोरवदायाभिघारयति। हविरुच्छिष्टोद्वासनानन्तरं परिक्रमिणः सम्प्रेष्यति—'अनुच्छिष्टीकुर्वन्त एतं चरुं व्युद्धृत्य प्राञ्चीतार्थैतां चरुस्थालीꣳ सक्षमकाषामेतन्मेक्षणमेतं वेदमेतद् बर्हिश्चतुष्टयमुदयनीयामुपनिधत्तात्।' परिक्रमिणो यथाप्रैषं कुर्वन्ति। स्रुग्विमोकानन्तरं तूष्णीमन्तर्वेदि प्रणीता निनीय तूष्णीं ध्रुवामाप्याय्य स्रुचि चतुर्गृहीतं गृहीत्वा स्रुगग्रे सूत्रेण हिरण्यं निष्टर्क्यं बद्धवा दर्भमूले प्रग्रथ्य जुह्वग्रे लम्बमानमवदधाति—'इयं ते शुक्र तनूरिदं वर्चस्तया सम्भव भ्राजं गच्छ' इति मन्त्रेण।

सोमक्रयाहुतिः—'जूरसि धृता मनसा जुष्टा विष्णवे त्वास्ते सत्यसवसः प्रसवे वाचो यन्त्रमशीय स्वाहा' इत्यन्वारब्धे यजमाने जुहोति। वाचे सोम-

---

१. तै० आ० ३।४।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्रयण्या इदं न ममेति यजमानोऽनुमन्त्रयते । इयं सोमक्रयाहुतिरित्युच्यते ॥

५३. पुनश्चतुर्गृहीतं गृहीत्वा स्फ्यमुदपात्रं बर्हिर्हिरण्यं चादाय एहि यजमानेति तमामन्त्र्य उद्धरणीहस्तया पत्न्याऽनुगतेन यजमानेन सह पूर्वद्वारेण शालाया बर्हिर्निष्क्रम्य शालाया अग्रे तिष्ठन् चतुर्गृहीतं स्रुक्स्थामाज्यं यजमानमवेक्षयति—'शुक्रमस्यमृतमसि वैश्वदेवꣳ हविः' इति यजुर्मन्त्रेण । हिरण्यमन्तर्धायादित्यमुदीक्षयति—'सूर्यस्य चक्षुरारुहमग्नेरक्षः । कनीनिकां यदेतशेभिरीयसे भ्राजमानो विपश्चिता' इति मन्त्रेण ।

सोमक्रयण्यनुमन्त्रणम् - सोमक्रयणीं गां शालाया अग्रे पृष्ठ्या सूत्रस्थाने उदङ्मुखीं स्थितामनुमन्त्रयते—'विदसि सनासि धीरसि दक्षिणासि यज्ञियासि क्षत्रियास्यदितिरस्युभयतः शीर्ष्णीः सा नः सुप्राची सुप्रतीची सम्भव मित्रस्त्वा पदि बध्नातु पूषाऽध्वनः पात्विन्द्रायाऽध्यक्षायानु त्वा माता मन्यतामनु पिता नु भ्राता सगर्भ्यो नु सखा सयूथ्यः सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वा वर्तयतु मित्रस्य पथा स्वस्ति सोमसखा पुनरेहि स रय्या इति । इदं सोमक्रयण्यनुमन्त्रणम् उच्यते ।

५४. **सोमक्रयण्यनुगमनम्**—दक्षिणस्येर्मस्यसप्तमं पदं जोषयध्वम् इति प्रेषयति । उदग्दिशं प्रतीनीयमानायाः सोमक्रयण्या दक्षिणस्य दोष्णः षट् पदान्यनुक्रामति । तत्रैकैकपदाऽनुक्रमणे षण्णां मन्त्राणां मध्ये एकैको मन्त्रः पठनीयः—वस्व्यसि, रुद्राऽसि, अदितिरसि, आदित्याऽसि, शुक्राऽसि, चन्द्राऽसि । एतैः षड्भिर्मन्त्रैः अध्वर्युः गोर्दोष्णः प्रक्षेपस्थाने स्वदक्षिणं पादं प्रक्षिप्य क्रमेण गच्छति । इदं सोमक्रमण्यनुगमनमुच्यते ॥

५५. **पद्धरणीग्रहणम्**—'बृहस्पतिस्त्वा. सुम्ने रण्वतु रुद्रो वसुभिराचिकेतु' इत्यनेन मन्त्रेण सप्तमस्य दोष्णः प्रक्षेपस्य स्थानं दक्षिणहस्तेन गृह्णाति स्पृशतीति यावत् । तस्मिन् स्थाने हिरण्यं निधाय परिस्तीर्य परिषिच्य पूर्वाहृतेन चतुर्गृहीतेन 'पृथिव्यास्त्वा मूर्धन्नाजिघर्मि देवयजन इडायाः पदे घृतवति स्वाहा' इति मन्त्रेण जुहोति । सोमक्रयण्या इदमिति याजमानम् । हिरण्यमपनीय 'परिलिखितꣳ रक्षः परिलिखिता अरातय इदमहꣳ रक्षसो ग्रीवा अपि कृन्तामि । योस्मान् द्वेष्टि यञ्च वयं द्विष्म इदमस्य ग्रीवा अपिकृन्तामि ।' स्फ्येन पदं 'परिलिखिता' इत्यादि मन्त्रेण सकृत्, द्विस्तूष्णीम् । अप उपस्पृश्य । स्फ्येनोपसङ्गृह्य [1]'पद्धरण्यां ! संवपति 'अस्मे रायः इति

१. यस्मिन् पात्रे गोः सप्तमपदस्था मृद रेणु वा उत्थाप्य निवपति गृह्णाति तत्पात्रं पद्धरणी इत्युच्यते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रेण'। मन्त्रक्रमणोस्त्रिरावृत्तिः। 'त्वे रायः' इति पद्धरणीं यजमानाय प्रयच्छति। यजमानः 'तोते रायः' इति मन्त्रेण पत्न्यै प्रयच्छति। 'सं देवि देव्योर्वश्या पश्यस्व' इति पत्नीं सोमक्रयण्या समीक्षयति। पत्नी 'त्वष्टीमती ते सपेय सुरेता रेतो दधाना वीरं विदेय तव सन्दृशि' इति यजमानं समीक्षते। यजमानः 'माहꣳरायस्पोषेण वियोषम्' इति सोमक्रयणीं समीक्षते। अध्वर्युः हिरण्यं प्रक्षाल्य मध्यमायामङ्गुलौ बध्वा पददेशे उदकमपनिनीय पत्नीं गमयति। एतावत्कर्म पद्धरणीग्रहणमुच्यते॥

५६. **क्रमणाङ्गसोमोपस्थानम्**—ततोऽध्वर्युस्तत्रैव चन्द्रं छागां कृष्णशुक्ले ऊर्णास्तुके उष्णीषं वाससी कृष्णाजिने सोमक्रयणीं चादायोपरवदेशं गत्वा पृच्छति—'सोमविक्रयन् शुद्धस्ते सोमाऽ३:' इति। सोमविक्रयी 'शुद्ध' इति ब्रवीति। यजमानः—'एष ते गायत्रो भाग इति मे सोमाय ब्रूतात्। एष ते त्रैष्टुभो भाग इति मे सोमाय ब्रूतात्। एष ते जागतो भाग इति मे सोमाय ब्रूतात्। छन्दोमानाꣳ साम्राज्यं गच्छेति मे सोमाय ब्रूतात्।' इति मन्त्रैः सुविचितं राजानमुपतिष्ठते। इदं क्रयणाङ्गसोमोपस्थानमित्युच्यते॥

५७. **सोमक्रयणाभिमर्शनम्**—अध्वर्युर्वस्त्रं द्विगुणं कृत्वा चर्मण उत्तरार्धे प्राग्देशमास्तृणाति—अꣳशुना ते अꣳशुः पृच्यतां परुषा परुर्गन्धस्ते काममवतु मदाय रसो अच्युतो ऽमात्योसि शुक्रस्ते ग्रहः' इति सहिरण्येन पाणिना राजानमभिमृशति। इदं क्रयणाभिमशनमित्युच्यते॥

५८. **सोमविमानम्**—'अभित्यं देवꣳ सवितारमूण्योः कविक्रतुमर्चामि सत्यसवसꣳ रत्नधामभिप्रियं मतिमूर्ध्वा यस्याऽमतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा सुवः' इत्यस्य मन्त्रस्य पञ्चकृत्व आवृत्या सोमस्य पञ्चमुष्टीर्विमाति। तत्र प्रथमविमानं अङ्गुष्ठसहितया प्रदेशिन्या। द्वितीयं साङ्गुष्ठयोपकनिष्ठिकया। तृतीयं तथैव प्रदेशिन्या। चतुर्थं तथैव कनिष्ठिकया। पञ्चमं तथैव मध्यमया। इति समन्त्रकविमानम्। ततस्तूष्णीं पञ्चकृत्वो विमाति। तच्च कनिष्ठिकया मध्यमया कनिष्ठिकया प्रदेशिन्या महानाम्न्येति क्रमेण। एवं दशकृत्वो मिमानः सन् क्रीयमाणस्य सोमस्यार्धं मुष्टिदशकरूपं द्विगुणिते वस्त्रे गृहीत्वा 'प्रजाभ्यस्त्वा' इति मन्त्रेणाविशिष्टमर्धं गृह्णाति। तच्च विमिते सोमे प्रक्षिपति। एतत् सोमविमानमित्युच्यते॥

५९. **सोमवेष्टनम्**—ततो वस्त्रस्य प्रान्तानेकत्र करोति 'प्राणाय त्वा' इति प्रदक्षिणमुष्णीषेण वेष्टयति। 'व्यानाय त्वा' इति प्रान्तभागानुपगू-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हति । अङ्गुल्या मध्ये वायुसञ्चारार्थमवकाशं करोति । एतत् सोमवेष्टनमित्युच्यते ॥

६०. **सोमावेक्षणम्**—'प्रजास्त्वमनुप्राणिहि प्रजास्त्वामनुप्राणन्तु' इति यजमानं सोममवेक्षयति । ततस्तत्सोमवद्वस्त्रं चर्मणि निदधाति । एतत् सोमावेक्षणमित्युच्यते ॥

६१. **सोमक्रयणम्**—सोमविक्रयिणा तस्मिन् गृहीते सति अध्वर्युर्जलेन तदभ्युक्षति । चर्म दूरे प्रक्षिप्योत्थाय पृच्छति———'सोमविक्रयिन् क्रय्यस्ते सोमा३: ।' सोमविक्रयी 'क्रय्य:' इति प्रत्याह । अध्वर्युराह———'मूजवता३:' इति । मूजवतो हि इति स प्रत्याह । अध्वर्युराह—गवा ते क्रीणानि । इति सोमक्रयण्या सोमं पणते । तत: क्रीत: सोम: वयांसि व्याचक्ष्व इति सोमविक्रयी प्रत्याह । अध्वर्यु: एषा ते सोमक्रयणी चन्द्रं ते छाग ते वस्त्रं ते । ततो हिरण्येन पणते—'सोमं ते क्रीणाम्यूर्जस्वन्तं पयस्वन्तं वीर्यावन्तमभिमातिषाहꣳ शुक्रं ते शुक्रेण क्रीणामि चन्द्रं चन्द्रेणामृतममृतेन सम्यक्ते गो:' इति कौत्साय हिरण्यं दर्शयति । 'अस्मे चन्द्राणि' इति यजमानाय प्रददाति । 'तपसस्तनूरसि प्रजापतेर्वर्णस्तस्यास्ते सहस्रपोषं पुष्यन्त्याश्चरमेण पशुना क्रीणामि' इति प्रतीची नग्नीवयाऽजया सोमं राजानं पणते । 'अस्मे ते बन्धु:' इति यजमानं समीक्षते । तदनन्तरम् 'मयि ते राय: श्रयन्ताम्' इति आत्मानं समीक्षते । तदनन्तरमजां प्रदक्षिणमादर्त्य अभ्युक्ष्योदङ्मुखीं तां कौत्साय ददाति । ब्रह्मा—'मित्रो न एहि सुमित्रधा:' इति सोमं राजानमादत्ते । 'इन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तꣳ स्योन: स्योनम्' इति यजमानस्य दक्षिणे ऊरौ सादयति । अध्वर्यु:—'वय: सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमाना: । अपध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधये ऽववद्धान्' इति कृष्णविषाणया यजमानस्योष्णीषमपनयति । यजमान:—उष्णीषं जलेनाभ्युक्ष्य कौत्साय परिक्रमिणे वा ददाति ॥

दण्डं मैत्रावरुणाय प्रयच्छति । तदानीमध्वर्युर्यजमानं वाचयति—'त्वां गावो वृणत राज्याय त्वाꣳ हवन्त मरुत: स्वर्का: । वर्ष्मन् क्षत्रस्य ककुभि शिश्रियाणस्ततो न उग्रो विभजा वसूनि । मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रो: प्रशिषाप्रयच्छामि' इति । अध्वर्यु:—'अस्मे ज्योति:' इति शुक्लोर्णास्तुकयजमाने प्रक्षिपति । कृष्णोर्णास्तुकान् तु—'इदमहꣳ सर्पाणां दन्दशूकानां ग्रीवा उपग्रथनानि इत्युपग्रथ्य 'सोमविक्रयिणि तम: ।' इति तया सोमविक्रयिणं भ्रुवोर्विध्यति । सोमक्रयहेतून् पदार्थाननुदिशति—'स्वानभ्राड्घारे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वम्भारे हस्त सुहस्त कृशानवेते वः सोमक्रयणास्तान् रक्षध्वं मा वो दभन्' इति मन्त्रेण। ततस्तांस्तस्मिन्नेव स्थाने उदकुम्भस्थजलं सर्वं प्रक्षिपति। 'सोमविक्रयिन् क्रय्यस्ते सोमा' इत्यारभ्यैतदन्तं कर्म सोमक्रयणमित्युच्यते॥

६२. **शकटे सोमस्थापनम्**—यजमानः 'उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य धामभिरुदस्थाममृताँ अनु' इत्यनेन मन्त्रेण राजानमादायोपोत्तिष्टति। ततो राजानं स्वशिरसि निधाय 'उर्वन्तरिक्षमन्विहि' इति प्राङ्मुखस्य शकटस्य दक्षिणतोऽभ्येति। ततो ऽध्वर्युः 'आदित्याः सदोऽसि' इति शकटस्य नीडे कृष्णाजिनमास्तृणाति। यजमानः 'अदित्याः सद आसीद' इति कृष्णाजिने सोमं राजानं स्थापयति। अध्वर्युर्यजमानौ—'अस्तभ्ना द्यामृषभो अन्तरिक्षममिमीति वरिमाणं पृथिव्याः। आसीदद् विश्वा भुवनानि सम्राड् विश्वेतानि वरुणस्य व्रतानि' इत्यनेन राजानमुपतिष्ठेते। अध्वर्युः—'वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पयो अघ्नियासु। हृत्सु क्रतुं वरुणो विक्ष्वग्निं दिवि सूर्यमदधात् सोममद्रौ' राजानं प्राग्दिशं वर्जयित्वा सर्वासु दिक्षु उक्तमन्त्रेण वाससा वेष्टयति। 'उदुत्यं जातवेदसं देवं वहन्ति केतवः। दृशे विश्वाय सूर्यम्' इति पूर्वदिशि ऊर्ध्वग्रीवमन्तर्लोम कृष्णाजिनं बध्नाति। सोमग्रहणपूर्वकोत्थानमाभ्यैतदन्तं कर्म शकटे सोमस्थापनमित्युच्यते॥

६३. **शकटपरिवहनम्**—'उस्रावेतं धूर्षाहावनश्रू अवीरहणौ ब्रह्मचोदनौ' इति मन्त्रेणानीयमानौ सोमवाहनावनड्वाहौ प्रतिमन्त्रयते। 'वरुणस्कम्भनमसि' इति दक्षिणमनड्वाहं योजयति। 'वरुणस्य स्कम्भसर्जनमसि' इति शम्यामवगूहति। 'प्रत्यस्तो वरुणस्य पाशः' इति योक्त्रमवगूहति। एवमेवोत्तरस्यां धुरि उत्तरमनड्वाहं योजयति। ततो दक्षिणामीषामन्वारभ्य होत्रे प्रेष्यति—'सोमाय क्रीताय प्रोह्यमाणायानुब्रूहि, सुब्रह्मण्य सुब्रह्मण्यामाह्वय, मा तु त्वमाह्वार्यजमान आह्वास्यति। यजमानः ईषयोर्मध्ये तिष्ठन् पलाशशाखां धारयन्—'सुब्रह्मण्योऽ३म्' इति त्रिरुपांशु सुब्रह्मण्यामाह्वयति। ततः सुब्रह्मण्येन सुब्रह्मण्यायामाहूतायां होत्रा च अनुवचनस्य प्रथमायामृचि त्रिरुक्तायां सत्यां शकटं प्रच्याव्य दक्षिणःमुखं परिवर्त्य वहन्ति 'प्रच्यवस्य भुवस्पते विश्वान्यभिधामानि मा त्वा परिपरीविदन् मा त्वा परिपन्थिनो विदन् मा त्वा वृका अघायवो मा गन्धर्वो विश्वावसुरादघच्छयेनो भूत्वा परापत यजमानस्य नो गृहे देवैः सꣳस्कृतम्' इत्यनेन मन्त्रेण। अध्वर्युरेवेमं मन्त्रं पठति। ततो ऽध्वर्युर्यजमानौ—'यजमानस्य स्वस्त्ययन्यस्यपि पन्थानगस्महि स्वस्ति गामनेहसं येन विश्वाः परिद्विषो वृणक्ति निन्दते वसु' इमं मन्त्रं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पठन्तौ अञ्जसा प्रतीचीं दिशं प्रति शकटं नयतः। एतत्कर्म शकटपरिवहनमित्युच्यते ॥

६४. ततोऽध्वर्युर्व्रीहीन् अरणीं राजासन्दीं च गृहीत्वा शालाया अग्रभागे तिष्ठन् ओह्यमानं प्रति मन्त्रयति—'नमो मित्रस्य वरुणस्य चक्षसे महो देवाय तदृतँ सपर्यत दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्याय शँसत' इत्यनेन मन्त्रेण। शकटवोढारः शालाया अग्रभागे उदगीषं शकटमुपस्थापयन्ति। ततोऽध्वर्युः—'वरुणस्य स्कम्भनमसि' इति उपस्तम्भने स्थापयति।

उपस्तम्भनम्—शकटादेर्यथास्थितस्थित्यर्थं यदूर्ध्वं काष्ठद्वयं रज्ज्वादिना परस्परबद्धं भवति, तदुपस्तम्भनमित्युच्यते ॥

६५. 'वरुणस्य स्कम्भसर्जनमसि' इति दक्षिणस्यानड्वाहः शम्यामुत्कर्षति। 'उन्मुक्तो वरुणस्य पाशः' इति योक्त्रं मुञ्चति।

आतिथ्येष्टिः—तत एहि यजमानेति यजमानमाहूय पूर्वया द्वारा शालां प्रवेशयति। यजमानः स्वस्थाने उपविश्य 'आतिथ्येष्ट्या यक्ष्ये' इत्यातिथ्येष्टिं सङ्कल्पयति। अस्यामिष्टौ वैष्णवो नवकपालः पुरोडाशः, अनुयाजानामभावः, प्रधानमुपांशु, आश्ववालः प्रस्तरः, ऐक्षवी विधृती, पञ्चविधं बर्हिः, कार्ष्मर्यमयाः परिधयः, सप्तदश सामिधेन्यः। योक्त्रेध्मप्रव्रश्चनान्वाहार्यस्थालीवर्जं प्रकृतिवत् पात्राण्यासादयति।

उपस्थानव्रीहयः—पूर्वं यान् व्रीहीन् गृहीत्वा शालाद्वारे प्राप्तस्य सोमस्य राज्ञ उपस्थानं कृतं तानेव व्रीहीन्निर्वपति। एते च व्रीहय उपस्थानव्रीहिपदवाच्याः ॥

६६. **अतिथ्येष्टिहविषो निर्वापः**—अत्र निर्वापमन्त्रे विशेषः—'देवस्य त्वा सवितुः प्रसवे ऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि'। 'देवस्य त्वा सवितुः प्रसवे अश्विभ्यांँसोमस्यातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि'। देवस्य त्वा·····बाहुभ्यामतिथेरातिथ्यमसि विष्णवे त्वा जुष्टं निर्वपामि। देवस्य त्वा·····बाहुभ्यामग्नये त्वा रायस्पोषदाव्ने विष्णवे त्वा जुष्टं निर्वपामि। देवभ्यांँ श्येनाय त्वा सोमभृते विष्णवे त्वा जुष्टं निर्वपामि। एतैः पञ्चभिर्यजुर्मन्त्रैः पञ्चमुष्टीन्निर्वपति। तन्दुलप्रक्षालननिनयनानन्तरं दक्षिणवदुत्तरमनड्वाह विमुञ्चति।

आसन्दीप्रतिष्ठानम्—चत्वारो ब्राह्मणा राजासन्दीं धृत्वा शालां प्रवेशयन्ति। 'या ते धामानि हविषा यजन्ति ता ते विश्वा परिभूरस्तु यज्ञम्' इत्य-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नेन मन्त्रेण यजमान: सोममादत्ते । गयस्फान: प्रतरण: सुवीरो वीरहा प्रचरा सोमदूर्यान्' इति तं शालां प्रवेशयति ।। आसन्दीघरा ब्राह्मणा राजासन्दीं वेद्युत्करयोर्मध्येन नीत्वा ऽग्रेणाहवनीयं पर्यानीयाहवनीयस्य दक्षिणत: सादयन्ति । तथैव यजमान: सोमं नीत्वा आसन्दीसमीपे तिष्ठति । अध्वर्यु: 'अदित्या: सदोऽसि' इति आसन्द्यां कृष्णाजिनमास्तृणाति । यजमान: 'अदित्या: सद आसीद' इति कृष्णाजिने राजानं स्थापयति । 'वरुणो ऽसि धृतव्रतो वारुणमसि' इति राजानमुपतिष्ठते । अध्वर्यु: 'शंयोर्देवानाꣳ सख्यात्' कृष्णाजिनान्तानेकीकृत्य रज्ज्वा बद्ध्वा मध्यमे वंशे प्रग्रथ्नाति । 'मा देवानामयसश्छिस्महि' इति आसन्द्या: पश्चिमपादयोर्मध्ये राजपादौ प्रक्षालयामीति भावयन्नञ्जलिना जलं सिञ्चति । तत: कश्चित् शूद्रस्तूष्णीं प्रक्षालयति । 'तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भि: । अहेडमानो वरुणेहबोध्युरुशꣳस मा न आयु: प्रमोषी:' इति यजमान: पुनरुपतिष्ठते । एतावत्कर्म सोमासन्दीप्रतिष्ठापनमित्युच्यते ।।

६७. **अन्तरागमननिषेधप्रैष:**— तत: ऽध्वर्यु:—'मा राजानं चाहवनीयं चान्तरेण कश्चन सञ्चारीन्मैनꣳ सायुधो मा सदण्डो मा सच्छत्रो मा सोष्णीषो मा साधस्याद्यो ऽनुप्रपादीत्' । अयमन्तरागमननिषेधप्रैष इत्युच्यते ।।

६८. **सोममधुपर्क:**—यजमानो राजानं सोमं मधुपर्केण पूजयति । तत्र निवेदितां गामध्वर्युरुत्सृजत इति वदति । अयं सोममधुपर्क उच्यते ।।

६९. अध्वर्यु:— कृष्णाजिनावधूननादि प्रकृतिवत् करोति । उत्तरेषु अधिवपनादिषु विष्णुमेव निगमयति । पुरोडाशमधिश्रित्य गार्हपत्ये मदन्तीरधिश्रित्याज्यनिर्वापादि प्रकृतिवत् । सर्वाण्याज्यानि चतुर्गृहीतानि भवन्ति । **"पृथिवी होता । द्यौरध्वर्यु: । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता'** इति चतुर्होत्रातिथ्यमासादयति ।

सम्भारमन्त्रा:—आसन्नाभिमन्त्रणानन्तरं सम्भारान् व्याचष्टे । अग्निर्यज्ञुभि:, सविता स्तोमै:, इन्द्र उक्थामदै:, मित्रावरुणावाशिषा, अङ्गिरसो धिष्ण्यैरत्निभि:, मरुत: सदोहविर्धानाभ्याम्, आप: प्रोक्षणीभि:, ओषधयो बर्हिषा, अदितिर्वेद्या, सोमो दीक्षया, त्वष्टेध्मेन, विष्णुर्यज्ञेन, वसव आज्येन, आदित्या दक्षिणाभि:, विश्वेदेवा ऊर्जा, पूषा स्वगाकारेण, बृहस्पति: पुरोधया, प्रजापतिरुद्गीथेन, अन्तरिक्षं पवित्रेण, वायु: पात्रै:, अहꣳ श्रद्धया, एते मन्त्रा: सम्भारपदवाच्या: ।।

७०. तत उत्करे कृष्णाजिनमारतीर्य 'अग्नेर्जनित्रमसि' इत्यादिमन्त्रै: पशु-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वन्मन्थनं कृत्वा निर्मन्थ्येन प्रचर्याभिहुत्य 'अग्नये समिध्यमानायानुब्रूहि' इत्यादि प्रकृतिवत् करोति। न समिधं परिशिनष्टि[1], अनुयाजाभावात्। चतुर्थे प्रयाजे सर्वमौपभृतमाज्यं जुह्वामानीय प्रयाजशेषेण ध्रुवामभिघारयति। उपभृतं नाभिघारयति। आज्यभागानन्तरमुपांशु प्रधानेन प्रचरति। विष्णोरहं देवयज्ययान्नादो भूयासम्। **अन्नाद** इत्यस्य स्थाने **शिपिविष्टपदं** वा इति यजमानस्य प्रधानयागानुमन्त्रणम्। ततः स्विष्टकृदिडे प्रचर्य प्राशित्रं परिहृत्य प्रणीता निनीय तूष्णीं ध्रुवामाप्याययति। सन्तिष्ठते अतिथ्येष्टिः। आतिथ्येष्टिसङ्कल्पप्रभृति (पदार्थसंख्या ६५) एतावदन्तं कर्म आतिथ्येष्टिरिति गीयते॥

७१. **तानूनप्त्राज्यग्रहणम्**—ततो वेद्यां कंसं चमसं वा निधाय ध्रुवाज्यात् पञ्चकृत्वो वक्ष्यमाणमन्त्रैर्गृह्णाति। ते च मन्त्राः—'आपतये त्वा गृह्णामि, परिपतये त्वा गृह्णामि, तनूनपत्रे त्वा गृह्णामि, शाक्वराय त्वा गृह्णामि, 'शक्मन्नोजिष्ठाय त्वा गृह्णामि' इति। इदं तानूनप्त्राज्यग्रहणमित्युच्यते॥

७२. **तानूनप्त्रावमर्शनम्**—मुख्यक्रमेण यजमानान्ता ऋत्विजस्तमवमृशन्ति—'अनाधृष्टमस्यनाधृष्यं देवानामोजोऽभिशस्तिया अनभिशस्तेन्यम्' इति मन्त्रेण। इदं तानूनप्त्रावमर्शनमित्युच्यते॥

७३. **तानूनप्त्रावघ्राणम्**—अध्वर्युर्यजमानं वाचयति—'अनु मे दीक्षां दीक्षापतिर्मन्यतामनुतपस्तपस्पतिरञ्जसा सत्यमुपगेषꣳ सुविते माधाः' यजमानः अध्वर्यवादीन् सर्वानृत्विजः क्रमेणोपहूय तानूनप्त्रमवजिघ्रति—'प्रजापतौ त्वा मनसि जुहोमि' इति मन्त्रेण सकृत् द्विस्तूष्णीम्। एतत् तानूनप्त्रावघ्राणमित्युच्यते॥

७४. **तानूनप्त्रसंज्ञकम् आज्यम्**—अथैनत्पात्रमद्भिः संस्पृश्य शालाया उत्तरभागे निनयति। अत्र कंसे गृहीतमाज्यं तानूनप्त्रमित्युच्यते॥

७५. **मदन्तीपाचनम्**—ततऽध्वर्युराग्नीध्रं पृच्छति—'अग्नीन्मदत्यापा३:'। इति। आग्नीध्रस्तमाह—'मदन्तिदेवीरमृता ऋतावृधः' इति। ततोऽध्वर्युः—'ताभिरा द्रव' इत्याह। इदं मदन्तीपाचनमित्युच्यते॥

७६. **सोमाप्यायनम्**—ततो यजमानान्ताः सर्वे मुख्यादिक्रमेण मदन्ती-

---

१. प्रकृतौ (दर्शपूर्णमासयोः) सामिधेनीमन्त्रैः प्रक्षिप्यमाणासु एका समित् अनुयाजार्थं परिशेषयन्ति।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रुपस्पृश्योपोत्थाय सोमसमीपं गत्वा तं विस्रस्य हिरण्यमवधाय सोमं राजानं मदन्तीजलेनाप्यायन्ति—'अꣳशुरꣳशुस्तेदेव सोमाप्यायतामिन्द्रायैकधनविद । आ तुभ्यमिन्द्रः प्यायतामात्वमिन्द्राय प्यायस्व' इति मन्त्रेण । अध्वर्युर्यजमानं वाचयति—'आप्यायय सखीन् त्सन्या मेधया स्वस्ति ते देव सोम सुत्यामशीय' इति । इदं सोमाप्यायनमित्युच्यते ।।

७७. **निह्नवः**—ततो मदन्तीजलं स्पृष्ट्वा यथास्थानमुपविशन्ति । अध्वर्युः वाजवतीभ्यां स्रुचौ व्यूह्य परिधीन् समज्य यथायतनꣳ स्रुचौ सादयित्वा विधृतीभ्यां सह प्रस्तरं गृहीत्वा ऽप्रतिशृणंस्त्रेधा ऽनक्ति—'अक्तꣳ रिहाणा' इत्यादिमन्त्रैः । अत्र प्रस्तरानुप्रहरणं नास्ति । अतस्तदर्थमाश्रावणमपि न । न वर्हिरनुप्रहरति । प्रस्तरं वेद्या दक्षिणार्धे निधाय तस्मिन् यजमानान्ताः सर्वे मुख्यादित्रमेण निह्नवन्ते—एष्टा रायः, प्रेषे भगाय, ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्यै' इति सव्यं पार्णि प्रस्तरस्योपरि उत्तानं निधाय तदुपरि दक्षिणं पार्णि न्यञ्चं निधाय । द्यावापृथिवीव्योर्नमस्काररूपो निह्नव उच्यते।।

७८. **अवान्तरदीक्षाप्रेषः**—आतिथ्याबर्हिष एकादेशेन विधृतिभ्यां च सह तमेव प्रस्तरं वध्वा तेष्वेव परिधिषु एकादश समिच्छकलानुपसङ्गृह्य तदुभयमाहवनीये ऽतिवाल्यादिभरभ्युक्ष्योत्तरतः सादयित्वा यजमानमाह—'अवान्तरदीक्षां गृहाण' इति । अयमवान्तरदीक्षाप्रैष इत्युच्यते ।।

७९. **यजमानशासनम्**—ततो यजमान आहवनीयमुपतिष्ठते—'अग्ने व्रतपते, त्वं व्रतानां व्रतपतिरसि, या मम तनूरेषा सा त्वयि या तव तनूरियꣳ सा मयि सह नौ व्रतपते व्रतिनोर्व्रतानि' इति । अध्वर्युः यजमानं संशास्ति—'सन्तरां मेखलां समायच्छस्व, सन्तरां मुष्टीकुरुष्व, तप्तव्रत एधि, मदन्तीभिर्मार्जयस्व, उत्पुर्वव्रतनꣳ सृज' 'या ते अग्ने रुद्रिया तनूस्तया नः पाहि तस्यास्ते स्वाहा' इत्येतेन 'अतोऽधिव्रतय' इति यजमानो यथाप्रैषं करोति । इदं यजमानशासनमित्युच्यते ।।

८०. ततो ऽध्वर्युर्ब्रह्मप्रतिप्रस्थात्रग्नीत्प्रस्तोतृहोतृयजमाना मदन्तीजलं स्पृष्ट्वा 'नमो वाच' इत्यादि पूर्वोक्तां शान्तिं जपन्ति ।

प्रवर्गसामग्रीसम्पादनम्—अध्वर्युर्गार्हपत्यस्य पुरस्तादास्तीर्णेषु दर्भेषु सम्राडासन्दीं, स्थूणां, गोदोहनीं, छागायैः शङ्कुशफोपयमनं, स्रुवं, रौहिणहवन्यौ, द्वे धृष्टी, त्रीणि धवित्राणि, षट् शकलानि, एतान्यौदुम्बराणि, वैकङ्कतीं समिधं, त्रयोदश, वैकङ्कतान् परिधीन्, वैकङ्कतीं प्रचरणीं, कार्भर्यमयान् परिधीन्, सौवर्णराजतौ रुक्मौ, द्वे घर्मदुघे, धेनुं च छागीं च बहिः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थापयित्वा द्वौ कुशमयौ वेदौ, एकं मौञ्जमपरिवासितं मौञ्जरज्जुदामं, मुञ्जप्रलवान् रौहिणपिष्टानि, सिकताश्चासाद्य, गार्हपत्याहवनीययोरुत्तरतः स्फ्येनोद्धृत्यावोक्ष्य सिकताभिः प्रदेशपरिमितौ परिमण्डलौ खरौ कृत्वा, शालाया उत्तरे खण्डे तथैव चतुरस्रमुदङ् निष्पन्दनवन्तमुच्छिष्टखरं कृत्वा, प्रचरणीयं महावीरं शफाभ्यां परिगृह्य, प्रवृञ्जनीये खरे सादयित्वा, मौञ्जेन वेदेनापिधाय, आहवनीयस्य दक्षिणतः सम्राडासन्द्यां कृष्णाजिने प्राग्विलौ उपशयौ महावीरौ वेदाभ्यां परिगृह्य आसाद्य, अतिशिष्टां मृदं चासाद्य, स्थूणां शङ्कुं चादाय, जघनेन गार्हपत्यं परीत्य, दक्षिणया द्वारोपनिष्क्रम्य, होतृदृष्टिगोचरदेशे गोवत्सबन्धनार्थं स्थूणं निहत्य, मौञ्जेन दाम्ना घर्मदुघाया गोर्वत्सं तत्र बद्ध्वा, तदुत्तरतः शङ्कुं निहत्य, तत्र छागां बद्ध्वा, छागायाः शिशुं कटादिना ऽऽच्छाद्य,प्रवर्ग्यकर्तॄन् सम्बुद्धचन्तेन एहि पदोत्तरेण यज्ञियेन नाम्ना ऽऽहूय, शालायाश्चत्वार्यपि द्वाराणि वस्त्रादिना परिश्रित्य, पत्नीशाले पत्नीमुपवेश्य, तस्यापि द्वारं परिश्रित्याग्नीन् दर्भैः परिस्तीर्य, गार्हपत्यस्य दक्षिणतो ब्रह्मयजमानावुपवेश्य, सपवित्रायां प्रचरण्यां मदन्तीरप आनीयोत्पूयाददान आह[1]—

[सम्राडासन्द्याद्यासादनप्रभृति (पदार्थसंख्या ६६) प्रचरणीग्रहणान्तं कर्म प्रवर्ग्यसामग्रीसम्पादनमित्युच्यते] ॥

८१. **प्रवर्ग्यारम्भप्रैषः**—ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामः, होतर्धर्नमभिष्टुहि, अग्नीद् रोहिणौ पुरोडाशावधिश्रय, प्रतिप्रस्थातः प्रवर्ग्यं विहर, प्रस्तोतः सामानि गाय । अयं प्रवर्ग्यारम्भप्रैष इत्युच्यते ॥

८२. **प्रवर्ग्यपात्रसम्भारप्रोक्षणम्**—ब्रह्मणा 'भूर्भुवः स्वर्बृहस्पतिप्रसूतः' इति जपित्वा 'ॐ प्रचरत' इत्याज्ञप्तो ऽध्वर्युः प्रचरणीयं महावीरं वेदमपास्य प्रोक्षति—'यमाय त्वा मखाय त्वा सूर्यस्य हरसे' इति । अभिप्राप्नुवन् परान् सम्भारान् प्रोक्षति । अध्वर्युः प्रोक्षितपात्रं स्थानान्तरे सादयति । इदं प्रवर्ग्यपात्रसम्भारप्रोक्षणमुच्यते ॥

८३. अध्वर्युराहवनीये काष्मर्यमयान् परिधीन् परिधाय, तस्य समीपे औदुम्बरान् शकलान् वैकङ्कतीं समिधं च सादयित्वा, गार्हपत्यसमीपे त्रयोदश वैकङ्कतान् परिधीन् सौवर्णराजतौ रुक्मौ मुञ्जमलवान् रौहिणपिष्टानि सादयति ।

---

१. उत्तरेण पदार्थेन सहैकवाक्यता नेया ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रौहिणपुरोडाशश्रपणम्—आग्नीध्रः गार्हपत्यस्य पश्चाद् भागे धृष्टिभ्यां प्रतीचोङ्गारान्निरूह्य रौहिणकपाले उदक्संस्थे तदुपर्युपधाय मदन्तीभिः रौहिणपिष्टानि संयुत्य, पिण्डौ कृत्वा कपालयोरधिश्रित्य, स्थाल्यां तिरः पवित्रमाज्यमानीयाधिश्रित्य, उभयं पर्यग्निकृत्वा, रौहिणौ पुरोडाशौ श्रपयति। इदं रौहिणपुरोडाशश्रपणमित्युच्यते।

८४. **रौहिणपुरोडाशासादनम्**—प्रतिप्रस्थाता मौञ्जवेदाग्रेण महावीरं स्रुवं पिन्वने रौहिणहवन्यौ उपयमनं च सम्मृज्य, आज्यमुत्पूय, रौहिणहवन्योरुपस्तीर्य्य रौहिणपुरोडाशावभिघार्य्य, उद्वास्य, रौहिणहवीभ्यां परिगृह्य, वेद्यां दक्षिणं पुरोडाशं दक्षिणपरिधिसन्धिसमीपे पूर्वाह्णिके प्रवर्ग्ये प्राञ्चौ, आपराह्णिके तु प्रत्यङ्मुखौ यथाभवतस्तथा सादयति। इदं रौहिणपुरोडाशासादनमित्युच्यते॥

८५. **प्रवर्ग्यारम्भहोमः**—अध्वर्युः प्रचरणीयं महावीरं शफाभ्यां सव्यहस्ते गृहीत्वा, अज्यस्थाल्याः सकाशात् सकृदाज्यं स्रुवेण गृहीत्वा, अनवानं सन्ततः सप्ताहुतीर्गार्हपत्ये जुहोति—'प्राणाय स्वाहा, व्यानाय स्वाहा, अपानाय स्वाहा, चक्षुषे स्वाहा, श्रोत्राय स्वाहा, मनसे स्वाहा, वाचे सरस्वत्यै स्वाहा, इति मन्त्रैः। ततश्चतस्र आहुतीः पुनः पुनराज्यमादाय जुहोति—'दक्षाय स्वाहा, क्रतवे स्वाहा, ओजसे स्वाहा, बलाय स्वाहा' इति मन्त्रैः। सर्वत्र यथालिङ्गं **प्राणाय इदं न मम**इत्यादिरूपो यजमानस्य त्यागः। अयं प्रवर्ग्यारम्भहोम इत्युच्यते।

८६. **महावीराञ्जनम्**—महावीरमाज्येनानक्ति—'देवस्त्वासविता मध्वानक्तु' इति मन्त्रेण। इदं महावीराञ्जनमुच्यते॥

८७. **रुक्मोपगूहनम्**—प्रतिप्रस्थाता राजतं रुक्मं प्रवृञ्जनीये खरे उपगूहति—'पृश्निवीं तपसस्त्रायस्व' इति इदं रुक्मोपगूहनमुच्यते॥

८८. **खरेमहावीरसादनम्**—अध्वर्युः व्यतिषक्तान् प्रागुदगग्रान् कृत्वा, रुक्मोपरिमञ्जुलप्रलवान् कृत्वा, प्रदक्षिणमादीपयति। तद्यथा—'अर्चिरसि' इति पुरतः, 'शोचिरसि' इति दक्षिणतः, 'ज्योतिरसि' इति पश्चिमतः, 'तपोऽसि' इत्युत्तरतः। तान् प्रवृञ्जनीये खरे सम्प्रकीर्य 'सँ सीदस्व महाँ असि शोचस्व देववीतमः। विधूममग्ने अरुषं भियेध्यसृज प्रशस्तदर्शतम्' इति तेषु महावीरं सादयति। इदं खरे महावीरसादनमुच्यते॥

८९. **महावीराज्यपूरणम्**—'अञ्जन्ति यं प्रथयन्तो न विप्रा वपावन्तं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नाग्निना तपन्तः। पितुर्न पुत्र उपसिप्रेष्ठ आ घर्मो अग्निमृतयन्नसादीत्' इति महावीरमाज्येन पूरयति। इदं महावीराज्यपूरणमुच्यते॥

९०. **महावीरप्रादेशकरणम्**—'अनाधृष्या पुरस्तादग्नेराधिपत्य आयुर्मेदाः। पुत्रवतो दक्षिणत इन्द्रस्याधिपत्ये प्रजां मेदाः। सुषदा पश्चाद् देवस्य सवितुराश्रोत्रं मेदाः। विधृतिरुपरिष्टाद्बृहस्पतेराधिपत्ये ब्रह्म मेदाः। क्षत्रं मेदास्तेजो मेधा यशो मेधास्तपो मेधा मनो मेधाः।' एतैः पञ्चभिर्मन्त्रैः क्रमेण यजमानो महावीरस्य प्राग्दक्षिणतः पश्चिमत उत्तरत उपरि च प्रादेशान् करोति। मन्त्रानध्वर्युरपि पठति। इदं महावीरप्रादेशकरणमुच्यते॥

९१. **महावीराङ्गारपरिश्रयणम्**—यजमानो भूमिमभिमृशति—'मनोरश्वाऽसि भूरिपुत्रा विश्वाभ्यो मानाष्ट्राभ्यः पाहि सूपसदा मे भूया मा मा हिꣳसीः' इति। अध्वर्युः—'तपोष्वग्ने अन्तराँ अमित्रान्तपाशꣳ समररुषः परस्य। तपा वसो चिकितानो अचित्तान्विततिष्ठन्तमजरा अयासः' इति गार्हपत्यात् धृष्टीभ्यामुदीचोऽङ्गारान् निरूहति। तैरेनं महावीरं प्रदक्षिणं परिचिनोति—'चितः स्थ परिचितः स्वाहा मरुद्भिः परिश्रयस्व'। इदं महावीराङ्गारपरिश्रयणमुच्यते॥

९२. **वैकङ्कतपरिधानम्**—महावीरस्य दक्षिणतः प्रागग्रमेक वैकङ्कतं परिधिं परिदधाति—'मा असि' इति मन्त्रेण, तथैव मन्त्रेणोत्तरतो द्वितीयम्। प्रतिप्रस्थाता पश्चादुदगग्रं तृतीयम्—'प्रमा असि' इति मन्त्रेण। अनेनैव मन्त्रेण पुरस्ताच्चतुर्थम्। 'प्रतिमा असि' एतस्य मन्त्रस्यावृत्या ऽध्वर्युर्द्वौ परिधी प्रथमद्वितीयवत् क्रमेण परिदधाति। 'संमा असि' एतन्मन्त्रावृत्यात्त्या प्रतिप्रस्थाता तृतीयचतुर्थवत्परिदधाति। 'विमा असि' इत्यस्यावृत्त्या द्वौ पूर्ववदध्वर्युः। 'उन्मा असि' एतदावृत्त्या द्वौ पूर्ववदत्प्रतिस्थाता। अध्वर्युस्त्रयोदशं परिधिं महावीरस्य दक्षिणत ऊर्ध्वाग्रमुच्छ्रयति—'अन्तरिक्षस्यान्तर्धिरसि' इति। वैकङ्कतपरिधानमिदमुच्यते॥

९३. **घर्मोपस्थानम्**—ततः दिवं तपसस्त्रायस्व' इति सौवर्णरुक्मेणा ऽपिदधाति। ततः 'आभिर्गीर्भिर्यदतो न ऊनमाप्याययं हरिवो वर्धमानः। यदा स्तोतृभ्यो महि गोत्रारुजाऽसि भूयिष्ठभाजो अधते स्याम'। 'शुक्रं ते अन्यद्यजतं ते अन्यद्विषुरूपे अहनी द्यौरिवाऽसि। विश्वा हि माया अवसि स्वधा वो भद्रा ते पूषन् निहरातिरस्तु॥' 'अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम्। अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्रत्वदस्ति' एताभिस्तिसृभिर्ऋग्भिर्घर्ममुपतिष्ठते। इदं घर्मोपस्थानमित्युच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

९४. **धवित्रादानं तत्प्रदानं च**—प्रज्वलिते ऽग्नौ सौवर्णरुक्ममपकृष्य धवित्राण्यादत्ते—'गायत्रमसि' इत्येकम्। 'त्रैष्टुभमसि' इति द्वितीयम्। 'जागतमसि' इति तृतीयम्। गृहीतैर्धवित्रैर्महावीरस्य पश्चात् प्राङ्मुखो जान्वाच्य युगपत्त्रिरूर्ध्वं धुनोति—'मधु मधु मधु' इति मन्त्रेण। स्वोत्तरतस्तिस्ठते प्रतिप्रस्थात्रे द्वे धवित्रे प्रयच्छति। तयोरेकमग्नीधे प्रतिप्रस्थाता प्रयच्छति॥

महावीरस्य प्रदक्षिणगमनम्—हेतुरभिष्टवनस्य प्रणवे प्रणवे महावीरस्योपरिधून्वन्तो ऽध्वर्यु प्रतिप्रस्थात्राग्नीध्रा महावीरं त्रिः प्रदक्षिणीकृत्योत्तरतस्तिष्ठन्ति। इदं महावीरप्रदक्षिणगमनमुच्यते॥

९५. **महावीराप्यायनम्**—ततो ऽध्वर्युः सर्वाणि धवित्राण्यादायात्मनः पश्चिममार्गेण परिक्रान्तायोत्तरतस्तिष्ठते प्रतिप्रस्थात्रे द्वे प्रयच्छति। तयोरेकं प्रतिप्रस्थाताग्नीधे प्रयच्छति। महावीरस्य पश्चात् प्राङ्मुखो ऽध्वर्युरुपविशति। पुरस्तात् प्रतिप्रस्थाता। उत्तरत आग्नीध्रः। एवमुपविश्य प्रणवे प्रणवे धून्वन्तः स्रुवेण महावीरमाप्याययन्ति। इदं महावीराप्यायनमुच्यते॥

९६. **महावीरप्रेक्षणमन्त्राः**—होतुः सकाशाद् याभिर्वर्तिकाम्' इत्युपश्रुत्याध्वर्युयजमानौ महावीरमुपोत्थाय प्रेक्षतः। 'दश प्राचीर्दश भासि दक्षिणां दश प्रतीचीर्दश भास्युदीचीः। दशोर्ध्वा भासि सुमनस्यमानः। स नो रुचे धेह्यनृणीयमाणः। अग्निष्ट्वा वसुभिः पुरस्ताद् रोचयतु गायत्रेण छन्दसा स मा रुचितो रोचय। इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा स मा रुचितो रोचय। वरुणस्त्वा ऽऽदित्यैः पश्चाद्रोचयतु जागतेन छन्दसा स मा रुचितो रोचय। द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा स मा रुचितो रोचय। बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसा स मा रुचितो रोचय। रोचितस्त्वं देव घर्म देवेष्वसि रोचिषीयाहं मनुष्येषु। सम्राड् घर्म रुचितस्त्वन्देवेष्वायुष्मा ँस्तेजष्वी ब्रह्मवर्चस्यसि। रुचितो ऽहं मनुष्ययेस्वायुष्मा ँ स्तेजस्वी ब्रह्मवर्चसी भूयासम्। रुगसि। रुचं मयि धेहि। मयि रुक्। दश पुरस्ताद्रोचये। दश दक्षिणा। दशप्रत्यङ्। वाजीवाजिनं पवस्व। दशोदङ्। दशोर्ध्वोभासि सुमनस्यमानः। सनः सम्राडिषमूर्जन् धेहि। रुचितो घर्मो रुचीय।' अयं मन्त्रसमूहेमहावीरप्रेक्षणमन्त्र इत्युच्यते॥

९७. **सर्वकर्तृकघर्मोपस्थानम्**—होत्रा 'अप्नस्वतीमश्विना' इत्यृच्युक्तायां सर्वे धवित्राण्यूर्ध्वं धारयन्ति। होत्रा रूरुदुषसः पश्निरग्रियः' इत्यृ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च्युक्तायां 'रुचितो घर्मः' इत्युक्त्वा यथेतन् त्रिरपसव्यं परीत्य धवित्राणि निधाय सर्वे घर्ममुपतिष्ठन्ते। 'अपश्यं गोपामनिपद्यमानम्। आ च परा च पथिभिश्चरन्तम्। ससध्रीचीः सविषूचीर्वसानः। आवरीवर्ति भुवनेष्वन्तः' अत्र प्रावीः। 'मधुमाध्वीभ्यां मधुमाधूचीभ्याम्। अनु वां देववीतये। समग्निनागत। सन्देवेन सवित्रा। सꣳसूर्येण रोचते। स्वाहा समग्निस्तपसाऽगत। सन्देवेन सवित्रा सꣳसूर्येणारोचिष्ट॥ धर्ता दिवो विभासि रजसः। पृथिव्या धर्ता। धर्ता देवो देवानाम्। अमर्त्यस्तपोजाः। हृदे त्वा मनसे त्वा सूर्याय त्वा। उर्द्धमिममध्वरं कृधि। दिवि देवेषु होत्रा यच्छ। विश्वा मां पते। विश्वस्य भुवनस्पते। विश्वस्य मनसस्पते। विश्वस्य वचसस्पते। विश्वस्य तपसस्पते। विश्वस्य ब्रह्मणस्पते। देवश्रूस्त्वं देवधर्म देवान् पाहि। तपोजां वाचमस्मे नियच्छ देवा युवम्। गर्भो देवानाम्। पिता मतीनाम्। पतिः प्रजानाम् मतिः कविनाम्। सन्देवो देवेन सवित्रा यतिष्ट। ससूर्येणा ऽरुक्त। आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि। पिता नो ऽसि पिता नो बोध। आयुर्दास्तनूधाः पयोधाः। वर्चोदा वरिवोदा द्रविणोदाः। अन्तरिक्षप्र उरोवरीवान्। अशीमहि त्वा मा मा हिꣳसीः। एतत् सर्वकर्तृकघर्मोपस्थानमुच्यते॥

९८. **प्रवर्ग्याङ्गगार्हपत्योपस्थानम्**—यजमानो गार्हपत्यमुपतिष्ठते—'त्वमग्ने गृहपतिर्विशामसि। विश्वासां मानुषीणाम्। शतं पूर्भिर्यविष्ठपाह्यꣳहसः समेद्धारꣳ शतꣳहिमाः। तं द्राविणꣳ हार्दिवानम्। इहैव रातयः सन्तु' इति। इदं प्रवर्ग्याङ्गगार्हपत्योपस्थानमुच्यते॥

९९. **दक्षिणरौहिणहोमः**—प्रतिप्रस्थाता पत्न्यै वेदं प्रदर्श्य 'त्वष्टीमतीते सपेय। सुरेता रेतो दधाना वीरं विदेय तव सन्दृशि। मा ऽहꣳ रायस्योषेण वियोषम्' इतीमं मन्त्रं वाचयति। 'अहर्ज्योतिः केतुना जुषताꣳ सुज्योतिर्ज्योतिषाꣳ स्वाहा' इत्याहवनीये दक्षिणं रौहिणपुरोडाशं जुहोति। 'ज्योतिष इदं न मम' इति त्यागो यजमानस्य। अयं दक्षिणरौहिणहोम इत्युच्यते॥

१००. आपराह्णिके प्रवर्ग्ये तु होममन्त्रे अहःपदस्थाने **रात्रि** पदं बोध्यम्।

धर्मदुघादोहन प्रकारः—ततो ऽध्वर्युः 'देवस्य त्वा स० माददे' इति मन्त्रेण रशनामादत्ते। 'अदित्यै रास्ना ऽसि' इति तामभिमन्त्रयते। प्रतिप्रस्थाता कꣳसं पिन्वने चाऽऽदाय होतुः पश्चिममार्गेण गच्छति। अध्वर्युः शालाया अन्तस्तिष्ठन् घर्मदुघां गामुपांशु त्रिराह्वयति—'इड एहि। अदित एहि। सरस्वत्येहि' इति त्रिभिर्मन्त्रैः। दक्षिणद्वारेण शालातो वहिर्निष्क्रम्य 'गङ्ग एहि' इति त्रिरुच्चैराह्वयति। तां गां तया रशनया बध्नाति। 'अदित्या उष्णीष-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मसि' इति। 'वायुरस्यैडः' इति वत्समभिमृशति। 'पूषा त्वोपावसृजत्वश्विभ्यां प्रदापय' इति पूर्वं स्थूणायां बद्धं वत्सं मुञ्चति—'यस्ते स्तनः शशयो यो मयोभूर्येन विश्वा पुष्यसि वार्याणि। यो रत्नधा वसुविद्यः सुदत्रः सरस्वती तमिह धातवे कः' इति गोस्तनमभिमन्त्रयते। प्रस्नुतायां गवि 'उस्रघर्मꣳ शिꣳषोस्नघर्मं पाहि घर्माय शिꣳषः' इति वत्समपनयति। बृहस्पतिस्त्वोपसीदतु' इति गां नियुज्य तत्समीपे दोहनार्थमुपविशति। 'दानवः स्थ पेरवो विष्वग्वृतो लोहिते' न॥ इति गोस्तनान् स्वकरेणसम्मृशति। होत्रा आदशभिर्विवस्वतः' इत्युच्युक्तायाम् 'अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेन्द्राय पिन्वस्वेन्द्राय पिन्वस्व' पिन्वने गां दोहयते। अतिशिष्टं कंसे। प्रतिप्रस्थाता तूष्णीं स्वपिन्वने छागां दोहयते। रशनादानप्रभृतिरेतदन्तो विधिर्घर्मदुघादोहनप्रकार उच्यते॥

१०१. **महावीरे गोपयःप्रक्षेपः**—होत्रा 'उतिष्ठ ब्रह्मणस्पते' इत्युक्ते ऽध्वर्युः प्रतिप्रस्थात्रे गोपयः प्रदाय यथागतमागत्य शफोपयमनान्यादत्ते। तद्यथा 'गायत्रो ऽसि' इति प्रथमं शफम्, 'त्रैष्टुभो ऽसि' इति द्वितीयम्, 'जागतमसि' इत्युपयमनम्। होत्रा 'उपद्रव पयसा' इत्युक्ते प्रतिप्रस्थात्रा आह्रियमाणे पयसी अभिमन्त्रयते—'सहोर्जो भागेनोपमेहीन्द्राश्विना मधुनः सारघस्य घर्मं पात वसवो यजतावट्' इति मन्त्रेण। महावीरस्य पुरस्तात् प्रत्यङ्मुख उपविश्य 'स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमि स्वाहा' इति स्वपिन्वनेन गोपयो महावीरेऽवनयति। अयं महावीरे गोपयःप्रक्षेप उच्यते॥

१०२. **घर्मोष्मान्वीक्षणम्**—'मधु हविरसि सूर्यस्य तपस्तप' इति पयः प्रक्षेपान्निर्गतमूष्माणमन्वीक्षते। इदं घर्मोष्मान्वीक्षणमुच्यते॥

१०३. **सिद्धघर्ममहावीरग्रहणम्**—प्रतिप्रस्थाता स्वपिन्वनस्थं छागापयस्तूष्णीं महावीरे ऽवनयति। उभयोः पयसोः शेषमेकीकृत्याध्वर्युस्तृतीयमवनयति। कंसस्थं गोपय उपयमने प्रत्यवनीयाङ्गारान् प्रत्यूह्य 'द्यावापृथिवीभ्यां त्वा परिगृह्णामि' इति महावीरं शफाभ्यां परिगृह्णाति। इदं सिद्धघर्ममहावीरग्रहणमुच्यते॥

१०४. **महावीरोत्थापनम्**—सव्ये हस्ते शफाभ्यां महावीरं धृत्वा मौञ्जेन वेदेन दक्षिणहस्तेनाधस्तान् मार्जयित्वा 'अन्तरिक्षेणत्वोपयच्छामि' इति उपयमनेनोपयच्छति। 'देवानां पितृणामनुमतो भर्तुं शकेयम्' इत्यनेन महावीरमादायोत्तिष्ठति। इदं महावीरोत्थापनमुच्यते॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१०५. 'तेजोऽसि तेजो ऽनुप्रेह्यग्निर्मा पृथिव्याः पातु वायुरन्तरिक्षात् सूर्यो दिवो दिविस्पृङ् मा मा हिꣳसीरन्तरिक्षस्पृङ् मा मा हिꣳसीः पृथिविस्पृङ् मा मा हिꣳसीः सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहि' इत्यनेन मन्त्रेण महावीरं प्राङ्हरति। 'समुद्राय त्वा वाताय स्वाहा' सलिलाय त्वा वाताय स्वाहा, अनाधृष्याय त्वा वाताय स्वाहा, प्रतिधृष्याय त्वा वाताय स्वाहा, वस्यवे त्वा वाताय स्वाहा'।

यथोपपादम्—यथोपपादं षट् मन्त्रानाह—'अग्नये त्वा वसुमते स्वाहा, सोमाय त्वा रुद्रवते स्वाहा, वरुणाय त्वा ऽदित्यवते स्वाहा, बृहस्पतये त्वा विश्वदेव्यावते स्वाहा, सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा, यमाय त्वा ऽङ्गिरस्वते पितृमते स्वाहा'। प्रतिमन्त्रमवसानं यथोपपादमित्युच्यते ॥

१०६. **महावीरप्राङ्नयनमन्त्राः**—एते षट् पूर्वोक्ताश्च सप्त मन्त्रा महावीरप्राङ्नयनमन्त्रा उच्यन्ते ॥

१०७. **घर्महोमार्थदक्षिणात्याक्रमणम्**—'विश्वा आशा दक्षिणसत्' इति दक्षिणत आसीनं ब्रह्माणमीक्षते। 'विश्वान् देवानयाडिह' इति पश्चादासीनं होतारम्। 'स्वाहाकृतस्य घर्मस्य मधोः पिषतमश्विना स्वाहा ऽग्नये यज्ञियाय शं यजुर्भिः' इति सव्येन पदा वेद्या दक्षिणतो ऽत्याक्रामति। इदं घर्महोमार्थदक्षिणात्याक्रमणमित्युच्यते ॥

१०८. **घर्मयागः**—'अश्विना घर्मं पातꣳहार्दिवानमहर्दिवाभिरूतिभिरनुवां द्यावापृथिवीमꣳसाताम्' इति यजमानं वाचयति। उच्चैराश्राव्य आग्नीध्रेण प्रत्याश्राविते। 'घर्मस्य यज' इति होतारं प्रेष्यति। होत्रा वषट्कृते स्वाहेन्द्राय इति जुहोति अनुवषट्कृते 'स्वाहेन्द्रावट्' इति पुनर्जुहोति। 'इन्द्रायेदं न मम' इति त्यागो यजमानस्य। 'घर्ममपातमश्विना हार्दिवानमहर्दिवाभिरूतिभिरनुवां द्यावापृथिवी अमꣳसातां तं प्राव्यं यथावण्नमो दिवे नमः पृथिव्यै दिविधा इमं यज्ञं यज्ञमिमं दिविधा दिवं गच्छाऽन्तरिक्षं गच्छ पृथिवीं गच्छ पञ्च प्रदिशो गच्छ देवान् घर्मपान् गच्छ पितॄन् घर्मपान् गच्छ' इत्यध्वर्युर्यजमानं वाचयति। अयं घर्मयाग उच्यते ॥

१०९. **अध्वर्युप्रतिप्रस्थातृकर्तृकघर्मस्रावणम्**—प्रतिप्रस्थाना पिन्वनेनोपयमनाद् उपहत्य महावीरं पूरयित्वा शफाभ्यां परिगृह्याध्वर्युप्रतिप्रस्थातारौ सहाहवनीये प्रतिमन्त्रं स्रावयतः—'इषे पीपिहि, ऊर्जे पीपिहि, ब्रह्मणे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पीपिहि, क्षत्राय पीपिहि, अद्भ्यः पीपिहि, ओषधीभ्यः पीपिहि, वनस्पतिभ्यः पीपिहि, द्यावापृथिवीभ्यां पीपिहि, सुभूताय पीपिहि, ब्रह्मवर्चसाय पीपिहि, यजमानाय पीपिहि, उपांशु मह्यं उच्चैः ज्यैष्ठ्याय पिपीहि ।' इदं उभयकर्तृकघर्मस्रावणमुच्यते ॥

११०. **अध्वर्युकर्तृकघर्मस्रावणम्**—अध्वर्युरेवाभिमुखं प्रदक्षिणं प्रागादिषु स्रावयति—विष्यै त्वा, द्युम्नाय त्वा, इन्द्रियाय त्वा, भूत्यै त्वा' इति क्रमेण चतुर्भिर्मन्त्रैः । इदमध्वर्युकर्तृकघर्मस्रावणमुच्यते ॥

१११. **उद्वासनीये महावीरासादनम्**—उपयमने महावीरस्थं पयो ऽवनीयोदङ्ङत्याक्रम्यान्तर्वेदि प्राग्विलं महावीरं सादयति । प्रतिप्रस्थाता राजतं रुक्ममुद्वासनीये खरे उपगूहति । अध्वर्युस्तस्मिन्महावीरं सादयति –'घर्मासि सुधर्मा मे ऽन्यस्मे ब्रह्माणि धारय नेत्वावातः स्कन्दयात्' इति मन्त्रेण । इदमुद्वासनीये महावीरसादनमुच्यने ॥

११२. **शकलक्षारणम्**– ततः औदुम्बरशकलेनोपयमनाद् उपहत्याऽऽहवनीयस्य पूर्वार्धे क्षारयति—'पूष्णे शरसे स्वाहा' 'पूष्णेशरस इदं न मम' इति यजमानः । तच्छकलं घर्मसिक्तभागो यथान्तः स्यात् तथा मध्यमे परिधौ सादयित्वा द्वितीयेन शकलेनोपयमनादुपहृत्य पूर्वार्धे क्षारयति—'ग्रावभ्यः स्वाहा' ग्रावभ्य इदं न मम' इति यजमानः । अध्वर्युर्द्वितीयमपि शकलं प्रथमवत्सादयित्वा तृतीयेनोपहृत्य मध्ये प्रश्च्योतयति—'प्रतिरेभ्यः स्वाहा' । 'प्रतिरेभ्य इदं न मम' इति याजमानम् । तथैव सादयित्वा चतुर्थेनोपहृत्याऽपरार्धे 'द्यावापृथिविभ्याꣳ स्वाहा' 'द्यावापृथिवीभ्यामिदं न मम' इति यजमानः । तच्चतुर्थं शकलम् उपरि सिक्तदेशं भस्मान्ते उपगूह्य पञ्चमेनोपहृत्य प्राचीनावीती भूत्वा आहवनीयस्य दक्षिणार्धे क्षारयति—'पितृभ्यो घर्मपेभ्यः स्वाहा' 'पितृभ्यो घर्मपेभ्य इदं न मम' इति याजमानम् । अध्वर्युर्यजमानावप उपस्पृशतः । इदं पञ्चमं शकलं बहिः सिक्तदेशं दक्षिणपरिधौ सादयित्वा षष्ठेन शकलेन महावीरपिन्वनकं सोपयमनलेपेषु सम्मृज्योत्तरार्धे क्षारयति—'रुद्राय रुद्रहोत्रे स्वाहा' 'रुद्राय रुद्रहोत्र इदं न मम इति याजमानम् । इदं शकलक्षारणमुच्यते ॥

११३. **शकलानुप्रहरणम्**—अध्वर्युर्यजमानावप उपस्पृशतः । तत्षष्ठं शकलमुत्तरेणातीकाशान् अनन्वीक्षमाणो निरस्यति—'पाप्मना सह निरयं गच्छ योस्मान् द्वेष्टि यं च वयं द्विष्मः' इति मन्त्रेण । अप उपस्पृश्य । ततः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चशकलान् सिक्तदेशान् अद्भिः संस्पृश्याहवनीये ऽनुप्रहरति । इदं शकलानुप्रहरणमुच्यते ॥

११४. **उत्तररौहिणहोमः**—प्रतिप्रस्थातोत्तररौहिणं जुहोति—'अह्र्ज्योतिः केतुना जुषताँ सुज्योतिर्ज्योतिषाँ स्वाहा' इति मन्त्रेण । पूर्ववद्[1] याजमानम् । आपराह्णिके तु प्रवर्ग्ये 'रात्रिर्ज्योतिः केतुना जुषताँ सुज्योतिर्ज्योतिषाँ स्वाहा' इति विशेषः अयमुत्तररौहिणहोम उच्यते ॥

११५. **गार्हपत्यादिपरिषेचनम्**—अध्वर्युः उत्पत्तिक्रमेणाग्नीन् परिषिञ्चति—'सत्यं त्वर्तेन परिषिञ्चामि' । आपराह्णिके तु 'ऋतं त्वा सत्येन परिषिञ्चामि' इति मन्त्रे विशेषः । इदं गार्हपत्यादि परिषेचनमुच्यते ॥

११६. **उपयमनपर्यग्निकरणम्**—उपयमनं गार्हपत्ये नीत्वा 'अन्तरितम्' इति प्राकृतेन मन्त्रेण पर्यग्नि करोति । इदमुपयमनपर्यग्निकरणमुच्यते ॥

११७. **उपयमनसादनम्**—'सजूर्देवैः प्रातर्यावभिः प्रातर्यावाणो मा देवाः स्वस्ति सम्पारयन्तु पशुभिः' इत्युपयमनं सम्मृशति । आपराह्णिके तु अस्मिन् **मन्त्रे प्रातर्याव**पदस्थाने **सायंयाव**पदस्योहः । 'नम इशानाय. प्रजाः पशवो मे वर्धन्तामहं यजमानो मारिषम्' गार्हपत्यस्य पश्चादुपसादनीयकूर्च्चे उक्तमन्त्रेण सादयति ।

उपयमनसादनाङ्गजपः—दशहोतारं व्याचष्टे । 'भूर्भुवः सुवरुर्वन्तरिक्षमन्विह्यायं पन्था विततो देवयानो येनायन्नृषयः स्वर्गकामास्तेन गच्छामि परमे व्योमन् यथा न हीयेयँ सुकृताँ सकाशात्' अयमुपसादनाङ्गजप उच्यते ॥

११८. **प्रवर्ग्योत्तरसमिदाधानम्**—पुनः प्राङाद्रुत्य 'नम ईशानाय' इत्यादिमन्त्रेणाहवनीयस्य पश्चादुपसादनीयकूर्चे सादयति । वैकङ्कतीं समिधं तूष्णीमाहवनीये आदधाति—'तया देवतयाङ्गिरस्वद् ध्रुवासीद' इत्येतेन यजुषा 'ता अस्य सूददोहसः' इत्यृचा च । तां समिधमभिमृशति । इदं प्रवर्ग्योत्तरसमिदाधानमुच्यते ॥

११९. **प्रवर्ग्योत्तरप्रथमाहुतिहोमः**—'विद्युदसि विद्य मे पाप्मानम्' इत्यप उपस्पृशति । ततः प्रथमाहुतिं जुहोति—'भूः स्वाहा' इति । अग्नय 'इदं न

---

१. द्र० आग्निष्टोमिक पदार्थसंख्या ९९ (पृष्ठ २१२) 'ज्योतिष इदं न मम' इति यजमानस्य त्यागः ।

२. दशहोतृमन्त्र पूर्वत्र १५ तमे पृष्ठे, टि० ३ द्र० ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मम' इति याजमानम्। आपराह्णिके तु प्रवर्ग्ये –'अपीपरोमाह्नोरात्रियै मा पाह्येषा ते अग्ने समित् तया समिध्यस्वायुर्मेऽदा वर्चसा माऽजी:' इतिमन्त्रेण समिदाधानम्। समिदभिमर्शनं पूर्ववत्। 'अग्निर्ज्योतिर्ज्योतिरग्नि: स्वाहा' इति प्रथमाहुति:। त्याग: पूर्ववदिति विशेष:। द्वितीयादिदिनेषु पौर्वाह्णिके प्रवर्ग्ये तु –'अपीपरो मा रात्रिया अहो मा पाह्येषा ते अग्ने समित् तया देवतया समिध्यस्वायुर्मेदा वर्चसा माऽजी:' इति समिदाधानम्। अभिमर्शनमन्त्रौ पूर्वोक्तौ। 'सूर्यो ज्योतिर्ज्योति: सूर्य: स्वाहा' इति होममन्त्र:। सूर्याय इदं न मम' इति याजमानम्। इति विशेष:। अयं प्रवर्ग्योत्तरप्रथमाहुतिहोम उच्यते॥

१२०. **पूर्वाहुत्यङ्गगार्हपत्यावेक्षणम्**—उपयमनं सकृदतिवाल्यकूर्चे निधाय दक्षिणावृदावर्त्य 'उपप्रेत सङ्गच्छध्वं मा भागिनां भागधेय प्रमायि। सप्तर्षीणाꣳ सुकृतां यत्र लोकस्तत्रेमं यज्ञं यजमानं च धत्त' इति गार्हपत्यमीक्षते। इदं पूर्वाहुत्यङ्गगार्हपत्यावेक्षणमुच्यते॥

१२१. **द्वितीयाहुतिहोम:**–एवं समिधि पूर्वाहुतिं हुत्वा तस्या आहुते: पूर्वस्यां समिध्येव पूर्वाहुत्यपेक्षया ऽधिकद्रव्यां प्रत्यग्विलया स्रुचा द्वितीयां जुहोति—'प्रजापतये स्वाहा' इति। प्रजापतय इदं न मम इति यजमान:। अयं द्वितीयाहुतिहोम उच्यते॥

१२२. **कूर्चे लेपमार्जनम्**– अध्वर्यु: उपयमनं त्रिरतिवाल्यकूर्चं निधाय—'वृष्टिरसि वृश्च मे पाप्मानम्' इत्यप: स्पृशति। 'ओषधीभ्यस्त्वौषधीर्जिन्व' इत्युपयमनलेप कूर्चे उत्तरतो निमार्ष्टि। ओषधीभ्य इदमिति याजमानम्। प्राचीनावीती स्रुचो दक्षिणत: कूर्चे लेपमवमार्ष्टि—'पितृभ्यस्त्वा पितॄन् जिन्व' इति। यजमान: प्राचीनावीती पितृभ्य इदं न मम इत्याह। यज्ञोपवीत्यप उपस्पृशति। इदं कूर्चे लेपमार्जनमुच्यते॥

१२३. **घर्मभक्षणम्**—उपयमनं होत्रे प्रदाय होत्रध्वर्यु ब्रह्मप्रतिप्रस्थातृप्रस्तोत्राग्नीध्यजमाना: क्रमेण परस्परमुपहूयाऽग्रेण भक्षयन्ति। यजमानो होत्रादीनुपहूय प्रत्यक्षं भक्षयति—'हूतꣳहविर्मधुहविरिन्द्रतमे ऽग्नौ पिता नो ऽसि मा मा हिꣳसीरश्याम ते देवघर्ममधुमतो वाजवत: पितुमतोऽङ्गिरस्वत: स्वधाविनोऽशीमहि त्वा मा मा हिꣳसी:' इति। इदं घर्मभक्षणमुच्यते॥

१२४. तत उच्छिष्टखरे आचामति। आग्नीध्र उच्छिष्टखरे उपयमनं प्रक्षाल्याऽऽहरति। अध्वर्यु स्तदादायाऽऽहवनीये निष्टप्याऽद्भि: पूरयित्वोदग्दिशि किञ्चिज्जलं प्रक्षिपति—'सप्तर्षीन् श्रीणीहि सप्तर्षीन् जिन्व सप्त-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

र्षिभ्यः स्वाहा' इति । सप्तर्षिभ्य इदं न मम इति याजमानम् । जघनेन गार्हपत्यं प्रक्षिपति—'इदमहमग्नौ वैश्वानरे ऽमृतं जुहोमि स्वाहा' इति । अग्नये वैश्वानराय इदं न मम इति याजमानम् । अन्तर्वेदि प्रक्षिपति—'अक्षित्यामक्षिताहुतिं जुहोमि स्वाहा' इति । अक्षित्या इदं न मम इति याजमानम् ।

प्रवर्ग्यप्रायश्चित्ताहुतिमन्त्राः--पूर्ववदग्नीन् परिषिञ्चति । वेदिमध्ये प्राग्विलमुपयमनं निधाय तस्मिन् सौवर्णराजतौ रुक्मौ मदन्तीश्चानीय 'हिरण्यवर्णाः शुचयः पावका' इति चतसृभिर्ऋग्भिरन्ते मार्जयित्वा ऽप्स्वेव निनीय, आज्यस्थाल्याः स्रुवेणोपहत्य, प्रतिमन्त्रं प्रायश्चित्ताहुतीर्जुहोति—'प्राणाय स्वाहा, व्यानाय स्वाहा, अपानाय स्वाहा, चक्षुषे स्वाहा, श्रोत्राय स्वाहा, मनसे स्वाहा, वाचे सरस्वत्यै स्वाहा, पूष्णे स्वाहा, पूष्णे शरसे स्वाहा, पूष्णे प्रपथ्याय स्वाहा, पूष्णे नरन्धिषाय स्वाहा, पूष्णे घृणये स्वाहा, पूष्णे नरुणाय स्वाहा, पूष्णे साकेताय स्वाहा, नमस्ते घर्मभूपतये स्वाहा, नमस्ते घर्मभुवनपतये स्वाहा, नमस्ते घर्मभूतानां पतये स्वाहा, घर्माय स्वाहा, अश्विभ्यां[1] स्वाहा, इन्द्राय स्वाहा, बृहस्पतये स्वाहा, प्रजापतये स्वाहा, ब्रह्मणे स्वाहा, यथालिङ्गत्यागो यजमानस्य । इति एते प्रवर्ग्यप्रायश्चित्ताहुतिमन्त्रा उच्यन्ते।।

१२५. **ऋग्यजुःसामतोयज्ञभ्रेशप्रायश्चित्तम्, घर्मोत्सादनप्रैषश्च** --ऋक्तो यजुष्टश्च भ्रेषप्रायश्चित्तद्वयं दर्शपौर्णमाससवद्धुत्वा 'सामतो यज्ञभ्रेशप्रायश्चित्तं करिष्ये' इति यजमानेन सङ्कल्पे कृते 'ब्रह्मणा स्व, स्वाहा' इत्याहवनीये होमे कृते [1]उपयमनमन्तर्वेदि प्राग्बिलं सादयित्वा [2]परिघर्म्यमासन्द्यां निदधदाह—'घर्मायोत्साद्यमानायानुब्रूहि ।' अयं घर्मोत्सादनप्रैष उच्यते ।।

१२६. तत उपयमनं सम्राडासन्द्यां प्राग्विलं सादयति—'स्वाहा त्वा सूर्यस्य रश्मिभ्यः' इति । आपरात्विके तु प्रत्यग्विलं सादयति—'स्वाहा त्वा नक्षत्रेभ्यः' इति । सर्वाणि घर्मपात्राणि संसाद्य 'शन्नो वातः' इति शान्ति जपन्ति ।

परिघर्म्यम्— उपयमनादीनि घर्मपात्राणि परिघर्म्यपदवाच्यानि ।।

१२७. **उपयमनम्**— महापुष्करं जुहूसदृशं महादण्डं पात्रमुपयमनमित्युच्यते ।।

१२८. **शफे** यज्ञियकाष्टनिर्मिते महावीरधारणार्थं मध्यभागे वर्तुले द्वे शफपदवाच्ये ।।

---

१. द्र० अग्रिमपदार्थसंख्या १२७ । २. द्र० अग्रिमपदार्थसंख्यायामन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१२९. **प्रचरणी**—विकङ्कतकाष्ठनिर्मितं जुहूसदृशं पात्रं प्रचरणीपदेनोच्यते ॥

१३०. **प्रवृञ्जनीयखरः**—गार्हपत्यस्योत्तरतः प्रादेशपरिमाणं सिकतानिर्मितं मण्डलं प्रवृञ्जनीयखर इत्युच्यते ॥

१३१. **उद्वासनीयखरः**—तथैवाहवनीयस्योत्तरतः कृतं मण्डलमुद्वासनीयखर इत्युच्यते ॥

१३२. **प्रचरणीयमहावीरः**—यस्मिन् महावीरे घर्मः पच्यते स प्रचरणीयमहावीरपदवाच्यः ॥

१३३. **उपशयौ**—उप समीपे शयाते इति व्युत्पत्त्या द्वौ महावीरावुपशयपदार्थौ ॥

१३४. **उपसदिष्टिः**—तत उपसदिष्टिः ।

उपसदिष्टिसंकल्पः—'उपसदिष्टया यक्ष्ये' इति सङ्कल्पयति । अयमुपसदिष्टिसङ्कल्प उच्यते ॥

१३५. **हविरधिश्रयणप्रैषः**—अग्निः सोमो विष्णुरिति प्रधानदेवताः । आज्यं द्रव्यम् । अध्वर्युः स्फ्यमाददान आह—'अग्नीन्मदन्तीरधिश्रय हविरधिश्रयैह्युपसीद ।' अयं हविरधिश्रयणप्रैष उच्यते ॥

१३६. अत्रेध्मावर्हिषोराहरणं नास्ति । शुल्वप्रभृति कर्म समन्त्रकं प्रकृतिवत्करोति । इध्मसम्भरणमन्त्रे **ततस्त्वां चतुर्दशधे**त्यूहः । वेदं परिभोजनीयांश्च कृत्वा 'कर्मणे वाम्' इत्यादि करोति । आतिथ्येष्टचन्त एव प्रस्तरे वर्हिः परिधिषु शकलानीत्यादिमन्त्रवत् कृतं चेत्तदेदानीं पूर्वोक्तप्रैषमुक्त्वा 'कर्मणे वाम्' इत्यादि करोति ।

अग्निपरिस्तरणानन्तरं स्फ्यमग्निहोत्रहवणीं जुहूमुपभृतं स्रुवमाज्यस्थालीं स्रुवसंसादनार्थं पात्रान्तरं वेदं वेदाग्राणीति पात्राण्यासादयति । ब्रह्मोपवेशनम् । पृष्ट्यास्तरणम् । पवित्रकरणम् । 'यजमान वाचं यच्छ' इति प्रैषः । 'वेषाय त्वा' इत्यग्निहोत्रहवणीमादाय—'प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः' इति प्रतितपति । अग्निहोत्रहवण्यां मदन्तीरानीय प्रोक्षणीवत् संस्कृत्य 'शुन्धध्वम्' इत्यादिप्राकृतमन्त्रेणोत्तानानि पात्राणि प्रोक्ष्य आज्यस्थाल्यां प्राकृतमन्त्रेणाज्यमानीय तथैव पर्यग्नि कृत्वा 'अयं वेदः' इत्यादिना मन्त्रेण वेदमादाय प्रकृतिवद् वेदिं सम्मार्ष्टि—'देवस्य त्वा' इत्यादिना । स्फ्यमादाय 'इन्द्रस्य बाहुरसि' इत्यादिना सम्मृश्य 'पृथिव्यै वर्मासि' इत्यादिनाऽऽस्तीर्णबर्हिष उपरि

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दर्भं निधाय स्तम्बयजुर्हरति । नात्र मन्त्रेण वेदिखननम् । अतएव तन्मन्त्रोपि न ।

स्फ्यं प्रकृतिवत् स्तब्ध्वा, 'मदन्तीरासादयेध्मार्बर्हिरुपसादय स्रुवं च सम्मृड्ढि हविषो दे३हि' इति सम्प्रेष्यति । आग्नीध्रः स्रुवं स्रुवमन्त्रेण सम्मृज्य स्रुचौ ध्रौवमन्त्रेण सम्मार्ष्टि । अध्वर्युः ध्रौवमन्त्रेणाष्टकृत्वो जुह्वां गृह्णाति । उपभृति चतुर्वारम् । आज्यस्थाल्याज्यं पात्रान्तरे ऽवनीय तस्यामाज्यस्थाल्यां सकृत् ध्रौवमन्त्रेण गृहीत्वा, पात्रान्तरं स्रुवं च वेद्याः पश्चान्निदधाति । ततो वेद्यां स्रुचौ स्वस्वमन्त्रेणासाद्य ध्रौवमन्त्रेण तूष्णीं वा ऽऽआज्यस्थालीं सादयति । एता असदन्निति मन्त्रे **एते असदशमिति** 'ता विष्णो' इत्यत्र **ते विष्णो** इति चोहः । पात्रान्तरस्याज्येन स्रुवमभिपूर्य 'स्योनो मे मासीद' इत्यादिना स्रुचां दक्षिणतः स्थापनादि करोति । 'ऋषभो ऽसि' इत्यादिना आज्यस्थाल्याआज्यमवनयति । यजमानो 'यन्मे अग्न' इत्यादिमन्त्रं जपति ।

देवपत्नीमन्त्राः—अध्वर्युः प्रदक्षिणमावृत्य जघनेन गार्हपत्यमुपविश्य देवपत्नीर्व्याचष्टे—'सेनेन्द्रस्य, धेना बृहस्पतेः, पथ्या पूष्णः, वाग्वायोः, दीक्षा सोमस्य, पृथिव्यग्नेः, वसूनां गायत्री, रुद्राणां त्रिष्टुप्, आदित्यानां जगती, विष्णोरनुष्टुप्, वरुणस्य विराट्, यज्ञस्य पङ्क्तिः, प्रजापतेरनुमतिः, मित्रस्य श्रद्धा, 'सवितुः' प्रसूतिः 'सूर्यस्य मरीचिः । चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । पर्जन्यस्य विद्युत् । चतस्रो दिशः । चतस्रो ऽवान्तरदिशाः—अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च । आपश्चौषधयश्च । ऊर्क् च सूनृता च देवानां पत्नयः । एते मन्त्रा देवपत्नीसंज्ञकाः ॥

१३७. ततः 'अग्नये समिध्यमानायानुब्रू३हि' इत्यादि । इध्मं सकृद्वा त्रिर्वा ऽभ्यादधाति ॥ समिधं न परिशिनष्टि । अनुयाजानामभावात् । वेदेनोपवाजपति । आज्यस्थाल्याः । स्रुवेणाज्यमादायस्रौवाधारेण प्रचर्य आग्नीध्रं प्रेष्यति 'अग्नीदग्नी॰स्त्रिस्त्रिः सम्मृड्ढि' इति । नाऽत्र जौहव आघारः । 'अग्निर्देवो होता देवान्यक्षत्सीद होतः' इत्यमन्त्र प्रवरः । होतुर्घृतवतीशब्दं श्रुत्वा जुहूपभृतावाददान आह—'अग्नये' इत्युपांशु । 'अनुब्रू३हि' इत्युच्चैः । अत्यात्रम्याऽऽश्राव्य प्रत्याश्राविते 'अग्नि' इत्यपांशु 'यज' इत्युच्चैराह । होतुर्वषट्कारे आहवनीयस्य पूर्वार्धेऽर्धमाज्यं जुहोति । तत्रैव स्थितः सन्नर्धेनाज्येन मध्ये सौमं यजति । उपभृत्स्थमाज्यं जुह्वां समावपमान आह—'विष्णवे ऽनुब्रू६हि' इति वषट्कृते पश्चात् सर्वं जुहोति । सर्वत्र **दब्धिरसीत्यादिना** यज-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानोऽनुमन्त्रयते । यथालिङ्गं त्यागं च पठति । उदङ्ङत्याक्रम्य यथा व्यतनꣳस्रुचौ सादयति । इयमुपसदिष्टिरिति गीयते ॥

१३८. **उपसद्धोमः**— ततोऽग्नीन्मदन्त्यापाꣳ: इत्यादि निह्नवान्तं पूर्ववत्। ततः सव्यहस्ते प्रस्तरं धृत्वा आज्यस्थाल्याज्येन पूर्णं स्रुवं प्रस्तरोपर्यग्रभागे इषुवत् धृत्वा प्रथमामुपसदं जुहोति—'या ते अग्नेऽयाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीन्त्वेषं वचो अपावधीꣳ स्वाहा' इति । 'अग्नय इदं न मम' इति यजमानः । परिधिषु शकलानुपसङ्गृह्णाति । प्रस्तरे बर्हिर्यावन्मात्रं सङ्गृह्णाति । तदुभयं स्पन्द्यया ऽविग्रथ्या ऽऽहवनीये ऽतिवाल्पाद्भिरभ्युक्ष्योत्तरतः सादयति । अयमुपसद्धोम उच्यते ॥

१३९. प्रथमायामुपसदि यत्र स्रुचः सादितास्ततः प्राक् द्वितीयायामुपसदि सादनीयाः । ततऽपि प्राक् तृतीयायां त्वरमाणा इव ऋत्विज उपसद्भिः प्रचरेयुः । न कृताकृतमाद्रियेरन् ।

त्रिस्तनव्रतप्रैषः— अग्रेण शालां तिष्ठन् सम्प्रेष्यति—'सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं प्रयच्छत' इति । अयं त्रिस्तनव्रतप्रैष उच्यते ॥

१४०. प्रतिप्रस्थाता ऽध्वर्युरन्यो वा कश्चिद् यजमानाय व्रतं प्रयच्छति । यजमानो मध्यन्दिने परिश्रित्य व्रतयति । 'या ते अग्ने रुद्रिया तनूस्तया नऽ पाहि तयस्यास्ते स्वाहा' इति । समानमन्यत् । स्थूणाशङ्कुनिखननमृदासन्द्यभ्रिखरकरणानि वर्जयित्वा ।

त्रिस्तनव्रतदोहनप्रैषः— एवमापराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्योपनिष्क्रम्य सम्प्रेष्यति—'सुब्रह्मण्य सुब्रह्मण्यामाह्वय त्रिस्तनव्रतं दोहयत' इति । अयं त्रिस्तनव्रतदोहनप्रैष उच्यते ॥

१४१. उपसमिन्धनवेलायामग्नीन् ज्योतिष्मत इत्यादि करोति । त्रिस्तनव्रतमर्धरात्रे प्रयच्छति ।

द्विस्तनदोहनप्रैप्रः - अपररात्रे सम्प्रेष्यति । द्विस्तनव्रतमर्धरात्रे प्रयच्छति। अपररात्रे सम्प्रेष्यति 'द्विस्तनव्रतं दोहयत' इति । अयं द्विस्तनव्रतदोहनप्रैष उच्यते ॥

१४२. **मध्यमोपसद्धोमः**—पुनरग्नीन् ज्योतिष्मत इत्यादि । उदित आदित्ये विसृष्टायां वाचि मध्यमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति—'या ते अग्ने रजाशया तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीन् त्वेषो वचो अपावधीꣳ स्वाहा' इति मध्यमामुपसदं जुहोति । अयं मध्यमोपसद्धोम उच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१४३. उपनिष्क्रम्य 'सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं प्रयच्छत' इति। कश्चिद् व्रतं प्रददाति।

महावेदिः—अथ महावेदिप्रकारः—आहवनीयपूर्वशङ्कोः सकाशात् षट् प्राञ्चि पदानि प्रक्रम्य शालामुखीयशङ्कुं निहन्ति। तस्माच्छङ्कोः सकाशात् षट्त्रिंशत्पदेषु यूपावटीयं शङ्कुं निहन्ति। शालामुखीयाद् दक्षिणोत्तरयोः पञ्चदशपदे क्रमेण शङ्कुं निहन्ति। तौ महावेद्याः श्रोणिस्थानम्। यूपावटीयात् द्वादशपदे दक्षिणोत्तरयोः क्रमेण द्वौ शङ्कू निहन्ति। तौ महावेद्या अंसस्थानम्। अक्षण्यामानेन प्रमाय समन्तं स्पन्द्यया रज्ज्वा महावेदिं परिस्तनोति। प्राकृतवेदिवन्मध्यसूत्रं पृष्ठ्यासंज्ञकम्। इयं महावेदिरित्युच्यते॥

१४४. **सौमिक्युत्तरवेदिः** यूपावटीयाच्छङ्कोरनुस्पन्द्य द्वादश प्रत्यञ्चि क्षुद्रपदानि प्रक्रम्य मध्यम औत्तरवेदिकः शङ्कुः। तस्मात् पञ्च दक्षिणा पञ्चोदञ्चि क्षुद्रपदानि प्रक्रम्य शङ्कू निहन्ति। तौ उत्तरवेद्याः श्रोणिस्थानम्। यूपावटीयात् प्रत्यगर्धं प्रक्रम्य चत्वार्युदञ्चि प्रक्रम्य तावंसौ। अक्षण्या प्रमाय स्पन्द्यया परितनोति। इयं सौमिक्युत्तरवेदिरुच्यते॥

१४५. **उपरवाणां कालः**—मध्यमाद् औत्तरवेदिकात् षट् प्रत्यञ्चि पदानि प्रक्रम्य दक्षिणांसप्रमं प्रक्रम्य तत्र स्फ्यं निदधाति। स देश उपरवाणां काल[1] उच्यते॥

१४६. **सौमिक उत्करः**—महावेद्या उत्तरांसीयाच्छङ्कोरनुस्पन्द्य द्वादश प्रत्यञ्चि पदानि प्रक्रम्य उदक् त्रयोदशं प्रक्रामति। स सौमिक उत्कर उच्यते॥

१४७. एवं मीत्वा वेदादानवेदिसम्मार्जने केचिदिच्छन्ति। महावेदिं परिस्तीर्य उपरवाणां काले स्तम्बयजुर्हरति। पाणी संमृश्य स्फ्यादानादि पशुवन्धवत् करोति। महावेद्याः पूर्वं परिग्राहं परिगृह्णाति—'इमां नराः कृणुत० मादित्यवतीं विश्वदेव्यावतीं वर्ष्मन्० ष्ठेत्।

वेदिकारप्रैषः—महावेद्याः सकाशात् आग्नीध्रस्त्रिर्मृदं हरति। अथाग्रेण शालां तिष्ठन् सम्प्रैषमाह—'वेदिकारा वेदिं कल्पयत, प्रस्थलानि भिन्दत, प्रतिनिम्नान् पूरयतः किंशारूणि निरस्य प्राचीमुदीचीं प्रवणां निस्तिष्ठत।' इत्ययं वेदिकारप्रैष उच्यते॥

---

१. कालनिर्देशे 'देशः' इति पदं व्यर्थम्। देशकालयोः परस्परमसम्बन्धात् वर्णानुक्रमपदार्थसूच्यामपि 'उपरवाणां काल' इत्येव पठ्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१४८. **चात्वालमध्यः**—अध्वर्यु पुरुषाः स्फ्यपरश्वभ्यादिभिस्तथा कुर्वन्ति । अध्वर्युर्महावेद्या उत्तरांसीयाच्छङ्कोः सकाशाद् वेद्यन्तेन त्रीणि प्रत्यञ्चि पदानि प्रक्रम्योदग् द्वे पदे प्रक्रामति । स देशश्चात्वालमध्य उच्यते ॥

उदगेकमेव स चात्वालदक्षिणान्तो वा भवति । तच्चात्वालं परिलिखति । पशुवदुत्तरनाभिप्रच्छादनान्तं करोति । आपराह्णिकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य उपनिष्क्रम्य सम्प्रेष्यति—'सुब्रह्मण्य सुब्रह्मण्यामाह्वय द्विस्तनव्रतं दोहयत' इति । तदर्धरात्रे प्रयच्छति । समानमन्यत् । अग्नीन् ज्योतिष्मत इत्यादि । अपररात्रे संशास्ति—'एकस्तनव्रतं दोहयत अग्नीन् ज्योतिष्मत' इत्यादि । उदित आदित्ये उक्तप्रकारेण वाग्विसर्गानन्तरं उत्तमाभ्यां प्रवर्ग्योपसद्भ्यां प्रचरति—'या ते अग्ने हराशय तनूर्वर्षिष्ठा गह्वरेष्ठोग्रं वचो अपावधीन् त्वेषं वचो अपावधीꣳ स्वाहा' इति उपसद्धोममन्त्रे विशेषः । शालाया अत्रे तिष्ठन् 'सुब्रह्मण्यामाह्वाऽर्धस्तनव्रतं प्रयच्छत' इत्याह । कश्चिद् यजमानाय व्रतं प्रयच्छति ।

प्रवर्ग्योद्वासनप्रैषः—तदानीमेवापराह्णिके प्रवर्ग्योपसदौ समस्योपनिष्क्रम्य 'सुब्रह्मण्य सुब्रह्मण्यामाह्वयं प्रतिप्रस्थातः प्रवर्ग्यस्यावृताप्रवर्ग्यꣳ सꣳसादयोद्वासनाय' इति अयं प्रवर्ग्योद्वासनप्रैष उच्यते ॥

१५०. **प्रवर्ग्योत्तरशान्तिपाठः**—पदं त्रेधा विभज्य 'नमो वाच' इति शान्तिं पठन्ति । अयं प्रवर्ग्योत्तरशान्तिपाठ उच्यते ॥

१५१. ततः प्रतिप्रस्थाता ऽग्रेणाहवनीयं तृणानि संस्तीर्य तदुपरि परिधर्म्यं सादयति । तथाहि—प्रवृञ्जनीयोद्वासनीयौ खरौ पृथक् सतयोः स्थापनीयौ । आग्नीध्रस्तत्रैवोच्छिष्टखरं सते स्थापयति । दक्षिणद्वारेण शालाया बहिर्गत्वा तं खरं मर्जालीयदेशे न्युप्य यथागतमेति । अध्वर्युः शालाया द्वाराणि परिश्रित्य प्राग्वंश एव पत्नीमुदग्देश वस्त्रेणाच्छाद्य अग्नीन् परिस्तीर्य दक्षिणतो ब्रह्मयजमानावुपदेश्य गार्हपत्ये आज्यं संस्करोति । प्रतिप्रस्थाता आहवनीये शालाकमिध्ममादीप्य मुखदघ्ने धारयन् पुरस्तात् प्रत्यङ्मुखस्तिष्ठति ।

इध्मप्रदीपनहोमः—अध्वर्युः पश्चात् प्राङ्मुखस्तिष्ठन् स्रुवाहुत्या ऽभिजुहोति—'घर्म या ते दिवि शुग्या गायत्रे छन्दसि या ब्राह्मणे या हविर्धाने तां त एतेनावयजे स्वाहा' इति । घर्माय इदं न मम इति यजमानः । प्रतिप्रस्थाता तमिध्ममग्नौ प्रक्षिप्यान्यमिध्ममादीप्य नाभदघ्ने धारयति । अध्वर्युः द्वितीयामाहुतिं जुहोति—'घर्म या ते ऽन्तरिक्षे शुग्या त्रैष्टुभे छन्दसि या राजन्येया

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ऽग्नीध्रे तां त एतेनावयजे स्वाहा' इति । प्रतिप्रस्थाता तमिध्मं प्रक्षिप्याऽपरमादीप्य जानुदघ्ने धारयति । अध्वर्युः तृतीयामाहुतिं जुहोति—'धर्म या ते पृथिव्याꣳ शुग्या जागते छन्दसि या वैश्ये या सदसि तां त एतेनावयजे स्वाहा' इति । उभयत्र त्यागः प्रथमवत् । प्रतिप्रस्थाता तमग्नौ प्रास्यति । अयं इध्मप्रदीपनहोम उच्यते ।।

१५२. **महावेदिगमनम्**—ततो ऽध्वर्युर्द्वाराणि विधृत्य प्रावर्गिक सर्वं सम्भारमादाय सर्वैः सह पूर्वया द्वारोपनिष्क्रामति—'अनु नो ऽद्यानुमतिर्य० दा शुषे मयः । अन्विदनुमते त्वं० तारिषः' इति मन्त्रद्वयमध्वर्युरेव पठति । अध्वर्युः महावेदिं पद्भ्यावक्रम्य 'प्रस्तोतः साम गाय' इति प्रेष्यति । प्रस्तोता साम गायति । निधनं सर्वे पठन्ति—'दिवस्त्वा परस्पाया अन्तरिक्षस्य तनुवः पाहि पृथिव्यास्त्वा धर्मणा वयमनुक्रामाम सुविताय नव्यसे' इति । महावेदिमभिक्रम्य मध्यभागे द्वितीयं निधनं पठन्ति । ब्रह्मणस्त्वा परस्पायाः क्षत्रस्य तनुवः पाहि विशस्त्वाधर्म्मणा वयमनुक्रामाम सुविताय नव्यसे'इति उपरवदेशं गत्वा तत्र तृतीयं निधनं पठन्ति—'प्राणस्य त्वा परस्पायै चक्षुषस्तनुमः पाहि श्रोत्रस्य त्वा धर्मणा वयमनुक्रमाम सुविताय नव्यसे' इति । अभिक्रम्योत्तरवेदिसमीपे तिष्ठन्ति । इदं महावेदिगमनमुच्यते ।।

१५३. ततः प्रेष्यत्याग्नीध्रम्—'अनेनोदकुम्भेन सन्ततया धारया त्रिः प्रदक्षिणं परिषिञ्चन् परीहि' इति । आग्नीध्रः सप्रवर्ग्यमुत्तरवेदिं परिषिञ्चंस्त्रिः प्रदक्षिणं पर्येति । अध्वर्युः परिषेककाले यजमानं वाचयति—'वल्गुरसि शंयुधाया शिशुर्जनधायाः शञ्च वक्षि परि च वक्षि' इति । आग्नीध्रः कुम्भं निधाय यथेतं त्रिः पर्यति । अध्वर्युः 'चतुस्त्रक्तिर्नाभिर्ऋतस्य सदो विश्वायुः शर्मसप्रथाः । अषट्टेषो अपह्वरो न्यद्व्रतस्य सश्चिम' इत्युत्तरनाभिमभिमृशति ।

प्रचरणीयमहावीरपरिपूरणम्—प्रवृञ्चनीयौद्वासनीयौ खेरावुत्तरतो ऽवकीर्य धृष्टीभ्यां प्रागायतं तयोः खरं कृत्वा तत्र सुवर्णशकलं निधाय प्राग्ग्रीवमुत्तरलोम कृष्णाजिनं तत्रास्तीर्य रौहिणपिष्टैर्मुञ्जप्रलवैः सिकताभिश्चानुप्रकीर्य प्रचरणीयं महावीरं शफाभ्यां परिगृह्य 'घर्मैत ते ऽन्नमेतत् पुरीषं तेन वर्धस्व चा च तेप्यायस्व । वर्धिषीमहि त्वा वयमा च प्यासिषीमहि' इति मन्त्रेण मधुमिश्रेण दध्ना पूरयति । 'महीनां पयोऽसि विहितं देवत्राज्योतिर्मा असित्वनस्पतीनामोषधीनाꣳ रसो वाजिनं त्वा वाजिनो वनयामः' इति पुनस्तेनैवाऽभिपूरयति । इदं प्रचरणीयमहावीरपरिपूरणमुच्यते ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१५४. **घर्मपात्रोत्सादनार्थसादनम्**—ततः 'ऊर्ध्वं मनः सुवर्गम्' इति प्रचरणीय महावीरं खरस्य पूर्वार्धे सादयति। तं परितो घर्मपात्रैः परिचिनोति। तद्यथा—बिलवन्ति पात्राणि मधुमिश्रेण दध्ना पूरयित्वा, बिलरहितानि तु तेन द्रव्येण सम्मृज्य, वेदरज्जुदामासन्दीधवित्रादीनि विस्रस्य, आज्यस्थाल्या उपरि धवित्रम्, समिधो दश दश द्विवार उपशयो महावीरौ शफाभ्यां परिगृह्य सादयति। एतत् घर्मपात्रोत्सादनार्थसादनमुच्यते।

१५५. **उत्सादनार्थं घर्मपात्रासादनक्रमः**—

उपप्रचरणीं रुक्मौ पिन्वने मौञ्जमेव च।
शफौ रौहिण हवनी समिधः कुशवेदकम्॥
स्थूणोपयमरज्जू च परिध्यभ्री च धृष्टिके।
पवित्रे समिधः स्थालीं धवित्रं च कपालके॥
'स्रुवं कुशमयं वेदमासन्दीं मृदमेव च।'

इदं सार्धकारिकाद्वयं उत्सादनार्थं घर्मपात्राणामासादने क्रमप्रतिपादकम्।

घर्मपात्राच्छादनम्—'घर्मैतत्ते ऽन्नमेतत्पुरीषं तेन वर्धस्व चा च प्यायस्व। वधिषीमहि त्वा वयमा प्यासिषीमहि' इति मन्त्रेण मृदं सिकतामुञ्जरौहिणैरनुप्रकिरति। ततः सर्वाणि घर्मोपकरणानि प्राचीनग्रीवेणोत्तरलोम्ना कृष्णाजिनेनाऽऽच्छादयति। इदं घर्मपात्राच्छादनमुच्यते।

१५६. **आसादितघर्मोपकरणोपस्थानम्**—तदन्तरम् 'अयं यः पुरुषरूपो ऽसि स न आस्येन तिष्ठसि नोर्ध्वो न तिर्यग्विधां ते ऽनुविहितोस्मि विधां मे ऽनुविहितो ऽस्मि स त्वं नाकमारोह सह यजमानेन साकम्' इत्यनेन मन्त्रेण आसादितघर्मोपकरणान्युपतिष्ठते। एतदासादितघर्मोपकरणोपस्थानमित्युच्यते।

१५७. आस्कान्द्यौः पृथिवीमस्कानृषभोयुवागाः। स्कन्नेमाविश्वा भुवनास्कन्नो यजः प्रजनयतु। अस्कानजनि प्राजन्यास्कन्नाज्जायते मृषास्कन्नात् प्रजनिषीमहि।

घर्मोद्वासनसामप्रैषः—दध्ना मधुमिश्रेण मुष्टिना ऽवोक्ष्य 'प्रस्तोतर्वार्षाहरꣳ साम गायेष्टाहोत्रीयञ्च' इति प्रस्तोतारं प्रेष्यति। अयं घर्मोद्वासनसामप्रैष इत्युच्यते।

१५८. अनेनोदकुम्भोनसन्ततया धारया त्रिःप्रदक्षिणं परिषिञ्चन् 'परी-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

हि' इत्याग्नीध्रं प्रेष्यति । आग्नीध्रः पूर्ववत् प्रदक्षिणं परिषिच्य कुम्भं निधाय त्रिरपसलैः[1] पर्येति ।

यजमानघर्मोपस्थानम्—तदानीमध्वर्युर्यजमानं वाचयति—'रन्तिर्नामासि दिव्यो गन्धर्वः । तस्य ते पद्वद्धविर्धानम् । अग्निरध्यक्षाः । रुद्रो ऽधिपतिः । समहमायुषा । सं प्राणेन । सं वर्चसा । सं पयसा । सं गौपत्येन । सꣳरायस्पोषेण । व्यसौ । यो स्मा०द्विष्मः । अचिक्रदद् वृषा हरिः । महान्मित्रो न दर्शतः । सꣳ सूर्येण रोचते । चिदसि समुद्रयोनिः । इन्दुर्दक्षः श्येन ऋतावा । हिरण्यपक्षः शकुनो भुरण्युः । महान्तसधस्थे ध्रुव आनिषत्तः । नमस्ते अस्तु मा मा हिꣳसीः । विश्वावसुं सोमगन्धर्वम् । आपो ददृशुषीः । तदृतेनाव्यायन् । तदन्ववैत् । इन्द्रो रारहाण आसाम् । परिसूर्यस्य परिधीꣳ रपश्यत् । विश्वावसुरभितन्नो गृणातु । दिव्यो गन्धर्वो रजसो विमानः । यद्वाघासत्यमुत यन्न विद्म । धियो हिन्वानो मिय इन्नो अव्यात् । सस्निमविन्दच्चरणे नदीनाम् । अपावृणोद्दुरोअश्वमब्रजानाम् । प्रासाङ्गन्धर्वो अमृतानि वोचत् । इन्द्रो दक्षं परिजानादहीनाम् । यजमानो गार्हपत्यमुपतिष्ठते । एतत्त्वं देवघर्म देवो देवानुपागाः । इदमहं मनुष्यो मनुष्यान् । सोमपीथानुमेहि । सह प्रजया सह रायस्पोषेण' इति यजमानघर्मोपस्थानमित्युच्यते ।

१५९. ततो ऽञ्जलिना ऽपो गृह्णाति—'सुमित्रा न आप ओषधयः सन्तु' इति । 'दुर्मित्रास्तस्मै भूयासुर्योस्मान् द्वेष्टि यञ्च वयं द्विष्मः' इति । ता अपो नैर्ऋत्यां दिशि प्रक्षिपति ।

आदित्योपस्थानम्—अप उपस्पृश्यादित्यमुपतिष्ठते—'उद्वयं तमसस्परि ज्योतिष्पश्यन्त उत्तरम् । देवन्देवत्रा सूर्यमगन्मज्योतिरुत्तमम्' इति ।

गोप्तादेशः—अध्वर्युः प्रवर्ग्यमवकाभारेण प्रच्छाद्य गोप्तारमादिशति—'वयोभ्यो महावीरं गोपाय, प्रस्तोतः श्यैतेनोन्वेहि' । अयं प्रैषो गोप्तादेश इत्युच्यते ।

१६०. **अन्तिमप्रवर्ग्यसम्बन्धि शालामुखीयोपस्थानम्**– ततो यथेतमेत्य गार्हपत्ये 'उदुत्यम्' इति 'चित्रम्' इति च द्वाभ्यामृग्भ्यां स्रुवाहुतीर्हुत्वा सर्वे शालामुखीयमुपतिष्ठन्ते—'इममूषुत्यमस्माभ्यꣳसम् । अग्ने देवेषु प्रवोचः' इति आग्नीध्रीयदेशे उत्तरां शान्तिं पठति । इदमन्तिमप्रवर्ग्यसम्बन्धि शालामुखीयोपस्थानमुच्यते ।

---

१. द्र० पृष्ठ ८६, पदार्थसंख्या ४७९ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६१. इदं [पदार्थसंख्या ८०-१६०] **प्रवर्ग्य**मित्युच्यते ।

१६२. **अग्नीषोमीय पशुः—अथाग्नीषोमीयः पशुः** । तस्य निरूढपशुवद् देवतासङ्कल्पः । आतिथ्यावर्हिरेव पञ्चविधम्, तेनैव प्रस्तरेण सहशुल्वादि सम्भरति, ते एव विधृती प्रज्ञाते निधाय तैरेव परिधिभिरिध्मं सम्भरति । ततस्त्वां त्रयीविंशतिधेत्यूहः परिभोजनीयान् वेदं च कृत्वा महावर्हिः सम्भृत्य अन्यानपि तत्तदर्थमुष्टीन् सम्भृत्य, निरूढपशुवदग्नीषोमीयस्य पशोः शाखां समन्त्रां तूष्णीं प्लक्षशाखाम्, एवं सवनीयस्य द्वे शाखे, दधिग्रहाय तूष्णीमेकां शाखां मैत्रावरुण्यर्थं समन्त्रामेकां शाखाम्, सवनीयाऽऽमिक्षार्थं समन्त्रां दधिघर्मार्थं शतातङ्क्यार्थमाशिरार्थं च तूष्णीम्, इत्यष्टौ शाखाः क्रमेण युगपद्वाऽऽहृत्य **इषे त्वेत्यादि यजमानस्य पशून् पाहि** इत्यन्तम् । ततः **अभ्यादधाताधर्म**मित्यादि अग्निप्रणयनम् । पदतृतीयं शालामुखीयनिकटे तृतीयमुपयमनीषु । तृतीयमञ्जनार्थं निदधाति । अग्निप्रणयनकाले कश्चिद् राजा नमादायोत्तरतस्तिष्ठति । अग्नौ प्रणीते सति तेनैवागत्यासन्द्यां स्थापयति । ततः स्वयं होमान्तं करोति । ततो ब्रह्माणं दक्षिणत उत्तरवेदेर्मन्त्रेणोपवेश्य अध्वर्युः पाणी सम्मृश्य उत्तरपरिग्रहादि करोति । उपरवदेशे स्फ्यं स्तब्ध्वा सम्प्रैषमाह—'प्रोक्षणीरासादयेध्मावर्हिरुपसादय' इति । तत उपरवदेशे प्राकृतमन्त्रेण स्फ्यमुदस्यति । इदं (पदार्थसंख्या १४३-१६२) **महावेदिकरण**मित्युच्यते ।।

१६३. आग्नीध्रः प्रोक्षणीरासाद्य महावर्हिरुत्तरवेदिसमिन्धनार्थं लौकिकमिध्ममासादयति । अध्वर्युः आहृताभिः प्रोक्षणीभिर्महावेदिं वर्हिरिध्मञ्च तूष्णीं प्रोक्षति । अपूर्ववर्हिमुष्टिं प्रोक्ष्य तेन पृष्ठ्यां प्रच्छाद्य अनसी प्रक्षाल्य अन्तरेण चात्वालोत्करौ प्रपाद्य महावेद्यां पृष्ठ्याया दक्षिणत उत्तरतश्च अरत्निमात्रं विहाय प्राचीं स्थापयित्वा उद्धृतफलकं दक्षिणम्, अनुद्वृतफलकं उत्तरं च शकटं प्रोक्षति—'**वैष्णवी विष्णवे शुन्धेथाम्**' इति ।

दक्षिणहविर्धानवर्तनीहोमः—'एहि यजमान' इति यजमानमामन्त्र्य पूर्वया द्वारा शालां प्रपाद्य शालामुखीय आज्यं विलाप्य उत्पूय 'युञ्जते मन' इत्यृचा अन्वारब्धे यजमाने चतुर्गृहीतेनाहवनीये जुहोति । सवित्र इदं न मम । अपरं चतुर्गृहीतं गृहीत्वा सस्रुवाज्यस्थालीं स्फ्यमुदपात्रं वर्हिर्हिरण्यमादाय 'एहि यजमान' इति यजमानमामन्त्र्य अन्वग्यजमानो ऽनूची पत्नी पदतृतीयमादाय पूर्वया द्वारोपनिष्क्रम्य दक्षिणस्यं हविर्धानस्य दक्षिणस्यां वर्तन्यां स्फ्येनोद्धत्यावोक्ष्य हिरण्यं तत्र निधाय परिस्तीर्य परिषिच्य चतुर्गृहीतमाज्यं

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'इदं विष्णुः' इत्यृचा जुहोति। अयं होमो दक्षिणहविर्धानवर्तनीहोम इत्युच्यते ॥

१६४. **दक्षिणधूरञ्जनम्**—पदपांसूनामर्धान् पत्न्यञ्जलावोप्य संस्रावेणाभिधारयति। पत्नी प्राचोत्तानेन पाणिना दक्षिणमक्षधुरमनक्ति—'आ नो वीरो जायतां कर्मण्यो यꣳ सर्वे ऽनुजीवाम यो वहूनामसद्वशी।' इदं दक्षिणधूरञ्जनमित्युच्यते ॥

१६५. **उत्तरहविर्धानोत्तरवर्तनीहोमः**—अध्वर्युः अवरं चतुर्गृहीतं गृहीत्वा उत्तरस्य हविर्धानस्योत्तरस्यां वर्तन्यां स्फ्येनोद्धत्याऽवोक्ष्य हिरण्यं निधाय परिस्तीर्य परिषिच्याऽभिजुहोति - 'इरावती धेनुमती हि भूतꣳ सूयवसिनी मनवे यशस्ये। व्यस्कभ्नाद् रोदसी विष्णुरेते दाधार पृथिवीमभितो मयूखैः स्वाहा' इति। विष्णव इदं न मम इति यजमानस्य त्यागः। अयमुत्तरहविर्धानोत्तरवर्तनीहोम इत्युच्यते ॥

१६६. **उत्तराक्षधूरञ्जनम्**—ततः सर्वान् पदपांसूनध्वर्युः पत्न्यञ्जलावोप्याभिधारयति। पत्नी पूर्ववद् दक्षिणमक्षधुरमनक्ति—'आ नो वीरो जायतां कर्मण्यो यꣳ सर्वे ऽनुजीवाम यो वहूनामसद्वशी' इति। इदमुत्तराक्षधूरञ्जनमित्युच्यते ॥

१६७. ततो ऽध्वर्युराज्यस्थाल्यादीनि प्रतिप्रस्थात्रे प्रदाय पत्नीं नयति। होतारं हूयन्ति।

हविर्धानप्रवर्तनप्रैषः—अथ हविर्धाने हस्ताभ्यां परिगृह्य सम्प्रैषमाह—'हविर्धानाभ्यां प्रवर्त्यमानाभ्यामनुब्रूऽहि' इति। अयं हविर्धानप्रवर्तनप्रैष इत्युच्यते।

१६८. **हविर्धानप्रवर्तनम्**—होता प्रेषितः सन्ननुवचनं पठति। तस्य प्रथमायामृचि त्रिरुक्तायां प्रवर्तयति—'प्राची प्रेतमध्वरं कल्पयन्ती ऊर्ध्वं यज्ञं नयतं मा जिह्वरतम्' इति मन्त्रेण। हविर्धानयोः प्रवर्तनकाले अक्षशब्दे जाते सति जपति 'सुवाग्देव दुर्या आवद देवश्रुतौ देवेष्वाघोषेथाम्' इति।

अनसोरुपस्तम्भने स्थापनम्—अध्वर्युः प्रतिप्रस्थाता चोत्तरेण हविर्धाने परीत्य मध्यमादौत्तरवेदिकाच्छङ्कोस्त्रीन प्रतीचः प्रक्रमान् प्रकम्योपस्तम्भनयोरुपरि अनसोरग्रे स्थापयतः। तत्र दक्षिणस्य हविर्धानस्याध्वर्युः, उत्तरस्य प्रतिप्रस्थाता। 'अत्र रमेथां वर्ष्मन् पृथिव्याः' इति मन्त्रेण। इदमनसोरुपस्तम्भने स्थापनमुच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१६९. **मेथीनिहननम्**—अध्वर्युः—'दिवो वा विष्णवुत वा पृथिव्या-महो वा विष्णवुतवाऽन्तरिक्षाद्धस्तौ पृणस्व बहुभिर्वसव्यैराप्रयच्छ दक्षिणा-दोत सव्यात्' इति दक्षिणतो मेथीं निहन्ति।

मेथ्यां हविर्धानबन्धनम्—'विष्णोर्नुकं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजाꣳसि। यो अस्कभायदुत्तरꣳसधस्थं विचक्रमाणस्त्रेधोरुगायः' इति मेथीमनसा सह बध्नाति। एवमेव प्रतिप्रस्थातोत्तरहविर्धानस्योत्तरतो मेथीं निहत्य एवमेव बध्नाति। इदं मेथ्यां हविर्धानबन्धनमित्युच्यते॥

१७०. **द्वादशगर्तखननम्**—अध्वर्युः दक्षिणहविर्धानस्याग्रभागादरत्नि-मात्रे गर्त्तं खात्वा तस्य दक्षिणोत्तरयोर्युगान्तार्जवेन गर्तद्वयं खनति। एवं प्रतिप्रस्थाता उत्तरहविर्धानस्योत्तरतो गर्तत्रयं खनति। एवं सति षट् गर्ताः सम्पद्यन्ते। एवमेव षट् पश्चात् हविर्धानयोः। ततो द्वादशगर्ता भवन्ति।

रराटीबन्धनम्—तेषु गर्तेषु प्राचीनकर्णाः स्थूणा उच्छ्रित्य तासु उदञ्चौ वंशौ प्रोह्य 'विष्णो रराटमसि' इति पुरस्ताद् रराटीं बध्नाति।

रराटीशब्दार्थः—रज्जुविशेषो रराटीत्युच्यते।

१७१. **हविर्धानगृहनिर्मितिप्रकारः**—'विष्णोः पृष्ठमसि' इति मध्यमं छदिरधिनिदधाति। विष्णो श्नप्त्रे स्थः। इति दक्षिणोत्तरयोर्द्वे छदिषी युग-पन्निदधाति। ततश्चतुर्दिक्षु परिश्रित्य प्राचीं प्रतीचीं च द्वारौ कृत्वा दक्षिणे द्वार्बाहौ कुशमुष्टिमुपनिगृह्य 'विष्णोः स्यूरसि' इति दर्भेण स्पन्द्यां निक्षिपति। 'विष्णोर्ध्रुवमसि' इति ग्रन्थिं करोति। तं विस्रस्य सम्प्रेष्यति—'अकुर्वन्तो ग्रन्थीन् हस्तकौशलैर्निस्तिष्ठत' इति। प्रतिप्रस्थाता एवमुत्तरे द्वार्बाहौ करोति एवमपरद्वार्बाह्वोः अध्वर्युप्रतिप्रस्थातारौ कुरुतः। अयं हविर्धान-गृहनिर्मितिप्रकार उच्यते।

१७२. अध्वर्युः—'वैष्णवे त्वा' इति हविर्धानमभिमृशति। इदं निर्मितं हविर्धानयोः स्थापनार्थं गृहं प्राक् प्रत्यग्द्वारं यत्तदपि हविर्धानमित्युच्यते।

१७३. **औदुम्बर्यवटपरिलेखनम्**—ततः शालामुखीयाच्छङ्कोरनुस्पन्द्यं षट् प्राचः प्रक्रम्य दक्षिणतः सप्तमं प्रक्रमं प्रक्रम्य अभ्रिमादत्ते—'देवस्य त्वा' इत्यादिमन्त्रेण। 'अभ्रिरसि नारिरसि' इति मन्त्रेण तामभिमन्त्रयते। 'परि-लिखितम्' इत्यादिमन्त्रेण तया ऽभ्र्या औदुम्बर्यवटं त्रिःपरिलिखति।

औदुम्बर्यवटखननप्रैषः—अप उपस्पृश्य सम्प्रेष्यति—'उद्गातरेहीममौ-दुम्बर्यवटं खनं, प्राक् पुरीषमुद्वपतात्' इति अयमौदुम्बर्यवटखननप्रैष उच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१७४. **उपरवखननप्रैषः**—उद्गाता तथा करोति । शालामुखीयाच्छङ्कोरेकं प्रक्रमं त्यक्त्वा तत आरभ्य दशपदं पूर्वापरं अष्टादशारत्निदक्षिणोत्तरं दीर्घचतुरस्रं सदो विमाय त्रिश्रेणिगर्तान् खात्वा दक्षिणस्य हविर्धानस्य पुरोक्षमुपरवान् विमाय सम्प्रेष्यति—'उन्नेतरेहीमानुपरवान् खनप्रादेशान्तस्पादान् वाहुमात्रानवाचो ऽसम्भिन्दन्नुपरिष्टादधस्तात् संतृण्णान्' इत्ययमुपरवखननप्रैष उच्यते ।

१७५. उन्नेता यथोक्तं करोति । उपरवपुरीषं दक्षिणस्य हविर्धानस्य पुरस्तान्न्युप्य चतुरस्रं खरं सिकताभिराभ्राशिनं कृत्वा 'देवस्य त्वा' इत्यभ्रिमादाय 'अभ्रिरसि' इत्यादिना यूपावटं 'परिलिखितम्' इत्यादिना परिलिख्य सम्प्रेष्यति—'अग्नीदेहीमं यूपावटं खनोपरवसम्मितं प्राक् पुरीषमुद्वपताच्चतुरङ्गुलेनोपरमति खनतात्' इति । ततः प्रतिप्रस्थाता औदुम्बरीं स्थूणां निखातादूर्ध्वं यजमानेन समं विमायाधस्तात् परिवासयति—'अच्छिन्नो रायः सुवीरः' इति । तां प्रक्षाल्य चात्वालोत्करयोर्मध्यमार्गेण प्रपाद्यावटात् पुरतः प्रागग्रां स्थापयति । अध्वर्युः 'एहि यजमान' इति यजमानमामन्त्र्य यवमतीः प्रोक्षणीर्बर्हिर्मुष्टिमाज्यस्थालीं सस्रुवां मैत्रावरुणदण्डमुदपात्रं चादाय औदुम्बरीं स्थूणां पुरस्तादर्वाचीं प्रोक्षति—'दिवे त्वा ऽन्तरिक्षाय त्वा पृथिव्यै त्वा' इति । 'शुन्धतां लोकः पितृषदनः' इत्यवटे ऽपो ऽवनयति । 'यवोसि यवयास्मद्द्वेषो यवयारातीः ।' प्राचीनावीती बर्हिर्हस्तं व्यतिषज्यावस्तृणाति—'पितृणाᳬसदनमसि' हिरण्यमन्तर्धाय स्रुवाहुत्या ऽभिजुहोति—'पितृभ्यः स्वाहा' इति । पितृभ्य इदं न मम इति यजमानस्य । अध्वर्युः उद्गात्रा औदुम्बरीमुच्छ्रयति—'उद्दिवᳬ स्तभानान्तरिक्षं पृण पृथिवीं द्वᳬह' इति ।

सदोनिर्माणम्—प्राचीनकर्णामिनोति—'द्युतानस्त्वा मारुतो मिनोतु मित्रावरुणो ध्रुवेण धर्मणा' इति । प्रदक्षिणं पुरीषेण पर्यूहति 'ब्रह्मवनिं पर्यूहामि' इति । मैत्रावरुणदण्डेन सᳬहन्ति—'ब्रह्मदृᳬह क्षत्र दृᳬह प्रजा दृᳬह रायस्पोषं दृᳬह' इति । अन्यूनमनतिरिक्तं परिन्यस्य उदपात्रमुपनिनीय विशाखे हिरण्यं निधाय स्रुवाहुत्या ऽभिजुहोति—'घृतेन द्यावापृथिवी आपृणेथाᳬ स्वाहा' इति । द्यावापृथीवीभ्यामिदं न मम इति यजमानस्य त्यागः । आन्तमन्ववस्रावयति, भूमिगते स्वाहाकारः । प्राचीनकर्णाः स्थूणा उच्छ्रित्य तासूदञ्चौ वंशौ प्रोह्य 'इन्द्रस्य सदोऽसि' मध्यमं छदिरधिनिधाय अभितो द्वे द्वे निदधाति—'विश्वजनस्य छाया' । द्विर्मन्त्रः । दक्षिणोत्तरान् नवसन्धिषु तृणावर्तान् करोति—'परि त्वा गिर इमा भवन्तु विश्वतो वृद्-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

घायुमनुवृद्धयो जुष्टा भवन्तु जुष्टयः।' परिश्रित्य प्राचीं प्रतीचीं च द्वारं कृत्वा दक्षिणे द्वार्वाहौ कुशमुपनिगृह्य दर्भेण स्पन्द्यामवनयति—इन्द्रस्य स्यूरसि' इति, 'इन्द्रस्य ध्रुवमसि' इति ग्रन्थि करोति। विस्रस्य अकुर्वन्तो ग्रन्थीन् हस्तकौशलैर्निस्तिष्ठत इति। एवमुत्तरे प्रतिप्रस्थाता। एवमपरद्वारवाह्वोः। इदं निर्मितं गृहं सदः पदवाच्यम्।

१७६. **सदोऽभिमर्शनम्**—अध्वर्युः 'ऐन्द्रमसीन्द्राय त्वा' इति मन्त्रेण सिद्धं सदो ऽभिमृशति। इदं सदो ऽभिमर्शनमित्युच्यते।

१७७. **मार्जालीयः**—महावेद्या उत्तरांसीयाच्छङ्कोर्वेद्यन्तेन दश प्रतीचः प्रक्रमान् प्रक्रम्य पञ्चारत्नि अन्तर्वेद्यर्धमर्धबहिर्वेदि आग्नीध्रागारं कृत्वा परिश्रित्य दक्षिणतो द्वारं करोति। एतेन दक्षिणो मार्जालीयो व्याख्यातः, तस्योदीचीं द्वारं कुर्वन्तीति विशेषः। इदं गृहं महावेद्या दक्षिणतो निर्मितं मार्जालीयपदेनोच्यते॥

१७८ **उपरवाणां खननम्**—ततः अभ्रि यवमतीः प्रोक्षणीर्बर्हिर्हस्तमाज्यस्थालीं स्रुवं चर्मफलके षट् शङ्कून् ग्रावाणं हिरण्यमुदपात्रमादाय 'एहि यजमान' इति यजमानमामन्त्र्य पूर्वया द्वारा हविर्धानं प्रवेश्य दक्षिणस्य हविर्धानस्य नीडे चर्म इतराणि अक्षात् पुरतः सादयित्वा **देवस्य त्व**' इत्यभ्रिमादाय 'अभ्रिरसि' इत्यादिना ऽभिमन्त्र्य दक्षिणपूर्वादीनुपरवान् 'परिलिखितम् इत्यादिना त्रिः परिलिख्य क्रमेण खनति—'रक्षोहणो वलगहनो वैष्णवान् खनामि'। दक्षिणपूर्वस्मात् पांसूनादत्ते—'इदमहं तं वलगमुद्वपामि यं नः समानो यमसमानो निचखानेदमेनमध्वरं करोमि यो नः समानो यो ऽसमानो ऽरातीयति गायत्रेण छन्दसा।' यजमानस्याधस्पादं पात्रान्तरे पांसुनुद्वपति—'अववाढो वलगः' इति। पुनस्तथैव पांसूनादत्ते। तन्मन्त्रे **गायत्रेणे**त्यस्य स्थाने **त्रैष्टुभेने**ति विशेषः। ततस्तृतीयादादत्ते। तन्मन्त्रे तत् स्थाने **जागतेने**त्यस्योहः। ततश्चतुर्थादादत्ते। तन्मन्त्रे **आनुष्टुभेने**त्यूहः। पांसूनसञ्चरे परावपति। इदानीमत्र यजमानः पाप्पानं ध्यायति। उभावप उपस्पृशतः।

उपरवाणां संस्कारः—अध्वर्युः [1]'पूर्वयोर्दक्षिणमभिमृशति यजमान उत्तरमभिमृश्य पृच्छति—'अध्वर्यो किमत्र' इति। अध्वर्युः 'भद्रम्' इत्याह। यजमानः—'तन्नौ सह' इत्याह। ततो ऽध्वर्युः 'यजमान किमत्र' इत्याह। यज-

१. पूर्वयोरुपरवोरित्यर्थः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानः 'भद्रम्' इत्याह । अध्वर्युः—'तन्नौ सह' इत्याह । ततो ऽध्वर्यु र्दक्षिणयोरपरमभिमृशति । अत्राध्वर्युः प्रथमं पृच्छति, ततो यजमानः । ततोध्वर्युरपरयोरुत्तरमभिमृशति । दक्षिणं यजमानः । यजमानः प्रथमं पृच्छति, ततो ऽध्वर्युः ।। तत उत्तरयोः पूर्वमध्वर्यु रभिमृशति । अपरं यजमानः । अध्वर्युः प्रथमं पृच्छत्यथ यजमानः । यजमानः प्रथमो यजमान उत्तमः ।।

ततो ऽध्वर्युः क्रमेणोपरवानभिमृशति—'विराडसि सपत्नहा सम्राडसि भ्रातृव्यहा स्वराडस्यभिमातिहा विश्वाराडसि विश्वासान्नाष्ट्राणा᳡ हन्ता' इति । सर्वत्रमन्त्रावृत्तिः । क्रमेणोपरवान् प्रोक्षति—'रक्षोहणो वलगहनः प्रोक्षामि वैष्णवान्' इति । मन्त्रावृत्त्या सर्वान् प्रोक्षति । 'रक्षोहणो वलगहनो ऽवनयामि वैष्णवान्' इति तथैव सर्वेष्वपो ऽवनिनयति । 'यवोसि यवयास्मद्वेषो यवयारातीः' इति क्रमेण सर्वेषु यवान् प्रस्कन्दयति । 'रक्षोहणो वलगहनो ऽवस्तृणामि वैष्णवान्' इति सर्वेषूपरवेषु वर्हिषा ऽवस्तृणाति । 'रक्षोहणो वलगहनो ऽभिजुहोमि वैष्णवान् स्वाहा'इति सर्वेषूपरवेषु हिरण्यं निधाय तदुपरि क्रमेण स्रुवाहुत्या ऽभिजुहोति । वैष्णवेभ्य उपरवेभ्य इदं न मम इति यजमानः । अयमुपरवसंस्कार इत्युच्यते ।।

१७९. **उपरवेषु फलकप्रतिष्ठापनम्** --प्रत्येकं सार्धप्रादेशविस्तारे प्रादेशत्रयदीर्घे मिलिते समचतुरस्रे अधिषवणफलके आदाय 'रक्षोहणौ वलगहनावुपदधामि वैष्णवी' इति संसृष्टे फलके तेषामुपरवाणामुपरि दधाति । तयोरनवसर्पणाय द्वाभ्यां शङ्कुभ्यां पुरस्तात् परिणिहन्ति, द्वाभ्यां पश्चात्, द्वाभ्यामभितः । एवं षड्भिः शङ्कुभिः परिणिहत्य 'रक्षोहणौ वलगहनौ पर्यूहामि वैष्णवी' प्रदक्षिणं पुरीषेण पर्यूहति । 'रक्षोहणौ वलगहनौ परिस्तृणामि वैष्णवी' इति तयोरुपरि वर्हिषा ऽवस्तृणाति । 'रक्षोहणौ वलगहनौ वैष्णवी' इत्याभिमृशति । एतावत्कर्म उपरवेषु फलकप्रतिष्ठापनमुच्यते ।।

१८०. ततो 'यज्ञप्रतिष्ठ' इति मन्त्रेण तूष्णीं वा फलकयोरानडुहं चर्मास्तीर्य तिरश्चर्मन् फलके ग्रावणोद्वादयति—'बृहन्नसि बृहद्ग्रावा बृहतीमिन्द्राय वाचं वद' इति । नीडे चर्मोत्सादयति । ग्रावसु ग्रावाणम् । दक्षिणस्य हविर्धानस्याग्रे स्तोत्रोपाकरणाय वर्हिर्मुष्टीन् वध्नाति ।

आग्नीध्रीखरकरणम्, आग्नीध्रधिष्ण्यकरणं वा—ततः 'एहि यजमान' इति यजमानमामन्त्र्य आग्नीध्रीयमध्ये स्फ्येनोद्धत्यावोक्ष्य तत्र चात्वालपुरीषसिकतान्युप्य अरत्निमात्रं परिमण्डलं खरं करोति —'विभूरसि प्रवाहणो

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' । एतन्मन्त्रपाठस्तूभयोरध्वर्युयजमानयोः । एतदाग्नीध्रीयखरकरणमुच्यते ॥

१८१. **होतृखरः, होतृधृष्ण्यं वा**—अन्तः सदसं प्राक् पदद्वयमवशेष्य पृष्ठचायां तथैव होतुः खरं करोति 'वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं होतृखरो होतृधिष्ण्यमित्युच्यते ॥

१८२. **मैत्रावरुणखरः, मैत्रावरुणधृष्ण्यं वा**—अग्रेणाहवनीयं पर्याहृत्य होतृधिष्ण्याद् दक्षिणो ऽरत्निमात्रे मैत्रावरुणस्य खरं करोति—'श्वात्रोसि प्रचेता रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरो मैत्रावरुणधिष्ण्यमित्युच्यते ॥

१८३. **ब्राह्मणाच्छंसिखरः, ब्राह्मणाच्छंसिधिष्ण्यं वा** तस्य धिष्ण्यस्योत्तरतो ऽरत्निमात्रे ब्राह्मणाच्छंसिनः । तुथोऽसि विश्वावेदा रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरो ब्राह्मणाच्छंसिधिष्ण्यमित्युच्यते ॥

१८४. **पोतृखरः, पोतृधिष्ण्यं वा**—तस्योत्तरतो ऽरत्निमात्रे पोतुः खरं करोति—'उशिगसि कवीरौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरः पोतृखर इत्युच्यते ॥

१८५. **नेष्टृखरः, नेष्टृधृष्ण्यं वा**—तदुत्तरतो ऽरत्निमात्रे नेष्टुः खरं करोति—'अङ्गारिरसि वम्भारी रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरो नेष्टृधिष्ण्यमित्युच्यते ॥

१८६. **अच्छावाकखरः, अच्छावाकधिष्ण्यं वा**—तदुत्तरतो ऽरत्निमात्रे अच्छावाकस्य । 'अवस्यूरसि दुवस्वान् रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरो ऽच्छावाकधिष्ण्यमित्युच्यते ॥

१८७. **मार्जालीयखरः: मार्जालीयधिष्ण्यं वा**—आग्नीध्रीयवन्मार्जालीये खरं करोति—'शुन्ध्यूरसि मार्जालीयो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । अयं खरो मार्जालीयधिष्ण्यमित्युच्यते ॥

१८८. **औत्तरवेदिकाद्युपस्थानम्**—अवशिष्टचात्वालपुरीषसिकता आग्नीध्रीये तूष्णीं निवपति । ततो ऽध्वर्युरौत्तरवेदिकमग्निमुपतिष्ठते—'सम्राडसि कृशानू रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । तत आस्तावमुपतिष्ठते—'परिषद्यो ऽसि पवमानो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति । ततश्चात्वालम्—'प्रतक्वा ऽसि नभस्वान् रौद्रेणा-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। पशुश्रपणमग्नि तत उपतिष्ठते—'असम्मृष्टो ऽसि हव्यसूदो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। सदसः पश्चिमद्वारे तिष्ठन् औदुम्बरीमुपतिष्ठते—'ऋतधामा ऽसि सुवर्ज्योति रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। ततो ब्रह्मसदनमुपतिष्ठते—'ब्रह्मज्योतिरसि सुवर्धामा रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। तत्रस्थ एव शालामुखीयम्—'अजोस्येकपाद् रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। ततो गार्हपत्यम्—'अहिरसि बुन्धियो रौद्रेणानीकेन पाहि माग्ने पिपृहि मा मा हिꣳसीः' इति। इदं औत्तरवेदिकाद्युपस्थानमित्युच्यते॥

१८९. **महावेद्यां बर्हिरासादनादिप्रैषः**—इतः प्रभृत्यध्वर्युः प्रत्यक् सदो नातीयात्। तत्रस्थ एव सम्प्रेष्यति—'स्तृणत बर्हिः प्रव्रतं यच्छत, समपिव्रताह्वयध्वमास्तावं बहुलं स्तृणीत, उन्नेतर्ग्राव्णो वायव्यानि द्रोणकलशे दशापवित्रे समवधाय पत्नीशाले पत्नीꣳसꣳसादयाग्नींदाज्यमधिश्रय, प्रतिप्रस्थातः स्रुचः सम्मृड्ढ्याज्येनोदेहि पृषदाज्याय दध्याऽऽहर' इति। अयं प्रैषो वेद्यां बर्हिरासादनादिप्रैष इत्युच्यते॥

१९०. दक्षिणे वेद्यन्ते महाबर्हिषो मुष्टि स्तृणाति—'देव बर्हिरूर्णाम्रदसं त्वा' इति प्राकृतमन्त्रेण। महावेदिं बहुलां पुरस्तात् प्रतीचीꣳ स्तृणाति। तूष्णीमर्धस्तनव्रतं प्रददाति। उन्नेता पञ्च ग्राव्णः सप्तदश वायव्यानि प्रादेशमात्राणि उलूखलाकाराणि एकतोमुखानि, दश चमसान्, परिप्लुपात्रं अदण्डं स्रुगाकारं, द्रोणकलशं, दशापवित्रे, चतस्रः स्थालीः, उपग्रहादि, यदन्यदुपयुक्तं तत्सर्वं प्रक्षाल्य द्रोणकलशे दशापवित्रे विन्यस्य एतत् सर्वं प्राग्वंशे सादयति।

दधिग्रहपात्रम्—वायव्यानां मध्ये औदुम्बरं चतुःस्रक्ति यत् तद्दधिग्रहपात्रमुच्यते।

१९१. **ऐन्द्रवायवग्रहपात्रम्**—रास्नाचिह्नितं पात्रमैन्द्रवायवमित्युच्यते।

१९२. **मैत्रावरुणग्रहपात्रम्**—पिलकाचिह्नितं मैत्रावरुणमित्युच्यते।

१९३. **आश्विनग्रहपात्रम्**—द्विकोणं पात्रमाश्विनमित्युच्यते।

१९४. **शुक्रग्रहपात्रम्**—बैल्वं पात्रं शुक्रपात्रमित्युच्यते।

१९५. **मन्थिग्रहपात्रम्**—वैकङ्कतं श्लक्ष्णं मन्थिपात्रमित्युच्यते।

१९६. **अंशुग्रहपात्रम्**—औदुम्बरं चतुःस्रक्ति अंशुपात्रमित्युच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

१९७. **अदाभ्यग्रहपात्रम्**—औदुम्बरं श्लक्ष्णं अदाभ्यसंज्ञकम् ।

१९८. **अतिग्रहपात्राणिः**—न्यग्रोधकाष्ठनिर्मितानि अतिग्राह्याणीत्युच्यन्ते ।

१९९. **ऋतुग्रहपात्रम्**—उभयतोमुखे द्वे पात्रे ऋतुपात्रसंज्ञके ।

२००. **अन्यपात्राणिः**—इतराणि पात्राणि नैयग्रधान्यौदुम्बराणि वा भवन्ति ।

चमसाः—चमसा नैयग्रोधाः ।

ब्रह्मचमसः—चतुरस्रो ऽल्पदण्डो ब्रह्मचमस इत्युच्यते ।

२०१. **होतृचमसः**—मण्डलाकारः स दण्डो होतृचमस उच्यते ।

२०२. **यजमानचमसः**—विस्तीर्णाग्रः स दण्डो यजमानचमसो भवति ।

२०३. **उद्गातृचमसः**—त्रिकोणः स दण्ड उद्गातृचमसपदवाच्यः ।

२०४. **प्रशास्तृचमसः**—अधोभागे वक्रः स दण्डः । प्रशास्तृचमस-उच्यते ।

२०५. **ब्राह्मणाच्छंसिचमसः**—उपरि वक्रः स दण्डो ब्राह्मणाच्छंसिचमसो भवति ।

२०६. **अच्छावाकचमसः**—तथैव रास्नायुक्तः स दण्डो ऽच्छावाकचमसो भवति ।

२०७. **आग्नीध्रीयचमसः**——तीक्ष्णाग्रः सदण्डः आग्नीध्रचमसो भवति ।

२०८. **अध्वर्व्वादीनां अग्नीषोमीयपशुसम्बन्धीनिकर्माणि**—अध्वर्युः अग्नीषोमीयपशुशाखायाः पशुवत् पवित्रं करोति । ततः पशुकुम्भी शाखापवित्रं वपाश्रपण्यौ रशने शूलं मैत्रावरुणदण्डं शालामुखीयस्योत्तरतो दर्भेषु सादयति । 'शुन्धध्वम्' इति प्राकृतमन्त्रेण प्रोक्षति ।

आग्नीध्रः पाणि सम्मृश्याग्नीन् प्रज्वाल्य परिस्तीर्य शालामुखीयस्याग्रे दर्भान् संस्तीर्य तेषु स्फ्यमग्निहोत्रहवणींजुहूमित्यादि पशुवत् पात्राण्यासाद्य गार्हपत्य आज्यं विलापयति । प्रतिप्रस्थाता पाणिसम्मर्शनं कृत्वा ब्रह्माणं दक्षिणत उपवेश्य शालामुखीयादारभ्योत्तरवेदिपर्यन्तं पृष्ठ्यां स्तीर्त्वा पवित्रे कृत्वा 'यजमान वाचं यच्छ' इति यजमानं सम्प्रेष्य अग्निहोत्रहवणीं प्राकृत-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रेणादाय तथैव प्रतितप्य प्रोक्षणीसंस्कारं कृत्वा पात्राणि प्राकृतमन्त्रेण प्रोक्ष्य आज्यं दधि च तथैव निरुप्य अधिश्रित्योभयं पर्यग्नि करोति।

ततो ऽध्वर्युः पाणी सम्मृश्य मन्त्रेण प्राकृतेन स्फ्यादानादि कृत्वा खरदेशे स्फ्यं स्तब्ध्वा सम्प्रैषमाह—'प्रोक्षणीरासादय' इत्यादि पशुवत्।

आग्नीध्रः प्रोक्षणीः सादयति। अध्वर्युः स्फ्यं प्रकृतिवद् ददाति। प्रतिप्रस्थातोत्तरवेदिसमीपे इध्मावर्हिषी उपसादयति। आग्नीध्रः दक्षिणेन स्रुवं स्वधितिं सव्येन हस्तेन वेदाग्राण्यादाय शालामुखीये 'अग्नेर्वाम्' इति मन्त्रेण प्रतितप्य स्रुवमन्त्रेणैवोभयं सम्मृज्य प्रतिप्रस्थात्रे प्रयच्छति।

प्रतिप्रस्थाता जुह्वादीन् पशुवत् प्रतितप्य सम्मृज्य वेदाग्राणि शालामुखीये प्रक्षिप्य पात्राणि अग्रेणोत्करं तृणेषु सादयित्वा पुनरादाय शालामुखीयसकाशे निदधाति। पत्नीं शालामुखीयमाज्यं चावेक्षयित्वा यजमानमाज्यमवेक्षयति। अध्वर्युः प्रोक्षणीनामुत्तरत आनीयाज्यं स्वयमवेक्ष्योत्पूय प्रोक्षणीश्चोत्पूयाज्य दधि चादाय ब्रह्मयजमानाभ्यां सह प्राग्वंशं गत्वा वेद्यां स्रुक्षु पशुवदाज्यानि गृहीत्वा परिकर्मिभ्यः प्रदायाऽप उपस्पृश्य ब्रह्मणे सोमं राजानं ददाति। ब्रह्मा राजानमादाय शालामुखीयमग्रेण परिश्रित्योत्तरतोऽवस्थायान्वग्गिं नयति।

अध्वर्युः शालामुखीये प्रणयनीयमिध्ममाधाय चात्वालादुपयमनीः कल्पयित्वा पुराणगार्हपत्य आज्यं विलाप्योत्पूय अध्वर्युं यजमानस्तं पत्नी तां पुत्राः तान् पौत्रास्तान् ज्ञातयश्चेति ज्येष्ठानुक्रमेण समन्वारब्धेषु सत्सु प्रचरण्यां चतुर्गृहीतं गृहीत्वा शालामुखीये जुहोति—'त्वꣳ सोम तनूकृद्भ्यो द्वेषोभ्योऽन्यकृतेभ्य उरु यन्तासि वरुथꣳ स्वाहा' इति। सोमाय इदमिति यजमानः। ततः स्रुवेण जुहोति—'जुषाण अप्तुराज्यस्या वेतु स्वाहा' इति। अग्नय इदमिति यजमानः।

अग्नीषोमप्रणयनप्रैषः—पुनश्चतुर्गृहीतं गृहीत्वा सम्प्रैषमाह—'अग्नीषोमाभ्यांप्रणीयमानाभ्यामनुब्रूहि' इति। अयमग्नीषोमप्रणयनप्रैष उच्यते॥

२०६, होत्रा प्रथमायामृचि त्रिरुक्तायामिध्मं शालामुखीयादुद्यम्य पूर्वया द्वारोपनिष्क्रामति अन्वग् राज्ञा चाज्यैश्चान्वक् ग्राव्णो वायव्यानि 'अयं नो अग्निर्वरिवः कृणोत्वयं मृधः पुर एतु प्रभिन्दन्। अयꣳ शत्रून् जयतु जर्हृषाणो ऽयं वाजं जयतु वाजसातौ' इति मन्त्रेण। ततः उत्तरेण सदः परीत्याग्नीध्रागारे ऽग्निं निधाय परिस्तीर्य परिषिच्य चतुर्गृहीतेनाभिजुहोति—'अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान्। युयोध्यस्म-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ज्जुहुराणमेनो भूयिष्ठान्ते नम उक्तिं विधेम स्वाहा' इति। अग्नय इदमिति यजमानः।

अत्रैवैतत् ग्राव्णो वायव्यानि सादयित्वा उत्तरेणाग्नीध्रीयं धिष्ण्यं राज्ञा चान्यैश्च गत्वा आहवनीये स्रुवाहुतिं जुहोति—'उरु विष्णो विक्र०रस्वाहा। इति विष्णव इदमिति यजमानः। ब्रह्मा राजानमन्यस्मै प्रदाय मन्त्रेणोपविशति। यजमानश्च स्वायतने। अध्वर्युः प्रोक्षणीरुन्महयन्नित्यादि यन्मे अग्न इत्यन्तं पशुवत् करोति। खरे प्रोक्षणादीनि करोति। महावेदिश्रोण्यां प्रोक्षणीर्निनयति। ब्रह्मा यथागतमागत्य राजानमुपादत्ते। यजमानः अप उपस्पृश्य यथेतमेत्य ब्रह्मणः सकाशाद् राजानमादाय पूर्वया द्वारा हविर्धानं प्रपादयति—'सोमो जिगातु गातुविद् देवानामेति निष्कृतमृतस्य योनिमासदम्' इति।

अध्वर्युः अप उपस्पृश्य दक्षिणस्य हविर्धानस्य नीडे कृष्णाजिनमास्तृणाति—'अदित्याः सदो ऽसि' इति। यजमानस्तस्मिन् कृष्णाजिने राजानं सादयति—'अदित्याः सद आसीद' इति। 'एष वो देव सवितः सोमस्तꣳ रक्षध्वं मा वो ऽदभन' इति। राजानं देवताभ्यः प्रयच्छति—'एतत्त्वं देव सोम देवो देवानुपागा इदमहं मनुष्यो मनुष्यान् सह प्रजया सह रायस्पोषेण' इति। तं सोममुपतिष्ठते—'नमो देवेभ्यः' इति। सोमस्योपरि प्राञ्चमञ्जलिं करोति—'स्वधा पितृभ्यः' इति। तस्य दक्षिणतो न्यञ्चमञ्जलिम्। अप उपस्पृश्य 'इदमहं निर्वरुणस्य पाशात्' इति। ततो निष्क्रम्य 'सुवरभिविख्येषं वैश्वानरं ज्योतिः' इत्याहवनीयमुपतिष्ठते।

अध्वर्युः 'अवान्तरदीक्षां विसृज' इति प्रेष्यति। ततो यजमानः 'अग्ने व्रतपते त्वं व्रतानां व्रतपतिरसि या मम तनूस्त्वय्यभूदियꣳ सा मयि या तव तनूर्मय्यभूदेषा सा त्वयि यथायथं नौ व्रतपते व्रतिनोर्व्रतानि' इत्याहवनीयमुपतिष्ठते। अध्वर्युः 'स्रस्नीष्व मेखलां प्रमुष्टीन् सारय यजमान' इति त्वाचक्षतां 'नामग्राहं ते पितृभिः पितामहैः प्रपितामहैः पुत्रैः पौत्रैः सुब्रह्मण्यः सुब्रह्मण्यामाह्वयतु' इति सम्प्रेष्यति। वपायागान्ते सुब्रह्मण्यः पिता पुत्रीयमाह्वानं करोति। ततो याचति यवमतीरित्यादि यूपप्रक्षालनादि वपामार्जनान्तं पशुवत्। प्रकृतौ निरूढपशौ यत्रेन्द्राग्निपदं तत्राग्नीषोमपदस्योहः कार्य इति विशेषः।

वसतीवरीग्रहणम्—आहूतायां पितापुत्रीयायां दृढं कुम्भमादायान्तरेण चास्वालोत्करावुदङ् उपनिष्क्रम्य स्रोतोभिमुखं स्थित्वा छाया तपसोः सन्धौ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वसतीवरीसंज्ञा अपो गृह्णाति—'हविष्मतीरिमा आपो हविष्मान् देवो अध्वरो हविष्माँ आविवासति हविष्माँ अस्तु सूर्यः' इति। सूर्ये त्वस्तङ्गते हिरण्यमन्तर्धाय गृह्णाति। आतपच्छायायां स्वदेहच्छायायां वृक्षच्छायायां वा गृह्णाति। इदं वसतीवरीग्रहणमित्युच्यते ॥

२१०. **वसतीवरीसादनम्**—ततः प्रदक्षिणमावृत्य वसतीवरीकुम्भं सव्ये निधायान्तरेण चात्वालोत्करावुत्तरेणाग्नीध्रीयं सदश्च गत्वा पूर्वया द्वारा शालां प्रपाद्य शालामुखीयस्य पश्चात् संसृष्टाः सादयति—'अग्नेर्वोपन्नगृहस्य सदसि सादयामि सुम्नाय सुम्मिनीः सुम्ने मा धत्त' इति एतद्वसतीवरीसादनमुच्यते।

२११. ततो ऽग्नीन् पुरोडाशमित्यादि स्वरुहोमवर्जमाज्येडान्तं पशुवत्। औपयाजाऽङ्गारहरणमाग्नीध्रीयादिति विशेषः। वृत्रहा भूयासमिति पुरोडाशयागे यजमानस्यानुमन्त्रणम्। इन्द्रियावी भूयासमित्यङ्गयागे। आज्येडामार्जनान्ते उलूखले मुसल इत्येव हुत्वा ध्रुवामाप्याय्य प्रायश्चित्तानि जुहोति न वा। अथाग्नीषोमीयः (पदार्थसंख्या १६२) इत्यत आरभ्य एतदन्तं कर्म अग्नीषोमीयपशुरिति गीयते।

२१२. **बहिर्वेदिभवनप्रैषः**—हृदयशूलं प्रक्षाल्य स्थापयित्वा सम्प्रेष्यति—'व्यपक्रामत मा वोऽभिपरिषम्' इति। अयं बहिर्वेदिभवनप्रैष उच्यते।

२१३. **वसतीवरीस्थापनम्**—ततः सर्वे बहिर्वेदि भवन्ति। वसतीवरीरादाय गार्हपत्यस्य पश्चान् मार्गेण नीत्वा दक्षिणया द्वारोपनिष्क्रम्य सव्येसे निधाय दक्षिणेन मार्जालीयं सदश्च पर्य्याहृत्योदङ्मुखो दक्षिणतो यूपेन संसृष्टाः सादयति—'इन्द्राग्नियोर्भागधेयी स्थ' इति। पुनरादायोदङ्ङावृत्य दक्षिणेसे निधाय यथेतमेत्य शालामुखीयस्य पश्चात् संसृष्टाः सादयति—'मित्रावरुणयोर्भागधेयी स्थ' इति। पुनरादाय दक्षिणेसे निधाय पूर्वया द्वारोपनिष्क्रम्य उत्तरेण सद आग्नीयं च परीत्योत्तरतो यूपेन संसृष्टाः सादयति—'विश्वेषां देवानां भागधेयी स्थ' इति। पुनरादाय प्रदक्षिणमावृत्यसव्येसे निधाय पुनस्तेनैव मार्गेणागत्याग्नीध्रीयस्य निष्णच्यस्य पश्चात् संसृष्टाः सादयति—'यज्ञे जागृत' इति। इदं वसतीवरीस्थापनमुच्यते।

२१४. **सुत्यासामग्रीसम्पादनप्रैषः**—अथ सम्प्रेष्यति—'या सम्राड् धुक् तस्यै दधि घर्माय दधि कुरुत या यजमानस्य तस्या आमिक्षायै या पत्न्यै तस्या आशिरे पयश्च सक्तूँश्च कुरुत शृतातङ्कचमादित्यग्रहाय दधि कुरुत पुरोडाशीयानि पिष्टानि कुरुत धाना हरियोजनीः कुरुत चतुरोम्भ्रणाँस्त्रीनुद-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ञ्चनानयुज एकधनाꣳस्त्र्यवमानेकादश परमान् द्वे रशने द्वे वपाश्रपण्यौ एकतयमिध्मावर्हिरौदुम्बरान् महापरिधीन् कुरुत सुब्रह्मण्यामाह्वयतु' इति। अयं सुत्यासामग्रीसम्पादनप्रैष उच्यते।

२१५. **सौत्यसायं दोहकरणम्**—अध्वर्युपुरुषेष्वन्यतमः सवनीयातिरिक्तानां शाखानां क्रमेण पर्णानि छित्वा ऽग्रेण शालामुखीयं निधाय मूलतः परिवास्योपवेषान् कृत्वा शालामुखीयस्य पश्चात् प्रज्ञातान्निधाय द्वितीयमन्त्यं च शाखापवित्रं मन्त्रेण प्राङ्तेन कृत्वाऽन्यानि षट् शाखापवित्राणि तूष्णीं कृत्वा गार्हपत्यादुत्तरतः षट् दोहनानि षट् शालापवित्राण्यष्टौ स्थालीश्च सादयित्वा प्राकृतमन्त्रेण प्रोक्ष्य तत्तदुपवेषेणाङ्गारान्निरूह्य तत्तत्पवित्रनिधाय तेन तेन दोहनेन दोहयित्वा तप्त्वा उदगुद्वास्यातनक्ति। नाभ्यातनक्ति। अत्र द्वितीयोदोह ऐन्द्रः। षष्ठो दोहो मैत्रावरुणः। अतस्तत्र विशेषो मन्त्रेषु भवति। स यथा—'मित्रावरुणौ रमयतां गावः। मित्रावरुणाभ्याꣳ हविरिन्द्रियम्' इति। 'वहदुग्धिमित्रावरुणाभ्यां देवेभ्यो हविरिन्द्रियम्' इति। दोहानन्तरं तत्तदुपवेषान् शाखापवित्राणि मेक्षणानि दोहाश्च प्रज्ञातान्निधाय प्रातर्दोहस्थाल्यौ चान्यत्र स्थापयित्वा दर्भैः प्रातर्दोहाय वत्सानपाकरोति। एतत् सौत्यसायन्दोहकरणमित्युच्यते।

२१६. **सौत्येध्मावर्हिःसम्भरणम्**—एतदनन्तरं वा सवनीयपशुशाखाद्वयमाहरति। ततः प्रकृतिवदसिदादानादि कृत्वा एकविधं बर्हिराश्ववालं प्रस्तरं ऐक्षवीविधृतिं च सम्भृत्य औदुम्बरैर्महापरिधिभिः सह विंशतिसमिधः तत्तस्त्वा त्रयोविंशतिधेत्यूहितमन्त्रेण सम्भरति। परिभोजनीयान् वेदं च करोति। इदं सौत्येध्मावर्हिःसम्भरणमित्युच्यते॥

२१७. **सुत्यासंकल्पः**—सुब्रह्मण्यायामाहूतायां यजमानः पशुदेवतामग्निं वनस्पत्यादि च सङ्कल्पयति। तद्यथा याः पुरस्तादिजपं प्रकृतिवत् कृत्वा 'सवनीयेना पशुना यक्ष्ये'। पाशुकꣳहविः, अग्निः प्रधानदेवता, वनस्पतिः पृषदाज्यस्येत्याद्युक्त्वा। इन्द्रो वसुमान् प्रातःसवनस्य देवता, इन्द्रो रुद्रवान् माध्यन्दिनस्य सवनस्य देवता, इन्द्र आदित्यवानृभुमान् वाजवान् बृहस्पतिवान् विश्वदेव्यावांस्तृतीयसवनस्य देवता। इत्यादि। अयं सुत्यासङ्कल्प इत्युच्यते॥

२१८. **आधवनीयः**—अध्वर्युः उत्तरस्य हविर्धानस्य नीडे[1] एकमम्भ्रणं[2]

---

१. द्र०—अग्रिमा पदार्थसंख्या २२०। २. द्र०—अग्रिमा पदार्थसंख्या २२२।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थापयति । स आधवनीय इत्युच्यते ।।

२१९. **पूतभृत्**—तस्यैव प्रउगे[1] द्वितीयमम्भ्रणं स्थायति । स पूतभृत् पदवाच्यः ।।

२२०. अनयोराधवनीयपूतभृतोरेकएवो द्ङ्चनो[2] भवति ।

नीडम्—शकटे यदुपवेशनस्थानं तन्नीडपदवाच्यम् ।।

२२१. **प्रउगः**—नीडस्य बहिर्भागः प्रउगपदवाच्यः ।।

२२२. **अम्भ्रणः**—बृहन्मुंखा मार्तिकघटा अम्भ्रणपदवाच्याः ।।

२२३. **उदञ्चनः**—अम्भ्रणेभ्यो जलोद्धरणार्थंयल्लघु मार्तिकपात्रं तदुदञ्चनपदवाच्यम् ।।

२२४. तृतीयमम्भ्रणमाग्नीध्रीये सोदञ्चनं स्थापयति । मार्जालीये सोदञ्चनं चतुर्थम् । एतद् (पदार्थसंख्या २१८-२२४) अम्भ्रणसादनमुच्यते ।।

२२५. यजमान एतां रात्रीमाग्नीध्रीये संविशति । रक्षिणो हविर्धाने राजानं गोपायन्ति ।।

२२६. **सुत्यार्थप्रबोधनम्** ततस्तस्या रात्र्यास्तृतीयभागे ऽवशिष्टे सति यजमानस्तत्पुरुषाश्च प्रबुध्याध्व र्वादीन् सर्वान् ऋत्विजश्चमसाध्वर्यून् पत्नीं परिकर्मिणोपि बोधयन्ति । न महारात्रे स्नान्ति । एतत् सुत्यार्थप्रबोधनमुच्यते ।।

२२७. **सुत्यारम्भप्रैषः**—यजमानो हस्तपादं प्रक्षाल्यान्तरेण चात्वालोत्करौ प्रविश्याग्नीध्रीये उपविशति । ऋत्विजोऽपि हस्तपादप्रक्षालनाचमनं कृत्वा यजमानसमीपे गच्छन्ति । अध्वर्युः अग्नीषोमीयपशुवत्सवनीयपशुशाखायाः पवित्रादिकुम्भ्यादि प्रोक्षणान्तं कृत्वा आग्नीध्रीयधिष्ण्यस्योत्तरतस्तिष्ठन् पाणिसम्मर्शनं कृत्वा तत्रैव तिष्ठन् सम्प्रैषमाह—'उन्नेतर्ग्राव्णो वायव्यानि कलशे दशापवित्रे समवधाय दक्षिणस्य हविर्धानस्य पुरोक्षꣳसꣳसादयाग्नीदाज्यमधिश्रय,' 'प्रतिप्रस्थातः स्रुचः सम्मृढ्याज्येनोदेहि पृषदाज्याय दध्याहर' इति । अयं सुत्यारम्भप्रैष उच्यते ।।

२२८. **हविर्धाने वायव्यादिसादनम्** उन्नेता ग्राव्णो वायव्यानि चमसान् परिप्लुपात्रं प्रक्षालितोपरिस्थदशापवित्रं द्रोणकलशं च दक्षिणस्य हवि-

---

१. द्र०—अग्रिमा पदार्थसंख्या २२१ । २. द्र०—अग्रिमा पदार्थसंख्या २२३ ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

र्धानस्थ पुरोक्षं सह संसादयति । एतद्धविर्धाने वायव्यादिसादनमुच्यते ॥

२२९. आग्नीध्रः पूर्वया द्वारा शालां प्रविश्य पाणी सम्मृश्य चतुरोऽग्नीन् प्रज्वाल्य परिस्तीर्य अग्नीषोमीयवदग्रेण शालामुखीयं पाशुकपात्राण्यासाद्य शालामुखीय आज्यमधिश्रयति । प्रतिप्रस्थाता तथैव प्रविश्य पाणी सम्मृश्य ब्रह्माणमुत्तरवेदेर्दक्षिणतो मन्त्रेणोपवेश्य शालामुखीयादुत्तरवेदिपर्यन्तं पृष्ठ्यां स्तीर्त्वा पवित्रे कृत्वा 'यजमान वाचं यच्छ' इत्युक्त्वा प्राकृतमन्त्रेण अग्निहोत्रहवणीमादाय निष्टप्य प्रोक्षणीः संस्कृत्य पात्राणि प्रोक्ष्याज्यं दधि च निरुप्याज्यमधिश्रित्योभयं पर्यग्नि करोति ।

अध्वर्युः मन्त्रेण प्रकृतिवत् स्फ्यादानादि कृत्वोपरवदेशे स्फ्यं तिर्यञ्चं स्तब्ध्वा ऽग्नीषोमीयवत् 'प्रोक्षणीरासादय' इत्यादिना सम्प्रेष्यति । तत आग्नीध्रेणाहृतासु प्रोक्षणीषु स्फ्यमुदस्य प्रकृतिवत् प्रक्षालयति । आग्नीध्र उत्तरवेदिसमीपे इध्मावर्हिरासाद्य पशुवत् स्रुवस्वधितिसम्मार्जनं प्रतिप्रस्थात्रे प्रयच्छति । प्रतिप्रस्थाता पशुवत् जुह्वादि सम्मृज्य उत्करस्याग्रे सर्वाणि संसाद्य पत्नीं गार्हपत्यमाज्यञ्चावेक्षयित्वा समिधमुपहृत्य दध्ना सहाज्यमाहृत्याहवनीये शालामुखीये वा ऽधिश्रित्य समिधमाधाय यजमानमवेक्षयित्वा ऽध्वर्यवे प्रयच्छति ।

आग्नीध्रियादिपञ्चकसम्मर्शनम्———अध्वर्युः उत्तरेण प्रोक्षणीरासाद्य स्वयमवेक्षयोत्पूय प्रोक्षणीश्चोत्पूयाज्यग्रहणात् प्राक् पञ्च[1] सम्मृशति——'अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् । अपाꣳ रेताꣳसि जिन्वति' इत्याग्नीध्रीयम् । 'विष्णो त्वं नो अन्तमः शर्म यच्छ सहन्त्य । प्रते धारा मधुश्चुत उत्सं दुहते अक्षितम्' इति हविर्धानम् । 'अयमग्निः सहस्रिण' इत्यृचा सर्वाः स्रुचः सम्मृशति । 'वायो शतꣳहरीणां युवस्व प्रोष्याणाम् । उत वा ते सहस्रिणो रथेन पृथुपाजसा' इति वायव्यानि चमसांश्च सम्मृशति । 'इन्द्रं विश्वा अवीवृधन्त्समुद्रव्यचसङ्गिरः । रथीतमꣳ रथीनां वाजानां सत्पतिं पतिम्' इति सदोभिमृशति । इदमाग्नीध्रीयादिपञ्चकसम्मर्शनमुच्यते ।

२३०. **सौमिकपरिधिस्रुगभिमर्शनम्**--ततो ब्रह्मयजमानाभ्यामाज्यदधिभ्यां च सहाग्नीध्रीयदेशं गत्वाऽग्नीषोमीयवत् पृषदाज्यसहितान्याज्यानि गृहीत्वा परिकर्मिभ्यः प्रदाय प्रोक्षण्युन्महनादि कृत्वा वेदिप्रोक्षणस्थाने खरस्योत्तरार्धे

१. आग्नीध्रियम्, हविर्धानम्, स्रुचः, वायव्यानि चमसाश्च, सदः, एतेषांसम्मर्शनं क्रमशः उत्तरत्र विधीयते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रोक्ष्य तत्रैवैकविधं बर्हिः स्तीर्त्वा प्रस्तरपाणिः प्राङ् भिसृप्यौदुम्बरान् महापरिधीन् परिधाय 'उता असदन्' इत्यादिमन्त्रेण स्रुगभिमर्शनान्तं कृत्वा परिधीन् योगेन युनक्ति—'युनज्मि ते पृथिवीं ज्योतिषा सह' इति मध्यमं परिधिम्। 'युनज्मि वाचꣳ सह सूर्येण ते' इत्युत्तरम्। सन्नाः स्रुचोऽभिमृशति 'युनज़्मि तिस्रो विपृचः सूर्य ते' इति। इदं सौमिकपरिधिस्रुगभिमर्शनमित्युच्यते ॥

२३१. 'विष्णू निष्थ' इत्यादिप्राकृतमन्त्रेण सर्वाण्याज्यान्यभिमन्त्र्य अग्नीषोमीयवत् स्रुवं ध्रुवायामवदधाति। यजमानः 'यन्मे अग्न' इत्यादि पठति। अध्वर्युः अप उपस्पृश्य 'एहि यजमान' इति यजमानमामन्त्र्य पूर्वया द्वारा हविर्धानं प्रपाद्य नीडे निहितं यच्चर्म तत् फलकयोः प्राचीनग्रीवमुत्तरलोम 'यज्ञ प्रतितिष्ठ' इति मन्त्रेण तूष्णीं वोपस्तृणाति। तस्मिन्नुपांशु सवनातिरिक्तांश्चतुरो ग्राव्णश्चतुर्दिक्षु परस्पराभिमुखाभिषवप्रदेशान् स्थापयित्वा ईषयोर्मध्यमार्गेण राजानमुपावहरन्ति 'हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वोर्ध्वमिममध्वरं कृधि दिवि देवेषु होत्रा यच्छ' इति।

सोमराजोपावरोहणम् - सोमराजन्नेह्यवरोह 'माभेर्मा सं विक्था मा त्वा हिꣳसिष प्रजास्त्वमुपावरोह प्राजास्त्वामुपावरोहन्तु' इति। इदं सोमराजोपावरोहणमुच्यते ॥

२३२. **उद्गातृनिवेदनम्**—राजानं ग्राव्णामुपरि निधाय उद्गातृभ्यः प्राह—'उपावहृतः सोमः' इति। इदमुद्गातृनिवेदनमुच्यते ॥

२३३. **सवनीयपञ्चहोतृहोमः**- ततोऽप उपस्पृश्य 'एहि यजमान' इति यजमानमामन्त्र्य आग्नीध्रीयं गत्वा प्रचरण्यां चतुर्गृहीतं गृहीत्वा पञ्चहोतारं मनसा द्रुतय यजमाने ऽन्वारब्धे जुहोति। वाचस्पतये ब्रह्मण इदमिति यजमानः। अयं सवनीयपञ्चहोतृहोम उच्यते ॥

२३४. **आसन्यहोमः**—ततो ऽन्येन चतुर्गृहीतेन जुहोति—'आसन्यान्मामन्त्रात् पाहि कस्याश्चिदभिशस्त्याः स्वाहा' इति। अग्नय इदमिति यजमानः। अयमासन्यहोम उच्यते ॥

२३५. **प्रातरनुवाकादिप्रैषः**—तूष्णीं घृतानुषिक्तं शकलमाहवनीये ऽभ्याधाय तत्रैव तिष्ठन् सम्प्रेष्यति—'प्रातर्यावभ्यो देवेभ्यो होतरनुब्रूहि, ब्रह्मन्वाचं यच्छ, सुब्रह्मण्य सुब्रह्मण्यामाह्वय, अग्नीत्सवनीयान्निर्वह, प्रतिप्रस्थातः खरे पात्राणि युङ्धि' इति। प्रेषिता ऋत्विजो यथासम्प्रैषं कुर्वन्ति। अयं प्रातरनुवाकादिप्रैष उच्यते ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२३६. **सौत्यपुरोडाशीयपात्रासादनम्**—पितापुत्रीयायां सुब्रह्मण्यायामाहूतायां आग्नीध्रः ऐन्द्रान् पुरोडाशान् शालामुखीये निर्वपति। तद्यथा पाणी सम्मृश्याग्रेण शालामुखीयं तृणानि संस्तीर्य, तेष्वेकादश पुरोडाशकपालानि द्वे भर्जनकपाले त्रीणि पात्राणि आमिक्षाकुम्भं द्वे मेक्षणे आमिक्षामेक्षणं मन्थनशलाकां शूर्पं कृष्णाजिनं शम्याम् उलूखलं मुसलं दृषदमुपलां पिष्टोद्वपनीं मेक्षणं प्रणीताप्रणयनं पञ्चायतनां दारुपात्रीं प्राकृतया दारुपात्र्या सहान्यानि चत्वारि पात्राणि वा, अजिनपात्रम्, उपवेषं मदन्तीं यानि चान्यान्युपयुक्तानि तानि सर्वाणि द्वन्द्वं सादयति। इदं सौत्यपुरोडाशीयपात्रासादनमुच्यते ॥

२३७. **सवनीयपुरोडाशनिर्वापः**—ततः पवित्रकरणादि। उत्तरवेदिसमीपे प्रणीतासादनम्। ततो ऽग्निहोत्रहवण्यादानादि। निर्वापे विशेष उच्यते—पात्र्यां व्रीहीन् यवाँश्च भेदेन प्रक्षिप्य पूर्वार्धमभिमृशति। द्वयोर्द्रव्ययोर्बीजेक्षणकिंशारुनिरसनयोरावृत्तिः। 'देवस्य त्वा स० भ्यामिन्द्राय जुष्टं निर्वपामि' इति मन्त्रे विशेषः। पुरोडाशार्थं चतुरो व्रीहिमुष्टीन्निरूप्य धानार्थं करम्भार्थं च यवमुष्टीन् परिवापार्थं व्रीहिमुष्टीन्निर्वपति। ऐन्द्राण्येव सर्वाणि द्रव्याणि। निरुप्ताभिमर्शनातिशिष्टाभिमर्शनैकीकरणानामावृत्तिः। धान्यद्वित्वात् 'उर्वन्तरिक्षमन्वितम्' 'अदित्या वा मुपस्थे सादयामि' इत्यूहः। अयं सवनीयपुरोडाशनिर्वाप उच्यते ॥

२३८. **सवनीयपुरोडाशादिद्रव्याणां प्रोक्षणादीनि**—'देवस्य त्वा स० भ्यामिन्द्राय यो जुष्टं प्रोक्षामि' इति भेदेनोभयोर्द्रव्ययोः प्रोक्षणम्। ततः कृष्णाजिनादानादि व्रीहीन् द्वेधा कृत्वैकं भागमवहन्ति। इदानीमेव हविष्कृदाह्वानम्। व्रीह्यवघातकाले पृथक् कृतान् व्रीहीन् यवाँश्चोपोद्यच्छन्ते। तन्दुलप्रक्षाल्यननिनयनान्ते, पुनः 'अग्नेस्तनूरसि' इत्यादिना यवानाम्। नात्र हविष्कृतमाह्वयति। परिवापव्रीहीनुपोद्यच्छन्ते। प्रक्षाल्यननिनयनान्ते।

सवनीयप्रातर्दोहः—सायं दोहवत्प्रातर्दोहः। उदगग्रेण शाखापवित्रेण। नात्रातञ्चनादि। अयं सवनीयप्रातर्दोह उच्यते।

२३९. **धानाकपालोपधानम्**—पुरोडाशीयाधिवपने 'इन्द्राय जुष्टमधिवपामि' इति विशेषः। पुरोडाशार्थमेकादशकपालान्युपधाय तदुत्तरता 'आदेवयजं वह' इत्यङ्गारमानीय तदुपरि 'ध्रुवमसि' इत्यादिमन्त्रेण भर्जनकपालमुपदधाति। 'निर्दग्धम्' इत्यादिमन्त्रेण प्रदक्षिणमङ्गारैः परिचिनोति। कपालस्यैकत्वाद् 'यद्घर्मे' इत्यादि मन्त्रे एकवचनान्तत्वम्। इदं धानाकपालोपधानमुच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२४०. **परिवापकपालोपधानम्**—तदुत्तरतस्तथैव द्वितीयं भर्जनकपालमुपदधाति। इदं परिवापकपालोपधानमुच्यते।

२४१. **आमिक्षाकुम्भ्युपधानम्**—तदुत्तरतस्तूष्णीमङ्गारमावर्त्य तिरः पवित्रं प्रातर्दोहमामिक्षाकुम्भ्यामानीय तां तूष्णीं तस्मिन्नङ्गारे ऽधिश्रित्य प्रातर्दोहं मेक्षणेनालोडच श्रपयति। इदमामिक्षाकुम्भ्युपधानमुच्यते।

२४२. **सौत्यपुरोडाशीयसंवापः**—ततः संवपनादि—'इन्द्राय जुष्टꣳ संवपामि' इति ऊहः। पिण्डाभिमर्शने मन्त्रः 'इन्द्राय त्वा' इति। पुरोडाशं प्रथयित्वा यवान् परिक्षुद्य भर्जनकपाले निवपति—'घर्माः स्थ विश्वायुषः' इति मन्त्रेण। एवमेव परिवापव्रीहीन् द्वितीये निवपति। अयं सौत्यपुरोडाशीयसंवाप उच्यते।

२४३. **सवनीयामिक्षावाजिनकरणम्**—तप्ते प्रातर्दोहे सायंदोहं दध्यानीयामीक्षावाजिने शीतले कृत्वा निदधाति। इदं सवनीयामिक्षावाजिनकरणमुच्यते।

२४४. **सवनीयधानाश्रपणम्**—ततः 'त्वचं गृह्णीष्व' इत्यादि। शालामुखीयस्य पश्चात् पुरो वाऽऽप्येभ्यो निनयति। ततो भ्रष्टान् यवानवतार्य द्विधा कृत्वा एकं भागम् 'इन्द्राय वः' इति मन्त्रेणाभिमृश्य, नवे पात्रे तिरः पवित्रं लौकिकमाज्यमानीय तस्मिन् तं भागमोप्य पुरोडाशादुत्तरतो भस्ममिश्रेष्वङ्गारेष्वधिश्रयति। इदं सवनीयधानाश्रपणमुच्यते।

२४५. **करम्भः**—ततः कृष्णाजिनावधूननादि कृत्वा द्वितीयं भागं पेषयित्वा नवे पात्रे तथैवाज्यमानीय जातान् सक्तूनोप्य मन्थनशलाकया रज्वादिना नथित्वा स्थाल्योष्ठलग्ना विप्रुषोन्तः क्षिप्त्वा 'इन्द्राय त्वा' इति मन्त्रेणाभिमृश्य धानानामुत्तरतो भस्ममिश्रेष्वङ्गारेष्वधिश्रयति। अयं पदार्थः करम्भ इत्युच्यते।

२४६. **परिवापश्रपणम्**—भृष्टान् व्रीहीनवतार्य वितुषीकृष्य नवे पात्रे पूर्ववदाज्यमानीयोप्य 'इन्द्राय त्वा' इति मन्त्रेणाभिमृश्य करम्भादुत्तरतो भस्ममिश्रेष्वङ्गारेष्वधिश्रयति। इदं परिवापश्रपणमुच्यते।

२४७. तदुत्तरतो भस्ममिश्रेष्वङ्गारेष्वामिक्षावाजिने अधिश्रयति। ततः पवित्रे प्रस्तरे विसृज्य शाखापवित्रं प्रस्तरे प्रज्ञातं विधाय उपवेषं चान्यत्र निदधाति।

खरे ग्रहादिसादनम्—प्रतिप्रस्थाता स्रुचा दक्षिणतः पूर्वार्धे खरस्य मध्ये

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणाशिरसमुपांशु सवनं ग्रावाणं निदधाति । तस्य दक्षिणतः संलग्नमुपांशु पात्रम् । तस्य उत्तरतोन्तर्यामपात्रम्। तस्य पश्चादाश्विनपात्रम् । तस्य पश्चात् प्रबाहुवदक्षिणं शुक्रपात्रम् । उत्तरं मन्थिपात्रम् । मन्थिपात्रस्याग्रे दक्षिणोत्तरे ऋतुपात्रे खरस्य पश्चार्धे मध्ये आग्रयणस्थालीम्, तदुपशयपात्रं च । उत्तरस्य हविर्धानस्याग्रेणोपस्तम्भनभूम्यां ध्रुवस्थालीम् । पूतभृदाधवनीययोर्मध्ये चमसान् परिप्लुपात्रं च । दक्षिणस्य हविर्धानस्य पश्चादक्षं द्रोणकलशम् । तस्मिन् दशापवित्रे ।

अतिग्राह्यपात्राणि--ऐन्द्रवायवस्य दक्षिणत आग्नेयम । तस्य पश्चादैन्द्रम् । तस्य पश्चात् सौर्यम् । एतानि त्रीणि पात्राण्यतिग्राह्याणीत्युच्यन्ते ।

२४८. ऐन्द्रवायवस्योत्तरतो ऽदाभ्यपात्रम् । तस्य पश्चादंशुपात्रम् । अधस्तादुपरिष्टाद् रजतसुवर्णरुक्मवेष्टितं क्वचिदधिग्रहपात्रम् । एवं पात्राणि-सादयति । एतत् (२४७-२४८) खरे ग्रहादिसादनमुच्यते ।

२४९. **ग्रहाभिमर्शनम्** -- अध्वर्युः 'अग्निर्देवता गायत्री छन्द उपांशोःपात्रमसि' इत्युपांशु पात्रमभिमृशति । सोमो देवता त्रिष्टुप् छन्दोन्तर्यामस्य पात्र-मसि' इत्यन्तर्यामम् । 'इन्द्रो देवता जगती छन्द इन्द्रवायवोः पात्रमसि' इत्यैन्द्रवायवपात्रम् । 'बृहस्पतिर्देवता ऽनुष्टुप् छन्दो मित्रावरुणयोः पात्रमसि' इति मैत्रावरुणम् । अश्विनौ देवता पङ्क्तिश्छन्दोऽश्विनोः पात्रमसि इत्या-श्विनम् । 'सूर्या बृहती छन्दः शुक्रस्य पात्रमसि' इति शुक्रम् । 'चन्द्रमा देवता सतोबृहती छन्दो मन्थिनः पात्रमसि' इति मन्थिनम् । 'विश्वेदेवा देवतो-ष्णिहा छन्द आग्रयणस्य पात्रमसि' इत्याग्रयणम् । 'इन्द्रो देवता ककुत् छन्द उक्थाना पात्रमसि' इत्युक्थ्यम् । 'पृथिवी देवता विराट् छन्दो ध्रुवस्य पात्र-मसि' इति ध्रुवस्थालीम् । एतद् ग्रहाभिमर्शनमित्युच्यते ।

२५०. **अपोनप्त्रीयारम्भकहोमः**—ततो यत्कर्तव्यं तच्चिन्तयन्नास्ते । होतुः सकाशाद् 'अभूदषा' इति श्रु वा प्रचरण्यां चतुर्गृहीतं गृहीत्वा आहव-नीये जुहोत्यन्वारब्धे यजमाने 'शृणोत्वग्निः समिधा धियं मे शृण्वन्त्वापो धिषणाश्च देवीः । शृणोत ग्रावाणो विदुषो नुयज्ञꣳ शृणोतु देवः सविता हवं मे स्वाहा' इति । अयमपोनप्त्रीयारम्भकहोम उच्यते ।

२५१. अग्न्यब्यावदेवसवितृभ्य इदमिति यजमानः ।

अपोनप्त्रीयानुवचनप्रैषः—अपरं चतुर्गृहीतं गृहीत्वा बर्हिरादाय सम्प्रैष-माह—अप इष्य होतर्मैत्रावरुणस्य चमसाध्वर्यवाद्रवैकधनिन एतनेष्टः पत्नी-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मुदानयाग्नीद्धोतृचमसेन च मा वसतीवरीभिश्च चात्वाले प्रत्युपलम्भस्व' इति। अयमपोनप्त्रीयानुवचनप्रैष इत्युच्यते।

२५२. **पन्नेजनीग्रहणार्थपत्न्यानयनम्**—यथासम्प्रैषं ते कुर्वन्ति। नेष्टा पन्नेजनीकलशहस्तां पत्नीमानयति 'प्रेह्युदेह्यृतस्य वामीरन्वग्नि स्तेग्रं नयत्वदितिर्मध्यं ददताँरुद्रावसृष्टासि युवानाम मा मा हिँसीः' इति। इदं पन्नेजनीग्रहणार्थपत्न्यानयनमित्युच्यते।

२५३. **एकधनग्रहणार्थहोमः**—प्राग्वंशस्य पूर्वया द्वारोपनिष्क्रम्योत्तरेण सद आग्नीध्रीयं धिष्ण्यं अन्तरेण चात्वालोत्करावुदङ्ङुपनिष्क्रम्य यत्रापस्तत्र गच्छन्ति। अध्वर्युः अप्सु बर्हिष एकदेशं प्रास्य तस्योपरि सशेषं जुहोति—'देवीरापो अपां नपाद्य ऊर्मिर्हविष्य इन्द्रियावान् मादिन्तमस्तं देवेभ्यो देवत्रा धत्त शुक्रँशुक्रपेभ्यो येषां भागस्थ स्वाहा' इति। अद्भ्य इदमिति यजमानः। अयं एकधनग्रहणार्थहोम उच्यते।

२५४. **मैत्रावरुणचमसपूरणम्**—अध्वर्युः अप्सु हुतमाज्यं मैत्रावरुणचमसेनोपप्लावयति—'कार्षिरस्यपापां मृध्रम्' इति। बर्हिषी अन्तर्धाय मैत्रावरुणचमसं पूरयति—'समुद्रस्य वोक्षित्या उन्नये' इति। इदं मैत्रावरुणचमसपूरणमुच्यते॥

२५५. **एकधनग्रहणम्**—त्रिषु कलशेषु बर्हिषी अन्तर्धाय एकधनान् गृह्णाति—'इन्द्राय वो जुष्टान् गृह्णासि' इति। इदमेकधनग्रहणमुच्यते॥

२५६. **एकधना आपः**—इमा गृहीता आपः एकधनपदवाच्याः॥

२५७. **पन्नेजनीग्रहणम्**—प्रतिकलशं ग्रहणमन्त्रस्यावृत्तिः। एकधनान् परिक्रमिभ्य एकधनिभ्यो दत्वा पत्नी कलशं गृहीत्वा बर्हिषी अन्तर्धाय पन्नेजनीर्गृह्णाति—'वसुभ्यो रुद्रेभ्य आदित्येभ्योविश्वेभ्यो देवेभ्यः पन्नेजनीर्गृह्णामि' इति। इदं पन्नेजनीग्रहणमुच्यते॥

२५८. **पन्नेजन्य आपः**—अत्र गृहीता आपः पादप्रक्षालनार्थत्वात् पादयोर्नेजन्य इति समासे पन्नेजनीपदवाच्याः॥

२५९. ततः पन्नेजनीकलशं पत्न्यै प्रदाय यथेतं मङ्गलवाद्यघोषयुक्ताश्चात्वालदेशं प्रतियन्ति। आग्नीध्रः चात्वालदेशे होतृचमसं वसतीवरीश्चसादयति।

होतृचमसादिषु प्रचरणीशेषानयनम्—अध्वर्युः होतृचमसं वसतीवरीभिः सम्मृश्य पूरयति अन्वारब्धे यजमाने। होतृचमसात् तथैव मैत्रावरुणचमसे

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विन्दुं प्रस्कन्दयति। होतृचमसं वसतीवरीमैत्रावरुणचमसमिति त्रयं संसृष्टं निधाय सकृद्वा प्रत्येकं मन्त्रं वक्ष्यमाणमुक्त्वा क्रमेण होतृचमसादिषु सशेषं प्रचरणीशेषमाज्यमानयति—सं ज्योतिषा ज्योतिरंवताꣳ सꣳ शुक्राः शुक्रेण सꣳ हविषा हविः सं यज्ञपतिराशिषा' इति। इदं होतृचमसादिषु प्रचरणीशेषानयनमुच्यते॥

२६०. **वेद्यां पन्नेजनीसादनम्**—पत्नी यथेतमेत्य वेद्यां शालामुखीयस्य पश्चात् तेन संसृष्टाः पन्नेजनीः सादयति। एतद् वेद्यां पन्नेजनीसादनमुच्यते।

२६१. **अबानयननिवेदनम्**—अध्वर्युः होतृचमसं वसतीवरीमैत्रावरुणचमसं एकधनांश्चादाय होतुः सकाशेमेति। 'अवेरपोऽध्वर्याऽउ' इति होत्रा पृष्टः सन् प्रत्याह—'उतेमन्नमुरुतेमाः पश्य' इति। इदमबानयननिवेदनमुच्यते॥

२६२. **ऋतुकरणहोमः**—'यमग्ने पृत्सु मर्त्यं मा वो वाजेषु यञ्जुनाः। स यन्ता शश्वतीरिषः स्वाहा' इति प्रचरणीशेषेणाज्येनाहवनीये जुहोति। अग्नय इदमिति यजमानः। अयं ऋतुकरणहोम उच्यते॥

२६३. **वसतीवर्यादिहविर्धानप्रवेशनम्**—होतृचमसं वसतीवरीमैत्रावरुणचमसं च दक्षिणेन होतारं पर्याहृत्य पूर्वया द्वारा हविर्धानं प्रपादयति। तथैव दक्षिणेन होतारं पर्याहृत्याऽपरया द्वारैकधानान् हविर्धानं प्रपादयति। इदं वसतीवर्यादिहविर्धानप्रवेशनमुच्यते॥

२६४. **हविर्धाने वसतीवर्यादिसादनम्**—होतृचमसीया दक्षिणस्य हविर्धानस्यान्तरेणेषे नीत्वा नीडे सादयति। तत्रत्यमाधवनीयमुत्तानं कृत्वा मैत्रावरुणचमसीया अपः पर्यस्यति। वसतीवरीणां तृतीयं भागमानयति। तथा तृतीयमेकधनानाम्। अवशिष्टा वसतीवरीरुत्तरस्य हविर्धानस्य पुरोक्षं सादयति। शिष्टानेकधनान् पश्चादक्षं सादयति। इदं हविर्धाने वसतीवर्यादिसादनमुच्यते॥

२६५. **दधिग्रहप्रचारः**—ततो हविर्धानयोर्मध्ये उपविश्य दधिग्रहपात्रमादाय तस्मिन् बर्हिषी अन्तर्धाय तदीयं दधि गृह्णाति—'उपयामगृहीतोऽसि प्रजापतये त्वा ज्योतिष्मते ज्योतिष्मन्तं गृह्णामि दक्षाय दक्षवृधे रातं देवेभ्यो ऽग्निजिह्वेभ्यस्त्वतायुभ्य इन्द्रज्येष्ठेभ्यो वरुणराजभ्यः'। अपोधत्य बर्हिषी ग्रहमादायोत्तिष्ठति 'दिवे त्वा ऽन्तरिक्षायत्वा पृथिव्यै त्वा' इति। 'अपेन्द्रद्विषतो मनोपजिज्यास्तो जह्यपयोनोरातीयति तं जहि' ईति पूर्वया द्वारोपनिष्क्रामति। पृष्ठच्यायां दक्षिणतः प्राङ्मुख उपविश्याहवनीये जुहोत्य-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

न्वारब्धे यजमाने—'प्राणाय त्वा ऽपानाय त्वा व्यानाय त्वा सते त्वा ऽसते ऽद्भ्यस्त्वौषधीभ्यो विश्वेभ्यस्त्वाभूतेभ्यो यतः प्रजा अक्खिद्रा अजायन्त तस्मै प्रजापतये विभूदाग्ने ज्योतिष्मते ज्योतिष्मन्तं जुहोमि स्वाहा' इति। प्रजापतये इदमिति यजमानः। अध्वर्युः दधिग्रहपात्रसंक्षालनजलमन्तः परिधि निनीय पात्रमग्नावनुप्रहरति। अयं दधिग्रहप्रचार इत्युच्यते॥

२६६. ततो यजमानः 'अध्वर्यो धेनुं ते ददामि'। अध्वर्युर्धेनु प्रतिगृह्य दधिग्रहशाखां मेक्षणं च तूष्णीमनुप्रहरति। यजमानः प्रकृतिवदुपवेषमुद्वासयति।

होतृचमसीयापेक्षणवाचनम्—अध्वर्यु होतृचससीया दक्षिणस्य हविर्धानस्येषयोर्मध्येनावतार्य चर्मणि निधाय ताः प्रेक्षमाणं यजमानं वाचयति—'निग्राभ्याः स्थ देवश्रुत आयुर्मे तर्पयत प्राणं मे तर्पयताऽपानं मे तर्पयत व्यानं मे तर्पयत चक्षुर्मे तर्पयत श्रोत्रं मे तर्पयत मनो मे तर्पयत वाचं मे तर्पयताऽऽत्मानं मे तर्पयताऽङ्गानि मे तर्पयत प्रजां मे तर्पयत पशून् मे तर्पयत गृहान् मे तर्पयत गणान् मे तर्पयत सर्वगणं मा तर्पयत मा गणा मे मा वितीतृषन्' इति। इदं होतृचमसीयाप्रेक्षणवाचनमुच्यते॥

२६७. 'वसवस्त्वा प्रवृहन्तु गायत्रेण छन्दसा ऽग्नेः प्रियं पाथ उपेहि' इत्युपनद्धस्य राज्ञस्त्रीनंशूनाकृष्य गृह्णाति। तत्रोक्तमन्त्रेण प्रथमम्, 'रुद्रास्त्वा प्रवृहन्तु त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथि उपेहि' इति द्वितीयपशुम्, 'आदित्यास्त्वा प्रवृहन्तु जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथ उपेहि' इति तृतीयम्।

आधावमन्त्राः—अंशूनङ्गुल्यवकाशे कृत्वा होतृचमसीयाः पात्रान्तरे निधाय होतृचमसे आधवनीया ऽपो गृह्णाति। ता अपस्तैरंशुभिर्द्वादशभिर्मन्त्रैराधूनोति—'मान्दासु ते शुक्र शुक्रमाधूनोमि। भन्दनासु ते शुक्र शुक्रमाधूनामि। कोतनासु ते शुक्र शुक्रमाधूनोमि। नूतनासु ते शुक्र शुक्रमाधूनोमि। रेशीषु ते शुक्र शुक्रमाधूनोमि। मेषीषु ते शुक्र शुक्रमाधूनोमि। वाशीषु ते शुक्र शुक्रमाधूनोमि। विश्वभृत्सु ते शुक्र शुक्रमाधूनोमि। माध्वीषु ते शुक्र शुक्रमाधूनोमि। ककुहासु ते शुक्र शुक्रमाधूनोमि। शक्वरीषु ते शुक्र शुक्रमाधूनोमि। शुक्रा सुते शुक्र शुक्रमाधूनोमि। एते मन्त्रा द्वादश आधावसंज्ञकाः॥

२६८. **अदाभ्यग्रहणम्**—ततः अदाभ्यपात्रमधस्तादुपरिष्टाद्रजतसुवर्णरुक्माभ्यां क्रमेणावेष्टय तस्मिन्नंशून्निधाय होतृचमसीया अपो गृह्णाति—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'शुक्रं ते शुक्रेण गृह्णाम्यह्नो रूपेण सूर्यस्य रश्मिभिः। आस्मिन्नु ग्रा अचुच्यवुर्दिवो धारा असश्चत' इति। एतददाभ्यग्रहणमुच्यते ॥

२६९. **अदाभ्यग्रहहोमः**—'ककुहँ रूपं वृषभस्य रोचते बृहत्' इति ग्रहमादायोपोत्तिष्ठति। 'सोमः सोमस्य पुरोगाः शुक्रः शुक्रस्य पुरोगाः' इत्याहवनीयसकाशमेति। वषट्कारपथस्य दक्षिणतः प्राङ्मुखस्तिष्ठन् अन्वारब्धे यजमाने सर्वं जुहोति—'यत्ते सोमादाभ्यं नाम जागृवि तस्मै ते सोम सोमाय स्वाहा' इति। सोमायेदमिति यजमानः। अध्वर्युः प्रदक्षिणमावृत्य राजन्यंशून् प्रक्षिपति—'उशिक् त्वं देव सोम गायत्रेण छन्दसा ऽग्नेः प्रियं पाथो अपीहि' इति प्रथममंशुं प्रक्षिपति। 'वशी त्वं देव सोम त्रैष्टुभेन छन्दसेन्द्रस्य प्रियं पाथो अपीहि' इति द्वितीयम्। 'अस्मत्सखा त्वं देव सोम जागतेन छन्दसा विश्वेषां देवानां प्रियं पाथो अपीहि' इति तृतीयम्। अयमदाभ्यग्रहहोम उच्यते ॥

२७०. ततः पात्रान्तरे ऽवनीता होतृचमसीया होतृचमसे आनीय यजमानाय दत्त्वोपांशुसवनं ग्रावाणं 'देवस्य त्वा' इत्यादिमन्त्रेणाऽऽदत्ते। 'ग्रावास्यध्वरकृद् देवेभ्यो गम्भीरमिममध्वरं कृध्युत्तमेन पवित्रेन्द्राय सोमँ सुषुतं मधुमन्तं पयस्वन्तं वृष्टिवनिम्' इत्यभिमन्त्रयते।

प्रातःसवनार्थं सोममानकरणम्-उपांशुसवनं चर्मणः पूर्वार्धे प्रागायतं निधाय राजानं विस्रस्य उपांशु सवनस्योपरि मिमीते—'इन्द्राय त्वा वृत्रघ्ने। इन्द्राय त्वा वृत्रतुरे। इन्द्राय त्वा ऽभिमातिघ्ने। इन्द्राय त्वादित्यवते। इन्द्राय त्वा विश्वदेव्यावते' इत्येकैकेन मन्त्रेण क्रमेण। तत्र प्रथममङ्गुष्ठयुक्तया प्रदेशिन्यां, द्वितीयमंगुष्ठयुक्तयोपकनिष्ठिकया, तृतीयं तथैव प्रदेशिन्या, चतुर्थं तथैव कनिष्ठिकया, पञ्चमं तथैव मध्यमा। एवं विमाय पञ्चकृत्वस्तूष्णीं मिमीते। अंगुष्ठयुक्तया प्रथमम्, तथैव मध्यमया द्वितीयम्, तथैव कनिष्ठिकया तृतीयम्, तथैव प्रदेशिन्यां चतुर्थम्, महानाम्न्या तथैव पञ्चमम्। एवं दशकृत्वो मिमानो ऽर्धं राजानं मिमीते। इदं प्रातःसवनार्थं सोममानकरणमुच्यते ॥

२७१. **अभिषवार्थसेचनम्**—अवशिष्टं राजानमुष्णीषेण विग्रथ्य ईषयोर्मध्येन नीत्वा नीडे सादयति। मितं राजानं होतृचमसीयाभिः सिञ्चति—'श्वात्राः स्थ वृत्रतुरो राधो गूर्ता अमृतस्य पत्नीस्ता देवीर्देवत्रेमं यज्ञं धत्तोपहूताः सोमस्य पिबतोपहूतो युष्माकँ सोमः पिबतु' इति। इदमभिषवार्थसेचनमुच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२७२. **होतृचमसीयामिश्रणम्**—'तत्ते सोम दिवि ज्योतिर्यत् पृथिव्यां यदुरावन्तरिक्षे तेनास्मै यजमानायोरु राया कृध्यधिदात्रेऽवोचः' इति राजानमुदकेन मिश्रयति। इदं होतृचमसीयामिश्रणमुच्यते।

२७३. **अभिषवार्थफलकाभिमर्शनम्**—'धिषणे वीड़ू सती वीडयेथामूर्जं दधाथामूर्ज्जं मे धत्तं वाँहिँसिषं मा मा हिँ सिष्टम्' इति चर्मान्तर्हिते फलके अभिमृशति। इदमभिषवार्थफलकाभिमर्शनमुच्यते।

२७४. **वृद्धिवाचनम्** ततो यजमानं वाचयति—'अवीवृधं वो मनसा सुजाता ऋतप्रजा ता भग इद्वः स्याम। इन्द्रेण देवीर्वीरुधः संविदाना अनुमन्यताँ सवनाय सोमम्' इति। इदं वृद्धिवाचनमित्युच्यते।

२७५. प्रतिप्रस्थाता राज्ञः षडंशूनादाय सव्यपाण्यन्तरालेषु द्वौ द्वौ कृत्वा सव्येनैव पाणिनोपांशुपात्रमादत्ते। अध्वर्युः प्रेष्यति—प्रतिप्रस्थातरुदकँसेन वोदचमसेन वा जघनेनाहवनीयं प्रत्युपलम्वस्व।'स तथा करोति।

अंशुपात्रहोमः—अध्वर्युः हिरण्यमद्भिः प्रक्षाल्य मध्यमायामङ्गुलौ कृत्वा राजानं विस्रस्योपांशुसवनेन सकृत्प्रहृत्य अंशुपात्रमादाय 'कया न' इति वामदेव्यं साम अनवानं गायन् योनिं[1] वा पठन्नंशुमात्रेण रसं गृह्णाति—'उपयामगृहीतोऽसि प्रजापतये त्वा जुष्टं गृह्णामि'। तिष्ठन्नाहवनीये जुहोति—'प्रजापतये स्वाहा'इति। यथालिङ्गं त्यागो यजमानस्य। हिरण्ये प्राण्यव्यानिति—'आनः प्राण एतु परावत आन्तरिक्षाद् दिवस्परि। आयुः पृथिव्या अध्यमृतमसि प्राणाय त्वा' इति। 'इन्द्राग्नी मे वर्चः कृणुतां वर्चः सोमो बृहस्पतिः। वर्चो मे विश्वे देवा वर्चो मे धत्तमश्विना॥''दधन्देवा' यदीमनु वोचद् ब्रह्माणि वेरु तत्। परिविश्वानि काव्या नेमिश्चक्रमिवाभवत्' इति द्वाभ्यां यजमानः पूर्वाहृताभिरद्भिर्मार्जयते। तच्छतमानं [2]हिरण्यमध्वर्यवे ददाति। शतमानं रजत ब्रह्मणे। अयमंशुपात्रहोम उच्यते।

२७६. **अभिषवणम्**—अध्वर्युरुपांशुसवनेनाभिषुणोति। एकं द्वे त्रीणि चत्वारि पञ्च षट् सप्त अष्टौ इत्यष्टकृत्वः सङ्ख्याय अभिषुणोति। सोमवल्याः जलेन कुट्टनम् अभिषवणमुच्यते।

२७७. **उपांशुपात्रे प्रथमरसग्रहणम्**—अंशौ स्कन्ने सति यजमानं वाचयति—'आ मास्कान्त्सह प्रजया सह रायस्पोषेणेन्द्रियं मे वीर्यं मा निर्वधीः।'

---

१. 'कया नश्चित्र' ऋच्युत्पन्नं साम वामदेव्यमुच्यते। तेनास्य साम्नो योनिभूता ऋगत्र योनिशब्देनोक्ता। २. ये हिरण्यं मिमीते तेन शतं मीत्वा।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अभिषुतं सोममञ्जलिनैकीकृत्य गृह्णाति । प्रतिप्रस्थाताऽङ्गुल्यन्तरालधृताभ्यां प्रथमाभ्यामंशुभ्यामुपांशु पात्रमन्तर्दधाति । अध्वर्युः 'वाचस्पतये पवस्व वाजिन्' इति पात्रे रसमानयति । प्रतिप्रस्थाता अंशू यथास्थानं लग्नयति । इदमुपांशुपात्रे प्रथमरसग्रहणमुच्यते ।

२७८. **द्वितीयरसग्रहणम्**—अध्वर्युः पुनर्होतृचमसीयाऽऽसिञ्चनादि वृद्धिवाचनान्तं कृत्वोपांशुसवनेन एकमित्यादि एकादशेत्यन्तं संख्यायाभिषुणोति । नात्रांशौ स्कन्ने वाचनम् । पूर्ववदञ्जलिनोपहन्ति । प्रतिप्रस्थाता मध्यमाभ्यामंशुभ्यां पात्रमन्तर्दधाति । अध्वर्युः पात्रे आनयति—'वृषा वृष्णो अंशुभ्यां गभस्तिपूतः' इति । प्रतिप्रस्थाता अंशू यथास्थानं लग्नयति । इदं द्वितीयरसग्रहणमुच्यते ॥

२७९. **तृतीयरसग्रहणम्**—द्वितीयवत् तृतीयं द्वादशकृत्वः संख्यायाऽभिषुणोति । नात्रांशौ स्कन्ने वाचनम् । उत्तमाभ्यामंशुभ्यामन्तर्धानम् । 'देवो देवानां पवित्रमसि येषां भागोऽसि तेभ्यस्त्वा' इति पात्रे रसानयनम् । इदं तृतीयरसग्रहणमुच्यते ।

२८०. **ग्रहावेक्षणम्**—अध्वर्युः उपांशुसवनं दशापवित्रेण परिमृज्य यथास्थानं निदधाति । उपांशुप्रभृतीनां सर्वेषां ग्रहाणां ग्रहणं पुरस्तादुपरिष्टाच्चोद्बुध्नता आविलात् । ग्रहाणाम् 'उपयामं' इत्येतद्घटितेन मन्त्रेण ग्रहणम् । अनादिष्टश्रपणानां हिरण्येन श्रपणम् । दधिग्रहभिन्नानां तिष्ठद्धोमः । अध्वर्युः 'स्वांकृतोसि' इति मन्त्रेण प्रतिप्रस्थातुः सकाशात् उपांशु पात्रमादते । 'मधुमतीर्न इषस्कृधि' इत्यवेक्षते पात्रम् । इदं ग्रहावेक्षणमुच्यते ।

२८१, **ग्रहोन्मार्जनम्**—सव्येन धृत्वा दक्षिणेनोर्ध्वमुन्मार्ष्टि—'विश्वेभ्यस्त्वेन्द्रियेभ्यो दिव्येभ्यः पार्थिवेभ्यः' इति । इदं ग्रहोन्मार्जनमुच्यते ।

२८२. **उपांशुपात्रहोमः**—'मनस्त्वाष्टु' इत्युपोत्तिष्ठति । 'उर्वन्तरिक्षमन्विहि' इत्याहवनीयसमीपं गच्छति । 'स्वाहा त्वा सुभवः सूर्याय स्वाहा' इत्यन्वारब्धे यजमाने आहवनीये जुहोति । सूर्यायेदमिति यजमानः । अयमुपांशुपात्रहोम उच्यते ।

२८३. **ग्रहरसावमार्जनम्**—अनुप्राण्य यजमानं वाचयति—'भूरसि श्रेष्ठो रश्मीनां प्राणपाः प्राणं मे पाहि' इति । विलादारभ्याधः प्रदेशादवाचीनं ग्रहस्य बहिष्ठं रसमवमृज्य प्रत्यगग्रेणाधामुखेन पाणिना मध्यमे परिधौ निमार्ष्टि—

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

'देवेभ्यस्त्वा मरीचिपेभ्यः' इति । देवेभ्यो मरीचिपेभ्य इदमिति यजमानः । इदं ग्रहरसावमार्जनमुच्यते ।

२८४. **उपांशुसवनं प्रत्यभिमर्शनम्**—अध्वर्युः प्रदक्षिणमावृत्याऽऽग्रयणस्थाल्यां ग्रहस्य संस्रावमवनयति—'एष ते योनिः' इति । उपांशुपात्रे राज्ञोंशुं प्रास्य यथास्थानं निदधाति—'प्राणाय त्वा' इति । इदमुपांशुसवनं प्रत्यभिमर्शनमुच्यते ।

२८५. प्रतिप्रस्थाता ग्रहणक्रमेणाभिषुते राज्ञि द्वौ द्वावंशू प्रक्षिपति—'यत्ते सोमादाभ्यं नाम जागृषि तस्मै ते सोम सोमाय' इति मन्त्रस्य त्रिरावृत्तिः ।

अभिषवार्थोपवेशनम्—अध्वर्युः राज्ञः पश्चात प्राङ्मुख उपविशति । तस्य दक्षिणत उदङ्मुखो यजमानः । प्रतिस्थाता च उत्तरतो दक्षिणामुखः । आग्नीध्रः पुरस्तात् प्रत्यङ्मुखः । नेष्टा दक्षिणत उदङ्मुखः । ब्रह्मा अभिषोतॄन् परीत्य दक्षिणत उदङ्मुख आस्ते । इदमभिषवार्थोपवेशनमुच्यते ।

२८६. **अंशुपरिप्लावनम्**—ततो ऽध्वर्युरुन्नेतारमाह—'आहरोपसृज' इति । उन्नेता आधवनीयादुदञ्चनेन होतृचमसमुपर्यर्धं करोति । अध्वर्युप्रतिस्थात्रग्नीन्नेष्टारो होतृचमसे राज्ञोंशून् परिप्लावयन्ति 'प्रागपागुदगधराक्तास्त्वादिश आधावन्त्वम्ब निष्वर' इति । इदमंशुपरिप्लावनमुच्यते ।

२८७. **सोमाभिषवप्रथमपर्यायः**—होतृचमसादंशूनादाय चर्मणि निधाय राजानं होतृचमसोदकेनोपसिच्य प्रत्यात्मानं सर्वे विभज्य अंशूनाकृष्य यावद् रसनिस्रावमभिषुण्वन्ति । आहरोपसृजेत्याद्ये तदन्तं त्रिवारं समन्त्रकं कृत्वा चतुर्थे आहरोपसृजेति प्रैषमात्रम्,अन्यत् तूष्णीम् । ततो राजानं हस्तेन निष्पीड्य सम्भरणीयकलशे रसं गृहीत्वा अध्वर्युरन्तरेणेषे उन्नेत्रे प्रयच्छति । उन्नेता आधवनीयस्था अपो ऽन्यस्मिन्नम्भ्रणे ऽवनीयाऽऽधवनीये पवित्रं वितत्य सम्भरणीमवनयति । एष एकः पर्यायः । अयं सोमाभिषवप्रथमपर्याय उच्यते।।

२८८. **सोमाभिषवद्वितीयपर्यायः**—तत आहरोपसृजेत्यादि त्रिवारं समन्त्रकं सकृत्तूष्णीं च कृत्वा अम्भ्रणान्तरस्था आधवनीया अप उपसृजति सम्भरणीमवनयतित्यन्तं करोति । एष सोमाभिषवद्वितीयपर्याय उच्यते ।।

२८९. **सोमाभिषवतृतीयपर्यायः**—एवमेव तृतीयः पर्यायः । तृतीये अम्भ्रणे आधवनीयापोऽवनयतीति विशेषः । एष सोमाभिषवतृतीयपर्याय उच्यते ।।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२९०. **अभिषुतसोमनिवेदनम्**—ततः ऋजीषं दशापवित्रेण परिवेष्टय अन्तरेणेषे उन्नेत्रे प्रयच्छति। उन्नेता मर्दयित्वा आधवनीये निष्पीड्य तेनैव मार्गेणाध्वर्युः ऋजीषं चर्मणि निधाय पूर्ववत् सम्मुखान् ग्राव्णः कृत्वा ग्रावमुखेषु ऋजीषं चतुर्धा कृत्वा व्यपोहति। उद्गातृभ्यः प्राह—'सोमो ऽभिषुतः' इति। इदमभिषुतसोमनिवेदनमुच्यते॥

२९१. **अन्तर्यामरसग्रहणम्**—उद्गातृभिर्द्रोणकलशे ऋजीषस्योपरि निहिते दशापवित्रे विततेऽदिते आदित्ये ऽनुदिते वा उन्नेत्रा आधवनीयादुदञ्चनेन दशापवित्रे ऽवनीयमानं सोममन्तर्यामपात्रेणाधोधारायां गृह्णाति—'उपयामगृहीतोस्यन्तर्यच्छ मघवन्पाहि सोममुरुष्य रायः समिषो यजस्वान्तस्ते दधामि द्यावापृथिवी अन्तरुर्वन्तरिक्षꣳ सजोषा देवैरवरैः परैश्चान्तर्यामे मघवन्मादयस्व' इति। इदमन्तर्यामरसग्रहणमुच्यते।

२९२. **अन्तर्यामपात्रहोमः**—'स्वां कृतोसि' इति धारातो ग्रहमपयच्छति। 'मधुमतीः' इत्यादिमन्त्रेणेक्षते। उपांशुपात्रवन्मन्त्रेणोन्मार्ष्टि। तथैवादायोपोत्थायाऽऽहवनीयसमीपमेत्यौपांशुपात्रहोममन्त्रेण जुहोति। अपान्य यजमानं वाचयति—'धूरसि श्रेष्ठो रश्मीनामपानपा अपानं मे पाहि' इति। अयमन्तर्यामपात्रहोम उच्यते।

२९३. ग्रहस्य बहिष्ठं रसं मूलादारभ्य बिलपर्यन्तं दक्षिणेन पाणिनोर्ध्वमुन्मुच्य प्राचोत्तानेन पाणिना मध्यमे परिधौ उक्तमन्त्रेणोन्मार्ष्टि। ग्रहस्य यथास्थानसादनान्तं प्रत्यभिमर्शनान्तं च समन्त्रकमुपांशुपात्रवत्।

ग्रहेषु रसायनप्रैषः—तत उन्नेतारमाह—अप्रमत्तः सन्ततमानयोपाꣳशुग्रहान् ग्रहीष्यामि' इति। अयं ग्रहेषु रसानयनप्रैष उच्यते।

२९४. **ऐन्द्रवायवपात्रे रसग्रहणम्**—उन्नेता पूर्ववदाधवनीयादुदञ्चनेन सन्ततां सोमधारां दशापवित्रे ऽवनयति। ध्रुवस्थाल्यां ग्रहणपर्यन्तं अध्वर्युः ऐन्द्रवायवपात्रेण धारायां गृह्णाति। एतदादीनाग्रयणान्तान् मन्द्रापेक्षया नीचस्वरेण गृह्णाति। 'आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार। उपो ते अन्धो०पेयम्। उपयामगृहीतो ऽसि वायवे त्वा जुष्टं गृह्णामि'—इति किञ्चित् गृहीत्वा धारातो ग्रहमपनीय पुनर्गृह्णाति—'इन्द्रवायू इमे सुता उप प्रयोभिरागतमिन्दवो वामुशन्ति हि। उपयामगृहीतोसीन्द्रवायुभ्यां त्वा जुष्टं गृह्णामि।' दशापवित्रेण परिमृज्य मन्त्रेण यथास्थानं निदधाति। 'एष ते योनिः सजोषाभ्यां त्वा' इत्यैन्द्रवायवपात्रे रसग्रहणमुच्यते।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

२९५. **मैत्रावरुणपात्रे रसग्रहणम्** –मैत्रावरुणपात्रे गृह्णाति—'अयं वां मित्रावरुणा०श्रुतꣳ हवम्। उपयामगृहीतो ऽसि मित्रावरुणाभ्यां त्वा जुष्टं गृह्णामि' इति। बर्हिषी अन्तर्धाय पयसा श्रीत्वा अपोद्धृत्य बर्हिषी दशापवित्रेण परि मृज्य यथास्थानं सादयति 'एष ते योनिर्ऋतायुभ्यां त्वा' इति। इदं मैत्रावरुणपात्रे रसग्रहणमुच्यते।

२९६. **शुक्रपात्रे रसग्रहणम्**—शुक्रपात्रेण गृह्णाति—'अयं वेनश्चोदयत् पृश्निगर्भा ज्योतिर्जरायू रजसो विमाने। इममपां सङ्गमे सूर्यस्य शिशुं न विप्रा मतिभी रिहन्ति। उपयाम गृहीतोऽसि शण्डाय त्वा जुष्टं गृह्णामि।'परिमृज्य सादयति—'एष ते योनिर्वीरतां पाहि' इति। इदं शुक्रपात्रे रसग्रहणमुच्यते।

२९७. **मन्थिपात्रे रसग्रहणम्**—मन्थिपात्रे गृह्णाति—'तं प्रत्नथा पूर्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदꣳ सुवर्विदम्। ०रोचनम्। उपयामगृहीतो ऽसि मर्काय त्वा जुष्टं गृह्णामि' इति। वर्हिषी अन्तर्धाय सक्तुभिः श्रीत्वा ऽपोद्धृत्य वर्हिषी परिमृज्य सादयति। इदं मन्थिपात्रे सोमग्रहणमुच्यते।

२९८. **आग्रयणस्थाल्यां सोग्रहणम्** –आग्रयणस्थं सोमं पात्रान्तरे ऽवनीय तेनोदञ्चनेन च द्वयोर्धारयोरधस्तादाग्रयणं गृह्णाति--'ये देवा सो०मञ्जुषध्वम्। उपयामगृहीतो ऽसि विश्वेभ्यस्त्वा देवेभ्यो जुष्टं गृह्णामि' इति। ततो मन्द्रेण 'हिं हिं हिं सोमः पवते सोमः पवते ऽस्मै ब्रह्मणे पवते ऽस्मै क्षत्राय पवते ऽस्यै विशे पवत इषे पवत ऊर्जे पवते ऽद्भ्यः पवते वनस्पतिभ्यः पवते द्यावापृथिवीभ्यां पवते सुभूताय पवते ब्रह्मवर्चसाय पवते ऽस्मै सुन्वते यजमानाय पवते ज्यैष्ठ्याय पवते।' अविच्छिद्योपरिमन्त्रं वदति—आग्रयणो ऽसि स्वाग्रयणो जिन्व यज्ञं जिन्व यज्ञपतिमभिसवना पाहि विष्णुस्त्वां पातु विश्वं त्वं पाहीन्द्रियेण' इति परिमृज्य सादयति—'एष ते योनिर्विश्वेभ्यस्त्वाः देवेभ्यः' इति। इदमाग्रयणस्थाल्यां सोमग्रहणमुच्यते।

२९९. एतदन्तान् उपांशु गृहीत्वा ऽत ऊर्ध्वं सवनस्वरेण गृह्णाति—

आग्नेयपात्रेसोमग्रहणम्——आग्नेयपात्रेण गृह्णाति—'अग्न आयूꣳषि० दुच्छुनान्। उपयामगृहीतोस्यग्नये त्वा ज्योतिष्मते। जुष्टं गृह्णामि। परिमृज्य सादयति—एष ते योनिरग्नये त्वा तेजस्वते' इति। इदमाग्नेयपात्रे सोमग्रहणमुच्यते।

---

१. प्रातःसवने मन्द्रस्वरो विहित, माध्यन्दिनसवने मध्यमः स्वरः, तृतीय-सवने च कृष्टस्वर, (द्र० आप० परिभाषा १।११-१६)॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३००. **ऐन्द्रपात्रे सोमग्रहणम्**—ऐन्द्रपात्रेण गृह्णाति—'उत्तिष्ठन्नोज०चमू सतम्। उदयामगृहीतोऽसीन्द्राय त्वौजस्वते जुष्टं गृह्णामि' इति। परिमृज्य सादयति 'एष ते योनिरिन्द्रायत्वौजस्वते' इति। इदमैन्द्रपात्रे सोमग्रहणमुच्यते।

३०१. **सौर्यपात्रे सोमग्रहणम्**—सौर्यपात्रेण गृह्णाति—तरणिर्वि०रोचनम्। उपमामगृहीतोऽसि सूर्याय त्वा भ्राजस्वते जुष्टं गृह्णामि। परिमृज्य सादयति—एष ते योनिः सूर्याय त्वा भ्राजस्वते' इति। इदं सौर्यपात्रे सोमग्रहणमुच्यते।

३०२. **उक्थ्यस्थाल्यां सोमग्रहणम्**—तत उक्थ्यस्थाल्याम्—'उपयामगृहीतोऽसीन्द्राय त्वा बृहद्वते वयस्वत उक्थायुवे यत्त इन्द्र बृहद्वयस्तस्मै त्वा विष्णवे त्वा जुष्टं गृह्णामि' इति। परि०यति—'एष ते योनिरिन्द्राय त्वोक्थायुवे' इति। इदमुक्थ्यस्थाल्यां सोमग्रहणमुच्यते।

३०३. **ध्रुवस्थालीसोमग्रहणम्**—ततो ध्रुवस्थालीं गृहीत्वा ऽऽह—'ये पूर्वया द्वारा प्रापत्स्यन्तः प्राञ्चस्ते निष्क्रामन्तु ये परया प्रत्यञ्चस्ते मा वोऽभिपरिहारिषम्।' ध्रुवस्थालीं सोन्नेतृकानभिषोतूंश्च जघनेनाभिपरिहृत्योत्तरतो धारायां गृह्णाति—'मूर्धानं दिवो०यन्त देवाः। उपयामगृहीतोस्यग्नये त्वा वैश्वानराय जुष्टं गृह्णामि' इति उपर्यविच्छिद्य मन्त्रं वदति—'ध्रुवोऽसि ध्रुवक्षितिर्ध्रुवाणां ध्रुवतमोच्युतानामच्युतक्षित्तमः' इति। ततः परिमृज्य यथाहृतं परिहृत्य यथास्थानं सादयति—'एष ते योनिरग्नये त्वा वैश्वनराय' इति। इदं ध्रुवस्थालीसोमग्रहणमुच्यते।

३०४. **सोमद्रप्सस्कन्दनानुमन्त्रणम्**—तत उन्नेता आधवनीयादुदञ्चनेनोपर्यधं द्रोणकलशं पूरयति। अध्वर्युस्तस्मिन् पयः सक्तून् हिरण्यं च प्रक्षिप्य मिश्रीकृत्य परिप्लुपात्रं च प्रास्य द्रप्सानानुमन्त्रयते—'द्रप्सश्चस्कन्द० सप्तहोत्राः। यस्ते द्रप्सः स्कन्दति०तं जुहोमि। यो द्रप्सो अꣳशु०तं जुहोमि' यस्ते द्रप्सो म० तं जुहोमि इति चतसृभिः। इदं सोमद्रप्सस्कन्दनानुमन्त्रणमुच्यते।

३०५. **पूतभृत्पूरणप्रैषः**—उन्नेतारमाह—अरिक्तं पूतभृतं कुरु पवमानस्य ग्रहान् ग्रहीष्यामि। अयं पूतभृत्पूरणप्रैष उच्यते।

३०६. उन्नेता पूतभृतो बिले दशापवित्रं वितत्याधवनीयात् द्वौ त्रीन् वोदञ्चनानयति।

द्रोणकलश-आधवनीय-पूतभृदभिमर्शनम्—अध्वर्युः द्रोणकलशमभिमृ-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शति—'उपयामगृहीतोऽसि प्रजापतये त्वा।' तत आधवनीयम्—'उप०सीन्द्राय त्वा।' पूतभृतम्—'उप०सिविश्वेभ्यस्त्वा देवेभ्यः।'

आधवनीयन्युब्जकरणप्रैषः—उन्नेतारमाह—उन्नेतः प्राञ्चं राजानं पूतभृतिमभिसंपवयताद् दशाभिराधवनीयं मृष्ट्वा न्युब्जताद्। अयमाधवनीयन्युब्जकरणप्रैष उच्यते॥

३०७. **बहिष्पवमानारम्भकहोमः**—उन्नेता अवकाशचरणानन्तरं तथा करोति। अध्वर्युः अप उपस्पृश्योपस्तंभनबर्हिर्मुष्टेर्बर्हिर्द्वयमादायोपनिःसर्पति। तं निःसर्पन्तमन्वारभत उद्गाता, उद्गातारं प्रस्तोता, तं प्रतिहर्ता, तं यजमानः, तं ब्रह्मा, तं प्रतिप्रस्थाता मैत्रावरुणो वा। एवमन्वारब्धेषु अध्वर्युराहवनीये स्रुवाहुतिं जुहोति—'अग्निः प्रातः सवने०मक्षाः स्याम स्वाहा' इति। एतयैवर्चा प्रतिप्रस्थाता। यथावेदमितरे। आश्वलायनयजमानस्य 'द्रप्सश्चस्कन्द, यस्ते द्रप्स' इति द्वाभ्यां होमः। स चान्वारम्भक्रमेण। अयं बहिष्पवमानारम्भकहोम उच्यते॥

३०८. **बहिष्पवमानस्तोत्रोपाकरणम्**—अध्वर्युर्बर्हिषी धून्वानो बहिष्पवमानायोदगास्तावं प्रतिसर्पति—'वागग्रेगा०यजमाने च' इति। आस्तावे यथाऽऽयतनमुपविश्य प्रस्तोत्रे बर्हिषी प्रयच्छति—'ऋक्साम०प्रजात्ये' इति। जपति—'वायुर्हिङ्कर्ता० बृहस्पतिः धत्वोंस्तुध्वम्' इति। इदं बहिष्पवमानस्तोत्रोपाकरणमुच्यते॥

३०९. **बहिष्पवमानारम्भकवाचनम्**—बहिष्पवमानस्य पञ्चम्यामृचि प्रस्तुतायां यजमानं वाचयति—'श्येनोऽसि०संपारय' इति। इदं बहिष्पवमानारम्भकवाचनम्॥

३१०. **स्तोत्रानन्तरवाचनम्**—दशहोतारं व्याख्याय समाप्ते साम्नि यजमानं वाचयति—'स्तुतस्य०रयीणाम्' इति। एवं सर्वस्तोत्रेषु। इदं स्तोत्रानन्तरवाचनम्।

३११. **अग्निविहरणादिप्रैषः**—'अग्नीदग्नीन् विहर, बर्हिः स्तृणाहि,पुरोडाशान् अलङ्कुरु, प्रतिप्रस्थातः पशुरन्तिकेऽस्तु' इति। अयमग्निविहरणादिप्रैषः॥

३१२. **सर्वपात्रस्थसोमोपस्थानम्**—अप उपस्पृश्य। 'एहि यजमान' इत्यामन्त्र्य यजमानेन सह पूर्वया द्वारा हविर्धानं प्रविश्य 'विष्णो त्वं नो०अक्षि' इति। इदं सर्वपात्रस्थसोमोपस्थानम्॥

३१३. **आश्विनपात्रे सोमग्रहणम्**—आश्विनपात्रमादाय द्रोणकलशात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

परिप्लुपात्रेण गृह्णाति—'यावांकशा०क्षतम्'। उप०स्यश्विभ्यां त्वा०मि। परि०यति—'एष ते योनिर्माध्वीभ्यां त्वा' इदमाश्विनपात्रे सोमग्रहणम्॥

३१४. अप०स्पृश्य। एहि त०त्र्य। आहवनीयसमीपं गत्वा प्रचरण्यां स्रुचि चतुर्गृहीतं गृहीत्वा यजमाने ऽन्वारब्धे सप्तहोतारं समनाद्रुत्याहवनीये जुहोति। यजमानो ऽध्वर्युश्च सर्वपात्रस्थं सोममुपतिष्ठते—'परिभूरग्नि० मुन्मृजे'।

सर्वपात्रस्थसोमानां प्रत्येकमुपस्थानम्—उपांशुपात्रम्—'प्राणाय मे०-पवस्व'। उपांशुसवनम्—'व्याना०वस्व'। ऐन्द्रवायवम्—'वाचे मे०स्व'। मैत्रावरुणम्—'दक्षक्रतुभ्यां मे०स्व'। आश्विनम्—'श्रोत्राय मे०स्व'। युग-पच्छुक्रामन्थिनौ—'चक्षुर्भ्यां मे०स्व'। आग्रयणम्—'आत्मने मे०स्व'। अति-ग्राह्यान् क्रमेण—'वीर्याय मे०स्व'। मन्त्रावृत्तिः। उक्थ्यम्—अङ्गेभ्यो मे०-स्व। ध्रुवम्—आयुषे मे०स्व। द्रोणकलशम्—विष्णोर्जठरमसि वर्चो०स्व। आधवनीयम्—इन्द्रस्य जठरमसि वर्चो०स्व। पूतभृतम्—विश्वेषां देवानां जठर०स्व। सर्वपात्रस्थम्—'को ऽसि को नाम०मुन्मृजे'। इदं सर्वपात्रस्थ-सोमानां प्रत्येकमुपस्थानम्॥

३१५. **आधवनीयस्य हविर्धाननीडे सादनम्**—उन्नेता पूतभृति दशापवित्रं वितत्याधवनीयस्थं सोमं तस्मिन्नवनीय दशापवित्रेणाधवनीयं मृष्ट्वोत्तरस्य हविर्धानस्य नीडे ऽधोविलं सादयति। इदमाधवनीयस्य हविर्धाननीडे सादनम्॥

३१६. **धिष्ण्येष्वङ्गारविहरणम्**—अध्वर्युः प्रचरण्यां नव कृत्व आज्यं गृह्णाति। आग्नीध्रः आग्नीध्रीयादङ्गारानादायाग्नीध्रीये होत्रीये चैकं विहृत्य स्वरं वहिर्गच्छन् यूपाहवनीययोर्मध्येन नीत्वा प्रशास्त्रीये विहृत्य यथेतमेत्य ब्राह्मणाच्छंसीये पोत्रीये नेष्ट्रीये ऽच्छावाकीये च विहृत्य पुनस्तथैव गत्वा मार्जालीये विहृत्य यथेतमेत्याग्नीध्रीये ऽतिशिष्टान् विहरति। इदं धिष्ण्ये-ष्वङ्गारविहरणम्॥

३१७. **धिष्ण्याधारणम्**—अध्वर्युः पुरस्तात् प्रत्यङ्मुख उपविश्य विहृ-तान् धिष्ण्यान् न्युप्तमिवाऽऽधारयति—'विभरसि०सीः स्वाहा' इत्याग्नीध्रीये। वह्निरसि०हा' प्रशास्त्रीयम्। 'तुथो०हा' इति ब्राह्मणाच्छंसीयम्। 'उशि० स्वाहा' पोत्रीयम्। 'अङ्गि०हा' नेष्ट्रीयम्। 'अवस्यु० हा' अच्छावाकीयम्। शुन्ध्यू०हा' मार्जालीयम्। 'सप्त त' इत्यृचा पुनराग्नीध्रीये जुहोति। उत्त-रस्य हविर्धानस्य चुबुके प्रचरणीं सादयति। इदं धिष्ण्याधारणम्॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३१८. **सवनीयपृष्ठ्यास्तरणम्**—आग्नीध्रः शालामुखीयादाहवनीयपर्यन्तं प्राकृतमन्त्रेण पृष्ठ्याँस्तृणाति । इदं सवनीयपृष्ठ्यास्तरणम् ॥

३१९. **सवनीयाङ्गमैत्रावरुणादिप्रवरणम्**—अध्वर्युः यूपरशनामादाय यूपसमीपमागत्य स्वरुं गृहीत्वा पूर्वां रशनामुद्गृह्य परिव्ययणादि प्रवरान्तमग्नीषोमीयवत् करोति । तत्र विशेषः मन्त्रेषु देवतास्थाने **अग्नि**शब्द ऊह्यः । होतृप्रवरान्तरम् अश्विनाऽध्वर्यू आध्वर्यवात् । 'अहं चामुकशर्मा मानुषौ' इति प्रतिप्रस्थातुर्नाम गृह्णाति । होत्रा हुते सकृद्गृहीतेन प्रवृताहुतीर्जुहोति—'जुष्टो वाचो०त्यै स्वाहा' । 'ऋचास्तो० नि स्वाहा ।' 'सूर्यो मा०ते स्वाहा' । एवं प्रतिप्रस्थाता । अध्वर्युः पुनरुत्करं गत्वा मित्रावरुणौ प्रशास्तारौ प्रशास्तात् । अमुकशर्मा मानुष इति मैत्रावरुणस्य नाम गृह्णाति । इन्द्रो ब्रह्मा ब्राह्मणात् । पूर्ववद् ब्राह्मणाच्छंसिनो नाम गृह्णाति । मरुतः पोत्रात् इति पोतुः । ग्रावो नेष्टात् नेष्टुः । अग्नीमाग्नीध्रात् इत्यग्नीधः । सर्वप्रवरात् पूर्वमाश्रावणप्रत्याश्रावणे भवतः । तत आश्राव्य प्रत्याश्राविते 'अग्निर्हं दैवीनां विशां पुर एता यां सुन्वन्यजमानो मनुष्याणां तपोरस्थरिगार्हपत्यं दीदयच्छतꣳ हिमाद्वायूराधाꣳसीत् संपृञ्चानावपृञ्चानौ तन्वः' इत्याह । इदं सवनीयाङ्गमैत्रावरुणादिप्रवरणम् ॥

३२०. **सवनीयपशुवपाप्रचारः**—आश्वलायनो यजमानः स्रुवेण प्रवृताहुतीर्जुहोति । अग्नीषोमीयवत् सवनीयपशुवपाप्रचार ऊहेन । अयं सवनीयपशुवपाप्रचारः ॥

३२१. **सवनीयेन सह पशुपुरोडाशनिर्वापः**—पशुपुरोडाशनिर्वापप्रैषानन्तरं आग्नीध्रो माध्यन्दिनीयैः सवनीयैः सह निर्वपति । अयं सवनीयैः सह पशुपुरोडाशनिर्वापः ॥

३२२. **यजमानस्य सदस्युपवेशनम्**—कुम्भ्यावदाननिक्षेपानन्तरं उत्करे स्फ्यादीन् विघनान् निधाय यजमानमुपस्थापयति—'स्फ्यः स्वस्ति०ह्वयन्ताम्' इति । यजमान आहवनीयमुपतिष्ठते—'नमो ऽग्नये म०र्यात्' । 'नेनोरु०पाहि' इत्याग्नीध्रीयम् । सदसः पूर्वद्वारि प्रत्यङ्मुखस्तिष्ठन् होत्रीयम्—'नम इन्द्रा०र्वधीः' इति । सव्यमावृत्य प्राङ्मुखो जपति—'दृढे स्थःशि०ष्येभ्यः' इति । प्रदक्षिणमावृत्य सदसः पूर्वे द्वार्बाहू युगपदभिमृशति—'देवी०प्तम्' इति । सदः प्रविशति—'नमः सद० थिव्यै' इति । मैत्रावरुणधिष्ण्यस्य दक्षिणतः स्वायतनाद्बहिः सदसस्तृणं नैर्ऋत्यान्दिशि निरस्यति—'अहे०तरः' इति । अप०स्पृश्योदङ्मुख उपविशति—'उन्नी०गेषम्' इति । पृथिवीं दृष्ट्वा द्यामी-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

क्षते—'पातं०ह्वः' इति । प्राचीनवीती दक्षिणार्धमीक्षते—'आगं०यास्त' इति । अप उपस्पृश्य तूष्णीमुत्तरार्धं परेक्षते । इदं यजमानस्य सदस्युपवेशनम् ॥

३२३. अध्वर्युप्रतिप्रस्थातारौ आहवनीयोपस्थानाद्येतदन्तं कुरुतः ।

सदसि प्रसर्पणम्—अध्वर्युर्दक्षिणद्वार्बाहुमूले प्रत्यङ्मुख उपविशति, उत्तरे प्रतिप्रस्थाता । इदं सदसि प्रसर्पणम् ॥

३२४. **खरे सवनीयासादनम्**—एवं सम्प्रसृप्तेषु आग्नीध्रः पञ्चायतनायां पात्र्यां मध्ये पुरोडाशं पूर्वस्यां धाना दक्षिणतः करम्भं पश्चात् परिवापं उत्तरत आमिक्षा प्रकृतिवद् यथार्थोहसहितैर्मन्त्रैरुषस्तरणादि कृत्वोद्वास्य कपालोद्वासनान्तं कृत्वा हवींषि परिगृह्य पूर्वद्वारा निष्क्रम्योत्तरेण सद आग्नीध्रीयं धिष्ण्यं चाहृत्य पूर्वद्वारा हविर्धानं प्रपाद्य स्रुचां पश्चात् खरे सादयति । उत्करे विशये वा वाजिनम् । इदं खरे सवनीयासादनम् ॥

३२५. **ब्रह्मयजमानाग्नीध्राणामुपवेशनम्**—ऐष्टिकपाशुकानुष्ठानकाले ब्रह्मयजमानावाहवनीयस्य दक्षिणत उपविशतः, तथा द्विदैवत्यप्रचारे । सौमिके तु सदसि पूर्वो यजमानो ऽपरो ब्रह्मा । आग्नीध्र उत्करे । सौमिके त्वाग्नीध्रीये ।

प्रातःसवनीयप्रचारः—अध्वर्युर्जुहूपभृतोरुपस्तृणान आह—'प्रातः सावस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रू३हि' इति । अवदानादिप्रत्यञ्जनान्तं कृत्वा जुहूपभृतावादाय पृष्ठ्याया दक्षिणतः प्राङ्मुखस्तिष्ठन्नाह—'प्रातःप्रातःसावस्येन्द्राय पुरोडाशान् प्रस्थितान् प्रे३ष्य' इति । आमिक्षायास्तूष्णीमिडायामवदानम् । अयं प्रातःसवनीयप्रचारः ॥

३२६. **ऐन्द्रवायवे सोमग्रहणम्**—होतृसकाशे इडां स्थापयित्वा प्राङायन्नाह—'वायव इन्द्रवायुभ्यामनुब्रू३हि' इति । प्रतिप्रस्थाता आदित्यस्थाल्या औपशयं पात्रमादाय तस्मिन् द्रोणकलशात् परिप्लुपात्रेण गृह्णाति । उप० क्षाभ्यां गृह्णामि' इति । इदमैन्द्रवायवे सोमग्रहणम् ॥

३२७. **ऐन्द्रवायवग्रहप्रचारः**—सव्येन प्रतिनिर्ग्राह्यं दक्षिणेनैन्द्रवायवमादाय निष्क्रामति । अध्वर्युस्तथैव प्रतिप्रस्थातुर्ग्रहावादाया ऽपरेण परिक्रम्य पृष्ठ्याया उत्तरतः प्राङ्मुखाय तिष्ठते प्रतिप्रस्थात्रे प्रतिनिर्ग्राह्यं प्रयच्छति । सव्येन ग्रहं धृत्वा दक्षिणेनाज्यस्थाल्याः स्रुवेणोपहृत्य प्राञ्चं तिर्यञ्चं वा आघारयति—'अध्वरो यज्ञो०सोम स्वाहा' इति । अत्याक्रम्य 'वायव

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इन्द्रवायुभ्यां प्रे३ष्य' इति । वषट्कृते जुहोति । द्वितीयवषट्कारे ऽध्वर्यु प्रतिप्रस्थातारौ जुहुतः । अध्वर्यु र्यजमानं वाचयति—'यो न०श्चेतयानि' इति । प्रतिप्रस्थाता प्रतिनिर्ग्राह—संस्रावमध्वर्यु पात्रे ऽवनयति । अध्वर्युः उभयोरर्धं प्रतिप्रस्थातुः पात्रे । प्रतिप्रस्थाता प्रत्यगावृत्या ऽध्वर्योर्दक्षिणेन पात्रमाहृत्य स्वयमुत्तरेण हविर्धानं प्रविश्य तदादित्यस्थाल्यामवनयति—'देवेभ्यस्त्वा' इति । अयमैन्द्रवायवग्रहप्रचारः ॥

३२८. **मैत्रावरुणप्रचारः**———आज्यपुरोडाशपश्वाऽऽमिक्षाचमसाहुतयो मध्ये । अभितो ग्रहाहुतयो धारया पात्रमुखेन सर्वत्र । अध्वर्युः प्रदक्षिणमावृत्य हविर्धानं प्रविश्य प्रतिप्रस्थातुर्दक्षिणेन पात्रं हृत्वा स्वयमुत्तरतो गत्वा होत्रे पात्रं प्रदाय प्राङायन्नाह—'मित्रावरुणाभ्यामनुब्रू३हि' इति । प्रतिप्रस्थाता तथैव मैत्रावरुणस्य प्रतिनिर्ग्राह्यं गृह्णाति—'उपया० स्पृत० मि' । ऐन्द्रवायववदादाय निष्क्रामति । पूर्ववत् प्रतिनिर्ग्राह्यं प्रदायाऽऽश्राव्याऽऽह—'मित्रावरुणाभ्यां प्रे३ष्य' इति । वषट्कृते सहोभौ जुहुतः । यजमानं वाचयति—'नमो मित्रा० यानि' इति । प्रतिप्रस्थाता संस्रावं पूर्ववदवनयति । अध्वर्युः उभयोरर्धं प्रतिप्रस्थातुः पात्रे । स तदादित्यस्थाल्यामवनयति—'विश्वदेवेभ्यस्त्वा' इति । अयं मैत्रावरुणप्रचारः ॥

३२९. **आश्विनप्रचारः** अध्वर्युः होत्रे पात्रं प्रदाय प्राङायन्नाह—'अश्विभ्यामनुब्रू३हि' इति । उभौ सह जुह्वतः । यजमानं वाचयति—'यो नोऽश्विना०यानि' इति । प्रतिप्रस्थाता पूर्ववत् संस्रावमवनयति । तस्य पात्रे ऽध्वर्युस्तदर्धं पूर्ववत् । स तदादित्यस्थाल्याम्—'विश्वेभ्यस्त्वादेवेभ्यः' इति । अयमाश्विनप्रचारः ॥

३३०. **द्विदैवत्यप्रचारः**—द्रोणकलशादादित्यस्थालीमुपर्यर्धां कृत्वोपशयपात्रेणाऽपिदधाति—'विष्णु०ख्यत्' इति द्विदैवत्यप्रचारः ॥

३३१, **चमसोन्नयनम्**—अध्वर्युः पूर्ववद्धोत्रे पात्रं प्रदाय प्राङायन्नाह—'उन्नीयमानेभ्यो ऽनुब्रू३हि, होतुश्चमसमनून्नयध्वम्, उभयतः शुक्रान् कुरुध्वम्, अच्छावाकस्य चमसाध्वर्यो मा तु त्वमुन्नेष्ठाः, प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः प्रोक्षिताऽप्रोक्षितैः प्रत्युपलम्बस्व' इति । होतृब्रह्मयजमानोद्गातृहोत्रकचमसानच्छावाकचमसरहितान् स्रुचां पश्चात् सादयित्वा उन्नेत्रा द्रोणकलशात् पूतभृतो द्रोणकलशाच्च क्रमेणाहृतेन सोमेन क्रमेण स्वं-स्वं चमसमुन्नीयोत्तरवेद्यां सादयन्ति । इदं चमसोन्नयनमुच्यते ॥

३३२. **शुक्रामन्थिग्रहणम्**—प्रतिप्रस्थाता द्वौ प्रोक्षितौ द्वावप्रोक्षितौ समि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च्छकलावादाय प्रोक्षिताऽप्रोक्षितौ द्वौ शकलावध्वर्यवे प्रयच्छति। अध्वर्युः शुक्रमादत्ते। प्रतिप्रस्थाता मन्थिनम्। दक्षिणेन प्रोक्षिताभ्यामपिधायाऽप्रोक्षिताभ्यामधस्तात् सव्येनोपयच्छतः। इदं शुक्रामन्थिग्रहणम्॥

३३३. **उत्तरवेद्यारोहणम्**—अध्वर्युः दक्षिणं द्वार्बाहुं निश्रयमाणो निष्क्रामति, प्रतिप्रस्थातोत्तरम्। 'आयुःसं०तम्, प्राणꣳसं०तम्, अपानꣳसं०तम्, व्या०तम्, चक्षुः०तम्, श्रो०तम्, एतैः षड्भिर्मन्त्रैः प्रतिमन्त्र वोत्तरवेद्याः पश्चाद् ग्रहौ सन्धत्तः। अध्वर्युः दक्षिणेनोत्तरवेदिं परिक्रामति—'स्तुतो०चिषा' इति। उत्तरेण प्रतिप्रस्थाता—'स्तुतो० चिषा' इति। उभौ पुरस्तात् प्रत्यङ्मुखौ उत्तरवेदिमारोहत इति। इदमुत्तरवेद्यारोहणम्॥

३३४. **उत्तरवेद्यवरोहणम्**—'इन्द्रेण स०यासम्' इति 'आयुस्थ०धत्तम्' एतैः षड्भिर्मन्त्रैः यूपाहवनीययोर्मध्ये ग्रहौ सन्धत्तः। उत्तरवेद्या अवरोहतः—'तौदे०ने च' इति। इदमुत्तरवेद्यवरोहणम्।

३३५. **अप्रोक्षितशकलनिरसनम्**—अध्वर्युर्यजमानस्य पाप्मानं मनसा ध्यायन् अप्रोक्षितं शकलं बर्हिर्वेदिं निरस्यति—'निर०श्मना' इति। एवं प्रतिप्रस्थाता—'नि०ना' इति अप्रोक्षितशकलनिरसनम्।

३३६. **प्रोक्षितशकलाभ्याधानम्**—अध्वर्युः अप उपस्पृश्य प्रोक्षितशकलमभ्यादधाति—'शुक्रै०हा' इति। एवं प्रतिप्रस्थाता 'मन्थि०हा' इति। इदं प्रोक्षितशकलाऽभ्याधानम्।

३३७. **चमसानयनप्रैषः**—चमसाध्वर्यवश्चमसानुपोद्यच्छन्ते। अध्वर्युः पुरस्तात् प्रत्यङ्मुखस्तिष्ठन्नाश्राव्याऽऽह—'प्रातः प्रातःसावस्य शुक्रवतो मन्थिवतो मधुश्चुत इन्द्राय सोमान् प्रस्थितान् प्रे३ष्य' इति। अयं चमसानयनप्रैषः।

३३८. **शुक्रामन्थिप्रचारः**— उभौ वषट्कारे जुहुत० सप्र०जुहोमि स्वाहा। चमसाध्वर्यवश्चमसान् सकृञ्जुह्वति, अनुवषट्कारे पुनरुभौ, चमसाध्वर्यवश्च। अध्वर्युराह—'प्रैतु होतुश्चमसः प्र ब्रह्मणः प्रोद्गातुः प्र यजमानस्य होत्रकाणः चमसाध्वर्यवः सकृत्सकृद् द्रोणकलशादभ्युन्नीयोपावर्तध्वम्, होतुश्चमसाध्वर्यवुपरमैहि, प्रतिप्रस्थातरुत्तरार्धं आहवनीयस्य मन्थिनः सꣳस्रावं जुहुधि, इति। प्रदक्षिणमावृत्य होतुश्चमसे ग्रहस्य सस्रावमवनयति—'हुतं०मनुष्येभ्यः' इति। प्रतिप्रस्थाता आहवनीयस्योत्तरार्धे उपविश्योत्तरार्धे मन्थिनः संस्रावं जुहोति—'एष ते रु०हा' इति। यजमानप्रतिप्रस्थातारौ अप

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

उपस्पृशतः। प्रतिप्रस्थाता ऽध्वर्योः शुक्रपात्रमादाय स्वीयं मन्थिपात्रं च खरे सादयति। अयं शुक्रामन्थिप्रचारः।

३३९. **सदसि ब्रह्मादिचमसनयनम्**—होतृब्रह्मोद्गातृयजमानानां चमसान् चमसाध्वर्यवः सदसि नयन्ति। प्रशास्त्रादीनां चमसाध्वर्यवः सशेषांश्चमसान् द्रोणकलशादभ्युन्नीयोपावर्तन्ते। इदं सदसि। ब्रह्मादिचमसनयनम्।

३४०. **प्रस्थितयाज्याप्रचारः**—अध्वर्युः मैत्रावरुणचमसमादायाऽऽश्राव्याऽऽह—'प्रशास्तर्यज' इति। वषट्कारानुवषट्कारयोर्होमौ। ब्राह्मणाच्छंसीयचमसमादायाऽऽश्राव्याऽऽह—'ब्रह्मन् यज' इति। होतृचमसमादायाऽऽश्राव्याऽऽह—'पोतर्यज' इति। नेष्टृचमसमादायाऽऽश्राव्याऽऽह—'नेष्टर्यज' इति। आग्नीध्रचमसमादायाश्राव्याऽऽह—'अग्नीद्यज' इति। अयं प्रस्थितयाज्याप्रचारः।

३४१. **प्रशास्त्रादिचमसनयनम्**—ततो होतुरग्रे उपविशति। प्रशास्त्रादीनां चमसाध्वर्यवः सदसि चमसान्नयन्ति। इदं प्रशास्त्रादिचमसनयनम्।

३४२. **द्विदेवत्यग्रहभक्षणम्**—होत्रा 'अयाडग्नीद्' इति पृष्ठे ऽध्वर्युरयाडग्नीदित्याह। होत्रा आत्तमैन्द्रवायवपात्रमध्वर्युप्रतिप्रस्थातारावन्वारभेते। होत्रा भक्षिते तस्मिन्नन्वारब्धे अध्वर्युः होतरुपह्वयस्व, 'प्रतिप्रस्थातरुपह्वयस्व' इति तावुपहूय नासिकयोरुपरि निग्राहं भक्षयति—'मयि०पाहि' इति। प्रतिप्रस्थाता होतारमध्वर्युञ्चोपहूयोक्तमन्त्रेण भक्षयति। पुनर्होत्रा भक्षिते तथैवाध्वर्युः प्रतिप्रस्थाता च मन्त्रेण ऐन्द्रवायववन्मैत्रावरुणपात्रस्य भक्षः। चक्षुषोरुपरि निग्राहं भक्षणम्। 'मयि०पाहि' इति विशेषः। होत्राऽऽश्विनपात्रे भक्षिते ऽपि तथैव भक्षः श्रोत्रयोरुपनिग्राहं सर्वतः परिहारं भक्षणम्। 'मयि०श्रोत्रं मे पाहि' इति विशेषः। इदं द्विदेवत्यग्रहभक्षणम्।

३४३. **सवनीयेडाभक्षणम्**—अध्वर्युरप उपस्पृश्य हौत्रङ्गुलिपर्वाञ्जनादि करोति। इडोपह्वानकाले चमसिनश्चमसानुपगृह्णन्ति। उपहूतायामिडायां पुरोडाशशकलमैन्द्रवायवपात्रे आमिक्षां मैत्रावरुणपात्रे धाना आश्विनपात्रे प्रास्यैतानि गृहीत्वा पूर्वद्वारा निष्क्रम्याऽपरद्वाराहविर्धानं प्रपाद्य दक्षिणहविर्धानस्योत्तरचक्रमार्गे सादयत्यातृतीयसवनात्। यथेतमेत्याग्नीधे षडवत्तमादधाति। प्रशास्तृसहिताः षट् सशेषामिडां भक्षयित्वा मार्जयन्ते। इदं सवनीयेडाभक्षणम्॥

३४४. **सौमिकवाजिनप्रचारः**—प्राशित्रपरिहरणम्, शाखापवित्रप्रहरणम्। वाजिनप्रचारः। अयं सौमिकवाजिनप्रचारः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

३४५. **चमसभक्षणम्** – तत्र सवनीयवद्वाजिनस्यासादनम् । सदसि इडोपहूतांश्चमसान् भक्षयन्ति । तद्यथा—होताऽध्वर्युं प्रतिप्रस्थातारं चोपहूय स्वचमसं भक्षयति । अध्वर्युस्तं प्रतिप्रस्थातारं चोपहूय भक्षयति—'भक्षेहि मा० यामि' इति । एवं प्रतिप्रस्थाता तौ उपहूय । होता ब्रह्माणमुपहूय तच्चमसम् । तथैव यजमानचमसम् । प्रशास्त्रादिचमसांस्तु चमसिनमध्वर्युं प्रतिप्रस्थातारं चोपहूय क्रमेण प्रशास्त्रा होत्रध्वर्युप्रतिप्रस्थातॄनुपहूय स्वचमसम् । अध्वर्युः प्रशास्तारं होतारं प्रतिप्रस्थातारं चोपहूय । प्रतिप्रस्थाता प्रशास्तृहोत्रध्वर्युनुपहूय । एवमन्येषां होत्रकाणां चमसान् भक्षयित्वा होतृचमसं पूर्ववद् भक्षयन्ति । ब्रह्मा होतारमुपहूय स्वचमसम् । यजमानो 'भक्षेहि' इत्यादिमन्त्रेण तथैव स्वचमसम् । पूर्ववत् त्रयो होत्रकचमसान् । इदं चमसभक्षणम्॥

३४६. **चमसाप्यायनम्** – तत आत्मानमभिमृशन्ते—'हिन्व०तिगा.'इति । अपः स्पृष्ट्वा एकधनाभिः स्व-स्वचमसानाप्याययन्ति—'आप्या०गथे' इति । इदं चमसाप्यायनम् ॥

३४७. **नराशंससादनम्**—चमसाध्वर्यवो होतृचमसादीन् दक्षिणहविर्धानस्य पश्चादक्षस्याप्यधः सादयन्ति । इदं नराशंससादनम् ॥

३४८. **अच्छावाकवादनप्रैषः**—अध्वर्युः सदसः पुरस्तादासीनस्याऽच्छावाकस्य हस्ते सवनीयशेषान् महत्पुरोडाशशकलमादधदाह—अच्छावाक वदस्व यत्ते वाद्यम् इति । अयमच्छावाकवादनप्रैषः ॥

३४९. **अच्छावाकचमसोन्नयनप्रैषः**—'उपो अस्मान्' इत्यच्छावाकस्य श्रुत्वा होतारमाह—होतरच्छावाको वा अयमुपहवमिच्छते तमुपह्वयस्व इति । प्राङायन्नाह—उन्नीयमानेभ्योऽनुब्रूहि, अच्छावाकस्य चमसाध्वर्युवुन्नयस्व, उभयतः शुक्रं कुरुष्व इति । अयमच्छावाकचमसोन्नयनप्रैषः ॥

३५०. सस्रुचां पश्चाच्चमसं निधाय द्रोणकलशात् पूतभृतो द्रोणकलशादित्युन्नीयोत्तरवेद्यां सादयति । अध्वर्युः अच्छावाकचमसमादायाऽऽश्राव्याह—अच्छावाक यज इति । वषट्कृतानुवषट्कृतयोर्हुत्वा चमसं हुत्वा भक्षणं न कुर्यात् । चमसमाप्याय्य पूर्ववत् सादयति ।

पन्नेजनीसहितपत्न्यानयनम्—अध्वर्युराह—अच्छावाक सीद, नेष्टः पत्नीमुदानय, अग्नीदच्छावाकं मे सन्नं प्रब्रूतात् इति । नेष्टा पन्नेजनीहस्तां पत्नीमानयति—'प्रेह्य०सी' इति । पन्नेजनीसहितपत्न्यानयनम् ।

३५१. पूर्वद्वारा निष्क्रम्याऽपरया द्वारा सदः प्रपाद्य पन्नेजनीरादाय स्व-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्य धिष्ण्यस्य पश्चादसञ्चरे उद्गातृदर्शनमार्गे सादयति। आग्नीध्रः—सन्नो ऽच्छावाको ऽच्छावाकꣳ सन्नमुपपन्नेजनीरसीषदन्।

हविशेषादिभक्षणम्—यजमानः आग्नीध्रे हविःशेषान् भक्षयति, पत्नी स्वशालायां हविष्यम्। इदं हविःशेषादिभोजनम्।

३५२. **ऋतुपात्रहोमः**—अध्वर्युर्दक्षिणमृतुपात्रमादत्ते, प्रतिप्रस्थातोत्तरम्। अध्वर्युः परिप्लुपात्रेण द्रोणकलशात् गृह्णाति—'उपसिमध०मि' इति प्रतिप्रस्थाता 'उप०माध०मि' इति। अध्वर्युः दक्षिणं द्वार्बाहुं संश्लिष्य निष्क्रामति। प्रतिप्रस्थातोत्तरं द्वार्बाहुं संश्लिष्य हविर्धाने तिष्ठति। होमार्थं गच्छन्तमागच्छन्त 'चाध्वर्युं स्वपात्रेण परिगृह्णाति। अध्वर्युः प्रतिप्रस्थातारं ऋतुना प्रेष्य वषट्कृते सशेषं जुहोति। होमाय निष्क्रामति प्रतिप्रस्थाता, प्रविशत्यध्वर्युः। स गृह्णाति—'उप०शुक्रामि'। प्रतिप्रस्थाता ऽध्वर्युवद् यजति। निष्क्रामत्यध्वर्युः प्रविशति प्रतिप्रस्थाता स गृह्णाति—'उप०शुचये०मि'। अध्वर्युः पूर्ववद् यजति। निष्क्रामति प्रतिप्रस्थाता प्रविशत्यध्वर्युः। स गृह्णाति—'उप०नभस्या०मि' प्रतिप्रस्थाता यजति निष्क्रामत्यध्वर्युः। प्रविशति प्रतिप्रस्थाता। स गृह्णाति—'उप०नभस्या०मि'। अध्वर्युर्यजति। निष्क्रामति प्रतिप्रस्थाता। प्रविशत्यध्वर्युः। स पात्रमुखं विपर्यस्य गृह्णाति—'उप०सीषाय०मि'। प्रतिप्रस्थाता पूर्ववद् यजति। निष्क्रामत्यध्वर्युः। प्रविशति प्रतिप्रस्थाता। स विपर्यस्य गह्णाति—'उप०स्यूर्जामि०मि' इति। अध्वर्युः ऋतुभिः प्रेष्येति यजति। निष्क्रामति प्रतिप्रस्थाता। प्रविशत्यध्वर्युः। स गृह्णाति—'उ०सहा०मि' इति। प्रतिप्रस्थाताऽध्वर्युवद् यजति। निष्क्रामत्यध्वर्युः। प्रविशति प्रतिप्रस्थाता। स गृह्णाति—'उ०सहस्या०मि' इति। अध्वर्युः पूर्ववद् यजति। स विपर्यस्य गृह्णाति—'उ०तपाय०मि' इति। प्रतिप्रस्थाता पूर्ववद् यजति। निष्क्रामत्यध्वर्युः। प्रविशति प्रतिप्रस्थाता।

ऋतुयाजविरामप्रैषः—अध्वर्युस्तमाह—'प्रतिप्रस्थातरुपैतेन पात्रेण रम' इति। अयमृतुयाजविरामप्रैषः।

३५३. **ऋतुयाजप्रचारः**—ऋतुना प्रेष्यति यजति। प्रशास्त्राऽध्वर्यूꣳ यजतमित्युक्ते आह—होतरेतद् यजेति। वषट्कारे जुहोति। हविर्धानं प्रविशति। प्रतिप्रस्थाता विपर्यस्य गृह्णाति—'उ०सꣳ सर्पो०मि' इति। ग्रहमादाय दक्षिणद्वार्बाहुं निश्रयमाणो निष्क्रामति। उत्तरं प्रतिप्रस्थाता। 'ऋतुना प्रेष्य, गृहपते यज' इति प्रशास्त्रोक्ते यजमानः होतरेतद यज। इत्याह।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सहोभौ जुहुतः। प्रतिप्रस्थाताऽध्वर्युपात्रे संस्रावमवनयति । अयमृतुयाज-प्रचारः ।

३५४. **ऐन्द्राग्नग्रहणम्**—अध्वर्युस्तमाह—'प्रतिप्रस्थातरेतेन पात्रेणैन्द्राग्नं ग्रहं गृहाण' इति । प्रतिप्रस्थाता द्रोणकलशात् परिप्लुपात्रेण गृह्णाति—'इन्द्रा० षिता, उप०सीन्द्रा०मि' इति । इदमैन्द्राग्नग्रहणम् ।

३५५. **ऋतुपात्रभक्षणम्**—अध्वर्युः प्रदक्षिणमावृत्य प्रत्यङ्ङद्रुत्य होतृ-पोतृनेष्ट्राग्नीध्रब्राह्मणाच्छंसिमैत्रावरुणैः सह स्वपात्रं प्रथममुखेन भक्षयति—'वसु०मि' इति । तथा प्रतिप्रस्थाता । त्रयाणां परस्परमुपहवः । विपर्यस्य पात्रं होत्रा पोत्रा नेष्ट्रा अच्छावाकेन सहोभौ 'ऋतुभिः प तस्य' इति । विपर्यस्य द्विर्होत्रोभौ—'ऋतुना पीतस्य' इति । अथ वा होत्राध्वर्युः, पोत्रा प्रतिप्रस्थाता नेष्ट्रा ऽध्वर्युः अग्नीधा प्रतिप्रस्थाता, ब्राह्मणाच्छंसिना ऽध्वर्युः, मैत्रावरुणेन होता । विपर्यस्य ऋतुभिर्होता ऽध्वर्युः, पोत्रा प्रति-प्रस्थाता । नेष्ट्रा ऽध्वर्युः । अच्छावाकेन प्रतिप्रस्थाता । विपर्यस्य ऋतुना होत्रा ऽध्वर्युः । होत्रध्वर्यु प्रतिप्रस्थातारः परस्परमुपहूय च । इदमृतुपात्र-भक्षणम् ।

३५६. **शंसनार्थाध्वर्यु प्रश्नः**—अध्वर्युर्होतारं पृच्छति—'प्रणवमुपाँशु शँ सँ शँसिष्यसी३ विग्राहा३म्' इति । अयं शंसनार्थाध्वर्युप्रश्नः ।

३५७. होता यथा शंसिष्यन् भवति तथा प्रत्याह ।

प्रतिगरः—अध्वर्युः पात्रं नीचैरवष्टभ्य सव्यमावृत्य प्राङ्मुख उपविश्ये-डाजपं कृत्वा ऽपसव्यमावृत्य होतुरग्रे प्रत्यङ्मुखः प्रह्वस्तिष्ठन् प्रतिगृह्णाति—'आहावेशो३सामो दैव' । तूष्णीं शंसे प्रणवान्ते उपांशु 'ओथामो दैवीं३'प्रणवे 'ओ३थामो दैव' । अवसाने 'ओथामो दैव' । शस्त्रमध्याहावे—'ओं३ शों३ सामो दैव' । शस्त्रान्ते—'ओ३म् इति प्रतिगीर्य । अयं प्रतिगर इत्युच्यते ।

३५८. **शस्त्रान्ते वाचनम्**—प्रातःसवने शस्त्रान्ते 'उक्थशाः' इत्युक्त्वा यजमानं वाचयति—'शस्त्रस्य०रयीणाम्' इति । इदं शस्त्रान्तेवाचनम् ।

३५९. **शस्त्रप्रायश्चित्तम्**—सदसि पात्रं निधाय प्रङेत्यापूर्वाज्यात् । स्रुवेण प्रचरण्या वा 'यन्म आत्मन' इति द्वाभ्यां व्याहृतिभिश्च जुहोति । इदं शस्त्रप्रायश्चित्तम् ।

३६०. ऐन्द्राग्नं ग्रहमुपोद्यच्छते । चमसाध्वर्यवो नाराशंसान् अध्वर्यु-र्होतारं प्रेष्यति—'उक्थशा यज सोमस्य' इति । वषट्कारानुवषट्कारयो-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

र्जुहोति । चमसाध्वर्यवश्चमसान् द्विरनुप्रकम्पयन्ति न जुह्वति । ग्रहमादाया ऽध्वर्युः सदमागच्छति । चमसाध्वर्यवश्चमसान् आदाय सदमागच्छन्ति ।

आज्यशस्त्रोत्तरभक्षः—होत्रा भक्षिते तमुपहूय भक्षयति—'वसु० इन्द्राग्निभ्याम्०मि' इति । होत्राभावुपहूय भक्षिते तं प्रतिप्रस्थातारं चोपहूय भक्षयति 'नरा०मि' इति प्रतिप्रस्थाता तावुपहूय । ब्रह्मादयो होतारमुपहूय स्वस्वचमसान्नराशंसपीतेन । हिन्वम इत्यात्मानं प्रत्यभिमृश्याण्यायस्वेति चमसानाप्याय्याय पूर्ववत् सादयन्ति । अयमाज्यशस्त्रोत्तरभक्षः ।

३६१. **वैश्वदेवग्रहे सोमग्रहणम्**—तत्रैव पात्रं निधाय शुक्रपात्रमाददान आह—'उन्नेतर्यदेनं वैश्वदेवं ग्रहं गृह्णाम्यथोदञ्चँराजानं पूतभृतमभिसम्पवयताद् दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जताद्' इति । द्रोणकलशात् परिप्लुपात्रेण वैश्वदेवं गृह्णाति—'उपविश्वे०मि' इति । परिमृज्य सादयति—'ए०भ्यः' इति । इदं वैश्वदेवग्रहे सोमग्रहणम् ।

३६२. **द्वितीयस्तोत्रोपाकरणम्**—उन्नेता पूतभृति पवित्रं वितत्य द्रोणकलशस्थं सोममवनीय दशापवित्रेण द्रोणकलशं मृष्ट्वा ग्रावसु न्युब्जति । अध्वर्युरप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ्ङाद्रुत्य स्तोत्रमुपाकरोति—'ऋ०त्यै' इति । इदं द्वितीयस्तोत्रोपाकरणम् ।

३६३. **माध्यन्दिनसवनीयनिर्वापः**—पूर्ववज्जपति । स्तोत्रे प्रक्रान्ते अग्नीत् सवनीयान्निर्वप इत्याह । आग्नीध्रः प्रथममाग्नेयमेकादशकपालं पुरोडाशं सवनीयांश्चामिक्षावर्जं तन्त्रेण निर्वपति । अयं माध्यन्दिनसवनीयनिर्वापः ।

३६४. **वैश्वदेवग्रहप्रचारः**—प्रस्तोत्रा एषोत्तमेत्युक्ते ऽध्वर्युः प्राङ्मुख उपविश्येडाजपं कृत्वा शस्त्रं प्रतिगीर्य प्रायश्चित्तं हुत्वा वैश्वदेवमादायाऽऽह 'उक्थ०स्य' इति । पूर्ववज्जुहोति । चमसाननुप्रकम्पयन्ति । अयं वैश्वदेवग्रहप्रचारः ।

३६५. **चमसभक्षणम्**—होत्रा भक्षिते तमुपहूयाध्वर्युः—'वसु०विश्वे०मि' इति । होतृचमसं होत्रध्वर्युप्रतिप्रस्थातारः पूर्ववत् । ब्रह्मादयो होतारमुपहूय स्वस्वचमसान् । चमसाध्वर्यवश्चमसान्मार्जालीये प्रक्षाल्य मैत्रावरुणचमसादीन् उदीचः स्रुचां पश्चात् सादयन्ति ।

ऋतुपात्रादिप्रक्षालनप्रैषः—अध्वर्युराह—'प्रतिप्रस्थातरिमे चर्तुपात्रे एत-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

च्च शुक्रपात्रं मार्जालीये मार्जयित्वा पात्रेष्वपिसृज' इति । अयमृतुपात्रादि-प्रक्षालनप्रैषः ।

३६६. प्रतिप्रस्थाता तथा करोति । अध्वर्युः प्राङायन्नाह—'मैत्रावरुणस्य चमसमनून्नयध्वमुन्नेतः सोमं प्रभावय' इति । चमसाध्वर्यवः उन्नेत्रा हृतेन पूतभृत्सोमतृतीयेन क्रमेण चमसानुन्नीयोत्तरवेद्यां सादयन्ति ।

उक्थ्यप्रथमांशग्रहणम्—अध्वर्युरुक्थ्यस्थाल्या औपशये पात्रे उक्थ्य-तृतीयं गृह्णाति—'उप०देवेभ्य०मि' इति । स्थालीमभिमृशति—'पु०सि'इति । प्रतिप्रस्थाता परिमृज्य सादयति—'एष०त्वा' इति । इदमुक्थ्यप्रथमांशग्रह-णम् ।

३६७. **मैत्रावरुणचमसादिभक्षणम्**—उपकरणादिप्रायश्चित्तहोमान्तम् । आह—'उ०सोमानाम्' इति । पूर्ववज्जुहोति । चमसाध्वर्यवश्चमसान् जुह्वति । पूर्ववन्मैत्रावरुणचमसे संस्रावमवनयति । उत्तरखरश्रोण्यां पात्रं निधाय चमसं मैत्रावरुणाध्वर्युप्रतिप्रस्थातारो भक्षयन्ति—'वसु०मित्रा०मि' इति । मैत्रावरुणोब्रह्मादिचमसास्तं चमसिनमुपहूय । तच्चमसं त्रयः पुनः पूर्ववत् । ब्रह्मादयो मैत्रावरुणमुपहूय । इदं मैत्रावरुणचमसादिभक्षणम् ।।

३६८. **ग्रहप्रचारार्थप्रतिप्रस्थातृप्रैषः**—प्रत्यभिमृश्य नाप्याययन्ति । प्रक्षाल्य ब्राह्मणाच्छंसिचमसादीन्त्सादयति । अध्वर्युः—'प्रतिप्रस्थातर्ग्रहौ ते प्रचर'इति । अयं ग्रहप्रचारार्थप्रतिप्रस्थातृप्रैषः ।।

३६९. **द्वितीयोक्थ्यग्रहणम्**—प्रतिप्रस्थाता प्राङायन्नाह—'ब्राह्मणाच्छं-सिनश्चमसमुन्नय' इति । पूर्ववत् पूतभृतो ऽर्धेन चमसानुन्नीय सादयति । प्रतिप्रस्थात उक्थ्यस्थाल्यौपशयपात्रे उक्थ्यस्यार्धं गृह्णाति—'उप०इन्द्रा०मि' इति । पूर्ववदभिमृश्य सादयति । इदं द्वितीयोक्थ्यग्रहणम् ।।

३७०. **ब्राह्मणाच्छंसिचमसप्रभृतिभक्षणम्**—स्तोत्रोपाकरणादि । ब्राह्मणा-च्छंसिशस्त्रं प्रतिगीर्य ग्रहमादायाऽऽह—'उक्थशा यज सोमानाम्'इति । पूर्ववत् हुत्वा हुतेषु चमसेषु संस्रावमवनयति पूर्ववत् । पात्रं निधाय ब्राह्मणाच्छंसि-चमसं पूर्ववत् त्रयो भक्षयन्ति । ब्राह्मणाच्छंसी ब्रह्मादीनुपहूय तच्चमसान् । पनस्त्रयः पूर्ववत् । ब्रह्मादयस्तमुपहूय स्वस्वचमसान् । मन्त्रे 'इन्द्रेण पीतस्य' इत्र विशेषः । प्रत्यभिमर्शनम् । नाप्यायनम् । इदं ब्राह्मणाच्छंसिचमस-प्रभृतिभक्षणम् ।।

३७१. **उक्थ्यतृतीयग्रहणम्**—पूर्ववत् प्रक्षाल्याच्छावाकचमसादीन् सादः

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यन्ति । प्रतिप्रस्थाता प्राङायन्नाह—अच्छावाकचमसमनूयध्वमुन्नेतः सर्वश एव सोमं राजानं प्रभावय मातिरीरिचः, इति । अध्वर्युः प्रतिप्रस्थातरुपैतेन पात्रेण रमैहि यजमान इति । यजमानेन सह हविर्धानं गत्वा द्रोणकलशं दक्षिणहविर्धानस्य पश्चादक्षं निधाय ग्राव्णः पृथक् कृत्वा नीडे कृष्णाजिने ऋजीषमन्तरेणेषे निधाय । अधिषवचर्मफलकयोः प्राचीनग्रीवमुत्तरलोमः 'यज्ञ प्रतितिष्ठ'इति मन्त्रेणोपस्तृणाति । तस्मिन् पूर्ववत् ग्राव्णः कृत्वा पूर्ववन्मन्त्रेण राजानमुपावहरन्ति । पूर्ववदुद्गातृन् प्रत्युक्त्वा आधवनीये वसतीवरीणामेकधनानां चार्धमानीय ता एकधना वसतीवरीश्च यथास्थानं सादयन्ति । चमसाध्वर्यव उन्नेत्रा ऽऽहूतेन सर्वशः पूतभृत्सोमेनाच्छावाकचमसमुखान् उन्नीय सादयन्ति । प्रतिप्रस्थाता पूर्ववदौपशयपात्रे उक्थ्यस्थालीस्थं सर्वं राजानं गृह्णाति—'उप०इन्द्राग्निभ्यां त्वा जुष्टं गृह्णामि' इति । नोक्थ्यस्थालीमभिमृशति । मृष्ट्वा न्युब्जति । ग्रहं परिमृज्य सादयति—'एष० ऽग्निभ्यां त्वा' इति । इदमुक्थ्यतृतीयग्रहणम् ।

३७२. **अच्छावाकचमसप्रभृतिभक्षणम्**—दशापवित्रं द्रोणकलशे निधाय स्त्रोत्रोपाकरणादि । अच्छावाकशस्त्रं प्रतिगीर्य पूर्ववत् जुहोति । चमसाँश्च । ब्राह्मणाच्छंसिचमसवदच्छावाकचमसभक्षक्रमः । मन्त्रे 'इन्द्राग्निभ्यां पीतस्य' इति विशेषः । इदम् अच्छावाकचमसप्रभृतिभक्षणम् ।

३७३. **परिप्लुसहितचमसनिधानम्**—चमसप्रक्षालनानन्तरं तान् पूतभृदाधवनीययोर्मध्ये परिप्लुना सह निदधाति । इदं परिप्लुसहितचमसनिधानम् ।

३७४. अध्वर्युः 'अग्निर्मूर्द्धादिव' इत्येकामाहुतिं द्वे मिन्दाहुती ? व्याहृतीश्च गत्वा ऽऽह—'प्रशास्तः प्रसुहि, तेन सर्प्पत इत्युक्ते सर्वे यथाप्रसृप्तं निःसर्पन्ति । सन्तिष्ठते प्रातःसवनम् । अथ प्रातःसवनमित्यारभ्य (पदार्थ २७०) एतदन्तं कर्म प्रातःसवनमित्युच्यते ।

अथमाध्यन्दिनम्

३७५. **ग्रावस्तुतप्रैषः**—उत्तरार्धे क्षणान्ते अध्वर्युः प्राङायन्नाह—अभिषोतार एतदाह्वयत ग्रावस्तुतमेहि यजमान । अयं ग्रावस्तुत्प्रैष उच्यते ।

३७६. **माध्यन्दिनसवनीयप्रेक्षणवाचनादि**—यजमानोऽभिषोतृभिश्च सह पूर्वया द्वारा हविर्धानं प्रविश्य होतृचमसे आधवनीयापोऽवनीय चर्मणि निधाय ताः प्रेक्षमाणं यजमानं वाचयति 'निग्राभ्यास्थ' इत्यादि पूर्ववत् । ता यज-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानाय प्रदाय चतुर्णामन्यतमं ग्रावाणमादत्ते—'देवस्य त्वा' इत्यादिमन्त्रेण। 'ग्रावासि' इत्यादिमन्त्रेणाभिमन्त्रयते। इदं माध्यन्दिनसवनीयप्रेक्षणवाचनादि ॥

३७७. **अवशिष्टसोमार्धमानम्**—ग्रावाणं चर्मणि प्राक्शिरस निधाय ग्राव्ण उपरि राजानं विस्रस्य प्रातःसवनवन्मिमीते 'इन्द्राय त्वा' इति पञ्चभिः, पञ्चकृत्वस्तूष्णीम्। एकयैकयोत्सर्गं दशकृत्वो मिमानो राजानं सर्वं मिमीते। इदमवशिष्टसोमार्धमानम् ॥

३७८. **ग्रावस्तुत उष्णीषदानम्**—अद्भिरभ्युक्ष्य ग्रावस्तुते राज्ञ उष्णीषं ददाति। इदं ग्रावस्तुते उष्णीषदानम् ॥

३७९. **माध्यन्दिनसवनाभिषवः**—यजमानः अद्भिरभ्युक्ष्य राजवासो[1] ऽध्वर्यवे प्रयच्छति। अध्वर्युः पूर्ववदुपसृजति। सम्प्रयौति। तिरश्चर्मफलके अभिमृशति। यजमानं वृद्धीर्वाचयति। अभिषोतारः प्रातःसवनवत् पर्युपविशन्ति। अध्वर्युः 'आहरोपसृज' इत्याह। उपर्यधे होतृचमसेंशून् परिप्लावयन्ति। 'प्रागपाग्' इत्यादिमन्त्रेण। अंशूश्चर्मणि निधाय होतृचमसस्था अपो राशि प्रक्षिप्य राजानं विभज्याकृष्याह 'इहा३ इहा३ इहा३' इत्युक्ता यावदसनिस्रावमपरिमितमभिषुण्वन्ति—आहरोपसृजेत्यादि। उन्नेता आधवनीयादुदुञ्चनेन सम्भरणीये उपसृजति। 'प्रागपाग' इत्यादिसम्भरणीयेंशून् परिप्लावयन्ति। अंशून्निधाय सम्भरणीयजलेन राजानमुपसिच्य विभज्याऽऽकृष्याह। 'इहा३ इहा३ इहा३' इत्युक्ता ग्रावाणमूर्ध्वमुत्क्षिप्य नीचैः पातयन्तीत्यादिक्रीडारूपेणाभिषुण्वन्ति अपरिमितं यावद्रसनिस्रावम्। पुनराहरोपसृजेत्यादि होतृचमसे तूष्णीं अंशून् परिप्लावयन्ति। अभिषुत्य राजानं हस्तेन निष्पीड्य सम्भरणीये राजानं सम्भृत्यान्तरेणेषे उन्नेत्रे प्रयच्छति। उन्नेता आधवनीयापोम्भ्रणान्तरेऽवदीयाऽऽधवनीये पवित्रं वितत्य सम्भरणीमवनयति। **एष एकः पर्यायः**। ग्रम्भ्रणान्तरस्था आधवनीयापो होतृचमसे ऽवनीय 'श्वात्रास्थ' इत्यादि। **एवं द्वितीयमेवं तृतीयम्**। तृतीयपर्यायस्य तृतीये ऽभिषवे इहा३ इत्यस्य स्थाने 'बृहत्-बृहत्-बृहत्' ऋज़ीषं चर्मणि निधाय सम्मुखान् ग्राव्णः कृत्वा ग्रावमुखे ऋजीषं चतुर्धा कृत्वा व्यपोहति। उद्गातृभ्यः प्राह—सोमोभिषुत इति। अयं माध्यन्दिनसवनीयाभिषवः ॥

३८०. **माध्यन्दिनसवनीयसोमग्रहणम्**—तैर्द्रोणकलशे निहिते दशापवित्रे

---

१. राज्ञः सोमस्यवासः।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वितते उन्नेतारमाह—अप्रमतः सन्ततमानयोपाँशुग्रहान् ग्रहीष्यामि इति। उक्थ्यग्रहणपर्यन्तं स तथा करोति। अध्वर्युः शुक्रपात्रमादाय धारायां गृह्णाति—'अयं वेन०रिहन्ति। उ०शंडा०मि' इति। परिमृज्य सादयति—'एष ते योनिर्वीर तां पाहि'इति। तथा मन्थिपात्रे पूर्ववत्। बर्हिषी अन्तर्धाय सक्तुभिः श्रीत्वाऽपोद्धृत्य बर्हिषी परिमृज्य सादयति पूर्ववत्। दक्षिणर्तुपात्रे गृह्णाति—'मरु०हुवेम। उप०मरुत्वते०मि' इति। सादयति—'एष०निरिन्द्राय त्वा मरुत्वते।' उत्तरर्तुपात्रे गृह्णाति—'इन्द्रम०सुयज्ञाः। उप०मि' इति। परिमृज्य सादयति—'एष०त्वते' इति। आग्रयणस्थं सोमं पात्रान्तरे ऽवनीय तेनोदञ्चनेन चोपरिष्टाद् दशापवित्रे ऽवनीय तिसृणां धाराणामधस्तादाग्रयणं गृह्णाति। पूर्ववत् सादयति। इदं ग्रहेषु माध्यन्दिनसवनीयसोमग्रहणम्॥

३८१. **माध्यन्दिनपवमानार्थसदःप्रसर्पणम्**—द्रोणकलशमुपर्यर्द्धं कृत्वा पयसा हिरण्येन सक्तुभिः क्रमेण श्रीत्वा परिप्लुपात्रं प्रास्य द्रप्सानुमन्त्रणम्। उन्नेतारमाह—'अरक्तिं पूतभृतं कुरु पवमानस्य ग्रहान् गृहीष्यामि' इति। उन्नेता पूतभृति पवित्रै वितत्याऽधवनीयाद् द्वौ वा त्रीन् वोदञ्चमानयति। अध्वर्युः—अरिक्तो पूतभृदाधवनीयौ पयसा सक्तुभिर्घृतेन च श्रीत्वा द्रोणकलशमभिमृशति—'उप०सीन्द्राय त्वा' इति। अनेनैव मन्त्रेणाधवनीयं पूतभृतं च। उन्नेतारमाह—'उन्ने०न्युब्जतात्' इति। उन्नेता ऽवकाशोपस्थानान्ते तथा करोति। अध्वर्युःरप उपस्पृश्य बर्हिषी आदाय निःसर्पति। उद्गात्रादिषु प्रातःसवनवत् समन्वारब्धेषु आहवनीये स्रुवाहुतिं जुहोति—'विश्वे देवा मरुत०स्याम स्वाहा' इति। यथावेदमितरे। द्रप्साहुती प्रातःसवनवद् यजमानः। एतयैव प्रतिप्रस्थाता। अध्वर्युः पूर्ववत् पवमानार्थं सदः सर्पति। इदं माध्यन्दिनपवमानार्थसदःप्रसर्पणम्॥

३८२. पूर्ववत् बर्हिषी प्रयच्छति। पूर्ववदुपाकरणं जपति पवमानस्य पञ्चम्यामृचि प्रस्तुतायां यजमानं वाचयति—'सुपर्णोऽसि०रय' इति।

दधिघर्मार्थदध्याहरणप्रैषः—चतुर्होतारं व्याख्याय समाप्ते साग्निसम्प्रैषमाह—'अग्नीदग्नीन् विहर,बर्हिस्तृणाहि, पुरोडाशान् अलङ्कुरु, प्रतिप्रस्थातदधिघर्माय दध्याहर' इति। अयं दधिघर्मार्थदध्याहरणप्रैषः॥

३८३. अप उपस्पृश्य 'एहि यजमान'[इत्युक्त्वा] तेन सह पूर्वया द्वारा हविर्धानं प्रविश्य समस्तं राजानं प्रातःसवनोक्तमन्त्रेणोपतिष्ठते। ततः प्रातःसवनवदवकाशैरुपतिष्ठते अध्वर्युर्यजमानौ। उन्नेता प्रातःसवनवत्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पूतभृति राजानमवनीयाधवनीयं न्युब्जति। प्रातःसवनवत् धिष्ण्यव्याघारणं पृष्ठचास्तरणं च। अध्वर्युः दधिघर्मस्यादौ घर्मोक्तां पूर्वां शान्तिं पठति।

आहृतदध्यवेक्षणम्- ततो हविर्धानयोर्मध्ये उपविश्य प्रतिप्रस्थात्रा दधिघर्मार्थमाहृतं दध्यवेक्षते— 'ज्योति०दुग्धम्'। इति इदमाहृतदध्यवेक्षणम्॥

३८४. चमसे बर्हिषी अन्तर्धाय दधि गृह्णाति—'यादती०म्यस्तृतम्' इति। अपोद्धृत्य बर्हिषी दध्यवेक्ष्य मन्त्रं पठति—'वाक् च त्वा०शृतं कृणु' इति।

होतृवाद्यवादनप्रैषः- होतारमाह— 'होतर्वदस्व यत्ते वाद्यम्' इति। अयं होतृवाद्यवादनप्रैषः॥

३८५. **दधिघर्मप्रचारः**—चमसमादाय उपोत्तिष्ठन्नाह—'श्रातꣳ हविः' इति। ऋत्याक्रम्याश्राव्याऽऽह— 'दधि घर्मस्य यज' इति। वषट्कृते जुहोति— 'यमिन्द्रमा०तेभ्यः स्वाहा' इति। अयं दधिघर्मप्रचारः॥

३८६. **दधिघर्मभक्षः**—अनुवषट्कारे हुत्वा चमसं होत्रे हरति। होत्रध्वर्यु प्रतिप्रस्थात्रग्नीत स्तोतृयजमानाः क्रमेण परस्परमुपहूय प्राणभक्षं भक्षयन्ति—'मयित्य०यानि' इति। अयं दधिघर्मभक्षः॥

३८७. **माध्यन्दिनसवनीयप्रचारः**—निर्णिज्यं पात्रं प्रयच्छति। तूष्णीं शाखां मेक्षणं च प्रहृत्योपवेषं निरस्यति। आग्नीध्रः भिन्नपात्र्यां पुरोडाशं पूर्ववत् सवनीयाँश्चोद्वास्य खरे सादयति। अध्वर्युः यजमानेन आसन्नाभिमर्शने कृते आग्नेयेन पशुपुरोडाशेन प्रचर्य जुहूपभृतोरुपस्तृणान आह— 'माध्यन्दिनस्य सवनस्येन्द्राय पुरोडाशानामवदीयमानानामनुब्रूऽहि' इति सवनीयायां द्विर्द्विरवद्यति, अभिघारयति, प्रत्यनक्ति। उपभृति पुरोडाशस्यावदाय सवनीयानामवद्यति। द्विरभिघारयति। न प्रत्यनक्ति। प्रथमं जुहूपभृतोरुपस्तीर्य पुरोडाशस्योपभृत्यप्युपस्तीर्य ? नाभिघार्येष्ट्वा तस्योपरि सवनीयानामवदानं जुह्वामुपस्तरणं वा। माध्यन्दिनीयान् पुरोडाशान् प्रस्थितान् प्रेऽष्य' इति प्रेष्यति। ततः स्विष्टकृतं हुत्वा प्रातःसवनवद्धोतुरग्रे इडापात्रं निदधाति। अयं माध्यन्दिनसवनीयप्रचारः।

३८८: **माध्यन्दिनीयचमसौन्नयनप्रैषः**—सर्वेषां सवनीयानां प्रातःसवन एव निर्वापे पशुपुरोडाशेन प्राशित्रान्तेन प्रचर्य माध्यन्दिनीयैः प्रचर्य प्राङायन्नाह—'उन्नी० हि होतुश्चमसमनून्नयध्वमुभयतः शुक्रान् कुरुध्वमुच्चावाकस्य

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चमसाध्वर्योऽपि त्वं चमसमुन्नयस्व प्रतिप्रस्थातश्चतुर्भिर्मा शकलैः प्रोक्षिताऽप्रोक्षितैः प्रत्युपलम्बस्व' इति । अयं माध्यन्दिनीयचमसौन्नयनप्रषः ।

३८९. **माध्यन्दिनीयशुक्रामन्थिप्रैषः**—पूर्ववच्छुक्रामन्थिप्रचारः । सर्वाश्चमसानुन्नयन्ति । आह—'माध्यन्दिनस्य सवनस्य निष्केवल्यस्य भागस्य शुक्रवतो० प्रेऽष्य' इति । अयं माध्यन्दिनीयशुक्रामन्थिप्रैषः ।

३९०. **माध्यन्दिनीयप्रस्थितयाज्याप्रचारः**—नेष्टृचमसहोमानन्तरं अच्छावाकचमसहोमः । अयं माध्यन्दिनीयप्रस्थितयाज्याप्रचारः ।

३९१. **हविःशेषप्राशनम्**—षड्ढोत्राः संयाज्याग्रेण होतारमुपविश्य 'अयाडग्नीद्' इत्यादि । इडोपह्वानान्तरं प्राशित्रहरणं तूष्णीमन्तर्वेदि प्रणीतानिनयनम् । इडोपहुताँश्चमसान् भक्षयन्ति । नेष्ट्रनन्तरमच्छावाकः । प्रातःसवनवत्—'भक्षेहि' इति मन्त्रे **रुद्रवद्गणस्येति माध्यन्दिनस्य सवनस्य त्रिष्टुप् छंदस** इति यथास्थानमूहः । प्रातःसवनवन्नाराशंससादनं यजमानस्य हविशेषप्राशनं पत्न्या हविस्यभोजनम् ।

दक्षिणारम्भकहोमः—अध्वर्युः सस्रुवासपूर्वाज्यस्थालीं स्रुचं वासस्तस्यान्तिमायां दशायां ग्रथितं हिरण्यशकलं चादाय यजमानमामन्त्र्य चात्वालोत्करयोर्मध्येन प्रविश्य यजमानेन सहोत्तरेणाग्नीध्रीयं सदश्च परीत्य पूर्वद्वारा शालां प्रविश्य शालामुखीय आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा ज्ञातिषु समन्वारब्धेषु वाससा सम्प्रच्छन्नेषु वैसर्जनवद्वसनस्यान्तं स्रुगूरोड ? उपसङ्गृह्य हिरण्यं स्रुग्बिले धारयन् शालामुखीये जुहोति—'उदुत्यम' इत्यृचा । पुनर्गृहीत्वा 'चित्रन्' इत्यृचा । पुनर्गृहीत्वा 'अग्ने नय' इत्यृचा आग्नीध्रीये । स्रुग्बिलाद्धिरण्यमुद्गृह्णाति—'दिवं गच्छ सुवपतः' इति । अयं दक्षिणारम्भकहोम उच्यते ।

३९२. **दक्षिणानयनम्**—पूर्वमेव चात्वालोत्करयोर्मध्येन प्रवेश्य सदो दक्षिणभागे दक्षिणास्थापिता भवन्ति । सदः शालामुखीययोः आग्नीध्रीययोश्चात्वालोत्करयोश्च मध्येनोदीचीं नीत्वा तत्रैकमस्थापयति । एतद् दक्षिणानयन मुच्यते ।

३९३. **दक्षिणाविभजनम्**—ततो यजमानस्ताः प्रदक्षिणं पर्येति—'रूपेण वो०वयः' इति । स्वीयकृष्णाजिनपुच्छेन दक्षिणाभूता गास्त्रासयित्वा विभजति—'तुथो वो० अधिनाके' इति । तत्र वर्गप्रथमानामृत्विजां द्वादश द्वादश ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

द्वितीयानां [षट् षट्। तृतीयानां][1] चतस्रश्चतस्रः। तुरीयाणाम् तिस्रस्तिस्रः। निष्क्रयस्याप्येवमेव विभागः। इदं दक्षिणाविभजनम्।

३९४. **सौमिकदक्षिणादानम्**—ततः सदसि गच्छति—'एतत्ते अग्ने राध०नयन्तीः'इति। सदसः पुरस्तादासीनमात्रेयं ब्राह्मणं प्रत्येति—'ब्राह्मणमद्य० सुधातु दक्षिणम्' इति। किञ्चित् किञ्चिद् गृहीत्वा तं पृच्छति त्रिः—'क आत्रेयः' इति। स द्विवारं अयमहमिति वदति,तृतीये त्वहमित्येव। यजमानस्तं सम्पूज्य हस्ते तस्मै हिरण्यं ददाति 'चन्द्रमॐह' इति। यथासम्भवं वस्त्रादि च ददाति। आग्नीध्रीयं गत्वा ऽग्नीधे हिरण्यं दक्षिणाभागं ददाति। अग्नीद् यथा भागं दक्षिणां ते ददामि इति। एवं सदसि गत्वा ब्रह्मणे होत्रे उद्गात्रे च। हविर्धाने गत्वा ऽध्वर्यवे प्रतिप्रस्थात्रे च। चमसाध्वर्युभ्यस्तु क्रतुदक्षिणाभिन्नां यथासम्भवं दक्षिणां ददाति। पुनः सदो गत्वा प्रस्तोत्रे मैत्रावरुणाय ब्राह्मणाच्छंसिने ऽच्छावाकाय नेष्ट्रे उन्नेत्रे सुब्रह्मण्याय च दत्वा प्रसर्पकेभ्यो विद्याविशेषानुरूपां क्रतुदक्षिणाभिन्नां दक्षिणांशं तदीयं ददाति। प्रकृतिवत् सर्वे प्रतिगृह्णन्ति। प्रतिग्रहमन्त्रे 'रुद्राय गाः' इत्यूहो विशेषः। इदं सौमिकदक्षिणादानमित्युच्यते।

३९५. **दक्षिणोत्तरवैश्वकर्मणहोमः**—अध्वर्युः यजमानमामन्त्र्य तेन सहाग्नीध्रीयं गत्वा चतुर्गृहीतेन स्रुचा आग्नीध्रीये जुहोति 'यज्ञपतिमृषय० सृजतु विश्वकर्मा स्वाहा' इति। पुनस्तथैव जुहोति—'घोरा ऋषयो०पात्वस्मान्त्स्वाहा' इति। पुनर्जुहोति—'अन्यान् त्सा०स्वस्तये स्वाहा' इति। 'ये भक्षयन्तो०विश्वकर्मा स्वाहा' इति। 'नमः पितृभ्यो०यिष्ट स्वाहा' इति। अयं दक्षिणोत्तरवैश्वकर्मणहोम उच्यते।

३९६. **दक्षिणोत्तराङ्गहोमः**—शालामुखीयं गत्वा यजमाने ऽन्वारब्धे तथैव जुहोति—'ये देवा यज्ञहनों०गच्छेम सुकृतो वयॐस्वाहा' इति। 'ये देवा यज्ञमुषों०वयॐ स्वाहा' इति। तत आग्नीध्रीयं गच्छति—'आगन्म मित्रावरुणा०रोचने दिवः' इति। तत्र 'ये देवा' इत्यादि होमद्वयं तत्र **पृथिव्या**मित्यस्य स्थानेन्तरिक्षे इत्यूहः। तत आहवनीयसमीपं गच्छति—'यास्ते रात्रीः० स्तरतारजाॐसि' इति तत्रापि 'ये देवा' इति होमद्वयं भवति। मन्त्रे **पृथिव्या**मित्यस्य स्थाने **दिवी**त्यूहः।

---

१. अयं पाठोमुद्रणे भ्रष्टः। सोमयागे ऋत्विजां चत्वारो विभाग श्रूयन्ते। तत्र प्रथम वर्गस्थानां यावती दक्षिणा, तस्यार्धं द्वितीयवर्गस्थानामर्धिनाम्, तृतीयोभागस्तृतीयवर्गस्थानां तृतीयिनम्, चतुर्थो भागश्चतुर्थवर्गस्थानां पादिनाम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणोत्तराङ्गहोमोपस्थानम् - तत आहवनीयमुपतिष्ठते—'येनेन्द्रा० आधेह्येनम्' इति । इदं दक्षिणोत्तराङ्गहोमोपस्थानमित्युच्यते ।

३९७. **दक्षिणासमनुदेशः**—अध्वर्युर्यजमानं प्राञ्चमीक्षयति—'विसुवः पश्य व्यन्तरिक्षम्' इति । सदस्युपवेशयति—'यतस्व सदस्यैः' इति । यजमानो दक्षिणाः समनुदिशति—'अस्मद्रात्रा देवत्रा० तन्नः सꣳस्कृतम्' इति । अयं दक्षिणासमनुदेशः ।

३९८. **मरुत्वतीयग्रहद्वयप्रचारः**—अध्वर्युः प्राङायन्नाह—'इन्द्राय मरुत्वते ऽनुब्रूऽहि' इति । प्रतिप्रस्थाता मरुत्वतीयौ ग्रहावादाय निष्क्रामति । अध्वर्युर्दक्षिणेन प्रथमं सव्येन द्वितीयं ग्रहमादायोत्तरतस्तिष्ठते प्रतिप्रस्थात्रे द्वितीयं प्रदायाऽऽश्राव्याऽऽह—'इन्द्राय मरुत्वते प्रेऽष्य' इति । वषट्कारे त्नुवषट्कारे चोभौ जुहुतः । प्रतिप्रस्थाता ऽध्वर्युपात्रे ग्रहस्य संस्रावमवनयति । अयं मरुत्वतीयग्रहद्वयप्रचारः ।

३९९. **मरुत्वतीयतृतीयपात्रेसोमग्रहणम्**—अध्वर्युस्तमाह—'प्रतिप्रस्थातरेतेन पात्रेण तृतीयं मरुत्वतीयं ग्रहं गृहाण' इति । प्रतिप्रस्थाता तस्मिन् द्रोणकलशात् परिप्लुपात्रेण गृह्णाति—'मरुत्वाꣳ इन्द्रवृ० प्रदिवः सुतानाम् । उप०मरुत्वते०मि' इति । पूर्ववत् सादयति । इदं तृतीयमरुत्वतीयतृतीयपात्रे सोमग्रहणम् ।

४००. द्विदेवत्यवद्धोमगमने पात्रपरिहरणम् । अध्वर्युर्होत्रे पात्रं प्रदाय तेन भक्षिते तं प्रतिप्रस्थातार चोपहूय भक्षयति । भक्षणमन्त्रे **रुद्रवद्गणस्येति वसुमद्गणस्येत्यस्य** स्थाने एवं तावुपहूय प्रतिप्रस्थाता । अध्वर्युः पात्रं निगृह्याऽऽवृत्येडाजपं कृत्वा शस्त्रं प्रतिगीय शस्त्रसमाप्तौ माध्यन्दिनसवने सर्वत्रोक्थं वाचीति वदति । तत्रैव पात्रं विधाय शस्त्रप्रायश्चित्तानि जुहोति ।

मरुत्वतीयतृतीयग्रहप्रचारः—अध्वर्युः तृतीयं मरुत्वतीयमुपोद्यच्छते, चमसाध्वर्यवो नाराशंसान् । आश्राव्याह—'उक्थशा यज सोमस्य' इति वषट्कारे ऽनुवषट्कारे च जुहोति । चमसाध्वर्यवश्चमसाननुप्रकम्पयन्ति । अयं मरुत्वतीयतृतीयग्रहप्रचारः ॥

४०१. **माध्यन्दिनसवनीयनाराशंससादनम्**—अध्वर्युः होत्रे पात्रं प्रदाय तेन भक्षिते उक्तमन्त्रेण भक्षयति । होतृचमसं होत्रध्वर्युप्रतिप्रस्थातारो नराशंसपीतेन भक्षयन्ति । ब्रह्मादयो होतारमुपहूय नराशंसपीतेन स्वस्वचमसम् ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

आत्मानमभिमृश्याऽऽप्याय्य नाराशंसान् सादयन्ति । इदं माध्यन्दिनसवनीय-नाराशंससादनम् ॥

४०२. **माहेन्द्रग्रहग्रहणम्**—अध्वर्युः तत्रैव पात्रं निधाय प्राङेत्य शुक्र-पात्रमाददान आह—'उन्नेतर्यदेमं माहेन्द्रं ग्रहं गृह्णाम्यथोदञ्चँ राजानं पूत-भृतमभिसंपवयताद् दशाभिर्द्रोणकलशं मृष्ट्वा न्युब्जताद्' इति । द्रोणकल-शात् परिप्लुपात्रेण शुक्रपात्रे माहेन्द्रं गृह्णाति—'महाँ इन्द्रो० वावृधे । उप० महेन्द्राय०मि' इति । परिमृज्य सादयति—'एष ते योनिर्महेन्द्राय त्वा' इति । इदं माहेन्द्रग्रहग्रहणम् ॥

४०३. **माध्यन्दिनपवमानस्तोत्रोपाकरणम्**—उन्नेता पूतभृति पवित्रं वितत्य द्रोणकलशमवनीय मृष्ट्वा न्युब्जति । अध्वर्युः अप उपस्पृश्य बर्हिषी आदाय वाचंयमः प्रत्यङ्ङादृत्य स्तोत्रमुपाकरोति । इदं माध्यन्दिनपवमान-स्तोत्रोपाकरणम् ॥

४०४. **अभिषवप्रैषः**—समाप्ते साम्नि सम्प्रैषमाह—'अभिषोतारोऽभि-षुणुत, अग्नीदाशिरं विनय, उलूखलमुद्वास्य प्रतिप्रस्थातर्वारुणमेककपालं निर्वप, सौम्यस्य विद्धि ।' अयमभिषवप्रैष उच्यते ॥

४०५. **माहेन्द्रग्रहप्रचारः**—प्रतिप्रस्थातृनेष्ट्रादयो ऽभिषोतारश्चर्मणि ग्रावभिः शुष्काभिषवं कुर्वन्ति स्तोत्रसमाप्तिपर्यन्तम् । तथा आग्नीध्रो मुसले-नोलूखलमुच्चैर्वादयति । अध्वर्युः 'अग्नीत् सवनीयान्निर्वप' इत्याह । स्तो-त्रसमाप्त्यनन्तरं आग्नीध्रः प्रातःसवनवदामिक्षावर्जं सवनीयान्निर्वपति । अध्वर्युः इडाजपं कृत्वा शस्त्रं प्रतिगीर्य प्राङेत्य माहेन्द्रं ग्रहमुद्यच्छते । चम-साध्वर्यवो नाराशंसान् । पूर्ववदाश्रावणाद्यं वषट्कारहोमान्तम् । अयं माहे-न्द्रग्रहप्रचारः ॥

४०६. **आग्नेयातिग्राह्यग्रहप्रचारः**—प्रतिप्रस्थाता आग्नेयमतिग्राह्य होष्य-न्नवेक्षते—'अग्ने तेजस्विन् तेजस्वी०मनुष्येषु कुरु' इति । जुहोति—'दीक्षायै च त्वा० ॥ तेजसे जुहोमि स्वाहा' इति । यजमानं वाचयति—'तेजोविदसि० तेजो हासीत्' इति । अयमाग्नेयातिग्राह्यग्रहप्रचारः ॥

४०७. **ऐन्द्रातिग्राह्यग्रहप्रचारः**—नेष्टा ऐन्द्रमादायावेक्षते—'इन्द्रोजस्वि० कुरु' इति । जुहोति—'ब्राह्मणश्च त्वा०स्वाहा' इति वाचयति—'ओजो विद०मोजो हासीत्' इति । अयमैन्द्रातिग्राह्यग्रहप्रचारः ॥

४०८. **सौर्यातिग्राह्यग्रहप्रचारः**—उन्नेता सौर्यमादायावेक्षते—'सूर्य भ्राज-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्वि०कुरु' इति। जुहोति—'वायोश्चत्वा०स्वाहा' इति । वाचयति—'सुवर्विदसि० सुवर्हासीत्' इति अयं सौर्यातिग्राह्यग्रहप्रचारः ॥

४०९. अध्वर्युः अनुवषट्कृते पुनर्माहेन्द्रं जुहोति। चमसाध्वर्यवश्चमसाननुप्रकम्पयन्ति । एतत् पात्रं नाराशंसा अतिग्राह्यश्चाऽन्वायन्ति ।

अतिग्राह्यभक्षणम्—अध्वर्युः होत्रे पात्रं प्रदाय तेन भक्षिते मन्त्रेणोक्तेन भक्षयति । होतृचमसं नराशंसपीतेन त्रयः । ब्रह्मादयो होतारमुपहूय नराशंसपीतेन स्वस्वचमसान् । यजमानो ऽध्वर्युमुपहूय आग्नेयं भक्षयति—'मयि मेधां मयि० स्तेजो दधातु' इति । तथैवैन्द्रम्—'मयि०सूर्यो भ्राजो०तु' इति। इदमतिग्राह्यभक्षणमुच्यते ॥

४१०. आत्मानमभिमृशते। चमसाप्यायनं न भवति । तान् प्रक्षाल्य स्रुचां पश्चात् मैत्रावरुणचमसप्रमुखान् सादयन्ति। अध्वर्युः—'प्रतिप्रस्थातरिमे चर्तु०यात्रेष्वपि सृज' इति वदति। प्रतिप्रस्थाता ऋतुपात्रे शुक्रपात्रमतिग्राह्याँश्च मार्जालीये प्रक्षाल्य स्वस्थाने सादयति । मैत्रावरुणचमसमित्यादि त्रय उक्थ्यपर्यायाः प्रातःसवनवत् । सर्वत्र ग्रहेषु सोमग्रहणे मन्त्रे 'इन्द्राय त्वा जुष्टं गृह्णामि' इति । सादनमन्त्रः—'एष ते योनिरिन्द्राय त्वा' इति। भक्षणमन्त्रे **इन्द्रेण पीतस्ये**ति। यजमानेन सह हविर्धानं गत्वा आधवनीयमुत्तानं कृत्वा तस्मिन् सर्वा वसतीवरीरेकधनाश्चावनीय मृष्ट्वा यथास्थानं न्युब्जति। सवनप्रायश्चित्ते **अग्नि र्मूर्धे**त्यस्य स्थाने **भुवो यज्ञस्य रजसश्च नेता** इत्यृचा होमः। प्रशास्तःप्रसुहीत्युक्ते यदुक्तं तत् पूर्ववत्। अयं माध्यन्दिनं सवनम् (संख्या ३७५) इत्यारभ्य एतदन्तं कर्म माध्यन्दिनं सवनमित्युच्यते ॥

अथ तृतीयसवनम्

४११. **तृतीयसवनारम्भकप्रैषः**—देवीर्द्वारावित्याद्युत्तरार्धेक्षणान्तं पूर्ववत्। अध्वर्युः प्राङायन्नाह—'अग्नीत् परिश्रपणमाहर, प्रतिप्रस्थातराशिरमानय, शृतातङ्यमादित्यग्रहाय दध्याहर, एहि यजमान' इति। अयं तृतीयसवनारम्भकप्रैषः ॥

४१२. **तृतीयसवनसम्बन्ध्यभिषवः**—यथासम्प्रैष ते कुर्वन्ति । यजमानेन सहविहर्धानं प्रविश्योपांशुपात्रस्थमंशुं माध्यन्दिनीय ऋजीषे प्रक्षिप्य होतृचमसे आधवनीयापो ऽवनीय चर्मणि निधाय **निग्राभ्यास्थे**त्यादिमन्त्रेण यजमानाय दत्वा **देवस्य त्वे**त्यादिमन्त्रेण कमपि ग्रावाणमादायाभिमन्त्र्य **श्वात्रेस्थे**त्यादि-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मन्त्रेण ऋजीषं होतृचमसीयाभिरुपसृज्य **यत्ते सोमेत्यादिमन्त्रेण** संप्रयुत्य, **धिषणे वीडू** इत्यादिमन्त्रेण चर्मान्तर्हिते फलके अभिमृश्य वृद्धीर्वाचयित्वा 'आहरोपसृज' इत्यादि । उपर्यर्धे होतृचमसे ऋजीषं परिप्लावयति । **प्राग्-पागित्यादिमन्त्रेण** । ऋजीषं चर्मणि निधायाध्वर्युरेव यावद् रसनिस्रावमभिषुणोति । 'आहरोपसृज' इत्यादि । एवं द्वितीयमेवं तृतीयम् । निग्राभवर्जं चतुर्थम् । राजानं हस्तेन निष्पीड्य सम्भरणीये सम्भृत्य पूर्ववदुन्नेत्रे प्रयच्छति । उन्नेता पूर्ववदवनयति । एष एकः पर्यायः । एवं द्वितीयमेवं तृतीयम् । पूर्ववदद्धोतृचमसे ऽवनीय **श्वात्रा** इत्यादि । ऋजीषं दशापवित्रेण परिवेष्ट्यान्तरेणेषे उन्नेत्रे प्रयच्छति उन्नेता तदाधवनीये विक्षाल्य प्रपीड्यान्तरेणेषे उपरि नीत्वा प्रातःसवनीय ऋजीषे निक्षिपति । अयं तृतीयसवनसम्बन्ध्यभिषवः ॥

४१३. **आदित्यग्रहे शृतातङ्कग्रहणम्**—अध्वर्युः परिश्रयणीयवासोभ्यां हविर्धानद्वारौ परिश्रित्यादित्यस्थाल्या औपशयपात्रे तस्याः सकाशात् तृतीयांशं गृह्णाति—'कदाचनस्त०पृच्यते । उप०स्यादित्येभ्य०मि' इति । बर्हिषी अन्तर्धाय शृतातङ्कमादयति—'कदाचन प्र०तं दिवि । इय०मि' इति । अपोद्धृत्य बर्हिषी आदित्यस्थाल्या अर्धं गृह्णाति—'यज्ञो देवानां०रासत । उप० मि' इति । इदमादित्यग्रहे शृतातङ्कग्रहणम् ॥

४१४. उपांशुसवनस्य स्थूलप्रदेशेन ग्रहमालोडयति—'विवस्व आदित्यै० श्रीणामि' इति । उपांशुसवनमुद्गृह्णाति । तस्य यदि शीघ्रं सोमबिन्दुः प्रस्कन्देद् वर्षुकः पर्जन्यः स्याद् यदि चिरं तर्ह्यवर्षुकः । ग्रहमनासादयन् उपांशुसवनं दशापवित्रेण परिवेष्ट्य यथा सोमस्योर्मिर्भवति तथा पात्रस्याधस्तात् द्विश्चतुर्वा सोमं पातयन्नुद्धन्ति—'आसमुद्रादान्तरिक्षा०तिम्' इति ।

आदित्यग्रहप्रचारप्रैषः—उपांशुसवनं दशापवित्रेण परिमृज्य प्रक्षिप्य द्वारौ विवृत्य बर्हिर्मुष्टिना ग्रहमपिधायोत्तिष्ठन्नाह—'आदित्येभ्यः प्रियेभ्यः प्रियधामभ्यः प्रियव्रतेभ्यो महस्वसरस्य पतिभ्य उरोरन्तरिक्षस्याध्यक्षेभ्योनुब्रू३हि' इति । अत्याक्रम्याश्राव्याऽऽह—'आदित्येभ्यः प्रे३ष्य' इति । वषट्कृते बर्हिर्मुष्टिमग्नौ प्रक्षिप्यादित्यं जुहोति । नान्वीक्षते । पर्यावृत्तस्य प्रतिप्रस्थाता पात्रमादत्ते । अयम् आदित्यग्रहप्रचारप्रैषः ॥

४१५. **आग्रयणे तृतीयसवनीयसोमग्रहणम्**—उपवेषनिरसनान्ते प्रतिहर्त्रा पूतभृति पवित्रे वितते उन्नेता आधवनीयात् द्वौ त्रीन्वोदञ्चनान् तस्मिन्नवनयति । अध्वर्युः आग्रयणस्थं सोमं पात्रान्तरे ऽवनीय तदादत्ते । प्रतिप्रस्थाता

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

सोपशयामापित्यस्थालीम् । उन्नेत्रा उदञ्चनादिचतुष्टयमुपर्यवनीय चतसृणां धाराणामधस्तादाग्रयणं प्रातःसवनवद् गृहीत्वा ऽभिहिङ्कृत्याधिवदनं कृत्वा परिमृज्य सादयति । इदमाग्रयणे तृतीयसवनीयसोमग्रहणम् ॥

४१६. पूतभृतो बिन्दाद् दशापवित्रमपनीय बर्हिषी अन्तर्धायाग्नीधा बिलोडितं संशेषमाशिरं पूतभृत्यवनयति—अन्वारब्धायां पत्न्यां प्रत्यृचं सवन्ति वा । ताश्चर्चः—'अस्मे देवासो वपुषे चिकित्सत' इत्यादयश्चतस्रः । ततो बर्हिषी अपोद्धृत्य परिप्लुपात्रं पूतभृति प्रास्य पूर्ववत् द्रप्सानुमन्त्रयते । तत आधवनीयाभिमर्शनादि उन्नेतृप्रैषान्तम् ।

तृतीयसवनीयहोमः—अध्वर्युर्बर्हिषी आदायोपनिःसृप्य प्रातःसवनवत् समन्वारब्धेष्वाहवनीये स्रुवाहुतिं जुहोति—'इदं तृतीयꣳस०नयन्तु स्वाहा' इति । अयं तृतीयसवनीयहोमः ॥

४१७. अध्वर्युर्माध्यन्दिनसवनवत् स्तोत्रमुपाकृत्य पवमानस्य नवम्यां प्रस्तुतायां वाचयति—'सधासि०पाय' इति । पञ्चहोतारं व्याख्याय समाप्ते साग्नि सम्प्रैषमाह—'आग्नीच्छालाकान् विहर०पशौ संवदस्व' इति । पूर्ववद्धविर्धानं प्रविश्य समस्तसोममुपतिष्ठते 'विष्णो त्वन्न' इत्यादिना । प्रातःसवनवच्छालाकान् विहृत्य धिष्ण्यव्याधारणं पृष्ठ्यास्तरणं च । अध्वर्युः अग्नीदुत्तर बर्हिरित्यादि अग्नीषोमीयवद् वक्षः परिहरणान्तम् ।

तृतीयसवनीयप्रचारः—आग्नीध्रः प्रातःसवनवदाग्निरहितान् सवनीयान् सादयति । अध्वर्युस्तैः प्रचरति । अयं तृतीयसवनीयप्रचारः ।

३१८. **तृतीयसवनीयहोतृचमसप्रचारः**—होतृसकाशे इडापात्रं निधाय प्राङ्नाह—'उन्नीमानेभ्यो०यध्वं तीव्राँ आशीवतः कुरुध्वमुन्नेतः०य' इति । चमसाध्वर्यवः पूर्ववच्चमसानुन्नीय तेषु किञ्चित् किञ्चिदाशिरमवनीयोत्तरवेद्यां सादयन्ति । अध्वर्युर्होतृचमसमादायाऽऽह—तृतीयस्य सवनस्यर्भुमतो विभुवतः प्रभुमतो वाजवतः सवितृवतो बृहस्पतिवतो विश्वदेव्यावतस्तीव्राँ आशीर्व इन्द्राय सोमा०ष्य' इति । वषट्कृते जुहोति—'श्येनाय पत्वने स्वाहा' इति । अनुवषट्कृते होमः—'तृप्यं०स्वाहा' इति । द्विः सर्वाश्चमसान् जुह्वति । अयं तृतीयसवनीयहोतृचमसप्रचारः ।

४१९. **तृतीयसवनीयप्रस्थितयाज्याप्रचारः**—अध्वर्युः सम्प्रैषमाह—'प्रेतु होतु० त्सकृदाशीर्वत्तो भ्युन्नीयोपावर्त्तध्वम्' इति । यन्ति होत्रादिचमसाः । चमसाध्वर्यवो होत्रकचमसान् सशेषान् पूतभृतोऽभ्युन्नीयोपावर्तन्ते ।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अध्वर्युर्मैत्रावरुणचमसादीन् क्रमेणाऽऽदाय पूर्ववत् प्रस्थितयाज्याभिर्यजति। प्रशास्त्रा वषट्कृते 'विष्टं०हा' इति जुहोति। अनुवषट्कृते 'तृप्यन्ताम्' इत्यादिमन्त्रेण षण्णामपि। ब्राह्मणाच्छंसिचमसे 'परिधये०हा' इति। पोतृचमसे 'ऊर्ज०हा' इति। नेष्टृचमसे 'पयसे०हा' इति। अच्छावाकचमसे 'प्रजा०हा' इति। आग्नीध्रचमसे 'ऋतमृ०हा' इति। अयं तृतीयसवनीयप्रस्थितयाज्याप्रचारः।

४२०. प्रदक्षिणमावृत्य होतुरग्रे उपवेशनादि इडोपहूतचमसभक्षान्तम्। भक्षमन्त्रे **आदित्यवद्गणस्ये**ति तृतीयस्य सवनस्य **जगतीछन्दस इन्द्रपीतस्ये**त्यूहः।

सौमिकपुरोडाशशकलदानम् नाराशंससादनान्तरं ब्रह्मादयः सर्वे प्राचीनावीतं कृत्वा स्वस्वचमससमीपे त्रींस्त्रीन् पुरोडाशशकलान् प्रक्षिपन्ति। अध्वर्युप्रतिप्रस्थातारौ होतृचमससमीपे। स्वस्थाने उपविश्यानुमन्त्रयते—'अत्र पितरो यथाभागं मन्दध्वम्' इति। अध्वर्युरत्रस्थ एव। इदं सौमिकपुरोडाशशकलदानम्।

४२१. यजमानो हविःशेषं पत्नी हविष्यं चाश्नाति।

वैश्वदेवग्रहप्रचारः—अध्वर्युर्हविर्धानात् प्राङायन्नाह—'देवाय सवित्रेऽनुब्रू३हि, प्रतिप्रस्थातरन्तर्यामपात्रेण सावित्रमाग्रयणाद् ग्रहं गृहीत्वोपास्व मासीषदः' इति। प्रतिप्रस्थाता तथा गृह्णाति—'वाम०स्याम। उप०सि देवाय त्वा सवित्रे' इति। हुत्वा सशेषे वैश्वदेवं पूतभृतः परिप्लुना गह्णाति—'सुश०मि' इति। सदो गत्वा होत्रा समीक्ष्य शस्त्रं प्रतिगृणाति। प्रतिप्रस्थाता होतुरेकया च दशभिश्चेति श्रुत्वा द्विदेवत्यपात्राणि मार्जालीये प्रक्षाल्य निदधाति। अध्वर्युः प्रद्यावा यज्ञैः' इत्यादियावदाहावं अवसाने 'ओथामो दैव' इति प्रणवे च 'मदामो दैव' इति। 'तद्राधो अद्य' इत्यादियावदाहावं अवसाने प्रणवे च 'मदामो दैव' इति। शस्त्रान्ते तृतीयसवने'उक्थं वाचीन्द्राय' इत्याह। शस्त्रप्रायश्चित्तान्ते वैश्वदेव अदायाह—'उक्थशा यज सोमस्य' इति। वषट्कृते च जुहोति। अयं वैश्वदेवग्रहप्रचारः।

४२२. चमसाननुप्रकम्पयन्ति। एतत् पात्रं नाराशंसा आ वायन्ति। पूर्ववत् भक्षः।

घृतया ज्यासम्पुटितसौम्यचरुयागः—स्रुचां परिचमससादनान्तरं प्रतिप्रस्थाता तूष्णीं समन्त्रकं वा शालामुखीये निरूप्य सौम्यं चरुं शृतमिदानीम-

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भिघार्योद्वास्य सादयति—'यन्मे अग्ने इत्यादिमन्त्रेण यजमानेनाभिमन्त्रिते ऽध्वर्युर्होतारं पृच्छति—'पर्यक्ष्यसि सोम्या३म् न पर्यक्ष्यसी३' इति। सन्नं सौम्यमागत्य ध्रुवाज्याच्चतुर्गृहीत्वा ऽऽश्राव्याऽऽह—'घृतस्य यज' इति। वषट्कृते जुहोति। पुनरुपस्तीय द्विश्चरोरवदायाभिघार्य न प्रत्यनक्ति। पूर्ववदाश्राव्याऽऽह—'सौम्यस्य यज' इति। वषट्कृते प्राचीनावीत्याग्नेय्यां जुहोति। अयं घृतयाज्यासम्पुटितसौम्यचरुयागः।

४२३. मेक्षणानुग्रहरणान्ते पुनश्चतुर्गृहीतं गृहीत्वा ऽऽह—'घृतस्य यज' इति। पूर्ववज्जुहोति। अपर्यग्निस्रुवा हुत्याभिर्जुहोति—'विष्णो त्वं न' इत्यृचा। ततश्चरुमध्ये गर्तं कृत्वा प्रभूतमाज्यं लौकिकमानीयोद्गातृव्यतिरिक्ताः स्वशरीरच्छायां तस्मिन्नवेक्षन्ते—'यन्मे सनः०मसि' इति।

पात्नीवतग्रहणम् - चरुमुद्गातृभ्यो दत्वा प्राङायन्नाह—प्रतिप्रस्थातरुपांशुप्रात्रेण पात्नीवतमाग्रयणाद् ग्रहं मही०पदः' इति। प्रतिप्रस्थाता तथा गृह्णाति—'उप०सि बृहस्पतिसुतस्यत इन्द्रो इन्द्रियावतः पत्नीवन्तं ग्रहं गृह्णाना३इ पत्नीवाः३' इति। बर्हिषी अन्तर्धाय घृतेन श्रीणाति—'अहं पुर०सनानाम्' इति। इदं पात्नीवतग्रहणम्।

४२४. बर्हिषी अपोदधृत्य परिमृज्यानासादितमेवादायाऽऽह—'अग्नोन्नेष्टरुपस्थमासीद,नेष्टः पत्नीमुदानय' उद्गात्रा सङ्ख्याप्यापि उपप्रव०मान' इति। पूर्वद्वारा हविर्धानं प्रपाद्य यजमानं ध्रुवमुपस्थापयति—'भूत०यासम्' इति। चमसाध्वर्यवः सर्वेण सोमेन होतृचमसादींश्चमसान् अभ्युन्नीय सादयन्ति। होतृचमसेऽल्पमुन्नयन्ति। अध्वर्युः स्तोत्रोपाकरणादि कृत्वा सप्तहोतारं व्याचष्टे। नेष्टा पत्नीमुद्गात्रा लक्षयित्वा वाचयति—'विश्वस्य ते० ईडिताः' इति।

पन्नेजनीजलस्रावणम्—यदोद्गाता संज्ञां करोति तदा पत्नी ईषद्वस्त्रमपसार्योरुमूलात् पन्नेजनीः स्रावयति। इदं पन्नेजनीजलस्रावणम्।

४२५. **तृतीयसवनस्यशिष्टं कर्म**—आपोहिष्ठीयशंसनान्तमास्ते। अध्वर्युः 'स्वादुष्किलायम्' इति चतस्र उभयतोमोदं प्रतिगृणाति। तदीयाहावे 'मोदानो दैवोंशोंसामोदैव' इति। प्रतिप्रस्थाता 'तन्तुं तन्वन्' इति श्रुत्वा ध्रुवं हस्ताभ्यां सुष्टु गृह्णाति—'द्यावा०मि' इति। स्थानाच्चालयति इति 'विश्वे० यन्तु' इति। आहरति—'दिवि०पार्थिवान्' इति। होतृचमसेऽवनयति—'ध्रुवं०रसन्' इति। अध्वर्युः पूर्ववद्धोतृचमसमादायाऽऽह—'उक्थ०सोमानां' इति पूर्ववज्जुहोति। चमसानपि पूर्ववच्चमसक्षणम। मन्त्रे **अग्निना**

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वैश्वानरेण मरुद्भिरित्यूहः । आहवनीयस्योत्तरतः पूर्ववच्चमससादनम् । आशिरोपवेषनिरसनान्ते अध्वर्युः जुहोति—'जनस्य गोपा०शुचिः स्वाहा' इति । 'यन्म आत्मन' इत्यादि समानम् । सर्वेषु चमसेषु त्रींस्त्रीन् पूर्वाग्रन्थी-नेकैकं दर्भपिञ्जूलं च 'प्रशास्तः प्रसुहि' इति प्रेष्य 'प्रसर्पत' इत्युक्ते सर्वे यथाप्रसृप्तं निःसर्पन्ति ।

अथ तृतीय सवनम् (पदार्थ संख्या ४११) इत्यारभ्यैतदन्तं कर्म तृतीय-सवनमुच्यते ।

४२६. **अग्निष्टोमसंज्ञा**—सङ्कल्पप्रभृति (पदार्थ संख्या ४) सर्व कर्म अग्निष्टोम इत्युच्यते ।

समाप्तोयङ् ग्रन्थः शुभम्भूयात्

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रामलाल कपूर ट्रस्ट द्वारा

प्रकाशित और प्रसारित ग्रन्थ

१. **ऋग्वेदादिभाष्यभूमिका**-सं०-यु०मी० १००.००

२. **भूमिकाभास्कर**-स्वा० विद्यानन्द सरस्वती- दो भागों में-
प्रथमभाग ३००.००, द्वितीयभाग २००.००

३. **ऋग्वेदानुक्रमणी**-वेङ्कटमाधवकृत- व्याख्याकार-
पं० विजयपाल जी विद्यावारिधि ५०.००

४. **कात्यायनीया ऋक्सर्वानुक्रणी**- षड्गुरुशिष्य विरचित संस्कृत
टीका सहित १५०.००

५. **ऋग्वेद की ऋक्संख्या**- युधिष्ठिर मीमांसक ५.००

६. **ऋग्वेदपरिचय**- पं० विश्वनाथ विद्यामार्त्तण्ड २५.००

७. **माध्यन्दिनपदपाठः** (यजुर्वेद-पदपाठ) २००.००

८. **तैत्तिरीयसंहिता** (मूल) मन्त्रसूचीसहित १२०.००

९. **तैत्तिरीय-संहिता-पदपाठः**— दाक्षिणात्य पाठानुसारी ३००.००

१०. **अथर्ववेदीय-दन्त्योष्ठ्यविधि** अर्थात् अथर्ववेद का चतुर्थ लक्षण ग्रन्थ-
पं० रामगोपाल शास्त्री ५.००

११. **अथर्ववेदीया बृहत्सर्वानुक्रमणिका**- भूमिका तथा
सूचियों सहित-पं० रामगोपाल शास्त्री ६०.००

१२. **गोपथब्राह्मण** (मूल) ८०.००

१३. **वैदिक-निघण्टु-संग्रह**- डॉ० धर्मवीर १००.००

१४. **वैदिक-सिद्धान्त-मीमांसा**- युधिष्ठिर मीमांसक- वेदविषयक सत्रह
निबन्धों का संग्रह- प्रथमभाग ७५.०० द्वितीयभाग १००.००

१५. **वैदिक-साहित्य-सौदामिनी**- ७०.००

१६. **वेद-श्रुति-आम्नाय-संज्ञामीमांसा**- युधिष्ठिर मीमांसक ५.००

१७. **वैदिकछन्दोमीमांसा**- युधिष्ठिर मीमांसक यन्त्रस्थ

१८. **वैदिकस्वरमीमांसा**- युधिष्ठिर मीमांसक ६०.००

पुस्तक-प्राप्ति-स्थान-

रामलाल कपूर ट्रस्ट, ग्राम रेवली, पो० ई० सी० मुरथल,
जि० सोनीपत- १३१०३९ (हरियाणा) ०१३०—३२९०२७६,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



श्रौतपदार्थ-निर्वचनम्

रामलाल कपूर ट्रस्ट

आवरण : श्रीमहालक्ष्मी; ०११-६५८४५५९९, ९३९३७८४२७२

Digitized by Arya Samaj Foundation Chennai and eGangotri
CC-0. Vipin Kumar Col. Deobandi. In Public Domain.